हरिभक्ति सुधाकर:

Haribhaktisudhākaraḥ

A critical study & Editing

By:
Dr. Sunanda Tripathy

HARIBHAKTI SUDHĀKARAḤ

of

Dīnabandhu Miśra

Critical Study and Editing

By :

Dr. Sunanda Tripathy (M.A. Ph. D)

HARIBHAKTI SUDHĀKARAḤ of Dīnabandhu Miśra
Critical Study and Editing

Published with the financial assistance
from the Rashtriya Sanskrit Sansthan, New Delhi
(Deemed University)

Edited by :
Dr. Sunanda Tripathy (M.A. Ph. D)
W/o- Braja Sankar Mishra.
At/P.O. : Sriramchandrapur
Via - Sakhigopal, Dist - Puri, Orissa
Mobile : 9337706488

First Edition : 2006
Copies : 500

For Copies Contact
Above address or
Sambidi Prakashan Mahodadhi Market
Mochi Sahi Square, Puri-1, Orissa

Composed by
Sambidi Prakashan
Mochi Sahi Square, Puri, Orissa

Printed at :
Mahavir (Offset) Press
Marchikot Square, Puri, Orissa
Ph. : (06752) 226710

Price : Rs.190/- (One Hundred Ninty Only)

Published by :
Dr Sunanda Tripathy

ॐ

मंगलाचरणम्

सृष्ट्वाखिलं जगदिदं सदसत्स्वरूपम्
सक्त्या स्वयां त्रिगुणया परिणामविश्वम् ।
संहृत्य कल्पसमये रमतेऽद्वितीयं
तं सर्वसंश्रयममुं मनसा स्मरामि ।।१।।

गोपालकृष्ण विहितार्थ सुसङ्गमत्या ।
नित्यं सुदर्शनधरांश्च नृसिंहनाथान् ।
नौमीड्यरूपवपुषो गुरुरूपशेषान्
विद्याप्रदापक सरोवर राजहंसान् ।।२।।

यत्नेन यात्र महता रचित: प्रबन्धो
ऽबन्धो वृथा जगति वेति न चिन्तयामि ।
स्वान्त: सुखाय विषयाय सतां हिताय
काले कदापि भवितेति विचारयामि ।।३।।

गोविन्द हे ! नीलकलेवर त्वं
कृपाकटाक्षाहतभक्तचित्त ।
निवेदितं ते निलये प्रबन्धं
सुनन्दया ऽऽनन्दधिया गृहाणा ।।४।।

आमुखम्

भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा । भारतवर्षस्य अन्तर्निहितसंस्कृतिधारायाः प्रवाहः संस्कृते एव विलोक्यते । वैदिककालादारभ्य साम्प्रतिककालं यावत् लोकशास्त्रकाव्य-व्यवहारस्य स प्रवाहो निरवच्छिन्न एव । मुकुटायमानात् काश्मीरात् चरणायमानां कन्याकुमारीं यावत् सांस्कृतिकधारा समरस एव । भारतपङ्कजस्य दलस्वरूपस्य उत्कलस्य अनुपमायां समरसतायां कथं वा व्यतिक्रमो विलोक्यते । सकलदर्शनप्रस्थानसमन्वयविन्दु-रूपेण उत्कलस्य भूमिका अविसंवादिता । काव्य-व्याकरण-दर्शन-आयुर्वेद-तन्त्र-पुराण-ज्योतिषादिनैकेषु विषयेषु उत्कलस्य महिमा गीयतेतराम् । नीलाद्रिकन्दरानन्दिनः श्रीपुरुषोत्तमस्य करुणया अत्र भक्तिधारायाः पावनः प्रवाहो बहून् महापुरुषान् भक्तान् च अकुण्ठं पावयति । भक्तिमाहात्म्यप्लावनाय कलौ श्रीमद्भागवतमेव अद्वितीयं शास्त्रम् । भगवतः श्रीकृष्णस्य महिमानं गायं गायं श्रीभागवतमपि देवत्वमाप तद्भक्तिमूलकं दिव्यं शास्त्रं साक्षाद् ज्ञानप्रदीपस्याऽवतारो भवति । तच्छास्त्रप्रतिपादितस्य भक्तितत्त्वस्य प्रचाराय प्रसिद्धाः टीका रचिता उपादेयाः ग्रन्थाः अपि लिखिताः ।

खीष्टीयसप्तदशाष्टदशशताब्दीमध्यभागे उत्कलराज्यस्य खण्डपत्तनदुर्गे (खण्डपडा इति) कविवरो दीनबन्धुमिश्रो भागवतभावितात्मा आविर्भूतः । राजप्रदत्तेन खड्गरायोपाधिना स विभूषितः । स लोकेषु दीनबन्धु खाडङ्गा इति नाम्ना परिचितः । तत्कृतं खाडङ्गाभागवतं वैष्णवेषु समाद्रियते । श्रीभद्भागवतमाश्रित्य उत्कलीयविरचितः कोऽपि एतादृशो मान्यो ग्रन्थो नावलोकितः । तत्प्रणीतः 'हरिभक्तिसुधाकरः' लोकलोचनं नागत इति विडम्बना-विषयः । अपूर्वस्य तद्ग्रन्थस्य सम्पादनं विधाय लोकार्पणं क्रियते इति मम आनन्दप्रवाहस्य इयत्ता वर्णयितुं न शक्यते ।

हरिभक्तिसुधाकरः सार्थकनामा ग्रन्थः । षोडशकलोऽयं

ग्रन्थः । विष्णुपुरीरचितां भक्तिरत्नावलीं विलोक्य तदपेक्षया स्ववैशिष्ट्यं दर्शयितुं ग्रन्थकारः प्रयतते । नवधाभक्तेः प्रकर्षं भागवतदर्शनस्य वैशिष्ट्यं सत्सङ्गस्य महिमानं च स दर्शयति। तद्‌ग्रन्थस्यायमेव विशेषो यद् भक्तिरत्नावल्या एकामप्युद्धृतिं विना तत्प्रतिपादितस्य तत्त्वस्य प्रमाणरूपेण भागवतस्य तदितरोदाहरणश्लोकं दृष्टान्तरूपेण उपस्थापयति ।

एतादृशस्य वैशिष्ट्यसमस्य ग्रन्थस्य शोधकाले म यानदुर्घटनाजनितः प्रत्यवायोऽपि जातः । श्रीभगवतः कृपया पुनर्जन्मलाभं कृत्वा महता श्रमेण ग्रन्थसम्पादनेन सह तत्समीक्षणं कृत्वा शोधं सम्पाद्य अद्य तस्य प्रकाशनं वीक्ष्य प्रसीदामितमाम् । करुणावरुणालयस्य भक्तभक्तिप्रियस्य श्रीजगन्नाथस्य कृपाकटाक्षेण श्रीभगवद्भक्तिवैभवमूलस्यास्य ग्रन्थस्य एवंविधप्रकाशनेन किमधिकं तदीयपदकञ्जे भक्तिकुसुमाञ्जलिं समर्पयामि ।

अस्मिन् शोधकार्ये अकुण्ठप्रेरणया उत्साहप्रदानेन च प्रदिपदं यथार्थसंशोधनमार्गदर्शनपुरःसरं निदर्शनं कृतवताम् उत्कलविश्व-विद्यालयस्नातकोत्तरसंस्कृतविभागस्याध्यक्षचरणां प्राचार्याणां बहुशास्त्रनिष्णातानां प्रोफेसर् डॉ. गोपालकृष्णदाशमहोदयानां चरणकमलेषु प्रणामाञ्जलिनिवेदनार्थं मदीया भाषा असमर्थास्ति । 'क्लेशफलेन हि पुनर्नवतां विधत्ते' इत्यनुभवेन सह प्राञ्जलिः कृतज्ञतां निवेदयामि । भुवनेश्वरस्थ-रमादेवी स्वयंशासितमहिलामहाविद्यालयस्य संस्कृतविभागस्य प्रवाचिकायाः मदीया गुरुपत्न्याः डॉ. श्रीमत्याः कादम्बिनी दाश महोदयायाः सस्नेहपूर्वकं प्रोत्साहनं स्मरन्ती कृतज्ञतां व्याहरामि । ओडिशाराज्यसंग्रहालये पाण्डुलिपिविभागे कार्यरतायाः सम्प्रति चेन्नपुरनगरे विवरणात्मकग्रन्थपञ्जिकानिर्माणे (एन्.सि.सि.) रतायाः डॉ. श्रीमत्याः ममतामिश्रमहोदयायाः, मम सहपाठिनः मानितविश्वविद्यालयस्य राष्ट्रियसंस्कृतसंस्थानस्य श्रीसदाशिवपरिसरस्य साहित्यविभागस्याध्यापकस्य डॉ. सत्यनारायण-आचार्यस्य च उपकारं नैव विस्मरामि । तयोः सविधे कृतज्ञतां निवेदयामि ।

अन्ये ये नित्यं क्लेशसहनपूर्वकं मम शोधकार्यं सर्वथा उत्साहम् अवर्धयन्, ते भवन्ति मम पितरौ, भ्रातरौ भगिन्यौ च, तेषां सविधे कृतज्ञतां स्नेहं स विहाय किं वा समर्पयामि । ग्रन्थप्रकाशनार्थं ये प्रतिपदं श्रमस्वीकृत्य प्रोत्साहनं सहयोगं च प्रददति, ते भवन्ति मम पतयः (Advocate) अधिवक्तारः श्रीयुक्तः विरजाशङ्करमिश्रमहोदयाः । तेषां कृते प्रणमाञ्जलिं समर्पयामि। अन्ते अस्य ग्रन्थस्य (डि.टि.पि.)टङ्कणकार्ये बहुश्रमं कृत्वा सहयोगं कुर्वन्ति, ते श्रीयुक्तः देवव्रतरथमहोदयाः । तेषां सविधे कृतज्ञतां विनिवेदयामि ।

सम्प्रति मानितविश्वविद्यालयस्य नवदेहलीस्थितस्य राष्ट्रियसंस्कृतसंस्थानस्य आर्थिकसहायतां विना एतादृशस्य भक्तितत्त्वप्रतिपादकस्य ग्रन्थस्य प्रकाशनं सर्वथा दुष्करम् । अत एव उक्तसंस्थानस्य कुलपतिमहोदयेभ्यः प्रकाशनविभागस्य कर्त्तृपक्षेभ्यः च कृतज्ञतां निवेदयामि ।

अघटनपटीयसी जगन्नाटकसूत्रधारस्य श्रीजगन्नाथस्य अपारकरुणया ग्रन्थस्यास्य प्रकाशनं भवतीति हेतोः तदीयं वस्तु तस्मै समर्प्य तदीयचरणकमलध्यानैकपरायणा भक्तिकुसुमाञ्जलिं समर्पयामि । भक्तः विदग्धाः सज्जनाः पाठकाः च मम भावं ग्रहीष्यन्ति इति सप्रश्रयं निवेदयामि ।

अक्षयतृतीया-३००४०६ विनीतः

पुरी **डॉ. श्रीमती सुनन्दा त्रिपाठी**

FOREWORD

सत्यं परं धीमहि

The Bhāgavata is a sacred book of the Vaiṣṇavas. The popularity is known by the large followers, commentaries and translations. It's impact cannot be ignored. It is worshipped as God. In the religion and philosophy it occupies a unique place for integrating different Vaiṣṇava sects to one fold. It has propagated a new concept which can be termed as Bhāgavatism.

Bhāgavatism is the developed theory of Vaiṣṇavism. Mārtaṇḍa, the Vedic sun, the eighth son of Aditi is cast off by his mother as Devakī casts off Kṛṣṇa, the eighth son. Kṛṣṇa is the synthesis of Devakī-putra *(Chāndogya Upaniṣad)*, Vāsudeva Kṛṣṇa of Sātvata Vṛṣṇi clan and Gopāla Kṛṣṇa of the Ābhīras. According to R.G. Bhaṇḍarkar Vāsudeva preached a monotheistic religion and was himself apotheosised by his kinsmen, the Sātvatas and how the three streams of religous thought, one flowing from the Vedic Viṣṇu, another from cosmic and philosophic God Nārāyaṇa and the third from the historical God Vāsudeva mingled together and formed what we call Vaiṣṇavism (Ajay Mitra Shastri, "Vaiṣṇavism", *Review of Indological Research in last 75 years*, Edited P.J. Chinmulgund, Bharatiya Charitra Kosa, Poona, 1967, p- 604).

Bhāgavatism is the natural reaction from the sacrifice-ridden religion. It propounded a new doctrine which laid emphasis on *ahiṃsā*. A great federation of religions is known as Vaiṣṇavism. The points of union are quite significant. (1) The *vyūha*-doctrine in virtue of which Vāsudevism united with Saṅkarṣaṇa worship forms Bhāgavatism. (2) The doctrine of *Avatāras* which effected a synthesis between

Bhāgavatism and the worship of Viṣṇu- Nārāyaṇa gave birth to Vaiṣṇavism. (3) The *Puruṣa-prakṛti* theory is virtue of which the cult of Śrī was engrafted on Vaiṣṇavism (H.C. Raychoudhuri quoted in Ajay Mitra Shastri p. 606)

The attribution of the pastoral character of Vāsudeva Kṛṣṇa is due to his identification with Viṣṇu who is called Gopa (cowherd or protector of cows) in *Ṛgveda.* The legend of Viṣṇu-Gopa is connected with Kṛṣṇs-Gopa and many charming stories developed to justify his amours with Rādhā and the Gopīs mainly due to his identification with local deities of the Ābhīras and other allied Gods. (D.C. Circar. *The History and Culture of Indian People.* Vol-II. quoted in Ajay Mitra Shastri, p.608).

Kṛṣṇa the supreme deity according to the *Bhāgavata (kṛṣṇastu bhagavān svayaṃ)* has been the center of Vaiṣṇavism in the religio-philosophical tradition of the country. Vaiṣṇavas, have deified the *Bhāgavata.* the book and the god as well. With the background of Vaiṣṇavism spread over India. Orissa could not isolate herself from the main stream of Vaiṣṇavism. The Gauḍiyas have their literature and philosophical scriptures. Ācāryas and Gosvāmīns have written commentaries on the *Bhāgavata. Aḷaṃkāra texts* and different *sandarbhas* popularise the gauḍiya philosophy. It is a point to be noted that the contribution of Orissa in the Vaiṣṇavite philosophy and literature has not been highlighted as they have been ignored for lack of proper reviews and critical estimations.

Some significant contributions of Orissa are presented for the information of general readers and scholars. The *Gītagovinda* of Jayadeva. (12th C.A.D.), *Śarvāṅga Sundarī* commentary of Nārāyaṇadāsa on the *Gītagovinda* (last quarter of the 13th C.A.D.). Śrīdhara Svāmī (14th C.A.D.)

and his *Bhāvārthadīpikā* commentary on the *Bhāgavata*, *Ātmaprakāśa* commentary on the *Viṣṇu Purāṇa*, *Subodhinī* commentary on the *Gītā*, *Paraśurāma Vijaya Vyāyoga* of Gajapati Kapiḷendra Deva (1435-1466), *Kautuka cintāmaṇi* of Gajapati Pratāparudra Deva (1497-1535), *Bhakti Bhāgavata Mahākāvya*, *Bhaktivaibhava Nāṭaka* of Kavi Ḍiṇḍima Jīvadevācārya (last quarter of 15th C.A.D.) *Abhinava Gītagovindaṃ*, *Bhāratāmṛtaṃ* and *Dhruvacaritaṃ* of Rāya Divākara Miśra (1450-1520), Daśagrivavadha *Mahākāvya* of Kavīndra Mārkaṇḍeya Miśra (last quarter of 15th and 2nd quarter of 16th C.A.D.), *Jagannātha Vallabha Nāṭaka* of Rāya Rāmānanda Paṭṭanāyaka (first quarter of 16th C.A.D.), *Pīyūṣa Laharī* of Śrī Jayadeva Ācārya (1525-1535), *Gītaprakāśa* of Kṛṣṇacandra Baḍajenā Mahāpātra (1550-1570), *Mukunda Viḷāsa Mahākāvya* and *Śrīkṛṣṇa Viḷāsa Mahākāvya* of Yatīndra Raghūttama Tīrtha, *Khāḍaṅgā Bhāgavata* (Oriya) and *Haribhakti Sudhākara* of Dīnabandhu Miśra (1670-1735), *Śrī Govinda Bhāṣya* on *Brahmasūtra* and *Prameya Ratnāvaḷī* of Baladeva Vidyā Bhūṣaṇa (1680-1770) are remarkable contributions.

Haribhakti Sudhākara of Dīnabandhu Miśra is different and peculiar. It is neither a *Kāvya* nor *Nāṭaka* nor a commentary. It is unique in the sense that it is the first of its type in Orissa to prove the authority of the *Bhāgavata* with appropriate citations.

Dīnabandhu Miśra Khaḍgarāya or popularly known as Dīnabandhu Khāḍaṅgā was the royal preceptor of Nārayaṇa Maṅgarāja (1673-1707) of Khaṇḍapaḍā princely state of Orissa. Baluṅkeśvara Maṅgarāja, son of Nārāyaṇa ascended the throne in 1707 A.D. and on his request Dīnabandhu composed *Bhāgavata* in Oriya in Navākṣarī-metre on the basis of the commentary of Śrīdhara Svāmī. It has been recently published by Vidyāpuri, Cuttack. It is

popularly known as *Khāḍaṅgā Bhāgavata.* Dīnabandhu belongs to *Kautsa gotra.* (*Haribhakti Sudhākara,* HBS. 16.24). He has completed HBS in 1688.

महानदी दक्षिणभूप्रदेशे देशे तदीये वसता शकाब्दे ।

गते नभश्चन्द्ररसेन्दुसंख्ये विनिर्मितो भक्तिसुधाकरोऽयम् ।।

(ह.भ.सु. १६/२२)

(नभस्.-0, चन्द्र.- 1, रस-6, इन्दु-1, 1610)

(*Śakābda* corresponding to 1688 A.D.)

GENEALOGY

Vāmadeva Vājapeyin

↓

Sarveśvara Vājapeyin

↓

Durgādāsa Vājapeyin

↓

Bālunki Dīkṣita

↓

Jīvadāsa Miśra

↓

Madhusūdana Miśra

↓

Dīnabandhu Miśra

(K.N. Mahāpātra, *Khurudhā Itihāsa*, p- 238, Śrī Śāradā Press)

In the *Haribhaktai Sudhākara* the author has taken the *Bhāgavata* as the main source of Vaiṣṇavita theory of *Bhakti* and it has been adorned by his own commentary appropriately called *Satkaumudī. Bṛhannāradīyapurāṇa. Kṛṣṇkarṇāmṛta* and *Bhaktiratnāvaḷī* have been taken as model ones. The author has accepted a challenging task to compete with *Bhaktiratnāvaḷī* of Viṣṇupurī. The citations of the Bhāgavata taken in the *Bhaktiratnāvaḷī* have not been

repeated in HBS. It has been divided into sixteen sections. Each section is known as *Kalā.* The Bhagavān has been regarded as complete with sixteen *Kalās.* The book tries to glorify and justify the *Pūrṇa Bhāgavata Svarūpa* of Kṛṣṇa (Absolute and Complete form of the *Bhāgavata*).

In the first Kaḷā the glory of Bhārata, Purāṇas, human birth and sacred places has been described. In the second Kaḷā *Vairāgya* has been justified, in the third *Kaḷā* Bhakti plays major role in the greatness of company of great souls *(Satsaṅgamahimā).* In the subsequent Kalās the following points have been glorified, such as, greatness of Kṛṣṇa among the incarnations, glory of Kṛṣṇa Bhakti in general, *Bhaktiyoga, Śravaṇa, Kīrtana, Smaraṇa, Pādasevana, Arcana, Vandana, Dāsya, Sakhya, Ātma-nivedana, Sādhana-Bhāva-Prema* and *Śaraṇa.*

Bhakti is self- consciousness in totality. It is extension of individual self and it is a means and end for the accomplishment of individual self. It is a process of accomplishment 'पूर्णात् पूर्णतरा कृतिः' (महोपनिषद्, १/६७). Strong belief in a more powerful existence brings about relief and hope of shelter. Śāstra is inferior to Bhakti. मद्भक्तिविमुखोऽपि शास्त्रगर्भेषु मुह्यते । Śāstras do not clarify the doubts rather create confusion. The question is that search of self within self advocated by Śaṅkara (स्वस्वरूपानुसन्धान) is not relished by the Vaiṣṇavas. They advocate in favour of different existence of the absolute and justify to do everything for him and enjoy the life through *Bhakti,* by discharging service at different levels. Exposition of the *Haribhakti Sudhākara* will help the students, scholars and devotees of Bhakti literature to comprehend the scope of Bhakti concisely and realise the significance of the look.

Dr. Sunada Tripathy faced a fatal accident in the middle of the research work and her firm devotion could save

her life and she could complete the research by the grace of Śrī Jagannātha. Her endeavour becomes fruitful by the publication of the present book. Wider circulation of the book will acquaint the world with a rare contribution of Orissa in the field of Bhakti literature. I wish that she should keep up research and bring forth new finding through her continous insightful love for knowledge blended with Bhakti.

कस्मै येन विभाषितोऽयमतुलो ज्ञानप्रदीपः पुरा
तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ।
योगीन्द्राय तदात्मना च भगवद्राताय कारुण्यतः
तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥

(*Haribhakti Sudhākara,* I.-11, *Bhāgavata* 12.13.19)

The Bhāgavata is the matchless lamp of knowledge. It was imparted to different autorities by the majestic absolute. It was manifested and handed over to Brahmā, Nārada, Vyāsa, Śuka and Parīkṣit. Except Parīkṣit others were identified with that absolute. Out of compassion it was imparted to Parīkṣit who was blessed by the Bhāgavata himself. May that incessant flow of compasion bring light to those who are in utter darkness.

॥ कृष्णं वन्दे जगद्गुरुम् ॥

Seeking Shelter Under the Lotus feet of Śrīkṛṣṇa.

अक्षयतृतीया-३०।०४।०६
पुरी

Dr. Gopal Krishna Dash
Professor, P.G. Dept. of Sanskrit
Utkal University, Vanivihar
Bhubaneswar-751004, ORISSA

विषय-सूची

पृष्ठाङ्कः

प्रथमो भागः

द्वितीयो भागः

समीक्षात्मकमध्ययनम्

प्रथमो भागः

उपक्रमः (Introduction)

ग्रन्थसम्पादनप्रविधिः

(क) मातृकाणां सङ्कलनम् (Collation of Manuscripts)

उत्कलवास्तव्यो भागवतसम्प्रदायानुयायी भक्तचूडामणि-र्दीनबन्धुमिश्रः । तत्कृतः हरिभक्तिसुधाकरः भक्तिसाहित्ये उपादेयो ग्रन्थः । ग्रन्थानुशीलनाज्ज्ञायते यत् श्रीमद्भागवतं तथा विष्णुपुरी-प्रणीतां भक्तिरत्नाबलीं चोपजीव्य कविवरमिश्रपादेन ग्रन्थोऽयं प्रणीतः। हरिभक्तिसुधाकरस्य चत्वारः पाण्डुलिपिग्रन्था उपलब्धाः। तेषु द्वे तालपत्रमातृके भुवनेश्वरस्य राज्य-संग्रहालयस्य पाण्डुग्रन्थ-विभागे वर्त्तेते । अन्या एका च कर्गजनिर्मिता पाण्डुलिपिः राज्यसंग्रहालयस्य संस्कृतिव्यापार-निर्देशालयतः प्राप्ता । अन्या च एका उट्टङ्किता पाण्डुलिपिः (Government Oriental Manuscript Library) मद्रासे विद्यते । पुनः अपि वनमालिरथस्य ग्रन्थे[1] सूचनानुसारं पुरीस्थश्रीरघुनन्दनग्रन्थागारे एका मातृकाऽस्तीति विज्ञाय तत्र सम्पादयित्री स्वयं गत्वा जिज्ञासितवती, परन्तु दौर्भाग्यात् तस्या दौर्लभ्यात् सा मातृका नात्र शोधकार्ये सन्निवेशिता । एतासां चतसृणां मातृकाणामाधारेण शुद्धसम्पादनाय प्रयासो विहितः । ग्रन्थस्य समीक्षात्मकसम्पादनावसरे पाण्डुलिपीनां क्रामिकसंख्या निम्नक्रमेण प्रदीयते ।

(१) मातृकाणां साधारणसारणी (General accounts of MSS)

ग्रन्थागारे प्रदत्ता क्रमिकसंख्या (Catalogue numbers)-

संग्रहालयसंख्या	संपादिकाप्रदत्ता क्रमाङ्कः	लिपिः
Dh 1037	'ओ-1'	उत्कललिपिः
Dh 1086	'ओ-2'	उत्कललिपिः
Paper copy	'ओ-3'	उत्कललिपिः
R 3263 (Paper copy)	'ना'	नागरीलिपिः

(२) मातृकाणां वर्गीकरणम् (Grouping of MSS)

हरिभक्तिसुधाकरस्य मातृकाश्चतस्रः, विषयवस्तु एकं भवति। तासु तिस्रो मातृका उत्कललिप्या संस्कृतभाषया च लिखिताः । अन्या चैका कर्गजनिर्मिता पाण्डुलिपिः संस्कृतत्वेन नागरीलिप्या लिखिता । एतासां वर्गीकरणं भागद्वयेन विभज्यते ।

मातृका

सम्पूर्णा — ओ-1, ओ-3, 'ना'

असम्पूर्णा — ओ-2

ओ-1, ओ-2, 'ना' इति तिसृणां दशा अक्षता । ओ-2 इत्ययं ग्रन्थः अंशतो नष्टो वर्त्तते ।

'हरिभक्तिसुधाकर'नामकस्य ग्रन्थस्य समीक्षात्मकसम्पादनाऽवसरे चत्वारः पाण्डुग्रन्था लब्धाः । तेषु द्वौ पाण्डुग्रन्थौ भुवनेश्वरस्य राज्यसंग्रहालयतः लब्धौ । तत्रत्या क्रामिकसंख्या Dh 1037, Dh 1086 च भवति । संस्कृतभाषया उत्कलाक्षरैश्च लिखितौ । R.3263 क्रमसंख्याङ्किता पाण्डुलिपिः (Government Oriental Manuscript Library) सर्वकारीय प्राच्यपाण्डुग्रन्थसंग्रहालयतः मद्रासतो लब्धा । सा संस्कृते देवनागरीलिप्या च लिखितास्ति । अन्या एका कर्गजनिर्मिता प्रतिलिपिः भुवनेश्वरस्य संस्कृतिव्यापारनिर्देशालयपक्षतः लब्धा । संस्कृतभाषया उत्कल-लिप्या लिपिबद्धाऽस्ति ।

(३) मातृकाणां सम्पूर्णविवरणम् (Detailed account of MSS)

भुवनेश्वरे राज्यसंग्रहालयात् लब्धा Dh 1037 इति संख्यां वहन्ती मातृका उत्कललिप्या कृता । अत एव ओ-1 इत्याख्यया सा सङ्केतिता । मातृकेयं सम्पूर्णा सती विराजते । स्पष्टान्यक्षराणि सुखपाठानि च भवन्ति । अपि च पत्राणि स्पष्टानि दृश्यन्ते । ग्रन्थेऽस्मिन् शुद्धपाठः स्पष्टाक्षराणि च सन्ति। ग्रन्थस्य सम्पूर्णताहेतोः इयं मुख्यमातृकारूपेण स्वीकृता । भुवनेश्वरस्थ राज्यसंग्रहालये संरक्षिता Dh 1037 इति संख्यां वहन्ती मातृका

गञ्जाममण्डलस्थपारलाखेमुण्डितः श्रीमती पी.मिश्र समीपात् लब्धा तत्रस्था क्रामिकसंख्या 2/137 भवति ।

(a) क्रामिकसंख्या 'ओ-1'

ओ-1 इति सङ्केतिता मातृका भुवनेश्वरस्थ राज्यसंग्रहालयस्य मातृकाविभागे संरक्षिताऽस्ति । तत्र ग्रन्थागारस्य प्रदत्ता क्रमिकसंख्या Dh 1037 भवति । अस्य दैर्घ्यं ३६ सेमि परिमितं, प्रस्थः ४.५ सेमि परिमितश्च । अत्र १०६ संख्यकानि पत्राणि सन्ति। प्रतिपत्रं सप्त पंक्तयः सन्ति। प्रतिपंक्ति द्वानवति (९२) पर्यन्तानि अक्षराणि सन्ति। तालपत्रे इयं लिखिता । अस्यां मातृकायां संस्कृतभाषया उत्कललिप्या च एकजन-हस्त-लिखितानि अक्षराणि परिलक्ष्यन्ते ।

'हरिभक्तिसुधाकरः' सत्कौमुदीनाम्ना टीकाग्रन्थेन सह सम्पूर्णा सती शोभते। अस्यावस्था सुष्ठु भवति । शुद्धवर्णविन्यासः पाठश्च दृश्यते । कुत्रचित् पंक्तिद्वयस्य मध्ये पार्श्वे वा पंक्त्यन्तरस्य लेखनं न विद्यते। कीटदष्टत्वात् कुत्रापि विभागसंख्या त्रुटयः परिलक्ष्यन्ते । शून्यस्थानानि न सन्ति । लिपिकरस्य स्थानम् अथवा नाम न दृश्यते । 'हरिभक्तिसुधाकरः' सत्कौमुदीटीकाग्रन्थ-समेतश्च दृश्यते । टीकापुष्पिकातो ज्ञायते यदस्याः टीकायाः रचयिता श्रीमान् दीनबन्धुमिश्रः इति प्रथमकलायां तथा अन्तिमषोडशकलायाः पुष्पिकायामेव उल्लेखो वर्त्तते । यथा[2]—

श्रीमद्भागवताम्भोधेर्हरिभक्तिसुधाकरः ।
प्रकाश्यते दीनबन्धुमिश्रेण प्रीतये सताम् ॥

न केवलं ग्रन्थकारस्य नामोल्लेखो वर्त्तते । अपि तु ग्रन्थकारस्य पृष्ठपोषकः ग्रन्थरचनायाः कालः तथा प्रयोजनमपि निर्धारितम् । यथा[3]-

इह क्षितौ सर्वगुणैरुपेतः सङ्गीतविद्भूरियशाः सुशान्तः ।
घोरासिविद्यार्णवकर्णधारो विभाति नारायणमङ्गराजः ॥

यथा[4]- महानदी दक्षिणभूप्रदेशदेशे तदीये वसता शकाब्दे ।
गते नभश्चन्द्ररसेन्दुसंख्ये विनिर्मितो भक्तिसुधाकरोऽयम् ॥
प्रकाशयन् विष्णुपदं तमस्तोमं च नाशयन् ।
एष साधु चकोराणामानन्दं जनयिष्यति ॥[5]

बहुप्रयत्नेन विरचितस्य ग्रन्थस्य सुष्ठु समाप्तिकामः ग्रन्थकर्त्ता स्वस्य ग्रन्थं भगवते समर्पयति । यथा- श्रीराधाकृष्णाभ्यां नमः । तदनन्तरं चायं श्लोको दृश्यते । यथा[6]-

कस्मै येन विभाषितोऽयमतुलज्ञानप्रदीपः पुरा ।
तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ॥
योगीन्द्राय तदात्मना च भगवद्राताय कारुण्यतः ।
तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥

(b) क्रामिकसंख्या 'ओ-2'

भुवनेश्वरस्थ राज्यसंग्रहालये संरक्षिता Dh 1086 इति संख्याचिह्निता पाण्डुलिपिः प्राचीनतरा इति ज्ञायते । प्राचीनत्वात् कीटदष्टत्वादत्र तालपत्राणि जीर्णानि सन्ति । बहूनि अक्षराणि कीटदष्टत्वात् पठनयोग्यानि न सन्ति । मातृकेयमसम्पूर्णा। मध्ये मध्ये तालपत्राणि भग्नानि । टीकाकारेण प्रदत्त-मङ्गलाचरणश्लोकोऽपि नष्टः। ग्रन्थारम्भात् तृतीयश्लोकं यावत् विनष्टम् । मध्ये मध्ये बहूनि अक्षराणि, पंक्तिः, श्लोकः च न दृश्यन्ते । पञ्चदशकलायाः अष्टादशश्लोकानन्तरं ग्रन्थसमाप्तिं यावत् पत्राणि न सन्ति । असम्पूर्णोऽयं ग्रन्थः जीर्णशीर्णत्वात् स्पर्शमात्रेण भग्नानि जायन्ते । पत्राणां व्यतिक्रमात् तथा असम्पूर्णताहेतोः मुख्यरूपेण ग्रहीतुं न शक्यते ।

संस्कृतभाषायामुत्कललिप्या संरचितत्वात् अस्य नामकरणम् 'ओ-2' इति सङ्केतितम् । प्रायः ग्रन्थः चतुर्दशकलापर्यन्तः अस्ति पठनयोग्यः । पञ्चदशकलातः कीटदष्टानि कति पत्राणि भग्नानि च । पुरीमणिकर्णिका-साहिनिवासिनो एम्.मिश्रस्य सकाशादयं (२/१२९ संख्याङ्कितः) लब्धः ।

अयं च भुवनेश्वरस्थराज्यसंग्रहालयस्य पाण्डुलिपिविभागे संरक्षितो Dh 1086 संख्यकः पाण्डुग्रन्थः 'ओ-2' इत्यनेन अङ्केन सम्पादयित्र्या सङ्केतितः । अस्य दैर्घ्यं ३४ सेमि, प्रस्थः ३ सेमि। असम्पूर्णताहेतोः पत्रसंख्या न निर्णीयते । प्रायशः प्रतिपत्रं चतस्रः पञ्च वा पंक्तयः सन्ति । प्रतिपंक्ति ६५/८६ पर्यन्तानि अक्षराणि सन्ति । तालपत्रे इदं लिखितम्। इयं मातृका उत्कललिप्या लिखिता । मातृकेयमसम्पूर्णा । कुत्रचित् पंक्तिद्वयस्य मध्ये पार्श्वे अथवा पंक्त्यन्तरे लेखो न दृश्यते । सुस्पष्टानि अक्षराणि परन्तु कीटदष्टत्वात् स्थाने स्थाने पाठो न

उद्धृतः । पत्राणां क्रमिकसंयोजनं नास्ति। लिपिकरस्य नाम-धाम-विषये सूचना नास्ति । कीटदष्टत्वात् संख्यात्रुटयः विद्यन्ते । शून्यस्थानानि न सन्ति । सकलग्रन्थः एकजनहस्ताक्षराणि वहति इव ज्ञायते । ग्रन्थे कुत्रापि अस्पष्टता न दृश्यते । टीकापुष्पिकातो ज्ञायते यदस्याः टीकायाः रचयिता श्रीमान् दीनबन्धुमिश्रः । हरिभक्तिसुधाकरः सत्कौमुदीटीकासमन्वितश्च इत्येव ज्ञायते ।

(c) क्रामिकसंख्या 'ओ-3'

भुवनेश्वरस्थराज्यसंस्कृतिव्यापारनिर्देशालयतः लब्धा कर्गज-पाण्डुलिपिः इयं 'ओ-3' इत्यनेन सङ्केतिता । इयं उट्टङ्कितपाण्डुलिपिः संस्कृतभाषया उत्कललिप्या लिखिता । एकजनहस्तलिखितानि अक्षराणि। अवस्था सुष्ठु भवति । सम्पूर्णा सती शोभते । 'ओ-1' इत्यस्या अविकलेयमनुकृतिः ।

(d) क्रामिकसंख्या 'ना'

कर्गजनिर्मिता उट्टङ्किता पाण्डुलिपिरियं (Government Oriental Manuscript Library) मद्रासे विद्यते । तत्रत्य ग्रन्थागारस्य प्रदत्ता क्रमाङ्कसंख्या R-3263 । पाण्डुलिपिरियं संस्कृते लिखिता। १६८ संख्याकानि पत्राणि सन्ति । दैर्घ्यं २९ सेमि, प्रस्थः २२ सेमि पर्यन्तः भवति । प्रतिपत्रं सप्तदशतः त्रिंशदक्षराणि परिदृश्यन्ते । षोडशकलासु इयं लिखिता । अस्या अवस्था सुखपाठ्या भवति । ग्रन्थस्य शुद्धवर्णविन्यासो विद्यते । कुत्रचित् पंक्त्यन्तरे विकल्पपाठो दृश्यते। पत्रे शून्यस्थानानि न दृश्यन्ते । पत्रे विभागसंख्या त्रुटयः च न सन्ति । परन्तु (Xerox copy) छायाचित्रानयनहेतोः कुत्रचित् अक्षराणां लोपो भवति । ग्रन्थे कुत्रापि लिपिकरस्य नाम तथा स्थानं न प्रदत्तमस्ति।

ग्रन्थपठने हरिभक्तिसुधाकरः सत्कौमुदीटीका च उभयोः ग्रहणमस्ति। अस्य रचयिता दीनबन्धुमिश्र इति टीकापुष्पिकासु ज्ञायते। ग्रन्थरचनायाः प्रयोजनमपि लिखितमस्ति। देवनागरीलिप्या संस्कृतेन लिखिता पाण्डुलिपिरत्र 'ना' इत्यनेन सङ्केतिता ।

(ख) ग्रन्थस्य सम्पादनपद्धतिः (Principles of the text reconstruction and textual criticism) —

(a) प्राथमिकाधारः (मातृका)-

संस्कृतभक्तिग्रन्थेषु श्रीमता दीनबन्धुमिश्रेण प्रणीतो भक्तिग्रन्थः 'हरिभक्तिसुधाकरः' एक उपादेयो ग्रन्थः । विष्णुपुरीप्रणीतभक्तिरत्नावली-ग्रन्थस्य परिपूरकोऽयं ग्रन्थः भवति । हरिभक्तिसुधाकरस्य सम्पादनं सम्पादनपद्धत्यनुसारं चतसृणां मातृकाणामाधारेण सम्भूतम् । 'ओ-1', 'ओ-3', 'ना' इति मातृकास्तिस्रः सम्पूर्णा विराजन्ते परन्तु 'ओ-2' मातृका असम्पूर्णतया विराजते । परितापोऽयं यत् मातृका 'ओ-2' आदौ अन्ते च विनष्टा। यतः ग्रन्थकारस्य मङ्गलाचरणात्मकश्लोकस्य पाठोद्धारो न सम्पूर्णो विधीयते । 'ओ-1' 'ओ-3' 'ना' इत्येतेषु मङ्गलाचरणमेव उद्धृतम्। द्वयोः तालपत्रग्रन्थयोः कर्गजनिर्मितपाण्डुलिप्योश्च व्यतिरेकेण नान्या प्रतिलिपिः सम्पादयित्र्या लब्धा । 'ना' नामाङ्किता पाण्डुलिपिः (GOML) मद्रासतः लब्धा। अस्याः पाठः शुद्धः । स्थले स्थले अधिकः पाठः उद्धृतः । एतासु 'ओ-1', मातृका मुख्या । यथा-

१.२.— 'ओ-1', मपहर्तुं 'ओ-2', 'ओ-3', 'ना', इत्येवमपि अस्ति । तु.भा. (११.२९.४९) 'मपहन्तुं' परन्तु 'ओ-1', इत्याधारेण पाठो गृहीतः ।

१.५.— 'ना', 'ओ-2' 'भागवतो'- 'ओ-1', 'ओ-3', 'भागवते' टीकायामपि- 'भागवते' । ओ-1, इत्यनेन 'भागवते' इति पाठो गृहीतः ।

१.५५.— 'ना' प्रथमकलायां ५५ संख्यके श्लोकटीकापाठे "सम्राट् परिक्षित्" इति अस्ति । 'ओ-1' इत्यनेन 'परीक्षित्' इति दृश्यते । एतदपि समीचीनम् ।

१.६४.— (भा. ११.२०.७)- 'कल्पं', 'ओ-1', 'ओ-2', 'ओ-3', 'ना'- इत्यनेन सुकल्यम् । श्लोकटीकापाठेऽपि "सुकल्यं" अस्ति । 'ओ-1' इति मातृकासम्पादनस्य मुख्याधारहेतोः "सुकल्यं" इति ग्रहणीयम् ।

३.३.— ना, (भा. ११.११.२५)- स उपासिता । 'ओ-1', 'ओ-2', 'ओ-3' - "समुपाश्रिता" टीकापाठेऽपि "समुपासिता"। अत्र समुपासिता पाठो गृहीतः ।

४.३८.— ओ-1, ओ-2, ओ-3, ना- ''चारुनेत्रं'' । टीकापाठेऽपि 'चारुनेत्रं' । (भा. १०.६१.३) बहुनेत्र । अत्र 'ओ-1', इत्यस्याधारेण पाठः साधीयत् ।

(i) अधिकपाठः—

ओ-1, ओ-2, ओ-3, प्रथमा कला, द्वितीया कला- इति प्रतिकलमेवमस्ति । परन्तु 'ना' इत्यत्र 'अथ प्रथमा कला', 'अथ द्वितीया कला'- एवं पाठोऽस्ति । स्थले स्थले श्री इत्यधिकः पाठः दृश्यते । यथा- 'श्री' अथ अष्टमी कला, 'श्री' अथ एकादशी कला 'इति द्वितीया कला' एवमधिकः पाठोऽस्ति। अपि च 'ना' मातृकायां कलानन्तरं 'श्री' इति अधिकं संयोजनं दृश्यते । यथा- इति तृतीया कला 'श्री' । इति एकादशी कला 'श्री' ।
१४.१०.— ओ-1, ओ-2, ओ-3, ''सकलं तदात्मना'', 'ना' इत्यत्र ''सकलत्र'' सकलं तदात्मना 'इति' ''सकलत्र'' अधिकपाठः।

भुवनेश्वरस्थराज्यसंग्रहालयात् प्राप्त ओ-1 मातृका इति सम्पूर्णा लब्धा। मातृका इयमुत्कललिप्या संस्कृतेन लिखिता । अयं ग्रन्थो मुख्याधाररूपेण गृहीतः । वर्णानां शुद्धिः परिलक्ष्यते । मातृकायां वर्णितविषयवस्तु एकं भवति । मातृकायां पाठ्यान्तराणि न बहुलं परिलक्ष्यन्ते । ग्रन्थानां मध्ये मध्ये विकल्पपाठः दृश्यते । मातृकायाः मध्ये यत्र कीटदष्टत्वात् कश्चित् पाठो नोद्धृतस्तत्र कर्गजनिर्मितपाण्डुलिपिसाहाय्येन पाठो गृहीतः ।

संस्कृतिव्यापारपक्षतः कर्गजनिर्मितपाण्डुलिपिः (OSM) पाण्डुग्रन्थविभागे संरक्षिताया Dh 1037 इत्यस्याः मातृकायाः अनुकृतिः प्रतिलिपिर्वा । अत्र अतः ओ-1, इत्यत्र यत्र तत्र त्रुटिर्विद्यते ओ-3 इत्यत्रापि तत्र तत्र त्रुटिः परिलक्ष्यते । कुत्रचित् स्थले स्थले भिन्नता प्राप्यते । मन्यते अशुद्धिरियं लेखनकारस्य अज्ञतावशतो जाता । चतसृषु मातृकासु प्रतिलिपि-मध्ये पाठान्तराणि लक्ष्यन्ते । प्रयोजनस्थले शोधनं सम्पाद्य पाठो निर्देशितः ।

(b) सहायकप्रमाणम् (Testimonia)—

यत्र तु श्लोकपाठो न स्पष्टस्तत्र कविलिखितटीकामाध्यमेन शुद्धपाठो गृहीतः यथा टीकासहायकाधाररूपेण ग्रन्थसम्पादने उपादेया वर्त्तते । तथैव श्रीमद्भागवतमपि सहायकप्रामाणिकाधाररूपेण स्वीकृतम्।

(i) टीकाधारेण—

१.१.— ओ-1, ओ-2, ओ-3, ना विभाषितो । भागवते (१२.१३.१९) विभासितो । परन्तु टीकाधारेण 'विभाषित' इति पाठः गृहीतः ।

१.२५.— ओ-1, ओ-2, ओ-3, ना - वतं सयन् पाठो गृहीतः ।

२.५.— ओ-1, ओ-2, ओ-3, ना- 'आवृणेति', (भा. ५.५.४) 'आपृणेति' परन्तु टीकातः 'आवृणोति' । अतः टीकामाध्यमेन पाठः ग्रन्थकारस्य स्वकृततया 'आवृणोति' इति पाठं द्रढयति ।

७.२९.— ओ-1, ओ-2, ओ-3, ना- 'विमिता' भा. 'विमता'। टीकाधारेण विमिति- इति ग्रहणम् ।

१०.१५.— ओ-1, ओ-2, ओ-3,- 'अंश्यां' ना- 'अश्वा' टीकाधारेण अंशे भवा 'अंश्यां' इति पाठो ग्रहीतुं शक्यते ।

१५.१४.— ओ-1, ओ-2, ओ-3, ना- 'स्वाफलिकना' (भा. ११.१२.१०) 'श्वाफलिका' । अत्र टीकाधारेण 'स्वाफलिकना' इति पाठो ग्रहणीयः ।

(ii) भागवताधारेण—

१.३०.— ओ-1, ओ-2, ओ-3, ना- यावत्, भागवतं नैव श्रूयतेऽमृतसागरः । (भा. १२.१३.१४) यावन्न दृश्यते साक्षाच्छ्रीमद्भागवतं परम् । अत्र भागवताधारेण पाठः अधिकः समीचीनः ।

१.३३.— ओ-1, ओ-2, ओ-3 - 'प्रसङ्गः' । ना- 'प्रसङ्गे' । (भा. १२.१२.६५) 'प्रसङ्गे' भागवतस्योद्धरणात् भागवतस्य पाठोऽधिकं समीचीनः ।

२.१०.— ओ-1, ओ-2, ओ-3 - पशवः । ना- इत्यत्र 'पणवः' परन्तु भागवताधारेण पाठः 'पशवः' इति समीचीनः ।

७.१.— ओ-1, ओ-2, ओ-3, ना- 'श्रेयरुकर्मणः' इति अशुद्धम्। भागवताधारेण 'गेयोरुकर्मणः' इति पाठः साधीयान्।

८.१०.— ओ-1, ओ-2, ओ-3, ना- 'तन्त्रितः', भागवते 'तन्द्रितः' प्रसङ्गतो भागवतोद्धृतः पाठः सधीयान् इति संगृहीतः ।

८.१४.— ओ-1, ओ-2, ओ-3, भा.- 'रन्ध्रान्', ना- 'चन्द्रान्' । अतः भागवताधारेण पाठः साधीयान् ।

८.२७.— ओ-1, ओ-2, ओ-3, ना- 'मतन्त्रित' भागवते 'मतन्द्रित' भागवताधारपाठः समीचीनः ।

(iii) टीकायाः तथा मातृकायाः च आधारेण—

१.७१.— ओ-1, ओ-2, ओ-3, ना- 'न्निह' इति पाठो दृश्यते। भागवते 'न्निज' । प्रस्तुतग्रन्थश्लोकाधारेण 'न्निज' इति पाठो दृश्यते। अतो 'न्निज' इति पाठो ग्रहणीयः ।

७.१८.— ओ-1, ओ-2, ओ-3, (भा. ९.७.४३)- 'वैतरण्याः'। ना- इत्यत्र 'वैतरिण्या' । अत्र तु टीकाश्लोकमातृकाधारेण 'वैतरण्याः' इति पाठः साधीयान् ।

(iv) टीकायाः भागवतस्य चाधारेण—

४.१५.— ओ-1, ओ-2, ओ-3, ना- 'स्वं विम्बं' भागवते 'स्वबिम्बं'। भागवतस्य टीकायाः च आधारेण 'स्व बिम्ब' इति शुद्धम्।

८.२२.— ओ-1, ओ-2, ओ-3, ना- नाभी । भागवतस्य तथा श्लोकटीकाया माध्यमेन 'नाभि' इति धृतः पाठः ग्रहणीयः।

१६.११.— ओ-1, ओ-2, ओ-3, ना- 'प्राणोन्यत' । भागवतस्य तथा टीकाया आधारेण 'घ्राणोन्यतं' इति पाठः गृहीतः ।

(v) व्याकरणाधारेण—

८.१५.— श्लोकानन्तरं टीकापाठे ओ-1, ओ-2, ओ-3, ना- ग्रन्थेषु आत्मनस्य पाठः दृश्यते । व्याकरणदृष्ट्या अयं पाठश्चिन्त्यः। अस्मत् चिन्तितः पाठः 'आत्मनश्च' इति गृहीतः ।

(vi) विकल्पपाठः—

२.४९.— ओ-1, ओ-2, ओ-3 (भा. ११.३.२१) 'समाश्रयम्', ना- 'स^{श}माश्रयम्' इत्येवं विकल्पपाठोऽस्ति । 'शमाश्रयम्' इति पाठो गृहीतः ।

८.२.— 'य^{म}दात्मनि', 'य'स्थाने 'म' विकल्पपाठो निर्दिष्टः तत्र 'मदात्मनि' इति पाठो गृहीतः ।

८.९.— ओ-1, ओ-2, ओ-3 - 'कुन्दहासम्' । टीकायामाधारेण 'कुन्दहासम्' ना- 'कु^{ग}न्दहासम्' इति विकल्पः पाठः एवं सन्दिग्धस्थले 'कुन्दहासम्' इति पाठः गृहीतः ।

एवं मुख्याधारस्य ओ-1 मातृकायाः, सहायकाधारभूतानाम् ओ-2, ओ-3, ना, इति तिसृणां मातृकाणां, तथा प्रामाणिकाधार-रूपेण टीकायाः श्रीमद्भागवतस्य च कदा कदा च टीकाधृतपाठस्य प्रचलितव्याकरण-परम्परामनुसृत्य शोधं विधाय ग्रन्थोऽयं सम्पादितः ।

(c) ग्रन्थानां वंशावली (Pedigree of texts)

- हरिभक्तिसुधाकरः
  - प्रस्तुतहरिभक्तिसुधाकरः
    - N (North)
      - देवनागरी
        - ना
      - उत्कलीया
        - ओ-1
        - ओ-2
        - ओ-3
    - S (South)

सन्दर्भनिर्देशः (Notes & References)—

1. Banamali Rath, A Study on *Śrīkṛṣṇalīḷāmṛtam*, p-17
2. ह.भ.सु. 1.13
3. ह.भ.सु. 16.25
4. ह.भ.सु. 16.27
5. ह.भ.सु. 1.18
6. ह.भ.सु. 1.1

***

सम्पादितग्रन्थः
॥श्रीराधाकृष्णाभ्यां नमः ॥

हरिभक्तिसुधाकरः

(सत्कौमुदीटीकासमेतः)

[1]प्रथमा कला

कस्मै येन विभाषि[2]तोऽयमतुलो ज्ञानप्रदीपः पुरा
तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ।
योगीन्द्राय तदात्मना च[3] भगवद्रा[4]ताय कारुण्यतः
तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥१॥[5]

प्रारीप्सित[6] निर्विघ्न परिसमाप्तिकामः ग्रन्थकारः श्रीभागतसम्प्रदाय-प्रवर्त्तकरूपेण भगवद्ध्यान-लक्षणं मङ्गलमाचरति श्रीभागवतपद्यैनैव। द्वादशे त्रयोदशेऽध्याये सूतवाक्येन । तत्परं सत्यं श्रीकृष्णाख्यं धीमहि ध्यायतेर्लिङ्छान्दसम् । ध्यायेमेत्यर्थः[7] । बहुवचनं शिष्याभिप्रायं येन पुरा कल्पादौ अतुलः असमः । अयं भागवतरूपो ज्ञान-प्रदीपः कस्मै[8] ब्रह्मणे विभाषितः । कायेत्यत्र कस्मायित्यार्षम्। तद्रूपेण ब्रह्मरूपेण कृष्णाय व्यासाय तद्रूपिणा नारदरूपिणा योगीन्द्राय शुकाय तदात्मना व्यासरूपेण चकार शुकरूपेण भगवद्राताय परीक्षिते किम्भूतं शुद्धमत्रहेतुर्विमलम् । पुनः किम्भूतं विशोकं विशोकत्वे हेतुरमृतम् । इदानीं भगवद्धर्मोपदेशकत्वात् जगद्गुरुत्वेन प्रणमति । एकादशे ऊनत्रिंशेऽध्याये शुकवाक्येन-

1. ना - अथ प्रथमाकला, 'अथ' अधिकः पाठः ।
2. भा. 12.13.19 - सि
3. भा. 12.13.19 - थ
4. ओ-1, ओ-2, ओ-3 - व्रत्राय
5. तु.भा. 12.13.19
6. ना - प्रारिप्सित
7. ओ-1, ओ-2, ओ-3 - हमित्यर्थः
8. ओ-2 - कस्मै...परीक्षिते इति पर्यन्तं नष्टः

भवभयमपहर्त्तुं[9] ज्ञानविज्ञानसारं
निगमकृदुपजह्रे[10] भृङ्गवद्वेदसारम् ।
अमृतमुदधितश्चापाययद्भृत्यवर्गान्
पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोऽस्मि[11] ॥२॥[12]

भवः संसारः भयं जरा च[13] रोगादिनिमित्तं तदुभयं प्रवृत्तानां निवृत्तानां च भृत्यवर्गाणां यथा योग्यमपहर्त्तुं योऽमृतद्वयमुपजह्रे उद्धृतवान् तदेवाह वेदसारमेकं किं तत् ज्ञानविज्ञानरूपं च तत् सारं श्रेष्ठं रूपं च भृङ्गो यथा पुष्पमकम्पयन्नेवामृतमुपहरति तथा स्वयं कृतवेदानुसारेणैव उदधितश्चैकं तदुभयं यथायथं भृत्यवर्गानपाययत् तं कृष्णसंज्ञमाद्यं पुरुषं नतोस्मीति ब्रह्मादिस्तुत्यतामनुस्मरति । द्वादशेत्रयोदशेऽध्याये सूतवाक्येन-

यं[14] ब्रह्मावरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै-
र्वेदैः[15] साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥३॥[16]

स्तवैर्वेदैश्च स्तुन्वन्ति स्तुवन्ति । उपनिषच्छब्दस्यादन्तत्वं छन्दोनुरोधेन ध्यानेनावस्थितं निश्चलं यन्मनस्तेन यस्तान्तं न विदुः सुरासुरगणाः क्षीरोदमन्थनादौ । परमपुरुषतामनुस्मरन्नमति । द्वितीये चतुर्थेऽध्याये शुकवाक्येन पञ्चभिः ।

नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया ।
गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलक्ष्यवर्त्मने ॥४॥[17]

परस्मै सर्वोत्तमाय अत्र हेतुभूयसे अपरिमितमहिम्ने तद्दर्शयति सतः[18] प्रपञ्चस्य

---

9. भा. 11.29.49 - हन्तुं
10. ओ-1, ओ-2, ओ-3 - जमे
11. ओ-1, ओ-2, ओ-3 - नतोऽहं
12. तु.भा. 11.29.49
13. ना- च इति नास्ति ।
14. ओ-2 - यं ब्रह्मा... नमः पर्यन्तं नष्टः ।
15. ओ-1, ओ-2, ओ-3 - वेदैसाङ्गोपाङ्ग
16. भा. -12.13.1
17. भा. - 2.4.12
18. ओ-1, ओ-2, ओ-3 - सतं

उद्भवादिषु निमित्तभूता या लीला तया[19] गृहीतं ब्रह्मादिरूपेण रज आदि शक्तित्रयं येन तस्मै अन्तर्भवाय[20] सर्वान्तर्यामिणे अत एव सर्वान्तरत्वमनुपलक्ष्यं वर्त्म यस्य तस्मै नमः । भक्तपालकत्वमनुस्मरन्नमति-

नमो नमस्तेऽस्त्वृषभाय सात्वतां
विदूरकाष्ठाय मुहुः कुयोगिनाम् ।
निरस्तसाम्यातिशयेन राधसा
स्वधामनि ब्रह्मणि रंस्यते नमः ॥५॥[21]

सात्वतां भक्तानामृषभाय पालकाय कुयोगिनां भक्तिहीनानां विदूरा काष्ठादिगपि यस्य दुर्ज्ञेयेत्यर्थः । तदेवं वैषम्य प्रतीतावपि निर्दोषाय चिन्त्यैश्वर्यमाह निरस्तं साम्यमतिशयश्च यस्य यदपेक्षया । अर्थस्य साम्यातिशयौ नस्तः । तेन राधसा[22] ऐश्वर्येण स्वधामनि स्वरूपे ब्रह्मणि रंस्यते रममाणाय भक्तिशून्यानां नृणां सर्वसाधनवैफल्यं दर्शयन्नमति ।

तपस्विनो दानपरा यशस्विनो
मनस्विनो मन्त्रविदः सुमङ्गलाः ।
क्षेमं न विन्दन्ति विना यदर्पणं
तस्मै सुभद्रश्रवसे नमो नमः ॥६॥[23]

मनस्विनो योगिनः सुमङ्गलाः सदाचाराः यस्मिं स्तपाद्यर्पणं विना सुभद्रं सुमङ्गलं श्रवो यशो यस्य तस्मै भक्तेः परमशुद्धिहेतुत्वं दर्शयन्नमति ।

किरातहूणान्ध्रपुलिन्दपुल्कसा
आभीरकङ्का यवनाः खशा[24]दयः ।
येऽन्ये च पापा यदुपाश्रयाश्रयाः
शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥७॥[25]

---

19. ओ-1, ओ-2, ओ-3 - चया
20. ओ-1, ओ-2, ओ-3 - अत्त
21. तु.भा. -2.4.14
22. ओ-1, ओ-2, ओ-3 - राधस्य
23. तु.भा. -2.4.17
24. भा. -2.4.18 - सा
25. तु.भा. -2.4.18

किराताः शबरा हूणा यवनादयः आन्ध्रा मल्लाः पुलिन्दाः[26] म्लेच्छाः पुल्कसा श्चाण्डाला आभीरा गोपालाः कङ्कादयो यवनभेदाः किरातादयो ये पापजातयः अन्ये च ये कर्मतः पापरूपा यदुपाश्रया भागवतास्तदाश्रयाः सन्तः[27] शुध्यन्ति । अत्रा सम्भावनाशङ्कां परिहरति प्रभविष्णवे प्रभवनशीलायेति । ज्ञानप्रदत्वमनुस्मरन् प्रार्थयते[28]—

यदङ्घ्र्यभिध्यान समाधि धौतया
धियानुपश्यन्ति हि तत्वमात्मनः ।
वदन्ति चैतत्कवयो यथारुचं स
मे मुकुन्दो भगवान्प्रसीदताम् ॥८॥[29]

यस्याङ्घ्रेरभिध्यानमेव समाधिस्तेन धौतया शोधितया धिया[30] आत्मनस्तत्वं पश्यन्ति यथारुचं रुच्यनुसारेण सगुणनिर्गुणादिभेदेन वदन्ति । यद्वा रुक् प्रतिभा यथामतीत्यर्थः प्रसीदतां प्रारीप्सित[31] ग्रन्थस्य निर्विघ्नपरिसमाप्तिर्यथा भवति तथा प्रसीदतु ।

अथ श्रीभागवतस्य प्रवक्तारं श्रीशुकं प्रणमति । द्वादशे द्वादशेऽध्याये[32] सूतवाक्येन—

स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽ-
प्यजितरुचिरलीलाकृष्टसारस्तदीयम् ।
व्यतनुत कृपया यस्तत्वदीपं पुराणं
तमखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि ॥९॥[33]

स्वसुखेनैव निभृतं पूर्णं चेतो यस्य तेनैव व्युदस्तोन्यस्मिन् भावो यस्य तथा भूतोऽपि

---

26. ओ-1, ओ-2, ओ-3 - पुलिन्दा म्लेच्छा इति नष्टम्
27. ओ-1, ओ-2, ओ-3 - सन्ति
28. ओ-1, ओ-2, ओ-3 - ज्ञानप्रदत्वमनुस्मरन् प्रार्थयते इति नष्टम्
29. तु.भा. -2.4.21
30. ओ-1, ओ-2, ओ-3 - धिया इति नास्ति
31. ना - प्रारिप्सित
32. ओ-1, ओ-2, ओ-3 - पञ्चमे, ना- पञ्चविंशेऽध्याये परन्तु भागवते 12.12.68, अत्र भागवताधारेण पाठो गृहीतः ।
33. तु.भा. -12.12.68

अजितस्य रुचिराभिर्लीलाभिराकृष्टः सारः स्वसुखगतं धैर्यं यस्य सः तत्त्वदीपं परमार्थप्रकाशकं भागवतसंज्ञं यो व्यतनुत तं नतोस्मीति । अथ श्रीगुरुं प्रणमति ।

पोतो[34] दुस्तर जन्ममृत्युजलधौ यस्याङ्घ्रिपद्मद्वयं
दीपोऽज्ञानतमस्सु यस्य च सुधास्पर्धिप्रभावोगिराम् ।
विद्याचारविवेकविष्णुभजनै र्निर्धूतषट्च्छत्रवे
तस्मै श्रीगुरवे नमोस्तु शतशो निर्मानमोहात्मने ॥१०॥

अथ द्वाभ्यां तन्नामादिकं प्रकाशयति ।

श्रीकृष्णस्तुति[35] सुधया विशीर्णरागो
विप्रेन्द्रो यइह चिरं क्षितौ ननन्द ।
मन्दानामपि सुखवर्धिनी यदीहा[36]
पारीन्द्रः सुकृतवनेऽति गौरगात्रः ॥११॥

विशीर्णो रागो विषयाभिलाषो यस्य यस्येहा चेष्टा मन्दानामपि सुखवर्धिनी किमुत महतामित्यर्थः पारीन्द्रः सिंहः ।

स श्रीमान्[37] सुघटितपूर्वपद्यपादा-
द्यन्तार्णैः क्रमश उदीरिताभिधानः ।
पीयूषद्युतिरिव काश्यपान्ववाय-
क्षीराब्धौ मनसि सदा ममाविरास्ताम् ॥१२॥

सुघटितस्य पूर्वपद्यस्य पादानाम् आद्यन्तवर्णैः क्रमशः उदीरितमभिधानं यस्य ।

श्रीमद्भागवताम्भोधेर्हरिभक्तिसुधाकरः ।
प्रकाश्यते दीनबन्धुमिश्रेण प्रीतये सताम् ॥१३॥

ननु श्रीमद्भागवते सति[38] तदुद्धृतायां[39] भक्तिरत्नावल्यां च सत्यां किं भक्तिसुधाकरेणेत्याशङ्क्याह चतुर्भिः—

प्रायेणाल्पायुषः सभ्याः कलावस्मिन्युगे जनाः ।
मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥१४॥

---

34. ओ-1, ओ-2, ओ-3 - पाते
35. ओ-1, ओ-2, ओ-3 - स्मृति
36. ओ-1, ओ-2, ओ-3 - यदीह
37. ओ-1, ओ-2, ओ-3 - सुश्रीमान्
38. ओ-1, ओ-2, ओ-3 - सन्ति
39. ना - तदुद्ध्या

इति सूताय यत्प्रोक्तमृषिभिः शौनकादिभिः ।
तत्प्रामाण्यान्न निखिलेऽभ्यासो भागवते[40] नृणाम् ॥१५॥

हे सभ्य साधो ! अस्मिन्युगे कलौ अल्पायुषो जनाः तत्रापि मन्दा अलसाः तत्रापि सुमन्दमतयः तत्रापि मन्दभाग्या विघ्नाकुलाः[41] तत्रापि उपद्रुता रोगादिभिः इति प्रथमस्कन्धे शौनकादिभिः ऋषिभिः सूताय यत्प्रोक्तं तद्वचनस्य प्रामाण्यान्निखिले समग्रे भागवते नृणामभ्यासो नास्ति ।

तद्रत्नावलितः कश्चित्कैश्चिद्भक्तिसुधाकरात् ।
ज्ञेया भागवतश्लोका ज्ञानवैराग्यभक्तिदाः ॥१६॥
अतो विष्णुपुरी यानि रत्नावल्यां न्यवेशयत् ।[42]
तद्वर्जमन्यपद्यानां संग्रहेऽद्य ममोद्यमः ॥१७॥

तत्तस्मात्समग्रभागवतश्रवणपठनालसैः कैश्चित् भक्तिरत्नावलितः अनवकलितः भक्तिरत्नावलिग्रन्थैः कैश्चिद्भक्तिसुधाकरात् ग्रन्थात् ज्ञानवैराग्यभक्तिदा भागवत-श्लोका ज्ञेयाः । अतः कारणाद्विष्णुपुरी यानि पद्यानि रत्नावल्यां न्यवेशयत् तद्वर्जं तानि वर्जयित्वा अन्यपद्यानां पूर्वापरसङ्गत्या एकत्र लिख्यते—

प्रकाशयन्विष्णुपदं तमःस्तोमं च नाशयन् ।
एष साधुचकोराणामानन्दं जनयिष्यति ॥१८॥

विष्णुपदमाकाशं पक्षे विष्णोश्चरणं तमस्स्तोममन्धकारसमूहं पक्षे अज्ञानौघम् । एष भक्तिसुधाकरः ।

अत्र श्रीभगवद्भक्तिसुधाभानौ सुनिर्मलाः ।
कला षोडश वक्ष्यन्ते जगदाह्लादपेशलाः ॥१९॥

जगदाह्लादपेशला दक्षाः ।

तत्र शास्त्रमहीदेशनदीकालनृजन्मनाम् ।
गार्हस्थ्यस्य च माहात्म्यं प्रथमायां निरूप्यते ॥२०॥

शास्त्रं भागवतं मही भारतभूः[43] कालः कलिः चकारानुक्तसमुच्चयार्थम् ।

जगदीशगुणानुवर्णनामृतसारैः परिपूरितं मुहुः ।
सुजना भजतामुमञ्जसा भवभानूद्भवतापशान्तये ॥२१॥

---

40. ना - भागवतो
41. ओ-1, ओ-3 - कुशन्ताः
42. ओ-1, ओ-3 - न्यवेशयेत्
43. ओ-1, ओ-2, ओ-3 - भारतत्वम्

हे सुजनाः ! अमुं भक्तिसुधाकरं ग्रन्थमञ्जसा झटिति[44] भवः संसारः स एव भानुः तदुद्भवानां तापानां शान्तये मुहुर्भजत तापशान्तौ हेतुः जगदीशेति ।

न मया ग्रथितोऽस्त्यत्यसौ सतां परिहार्यो महर्षिवाक्तया ।[45]
अपि नीचजनेन रोपितः किमु यस्तुलसीतरुर्द्विजैः ॥२२॥

मया ग्रथितः[46] न[47] तु कृतः असौ ग्रन्थः महर्षिवचनत्वेन सतां परिहाराय त्यागाय मास्तु परिहारानर्हत्वे[48] दृष्टान्तः अपीत्यादि । भागवतं प्रशंसति त्रिभिः ।

सकलश्रुतिशास्त्रसंमतं हरिलीलारसमाधुरीयुतम् ।
मुरजित्तनुवासवीसुतो न न शीतद्युति निर्गतामृतम् ॥२३॥
द्विजशापभयातुरोत्तरासुतनिश्शेषजनुर्भयापहम् ।
नहि भागवतमवतंसयञ्[49] श्रुतियुग्मे मनुजो निमुह्यति[50] ॥२४॥

वासवीसुतो वेदव्यासः उत्तरासुतः परीक्षित् श्रुतियुग्मेऽवतंसयन् शृण्वन्नित्यर्थः ।

इह सर्वजगज्जनिस्थितिक्षितिकृत्कर्णरसायने हितः[51] ।
विधिरुद्रमुखामरस्तुतः करुणासिन्धुरुदीर्यते भृशम् ॥२५॥

जनिर्जन्म स्थितिः पालनं क्षितिः क्षयः ।

इदानीमेतद्ग्रन्थस्य भागवतमूलत्वात् श्रोतृप्रवर्त्तनाय श्रीभागवतस्य काण्डत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति द्वाभ्याम् । प्रथमे प्रथमेऽध्याये श्रीवेदव्यासवाक्येन ।

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्रवस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किंवा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्[52] ॥२६॥

---

44. ओ-1, ओ-3 - झकृति
45. ओ-1, ओ-2, ओ-3 - वाविक्रया
46. ओ-1, ओ-2, ओ-3 - ग्रथितो
47. ओ-1, ओ-2, ओ-3 - च
48. ओ-1, ओ-2, ओ-3 - नहित्वे
49. ओ-1, ओ-2, ओ-3, ना- वतं शयञ् । परन्तु टीकाधारेण वतं सयन् पाठो गृहीतः ।
50. ओ-1, ओ-2, ओ-3 - किमुद्यत
51. ओ-1, ओ-2, ओ-3 - हतः
52. तु.भा. -1.1.2

अत्र श्रीमति सुन्दरे भागवते परमो धर्मो निरूप्यते । परमत्वे हेतुः प्रकर्षेण उज्झितं कैतवं फलाभिसन्धिलक्षणं कपटं यस्मिन् स प्रशब्देन मोक्षाभिसन्धिरपि निरस्तः केवलमीश्वराराधनालक्षणो धर्मो निरूप्यते इत्यर्थः । अधिकारिणो धर्मस्य परमत्वमाह निर्मत्सराणां परोत्कर्षासहनं मत्सरस्तद्रहितानां सतां भूतानुकम्पितनाम् एवं कर्मकाण्डविषयेभ्यः श्रैष्ठ्यमुक्तम् । ज्ञानकाण्डविषयेभ्यः श्रैष्ठ्यमाह वेद्यमिति वास्तवं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकादिवत् द्रव्यगुणादिरूपं यद्वा वस्तुशब्देन वस्तुशब्दोऽंशो जीवः वस्तुतश्शक्तिर्माया च । वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथगिति वेद्यं अयत्नेनैव ज्ञातुं शक्यमित्यर्थः । ततः किमत आह शिवदं परमसुखदम् । किञ्चाध्यात्मिकादितापत्रयोन्मूलनं च अनेन ज्ञानकाण्डविषयेभ्यः श्रैष्ठ्यं दर्शितम् । कर्त्तृतोऽपि श्रैष्ठ्यमाह महामुनिः श्रीनारायणः तेन प्रथमतः[53] संक्षेपकृते । देवताकाण्डगतं श्रैष्ठ्यमाह परैरिति परैः शास्त्रैस्तदुक्तसाधनैर्वा ईश्वरो हृदि सद्य एवावरुध्यते । स्थिरीक्रियते वा शब्दः कटाक्षे किन्तु विलम्बेन कथञ्चिदेव । अत्र शुश्रूषुभिः श्रोतुमिच्छुभि[54]स्तत्क्षणादेवावरुध्यते इदमेव तर्हि किमिति सर्वे न शृण्वन्ति तत्राह कृतिभिरिति । श्रवणेच्छा तु पुण्यैर्विना नोत्पद्यत इत्यर्थः । तस्मादत्र काण्डत्रयार्थस्यापि यथावत् प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठमतो नित्यमेतदेव श्रोतव्यमिति भावः । इदानीं तु केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयतेऽपि तु सर्वशास्त्र-फलरूपमिदमतः परमादरेण सेव्यमित्याह—

निगमकल्पतरोर्गलितं फलं[55] शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः॥२७॥[56]

निगमो वेदः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वात् तस्य फलमिदं भागवतं नाम तत्तु वैकुण्ठगतं परमेश्वरेण ब्रह्मणे समर्पितं ब्रह्मणा तु नारदेनानीय मह्यं दत्तं मया च शुकस्य मुखे निहितं तच्च तन्मुखाद् भुवि गलितं शिष्यप्रशिष्यादिरूपपल्लवपरम्परया शनैरखण्डमेवावतीर्णं न तूच्चपातेन । स्फुटितमित्यर्थः एतेन भविष्यदपि भूतवन्निर्दिष्टम् । अनागताख्यानेनैव शास्त्रस्य प्रवृत्तेः अत एवाऽमृतरूपेण द्रवेण संयुतं लोके हि शुकमुखस्पृष्टं फलममृतमिव स्वादु भवतीति प्रसिद्धम् । अत्र तु शुको मुनिः अमृतं परमानन्दः स एव द्रवो रसः अतो हे रसिकाः रसज्ञाः तत्रापि हे भावुकाः

53. ओ-1, ओ-2, ओ-3 - प्रथमं
54. ना - श्रोतुमिच्छुभि इति पदं नास्ति ।
55. ओ-1, ओ-3 - फलं नष्टः
56. तु.भा. -1.1.3

रसविशेषभावनाचतुराः अतो भुवि गलितमित्यलभ्यलाभोक्तिः इदं भागवतं नाम फलं मुहुः पिबत। तत्तु त्वगस्थ्यादिकं विहाय फलाद्रसः पीयते तत्कथं फलमेव पातव्यं तत्राह रसं रसरूपम् अतस्त्वगस्थ्यादि देहेन्द्रियाद्यंशस्याभावात् फलमेव कृत्स्नं पिबत । अत्र रसतादात्म्यविवक्षया रसवत्त्वस्य[57] विवक्षितत्वादनुगुणवचनेऽपि रसशब्दे मतुपः प्राप्त्यभावात् तेनैव रसफलमिति सामानाधिकरण्यं तत्र फलमित्युक्ते पानासम्भवो हेयां[58]शप्रसक्तिश्च भवेदिति तन्निवृत्त्यर्थं रसमित्युक्तम्। रसमित्युक्तेऽपि गलितस्म रसस्य पातुमशक्यत्वात् फलमिति द्रष्टव्यम् । न च भागवतामृतपानं मोक्षेऽपि त्याज्यमित्याह आलयं लयो मोक्षः अभिविधावाकारः लयमभिव्याप्य नहीदं स्वर्गादिसुखवन्मुक्तेरुपेक्ष्यते किन्तु सेव्यत एव वक्ष्यति हि ।

आत्मारामाश्च मुनयो निर्ग्रन्थाऽप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ।। इति ।

इदानीमस्य वाच्यप्रयोजनादीन् दर्शयति द्वादशे त्रयोदशेऽध्याये शौनकादीन् प्रति । सूतवाक्येन पञ्चभिः—

इदं भगवता पूर्वं ब्रह्मणे नाभिपङ्कजे ।
स्थिताय भवभीताय कारुण्यात्संप्रकाशितम् ।।२८।।[59]
आदिमध्यावसानेषु वैराग्याख्यानसंयुतम् ।
हरिलीलाकथाव्रातामृतानन्दितसत्सुरम्[60] ।।२९।।[61]

हरिलीलाकथानां व्रातः समूहः स एवामृतं तेन नन्दिताः सन्तस्सुराश्च येन तत्[62]—

राजन्ते तावदन्यानि पुराणानि सतां गणे ।
यावन्न[63] दृश्यते साक्षाच्छ्रीमद्भागवतं परम् ।।३०।।

एतदुपपादयति सर्वेति ।

---

57. ओ-1, ओ-2, ओ-3 - रसवदस्य
58. ओ-1, ओ-2, ओ-3 - त्वेया
59. तु.भा. -12.13.10
60. ओ-1, ओ-2, ओ-3 - स्मरन्मम्
61. तु.भा. -12.13.11
62. ओ-1, ओ-2, ओ-3 - सन्ति सुराश्च येन तत
63. ओ-1, ओ-2, ओ-3, ना - यावत् भागवतं नैव श्रूयतेऽमृतसागरः । अत्र तु भागवताधारेण (12.13.14) 'याव दृश्यते साक्षाच्छ्रीमद्भागवतं परं' पाठः साधीयान् ।

सर्ववेदान्तसारं हि श्रीभागवतमिष्यते[64] ।
तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् ॥३१॥[65]
निम्नगानां यथा गङ्गा देवानामच्युतो यथा ।
वैष्णवानां यथा शम्भुः पुराणानामिदं तथा ॥३२॥[66]

अस्य पुराणस्यैवं प्रभावाति[67]रेके कारणान्तरमाह द्वादशे द्वादशेऽध्याये सूतवाक्येन—

कलिमलसंहति[68]कालनोऽखिलेशो
हरिरितरत्र न गीयते ह्यभीक्ष्णम् ।
इह तु पुनर्भगवानशेषमूर्त्तिः
परिपठितोऽनुपदं कथाप्रसङ्गैः[69] ॥३३॥

कलिमलानां संहतिं समूहं कालयति नाशयतीति तथा इतरत्र शास्त्रान्तरे । एतच्छ्रवणादिफलं दर्शयति । द्वादशे त्रयोदशेऽध्याये तद्वाक्येनैव—

श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते ।
यत्र[70] ज्ञानविरक्तिभक्तिसहितं नैष्कर्म्यमाविष्कृतं
यच्छृण्वन्विपठन्विचारणपरो भक्त्या विमुच्येन्नरः ॥३४॥

पारमहंस्यं परमहंसैः प्राप्यं नैष्कर्म्यं सर्वकर्मोपरमः भक्त्या तच्छ्रवणादिपरो मुच्यते । इदानीमेतद्ग्रन्थप्रतिपाद्यं भगवद्भक्तेर्मूल-साधनस्य मनुष्यजन्मनो देवादिदुर्लभतां निरूपयिष्यन् तदाधारत्वेन भारतवर्षस्य श्रैष्ठ्यं[71] निरूपयित । पञ्चमेऽष्टमेऽध्याये[72] शुकवाक्येन-

---

64. ओ-1, ओ-2, ओ-3 - मीष्यते
65. तु.भा. -12.13.15
66. तु.भा. -12.13.16
67. ओ-1, ओ-2, ओ-3 - प्रभावादि
68. ओ-2 - संप्रमहं इति अधिकम्
69. ओ-1, ओ-2, ओ-3 - प्रसङ्ग, ना- प्रसङ्गे भा. (12.12.65) प्रसङ्गैः । भागवतस्योद्धरणात् भागवतस्य पाठोऽधिकं समीचीनः ।
70. भा.-12.13.18 - तत्र
71. ओ-1, ओ-2, ओ-3 - श्रेष्ठयं

अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेऽप्यधिपुण्यमेतत् ।
गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवन्ति ॥३६॥

अधिकम् अधिकं पुण्यं यस्मिन् । एतत् भारतं वर्षं ऋषभाद्यवतारवन्ति कर्माणि । एतेनावताराणां प्राचुर्यमत्रैवेति सूचितम् ।

अत्राहितं जन्मभिरनायासेन परमं पदं लभ्यत इत्याह पञ्चमे ऊनविंशेऽध्याये भरतखण्डवर्णनाप्रस्तावे देवानां वाक्येन—

कल्पायुषां स्थानजयात्पुनर्भवात्
क्षणायुषां भारतभूमयो[73] वरम् ।
क्षणेन मर्त्येन कृतं मनस्विनः
संन्यस्य संयान्त्यभयं पदं हरेः ॥३६ ॥

कल्पायुषां ध्रुवादीनां क्षणमल्पमायुर्येषां वरत्वे हेतुः मर्त्येनापि देहेन क्षणेनाल्पकालेन कृतं कर्मसंन्यस्याभयं पुनरावृत्तिभयशून्यं हरेः पदं यान्ति । अतः स्वर्गिभिरप्यत्र जन्म प्रार्थ्यमित्याह तत्रैव तेषां वाक्येन-

यद्यत्र नः[74] स्वर्गसुखावशेषितं
स्विष्टस्य सूक्तस्य कृतस्य शोभनम् ।
तेनाजनाभे[75] स्मृतिमज्जन्म[76] नः
स्याद्वर्षे हरिर्यद्भजतां शं तनोति ॥३७॥[77]

स्विष्टस्य सम्यग्जनस्य सूक्तस्य प्रवचनस्य कृतस्यार्थस्यापि कर्मणः स्वर्गसुखादुपभुक्तादवशेषितं यदि किञ्चिदस्ति तेनाजनाभे वर्षे नोस्माकं जन्म स्यात् कीदृशं स्मृतिमत् हरिरेव सेव्य इत्यनुसन्धानयुक्तं यतो हरिर्भजतां शं सुखं तनोति । स्वर्गस्यासेव्यत्वे कारणमाहुः—

---

72. ओ-1, ओ-2, ओ-3, ना - ग्रन्थेषु पञ्चमे अष्टमेऽध्याये परन्तु (the number of Bhagavata 5.6.13) भागवतस्य श्लोकसंख्या भवति 5.6.13
73. भा.-5.19.23 - भूजयो
74. ना - यदत्र
75. ओ-1, ओ-2, ओ-3 - तेजनाभे
76. ओ-1, ओ-2, ओ-3 -मज्जनिः
77. तु.भा. -5.19.28

किं[78] दुष्करैर्नः[79] क्रतुभिस्तपोव्रतै-
दर्नादिभि[80]र्वा द्युजयेन फल्गुना ।
न यत्र नारायणपादपङ्कजस्मृतिः
प्रणष्टातिशयेन्द्रियोत्सवात् ॥३८॥[81]

दुष्करैः क्रत्वादिभिर्नः अस्माकं फल्गुना तुच्छेन द्युजयेन स्वर्गप्राप्त्या किं फलं कुतः यत्र स्वर्गे नारायणपादपङ्कजस्मृतिर्नास्ति । प्रत्युतातिशयितादिन्द्रियाणामुत्सवाद्भोगादुत्सवात् प्रणष्टाऽभूत् । हरिकथाविरहितब्रह्मलोकोऽप्यसेव्य इत्याहुः—

न यत्र वैकुण्ठकथासुधापगा[82]
न साधवो भागवतास्तदाश्रयाः ।
न यत्र यज्ञेशमखा महोत्सवाः
सुरेशलोकोऽपि[83] न वै स सेव्यताम् ॥३९॥[84]

अतो यत्र वैकुण्ठकथामृतनद्यो न सन्ति तदाश्रयाः कथा सुधापगाश्रयाः महान्तो नृत्याद्युत्सवा येषु तादृशा यज्ञेशस्य विष्णोर्मखाः पूजाश्च सुरेशस्य ब्रह्मणोऽपि लोको द्वापरार्धपर्यन्तस्थाय्यपि न सेव्यताम् । किमुताशुक्षयिष्णुः स्वर्गलोक इति भावः । अतः स्वर्गादिलोकेभ्योऽपि भारतभूमयः श्रेष्ठा इत्युक्तम् । इदानीं तत्रापि पुण्यान्देशानाह सप्तमे चतुर्दशेऽध्याये युधिष्ठिरं प्रति नारदवाक्येन सप्तभिः—

अथ देशान् प्रवक्ष्यामि धर्मादिश्रेय आवहान्[85] ।
स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते ॥४०॥[86]
बिम्बं भागवतो यत्र सर्वमेतच्चराचरम् ।
यत्र हि[87] ब्राह्मणकुलं तपोविद्यादयान्वितम् ॥४१॥

---

78. ना - किन्दुष्करैः
79. ओ-1, ओ-2, ओ-3 - निः
80. ओ-1, ओ-2, ओ-3 - दर्नादिभिः
81. तु.भा. -5.19.22
82. ओ-1, ओ-2, ओ-3 - सुधापना
83. ओ-1, ओ-2, ओ-3 - सुरेण
84. तु.भा. -5.19.24
85. ओ-1, ओ-2, ओ-3 - आवहन्
86. तु.भा. -7.14.27 87. तु.भा. -7.14.28 - ह

यत्र यत्र[88] हरेरर्च्चा स देशः श्रेयसां पदम् ।
यत्र गङ्गादयो नद्यः पुराणेषु च विश्रुताः ॥४२॥[89]
सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत[90] ।
कुरुक्षेत्रं गयःशिरः[91] प्रयागः पुलहाश्रमः ॥४३॥

अहैरुत्तमैराश्रितानि ।

नैमिषं[92] फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ।
वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा ॥४४॥[93]
नारायणाश्रमो नन्दा सीतारामाश्रमादयः ।
सर्वे कुलाचला राजन् महेन्द्रमलयादयः ॥४५॥[94]

सीताया रामस्य च आश्रम आदि र्येषाम् । द्वयोः पृथग्ग्रहणं वियोगकालाभिप्रायेण ।

एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये ।
एतान् देशान् निषेवेत[95] श्रेयस्कामो ह्यभीक्ष्णशः ॥४६॥

अर्चाश्रिताः स्थिर प्रतिमाश्रिताः । पूर्वन्तु सालग्रामशिलार्चनदेश[96] उक्तम् इत्यपौनरुक्त्यम् । निन्दितोऽपि देशो वैष्णवावस्थित्या पवित्र इत्याह । सप्तमे दशमेऽध्याये प्रह्लादं प्रति नृसिंहवाक्येन—

यत्र यत्र च मद्भक्ताः[97] प्रशान्ताः समदर्शिनः ।
साधवः समुदाचारास्ते पूयन्त्येपि कीकटाः ॥४७॥[98]

---

88. ओ-1, ओ-2, ओ-3 - तत्र
89. तु.भा. -7.14.29
90. ओ-1, ओ-2, ओ-3, ना - श्रितानिच । परन्तु भागवते (7.14.30) श्रितान्युत । भागवतस्य मान्यग्रन्थहेतोर्भागवताधारेण पाठो गृहीतः ।
91. भा. -7.14.30 - गय
92. ना - नैमिशं
93. तु.भा. -7.14.31
94. तु.भा. -7.14.32
95. तु.भा. - 7.14.33
96. ओ-1, ओ-2, ओ-3 - शिलाद्यर्चन
97. ओ-1, ओ-2, ओ-3, ना- मे भक्ताः
98. तु.भा. -7.10.19

सम्यगुत्तम आचारो येषां कीकटाः मागधोऽपि देशस्तत्तुल्या वंशाश्च पूयन्ते शुद्धा भवन्ति । यत्र गङ्गादय इत्यादिना देशपावनत्वेन गङ्गादीनां माहात्म्यमुक्तम् । इदानीं तासां महिमान्तरं निरूपयति । तत्र सर्वेषां गङ्गासेवनमुचितमित्याह प्रथमे ऊनविंशेऽध्याये सूतवाक्येन—

या वै लसच्छ्रीतुलसीविमिश्र-
कृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री[99] ।
पुनाति लोकानुभयत्र सेशान्[100]
कस्तां[101] न सेवेत मरिष्यमाणः ॥४८॥[102]

या गङ्गा लसन्ती श्रीर्यस्यास्तया तुलस्या विमिश्रा ये कृष्णाङ्घ्रिरेणवस्तैरधिकं सर्वोत्कृष्टं यदम्बु तस्य नेत्री तद्वाहिनी उभयत्रान्तर्बहिश्च सेशान् लोकपालैः सहितान् लोकान्पुनाति मरिष्यमाणः आसन्नमरणः [103]मरणस्यानियतत्वात् सर्वोपि अतस्तां को वा न सेवेत । आस्तां तावज्जीवतो गङ्गास्नानं निर्दग्धाङ्गभस्मनामपि गङ्गासम्पर्कः स्वर्गादिदो लोकस्येत्याह नवमे नवमेऽध्याये शुकवाक्येन द्वाभ्याम्—

भस्मीभूताङ्गसङ्गेन स्वर्याताः सगरात्मजाः ।
किं पुनः श्रद्धया देवीं ये सेवन्ते धृतव्रताः ॥४९॥[104]

भस्मीभूतेनाङ्गेन सङ्गस्तेन । अत्रासां भावनां परिहरति—

न ह्येतत्परमाश्चर्यं स्वर्धुन्या यदिहोदितम् ।
अनन्तचरणाम्भोजप्रसूताया भवच्छिदः ॥५०॥[105]

इदानीमन्यासां पुण्यनदीनां माहात्म्यमाह द्वाभ्याम् । एकादशे पञ्चमेऽध्याये जनकं प्रति करभाजनवाक्येन—

ताम्रपर्णी नदी यत्र कृतमाला[106]पयस्विनी[107] ।
कावेरी च महापुण्या प्रतीची च महानदी[108] ॥५१॥

---

99. ओ-1, ओ-2, ओ-3 - सनाम्बु
100. ओ-1, ओ-2, ओ-3 - शेषान्
101. ओ-1, ओ-2, ओ-3 - कस्त्वं
102. तु.भा. -1.19.6
103. ओ-1, ओ-2, ओ-3 - चरण
104. तु.भा. -9.9.13
105. तु.भा. -9.9.14
106. ओ-1, ओ-2, ओ-3, ना - माल
107. तु.भा. -11.5.39 - द्वितीय पादः
108. तु.भा. -11.5.40 - प्रथम पादः

ये पिबन्ति जलं तासां मनुजा मनुजेश्वर[109] ।
प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः[110] ॥५२॥

अमलाशयास्सन्तःप्रायशो भगवति भक्ता भवन्ति । इदानीं कृतादिभ्योऽपि कलेः श्रेष्ठतामाह द्वाभ्यामेकादशे पञ्चमेऽध्याये जनकं प्रति करभाजनवाक्येन—

कृतादिषु[111] प्रजा राजन् कलाविच्छन्ति सम्भवम् ।
यत्र[112] सङ्कीर्त्तनेनैव सर्वः स्वार्थोऽभिलभ्यते[113] ॥५३॥

कृतादिषु सत्यादिषु युगेषु । यत्र कलौ किञ्च ।

कलौ खलु[114] भविष्यन्ति नारायणपरायणाः[115] ।
क्वचित् क्वचिन्महाराज द्रविडेषु च भूरिशः[116] ॥५४॥

कलेर्गुणान्तरमाह द्वाभ्याम् । प्रथमेऽष्टमेऽध्याये शौनकादीन्प्रति सूतवाक्येन ।

नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक् ।
कुशलान्याशु सिध्यन्ति नेतराणि कृतानि यत् ॥५५॥[117]

सम्राट् परीक्षित्[118] सारङ्गो भ्रमर इव सारग्राही सारमाह यद्यस्मिन् कुशलानि पुण्यानि आशु सङ्कल्पमात्रेण फलन्ति इतराणि पापानि न सिध्यन्ति यतस्तानि कृतान्येव सिध्यन्ति न खलु सङ्कल्पमात्राणीति ननु दोषाधिक्याद्द्वेष एव युक्तः न धीरेषु तस्य किञ्चित्करत्वादित्याह—

किन्नु[119] बालेष्वधीरेषु[120] कलिना धीर[121] भीरुणा ।
अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्त्तते ॥५६॥

---

109. तु.भा. -11.4.40 - द्वितीय पादः
110. तु.भा. -11.5.40 - तृतीय पादः
111. तु.भा. -11.5.38 - प्रथम पादः
112. ओ-1, ओ-2, ओ-3, ना- यत्र संकीर्त्तनेनैव हरिर्दस्यत्यसंभवम् ।
113. तु.भा. -11.5.36 - द्वितीय पादः
114. ओ-1, ओ-2, ओ-3, ना - किल
115. तु.भा. -11.5.38 - द्वितीय पादः
116. तु.भा. -11.5.39 - प्रथम पादः
117. तु.भा. -1.18.7
118. ना - परिक्षित्
119. तु.भा. (1.18.8) - किं नु
120. तु.भा. (1.18.8) - शूरेण
121. तु.भा. (1.18.8) - धीर । ओ-1, ओ-2, ओ-3 - धर्म । अत्र भागवताधारेण पाठः साधीयान् ।

किन्तु तेन तावद्बालेष्वधीरेषु अप्रमत्तोऽवहितः सन्यो वृक इव वर्त्तते अथातिशयज्ञानवत्त्वेन सर्वशरीरेभ्यो नृशरीरं श्रेष्ठमित्याह एकादशे नवमेऽध्याये अवधूतेतिहासप्रस्तावे उद्धवं प्रति भगवद्वाक्येन—

सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या
वृक्षान्सरीसृपपशून् खगदंशमत्स्यान् ।
तैस्तैरतुष्टहृदयः पुरुषं विधाय
ब्रह्मावलोकधीषणं मुदमाप देवः ॥५७॥[122]

पुराणि शरीराणि पुरुषं पुरुषदेहं ब्रह्मणोवलोकायापरोक्षा या धिषणा बुद्धिर्यस्मिन् । भगवतोऽपि पौरुषी तनुः प्रियेत्याह द्वाभ्याम् एकादशे सप्तमेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

एकद्वित्रिचतुष्पादा[123] बहुपादास्तथापदः ।
बह्व्यः सन्ति[124] पुरः सृष्टास्तासां मे पौरुषी प्रिया ॥५८॥

मे मम पौरुषी पुरुषतनुः । प्रियत्वे हेतुमाह—

अत्र मां[125] मृगयन्त्यद्धा युक्ताहेतुभिरीश्वरम् ।
गृह्यमाणैर्गुणैर्लिङ्गैरग्राह्यमनुमानतः ॥५९॥

अत्र पौरुष्यां पुरि[126] युक्ता अप्रमत्ताः । अग्राह्यं ग्राहेभ्योहङ्कारादिभ्यो व्यतिरिक्तं माम् अद्धा साक्षान्मृगयन्ति गृह्यमाणैर्बुद्ध्यादिभिर्गुणैर्हेतुभिः जडानां प्रकाशः स्वप्रकाशमेकं विना न घटत इति अनुपपत्तिमुखेन लक्षणैस्तथा तैरेव लिङ्गैः व्याप्तिमुखेनानुमानेनेश्वरं प्रवर्त्तकं मृगयन्ति। ज्ञानभक्त्योः प्राप्तिसाधनमेतदेवेत्याह एकादशे विंशेऽध्याये उद्धवं प्रति भगवद्वाक्येन द्वाभ्याम् ।

अस्मिन् लोके वर्त्तमानः स्वधर्मस्थोऽनघः शुचिः ।
ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया ॥६०॥[127]

किञ्च अस्मिंल्लोकेऽस्मिन्नेव देहे अनघो निषिद्धत्यागी शुचिनिवृत्तरागादिमलः यदृच्छयेति केवलज्ञानादपि भक्तेर्दुर्लभतां द्योतयति । अस्य देहादिदुर्लभतामाह—

122. तु.भा. -11.9.28
123. तु.भा. -11.7.22 - पादो
124. ना - नास्ति
125. तु.भा. -11.7.23 - मार्गे
126. ना - पुरी
127. तु.भा. -11.20.11

स्वर्गिणोऽप्येतमिच्छन्ति लोकं निरयिणस्तथा ।
साधकं ज्ञानभक्तिभ्यामुभयं तदसाधनम्[128] ॥६१॥

निरयिण इति दृष्टान्तत्वेनोक्तम् । ज्ञानभक्तिभ्यां ज्ञानिभक्तयोः तदुभयं स्वर्गिनारकि शरीरम् । एतत् स्पष्टयति पञ्चमे ऊनविंशेऽध्याये[129] देवानां वाक्येन ।

अहो अमीषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः ।
यैर्जन्म लब्धं नृषु भारतेऽजिरे
मुकुन्दसेवौपयिकस्पृहा हि नः ॥६२॥[130]

अमीषाममीभिः[131] तदस्विदथवा स्वयमेव साधनं विनैव हरिरेषां प्रसन्नोभूत् । एवंभूतस्य[132] पुण्यस्य दुष्करत्वात् भारतेऽजिरे भारताङ्गणेन अस्माकं केवलं[133] स्पृहैव यत्र तन्मुकुन्दसेवोपयोगिनृषु जन्म यैर्लब्धम् । लब्धमानुष्येण[134] करणीयमाह एकादशे नवमेऽध्याये अवधूतेतिहासप्रस्तावे उद्धवं प्रति भगवद्वाक्येन—

लब्धा सुदुर्लभमिदं बहुसम्भवान्ते
मानुष्यमर्थदमनित्यमपीह धीरः ।
तूर्णं यतेत न पतेदनुमृत्यु याव-
न्निःश्रेयसाय विषयः खलु सर्वतः स्यात् ॥६३॥[135]

बहूनां सम्भवानां जन्मनामन्ते मानुष्यमनित्यमप्यर्थदं पुरुषार्थ-प्रापकं दैवाल्लब्धा अनुमृत्यु अनु निरन्तरं मृत्यवो यस्य तत् यावन्नपतेत्तावदेव तूर्णं शीघ्रं निःश्रेयसाय यतेत विषयः[136] सर्वतः पश्वादियोनिषु स्यादेव लब्धनृदेहमप्यप्रयतमानं प्रमत्तं निन्दति एकादशे विंशेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

---

128. तु.भा. -11.20.12 - साधकम्
129. ना - ऊनविंशेऽध्याये इति नास्ति
130. तु.भा. -5.19.21
131. ओ-1, ओ-2, ओ-3 - अनीधनं इति अधिक पाठः दृश्यते ।
132. ओ-1, ओ-2, ओ-3 - एवं तस्य
133. ओ-1, ओ-2, ओ-3 - सुदुर्लभं इत्यधिकपाठः
134. ओ-1, ओ-2, ओ-3 - मानुष्येन
135. तु.भा. -11.9.29
136. ओ-1, ओ-2, ओ-3 - पुनः इति अधिकम्

नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्यं[137] गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत्स आत्महा ॥६४॥

नृदेहं प्लवं नावं प्राप्येत्यध्याहारः यो भवाब्धिं न तरेत्स आत्महा । आद्यं सर्वफलानां मूलं एतदुपार्जितकर्मभिः सर्वप्राप्त्यै । किञ्च सुदुर्लभम् उद्यमकोटिभिरपि प्राप्तुमशक्यं तथापि सुलभं यदृच्छया लब्धत्वात् किञ्च सुकल्यं पटुतरं किञ्च गुरुः संश्रितमात्र एवं कर्णधारो नेता यस्य तं मया च स्मृतमात्रेणानुकूलेन मारुतेन प्रेरितम् अत्रात्मानमजानतो न क्वचित् क्षेममित्याह षष्ठे षोडशेऽध्याये चित्रकेतुं प्रति श्रीसङ्कर्षणवाक्येन—

लब्ध्वेह मानुषी योनिं ज्ञानविज्ञानसम्भवाम् ।
आत्मानं यो न जानाति[138] न क्वचित् क्षेममाप्नुयात् ॥६५॥

ज्ञानं शास्त्रोत्थं विज्ञानं परोक्षं तयोः सम्भवो यस्यां ताम् । किञ्च यस्य कर्म धर्माद्यर्थं न भवति स जीवन्मृत एवेत्याह तृतीये त्रयोविंशेऽध्याये कर्दमं प्रति देवहूतिवाक्येन ।

नेह यत् कर्म धर्माय न विरागाय कल्पते ।
न तीर्थपदसेवायै जीवन्नपि मृतो हि सः ॥६६॥[139]

स्वभावतः प्रवृत्तं यस्य कर्म धर्माद्यर्थं न कल्पते धर्माभिमुखं न भवेत् तत्रापि निष्कामद्वारा विरागाय न कल्पते तद्वारा तीर्थपदस्य हरेः सेवार्थं न पर्यवस्येदित्यर्थः । यस्मान्नृदेहादेव सकलं ज्ञानादिकं सम्भवति तस्मादयं विषयार्थो न भवतीत्याह पञ्चमे पञ्चमेऽध्याये भरतादिपुत्रशतं प्रति श्रीऋषभदेववाक्येन—

नायं देहो देहभाजां नृलोके
कष्टान् कामानर्हते विड्भुजां[140] ये ।
तपो दिव्यं पुत्रकामेन[141] सत्यं
शुद्ध्येद्यस्माद्ब्रह्मसौख्यं त्वनन्तम् ॥६७॥

विड्भुजा[142]मपि ये सन्ति तान् कष्टान् कामान्विषयान्नार्हते तद्योग्योयं मनुष्यदेहेन

---

137. भा.-11.20.17 - कल्पं
138. भा. (6.16.58) - बुद्ध्येत
139. तु.भा. -3.23.56
140. ओ-1, ओ-2, ओ-3 - विभ्भुजां
141. भा. (5.5.1) - पुत्रकायेन
142. ओ-1, ओ-2, ओ-3 - विभ्भुजा

न भवति । दिव्यमुत्कृष्टं येन तपसा यस्माच्छुद्धसत्त्वादनन्तरं ब्रह्मसुखं भवति । तस्मात्साधूक्तं मुकुन्दसेवौपयिकमिति । अथ मानुष्यदेहे गार्हस्थ्यस्य प्रशंसामाह तृतीये चतुर्विंशेऽध्याये दितिं प्रति काश्यपवाक्येन—

सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान् ।
व्यसनार्णवमत्येति जलयानैर्यथार्णवम् ॥६८॥[143]

सर्वाश्रमानुपादायेति तानप्यन्नादिदानेन कृच्छ्रतस्तीरयन् स्वयं कृच्छ्रं तरतीत्यर्थः । ननु गृहेषु वर्त्तमानस्य भोगान् भुञ्जानस्य कुतोऽभि-मानाभावो भगवद्रतिर्वा अतस्तदपायेन वनवास एव युक्तस्तत्राह पञ्चमे प्रथमेऽध्याये प्रियव्रतं प्रति ब्रह्मवाक्येन द्वाभ्याम्—

भयं प्रमत्तस्य वनेष्वपि स्याद्यतः
स आस्ते सहषट्सपत्नः ।
जितेन्द्रियस्यात्मरतेर्बुधस्य
गृहाश्रमः किन्नु करोत्यवद्यम् ॥६९॥[144]

भयं संसारात् स्यादेव प्रमत्तस्य जितेन्द्रियस्य । वनेष्विति सङ्गभयात्[145] वनाद्वनान्तरं गच्छतोपीत्यर्थः[146] सहैव षट्सपत्नाः शत्रवो मनो बुद्धीन्द्रियाणि च यस्य स तथाभूत एव वनेष्वपि यत् आस्ते बुधत्वेन जितेन्द्रियत्वादात्मारामस्यावद्यं रागादिदोषम् । ननु गृहे वर्त्तमानस्य रागादयः सम्भवन्ति न तु वन इत्याशङ्क्याह—

यः षट्सपत्नान्विजिगीषमाणो
गृहेषु निर्विश्य यतेत पूर्वम् ।
अत्येति दुर्गाश्रित ऊर्जितारीन्
क्षीणेषु कामं विचरेद्विपश्चित् ॥७०॥[147]

यो जिगीषमाणः स पूर्वं गृहेषु[148] स्थित्वा तोषमत्यन्तं विरोधमकुर्वन् यतेत क्षीणेष्वरिषु कामं गृहेष्वन्यत्रवापि चरेत् यतो लोके दुर्गाश्रित ऊर्जितारीनत्येति जयति पश्चाद्दुर्गेऽन्यत्र वा वर्त्तते युध्येतेति पाठे प्रहरेदित्यर्थः—

143. तु.भा. -3.14.17
144. तु.भा. -5.1.17
145. ओ-1, ओ-2, ओ-3 - सङ्गभङ्गक्षयानान्तरं
146. ओ-1, ओ-2, ओ-3 - गच्छतोपित्यर्थः
147. तु.भा. -5.1.18
148. ओ-1, ओ-3 - गृहे

यदा कदाचिज्जीवात्मा सञ्चर[149]न्निज[150] कर्मभिः ।
नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत् ॥७१॥
जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ।
यद्यस्य न भवेत्स्तम्भस्तत्रायं[151] मदनुग्रहः ॥७२॥[152]

अनीशः परवशः सन् निजैः कर्मभिर्नानायोनिषु कृमिकीटादिषु सञ्चरन् तत्र पौरुष्यां गतौ जन्मादिभिरस्य यदि स्तम्भो न जायते तत्रायं मदनुग्रह एव । ननु जन्मादिभिर्गुणैरधिकाधमसमेषु असूयातिरस्कारस्पर्धा भवन्त्येव कथं ताः परिहार्यास्तत्रोपायमाह चतुर्थेऽष्टमेऽध्याये ध्रुवं प्रति नारदवाक्येन—

गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् ।
मैत्रीं समानादन्विच्छन्न तापैरभिभूयते ॥७३॥[153]

गुणैरधिकात्पुंसमिति ल्यबलोपे पञ्चमी । तं दृष्ट्वा प्रीतिं कुर्यात् नत्वसूयामित्यर्थः। अनुक्रोशं कृपां लिप्सेत न तु तिरस्कारं समानात् मैत्रीं न तु स्पर्धाम् । प्रसङ्गात् गार्हस्थ्यस्य प्रशंसा कृता । सतां[154] पुनर्गृहेष्वभिनिवेशो न सम्भवतीत्याह द्वाभ्यां पञ्चमे प्रथमेऽध्याये श्रीशुकं प्रति परीक्षिद्वाक्येन—

न नूनं मुक्तसङ्गानां तादृशानां द्विजर्षभ ।
गृहेष्वभिनिवेशोऽयं पुंसां भवितुमर्हति ॥७४॥[155]

गृहासक्तिर्हि कुटुम्बादिस्पृह्या भवति सा च तेषां नास्तीत्याह ।

महतां खलु विप्रर्षे उत्तमश्लोकपादयोः ।
छायानिवृत्तचित्तानां[156] न कुटुम्बस्पृहामतिः ॥७५॥[157]

---

149. भा. (8.22.25) - संसरन्
150. ना, ओ-1, ओ-2, ओ-3 - ग्रन्थेषु...न्निह...इति पाठो दृश्यते, भागवते...न्निज...तथा प्रस्तुतग्रन्थश्लोकवृत्तौ च...न्निज...इति पाठो दृश्यते । अतो...न्निज इति पाठः साधीयान् । भागवतश्लोकटीकाधारेण गृहीतोऽयं पाठः ।
151. ओ-1, ओ-2, ओ-3 - त्राय
152. तु.भा. -4.8.34
153. तु.भा. -8.22.26
154. ओ-1, ओ-2, ओ-3 - सङ्ग
155. तु.भा. -5.1.2
156. ओ-1, ओ-2, ओ-3 - चिन्तानां
157. तु.भा. -5.1.3

उत्तमश्लोकपादयोश्छायासन्तापहारिणी तया निवृत्तं चित्तं[158] येषां स्पृहा युक्तमतिर्नास्ति । तत्र शिष्टाचारं प्रमाणयति द्वाभ्यां तत्रैव चतुर्दशेऽध्याये शुकवाक्येन—

यो दुस्त्यजान्दारसुतान् सुहृद्राज्यं हृदिस्पृशः ।
जहौ[159] युवैव मलवदुत्तमश्लोकलालसः ॥७६॥[160]

सुहृद्राज्ययोर्द्वन्द्वैक्यं यो भरतो दुस्त्यजान्दारादीन्विष्ठामिव जहौ तस्यानुवर्त्मनान्यो नृपोऽर्हतीति पूर्वेण सम्बन्धः । दुस्त्यजत्वहेतुः हृदिस्पृशः मनोज्ञात् उत्तमश्लोके लालसा लम्पटत्वं यस्य स महान् लालसा द्वयोरित्यमरः । तस्य विषयत्यागो न चित्रमित्याह—

यो दुस्त्यजान् क्षितिसुतान्[161] स्वजनार्थदारान्
प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम् ।
नैच्छन्नृपस्तदुचितं महतां मधुद्विट्
सेवानुरक्तमनसामभवोऽपि फल्गुः ॥७७॥

स एवंभूतो नृपः क्षित्यादीनैच्छदिति यत्तदुचित्तं सदयावलोकां भरतस्य दया यथा भवति एवमवलोको यस्याः परिजनावलोकः श्रियः उपचर्यते यतो मधुद्विषः सेवायामनुरक्तं मनो येषां महतामभवोऽपि फल्गुस्तुच्छ एव हरिसेवापराणां मोक्षोऽप्यनादरमाह तृतीये ऊनत्रिंशेऽध्याये देवहूतिं प्रति श्रीकपिलवाक्येन—

सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥७८॥[162]

सालोक्यं मयासहैकस्मिन् लोके निवासः । सार्ष्टिः समानैश्वर्यं सामीप्यं निकटवर्त्तित्वं सारूप्यं समानरूपता एकत्वं सायुज्यं ततोऽपि दीयमानमपि न गृह्णन्ति कुतस्तत्कामनेत्यर्थः । यत एवंभूतं हरेः सेवनम् अतस्तस्य तोषणमेव धर्मस्य फलं नार्थकामादिकमित्याह प्रथमे द्वितीयेऽध्याये शौनकादीन् प्रति सूतवाक्येन—

अतः पुम्भिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ।
स्वनुष्ठितस्य धर्मस्य संसिद्धर्हरितोषणम् ॥७९॥[163]

---

158. ओ-1, ओ-2, ओ-3 - वितं
159. ना - 'अहो' इति लिपिकर प्रमादः
160. तु.भा. -5.14.43
161. तु.भा. -5.11.44 - सुत
162. तु.भा. -3.29.13
163. तु.भा. -1.2.13

हे द्विजश्रेष्ठा हरेः तोषणं संसिद्धिः फलम् । हरौ तुष्टे किमित्यपेक्षाया-माह सप्तमे षष्ठेऽध्याये असुरबालकान् प्रति प्रह्लादवाक्येन—

तुष्टे च तत्र किमलभ्यमनन्त ईशे[164]
किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः ।
धर्मादयः किमगुणेन च काङ्क्षितेन
सारं जुषां चरणयोरुपगायतां नः ॥८०॥

तुष्टे च तत्र तस्मिन् हरौ किमलभ्यं तथापि गुणपरिणामाद्दैवादेव स्वसिद्धा ये धर्मास्तैः[165] किम् अगुणेन च मोक्षेण काङ्क्षितेनापि किं तमुपगायतां नः अस्माकम् अनाकाङ्क्षितस्यापि सिद्धेः किम्भूतानां तस्य चरणयोः सारं जुषां सुधां सेवमानानाम्। एवंभूतस्य हरितोषस्य साधनमाह चतुर्थे एकत्रिंशेऽध्याये प्रचेतसः प्रति नारदवाक्येन—

दयया सर्वभूतेषु सन्तुष्टया येन केन वा ।
सर्वेन्द्रियोपशान्त्या च तुष्यत्याशु जनार्दनः ॥८१॥[166]

दयादिभिराशु शीघ्रं तुष्यति। इन्द्रियाणामनुपशान्तिः संसारहेतुरित्याह द्वाभ्यां चतुर्थे द्वाविंशेऽध्याये पृथुं प्रति सनत्कुमारवाक्येन—

इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः ।
चेतनां हरते बुद्धेः स्तम्भस्तोयमिव ह्रदात् ॥८२॥[167]

ध्यायतां गुणारोपणं स्मरतां पुंसामिन्द्रियाणि स्मृतैर्विषयैराक्षिप्यन्ते। तैरिन्द्रियैर्मन आक्षिप्यते विषयासक्तिं प्राप्यते तच्च बुद्धेः सकाशात्तद्धर्मं चेतनाविचारं सामर्थ्यं हरति ।

एतच्च विवेकानां न लक्ष्यत इति दृष्टान्तेनाह तीरजः कुशादि-स्तम्बो यथा मूलैस्तोयं ह्रदादपहरति तद्वत्—

भ्रश्यत्यनुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये ।
तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः ॥८३॥[168]

चित्तं चेतनामनु तस्यां चेतनायाम् अपहृतायां[169] स्मृतिः पूर्वापरानुसन्धानं भ्रश्यति

---

164. तु.भा. -7.6.25 - आद्ये
165. ओ-1, ओ-2, ओ-3 - धर्मोदयस्तै
166. तु.भा. -4.13.19
167. तु.भा. -4.22.80
168. तु.भा. -4.22.31
169. ना- अपहतायां

तद्रोधं ज्ञानं भ्रंशमात्मन एव हेतो रात्मनो जीवस्यापह्नवं नाशं प्राहुः । इन्द्रियेष्वपि मनसः शान्तौ न किञ्चित्करणीयमस्तीत्याह एकादशे त्रयोविंशेऽध्याये भिक्षुवाक्यमित्युद्धवं प्रति भगवद्वाक्येन—

समाहितं यस्य मनः प्रशान्तं
दानादिभिः किं वद तस्य कृत्यम् ।
असंयतं यस्य मनो विनश्यद्
दानादिभिश्चेदपरं किमेभिः ॥८४॥[170]

यस्य मनः समाहितं भवति तस्य किं कृत्यमस्ति वदेति परं प्रत्युपदिशन्निव स्वयमेवाह । असंयतं विक्षिप्तं चेद्विनश्यदालस्यादिना[171] लीयमानं चेद्भवति तर्हि एभिर्दानादिभिः प्रयोजनं किमपरं स्यान्न किञ्चिदपीत्यर्थः । यतो बन्धमोक्षयोर्मन एव हेतुरित्याह तृतीये पञ्चत्रिंशेऽध्याये देवहूतिं प्रति श्रीकपिलवाक्येन—

चेतः खल्वस्य बन्धाय मुक्तये चात्मनो मतम् ।
गुणेषु सक्तं बन्धाय रतं वा पुंसि मुक्तये ॥८५॥[172]

पुंसि परमेश्वरे मुक्तये बन्धमोक्षाय । अतो मनो नियन्तव्यमिति प्रकरणार्थमुपसंहरति । तृतीये सप्तविंशेऽध्याये देवहूतिं प्रति श्रीकपिल-वाक्येन—

अत एव शनैश्चित्तं प्रसक्तमसतां पथि ।
तीव्रेण[173] भक्तियोगेन विरक्त्या च नयेद्वशम् ॥८६॥

अतो गुणसक्तं मनो बन्धाय अत एव द्रुतनियमेन असामर्थ्यं द्योतयति शनैरिति । असतामिन्द्रियाणां पथि विषयमार्गे तीव्रेण व्रतेन विरक्त्या च तीव्रया तावत्यैव सर्वानर्थानिवृत्तिरीश्वरस्फूर्त्तिश्चेति भावः ।

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
पुराणादिप्रशंसाख्या सम्पूर्णा प्रथमा कला ॥
इति प्रथमा कला ॥[174]

***

170. तु.भा. -11.23.47
171. ओ-1, ओ-3 - दालस्यादिना इति नष्टः
172. तु.भा. -3.25.15
173. भा. -3.27.5 - भक्तियोगेन तीव्रेण
174. ना - 'इति प्रथमाक कला' इति पाठः अधिकः । सोऽत्र प्रदत्तः ।

[1]द्वितीया कला

द्वितीयायामिहामुष्मिन्विरक्तो गुरुसेवनात् ।
सद्धर्मजातया भक्त्या तरेन्मायामितीर्यते ॥१॥

सद्धर्मो भागवतधर्मः। पूर्वकलान्ते भक्तियोगेन विरक्त्या च मनोवशंनयेदित्युक्तम्। तत्र को भक्तियोगः का वा विरक्तिरित्यपेक्षायां भक्तेः पुरुषार्थत्वान्नानाविधभेद-वत्त्वात्तन्निरूपणं पश्चात्कर्त्तव्यमस्यां विरक्तिः निरूप्यते । प्रथमं रागागारस्य देहस्य पारतन्त्र्यमाह पञ्चमे प्रथमेऽध्याये प्रियव्रतं प्रति ब्रह्मवाक्येन—

भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदा भयाय ।
सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनताङ्ग धत्ते ॥२॥[2]

भवो जन्म अभवो मोक्षः भवाद्यर्थमव्यक्तेनेश्वरेण दिष्टं दत्तं देहयोगं जनता जनसमूहः धत्ते । नत्वन्यथाकर्तुं शक्नोति अङ्ग हे प्रियव्रत। भोगस्यापि पारतन्त्र्यमाह तत्र तद्वाक्येन—

ईशाभिसृष्टं ह्यवरुन्ध्महेऽङ्गदुःखं सुखं वा गुणकर्मसङ्गात् ।
आस्थाय तत्तद्यतयुङ्क्त नाथश्चक्षुष्मतान्धा इव नीयमानाः ॥३॥[3]

ईशेनेश्वरेणाभिसृष्टं दत्तमेवारुध्महे स्वीकुर्मः । यथा स्वामिना दत्तमेव कणिशादि बलीबर्दा भक्षयन्ति न तु स्वेच्छया तद्वत् न चैवं वैषम्यमीश्वरस्य यतो गुणकर्मसङ्गात् यत् यतो नाथो देवस्तिर्यगादि लक्षणं देहमयुक्तं योजितवान् तत्तदास्थाय स्वीकृत्य यथा अन्धाश्चक्षुष्मताच्छायामातपं वा नीयमानाः सन्तः। नन्वेतत्सर्वमविदुष एव नत्वात्मविद इत्याह तद्वाक्येन—

मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः ।
यथानुभूतं प्रतियातनिद्रः किं त्वन्यदेहाय गुणान्नवृङ्क्ते ॥४॥[4]

यत्प्रारब्धं कर्म तावत् यथा स्वप्नेऽनुभूतं प्रतियातनिद्रो गतनिद्रोऽभिमानशून्य एवानुस्मरति। तर्हि भोगवासनया पुनर्जन्म भवेत्तत्राह । किन्तु देहान्तरारम्भकान् विकर्माणि वासनाश्च न वृङ्क्ते न भजते । तत्र विकर्मभजने दोषमाह पञ्चमे पञ्चमेऽध्याये भरतादिपुत्रशतं प्रति श्रीऋषभदेववाक्येन—

1. ना. इति ग्रन्थे 'अथ' अधिकपाठोऽस्ति ।
2. तु.भा. 5.1.13
3. तु.भा. 5.1.15
4. तु.भा. 5.1.16

नूनं प्रमत्तः कुरुते विकर्म यदिन्द्रियप्रीतय आपृणोति[5] ।
न साधु मन्ये यत आत्मनोऽयमसन्नपि क्लेशद आत्मदेहः[6]।।५।।

यद्यदा इन्द्रियप्रीतय आपृणोति व्याप्रियते । तदा प्रमत्तस्सन् विकर्म पापं नूनं कुरुते यतो विकर्मणः प्राचीनादयं क्लेशदो देहो जातः तस्यैव पुनःकरणं न साधु मन्यते भगवद्भक्तियुक्तसच्छरीरहेतुभूत-सत्कर्म-करणे न कापि हानिरिति भावः । न केवलं देहमात्र एव अर्थान्तरं चेत्याह तत्र तद्वाक्येन—

यदा न पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् ।
गतस्मृतिर्विन्दति तत्र तापानासाद्य मैथुन्यमगारमज्ञः ।।६ ।।[7]

यदा गुणानामिन्द्रियाणामीहां चेष्टाम् अयथा मिथ्या आत्मीया न भवतीति विवेकी सन्नपश्यति पश्यतीति पाठे अयथा आत्मीयत्वेनेत्यर्थः तदा तदागतस्मृतिशून्यः सन् अज्ञो मूढः मैथुन्यसुखप्रधानं गृहं प्राप्य तापान्विन्दति विकर्मणः क्लेशददेहहेतूनां प्रपञ्चलब्धस्य देहस्येश्वरसेवां विना वृथायुर्व्ययप्रकारमाह त्रिभिः । सप्तमे षष्ठेऽध्यायेऽसुरबालकान् प्रति प्रह्लादवाक्येन—

पुंसो वर्षशतं ह्यायुस्तदर्धं मजितात्मनः ।[8]
निष्फलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः ।।७।।

यद्यस्माच्छेते-

मुग्धस्य बाल्यकैशोरे[9] क्रीडतो याति विंशतिः ।
जरया ग्रस्तदेहस्य यात्यकल्यस्य विंशतिः ।।८ ।।

अकल्यस्यासमर्थस्य ।

दुरापूरेण कामेन मोहेन च बलीयसा ।
शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ।।९ ।।[10]

दुरापूरेण दुःखैः समन्तादापूर्यमाणेन । कामस्य दुष्पूरतामाह द्वाभ्यां नवमे ऊनविंशेऽध्याये देवयानीं प्रति ययातिवाक्येन—

---

5. ना- आवृणोति
6. तु.भा. 5.5.4 - आस
7. तु.भा. 5.5.7
8. तु.भा. 7.6.6 - चाजितात्मनः
9. तु.भा. 7.6.7 - कौमारे
10. तु.भा. 7.6.8

यत्पृथिव्या व्रीहियवं हिरण्यं पशवः[11] स्त्रियः ।
न दुह्यन्ति मनः प्रीतिं पुंसःकामहतस्य ते ॥१०॥[12]

मनसः प्रीतिं न दुह्यन्ति तृप्तिं नोत्पादयन्ति ।

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥११॥[13]

क्रोधस्य दोषमाह एकादशे चतुर्थेऽध्याये[14] नारायणं प्रति कदर्यादीनां वाक्यमिति निमिं प्रति द्रविडवाक्येन—

क्षुत्तृट्त्रिकालगुणमारुत जैह्वयशैशन्या-
नस्मान[15]पारजलधीनतितीर्य केचित् ।
क्रोधस्य यान्ति विफलस्य वशं पदे गो-
र्मज्जन्ति दुःश्चरतपश्च वृथोत्सृजन्ति ॥१२॥[16]

यच्च तृट्त्रिकालगुणाश्च शीतोष्णवर्षाश्च प्राणोवाद्यो वा जिह्वा जिह्वोपभोगाः शैश्नाः शिश्नोपभोगाः एतानस्मानपारजलधिरूपानतितीर्यविलङ्घ्य गोष्पदे मज्जन्ते कुतः क्रोधस्य विफलस्य वशं यान्ति गच्छन्ति किञ्च जले मज्जन्तो यथा विवशाः स्वमस्तकारोपितं भारमृत्सृजन्ति तथा वृथा न मोक्षाय न भोगाय शापादिना दुश्चरं तप उत्सृजन्ति। लोभस्य क्रोधमाह एकादशे त्रयोविंशेऽध्याये कदर्यब्राह्मण-वाक्यमिति उद्धवं प्रति भगवद्वाक्येन—

यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः ।
लोभः[17] स्वल्पोऽपि तान् हन्ति श्वित्रं[18] रूपमिवेप्सितम् ॥१३॥

श्वित्रं श्वेतकुष्ठम् । देहाद्यनुरागो मोहस्य कारणमाह अष्टमे षोडशेऽध्याये अदितिं प्रति कश्यपवाक्येन—

---

11. ना. पणवः
12. तु.भा. 9.19.13
13. तु.भा. 9.19.14
14. ओ-2 चतुर्थेऽध्याये इति नष्टः ।
15. ओ-1, ओ-2, ओ-3, - भोगान्
16. तु.भा. 11.4.11
17. ओ-1, ओ-3, - तेभ्यः
18. तु.भा. 11.23.16 - श्वित्रो

क्व देहो भौतिकोऽनात्मा क्वचात्मा प्रकृतेः परः ।
कस्य के पतिपुत्राद्या मोह एवहि[19] कारणम् ॥१४॥

अनात्मा आत्मभिन्नः श्रीमदस्य दोषानाह द्वाभ्यां दशमे दशमेऽध्याये नलकूबरशापप्रस्तावे नारदवाक्येन—

न ह्यन्धो[20] जुषतो जोष्यान् बुद्धिभ्रंशो रजोगुणः ।
श्रीमदादाभिजात्यादिर्यत्र स्त्रीद्यूतमासवः ॥१५॥

जोष्यान् प्रियान् विषयान् सेवमानस्य पुंसः श्रीमदादन्य आभिजात्यादिः सत्कुलविद्यादिजनितमदः अल्पो वा रजो गुणः रजः काये हास्यदर्पादिरूपः नहि तथा बुद्धिभ्रंशः बुद्धिं भ्रंशयति यथा श्रीमद एवेति तदाह—

हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः ।
मन्यमानैरिमं देहमजरात्मृत्युनश्वरम् ॥१६॥[21]

यत्र श्रीमदे इमं नश्वरं नाशस्वभावं देहम् अजरामृत्युं यथा तथा मन्यमानै[22]र्निर्दयैरजितेन्द्रियैः पशवो हन्यन्ते । महतामपि स्थानभ्रंशः श्रीमदादेवेत्याह दशमे त्रिसप्ततितमेऽध्याये जरासन्धनिबद्धान् राज्ञः प्रति भगवद्वाक्येन—

हैहयो नहुषो वेनो रावणो नरकोऽपरे ।
श्रीमदाद्भ्रंशिताः स्थानाद्देवदैत्यनरेश्वराः ॥१७॥[23]

हैहयः कार्तवीर्यश्चक्रवर्त्ती नरेश्वरः उन्मत्तः पितुः कामधेनुहरणात् परशुरामेण हतः नहुषो देवेन्द्रतां प्राप्तः उन्मत्तः शचीसङ्गाय ब्राह्मणान् शिविकां वाहयित्वा तैरेव ततो भ्रंशितोऽजगरत्वमाप। वेनोप्युन्मत्तो ब्राह्मणानधिक्षिपन् तैरेव हुंकृतैर्हतः। रावणो राक्षसेश्वरः सीतामभिलषन् राघवेण हतः । नरको[24] दैत्येश्वरोऽदिति कुण्डलाद्य-हरणान्मयैव हतः। अपरेऽपि मदात्तत्स्थानाद्भ्रंशिताः इदानीं धनदोषानाह एकादशे त्रयोविंशेऽध्याये कदर्यब्राह्मणवाक्यमित्युद्धवं प्रति भगवद्वाक्येन त्रिभिः ।

---

19. तु.भा. 8.16.19
20. तु.भा. 10.10.8 - ह्यन्यो
21. तु.भा. 10.10.9
22. ना-मय । परन्तु ओ-1, ओ-2, ओ-3, भागवते 10.10.9 ग्रन्थे तथा टीकाधारेण 'मन्य' इति पाठः गृहीतः ।
23. तु.भा. 10.73.20
24. ओ-1, ओ-2, ओ-3, - नरको..... हत इति पर्यन्तं नष्टम् ।

अर्थस्य साधने सिद्धे उत्कर्षे रक्षणेव्यये[25] ।
नाशोपभोग आयासस्त्रासश्चिन्ता भ्रमो नृणाम् ॥१८॥[26]

सिद्धेऽप्यर्थे तस्योत्कर्षे संवर्धने । नाशोपभोगयोर्द्वन्दैक्यं नाशे उपभोगे चेत्यर्थः । साधनोत्कर्षयोरायासस्ततस्त्रासश्चिन्ता च नाशो भ्रम इति।

स्तेयं हिंसानृतं दम्भः कामः क्रोधः स्मयो मदः ।
भेदो वैरमविश्वासः[27] संस्पर्धाव्यसनानि च ॥१९॥[28]

किञ्च अर्थप्राप्त्यर्थाः स्तेयादयः षडनर्थाः । प्राप्तेऽर्थे स्मयादयो व्यसनैः सह नव व्यसनानि स्त्रीद्यूतमद्यविषयाणि त्रीणि—

एते पञ्चदशानर्था ह्यर्थमूला मता नृणाम् ।
तस्मादनर्थमर्थाख्यं श्रेयार्थी दूरतस्त्यजेत् ॥२०॥[29]

असत्पुत्रदोषानाह चतुर्थे त्रयोदशेऽध्याये वेनापनयसंतप्तस्याङ्गराजस्य वाक्येन त्रिभिः।

प्रायेणाभ्यर्चितो देवो येऽप्रजागृहमेधिनः ।
कदपत्यभृतं दुःखं ये न विन्दन्ति दुर्धरम्[30] ॥२१॥

योऽप्रजागृहमेधिनस्तैर्देवोऽभ्यर्चितः। कुत्सितैरपत्यैः सम्भूतं धारयितुमशक्यं दुःखं येन विन्दन्ति ।

यतः पापीयसी कीर्त्तिरधर्मश्च महानृणाम्[31] ।
यतो विरोधः सर्वेषां यत आधिरनन्तकः ॥२२॥

सर्वेषां सर्वैः सह । आधिर्मानसीव्यथा ।

कस्तं प्रजापदेशं वै मोहबन्धनमात्मनः ।
पण्डितो बहु मन्येत यदर्थाः क्लेशदा गृहाः ॥२३॥[32]

तं प्रजापदेशं पुत्रनामानमत्यात्मनो मोहेन बन्धनं यदर्थो यन्निमित्ता क्लेशदा गृहा भवन्ति-

25. ना- व्यये
26. तु.भा. 11.23.17
27. ओ-2 - वै इति नष्टः
28. तु.भा. 11.23.18
29. तु.भा. 11.23.19
30. तु.भा. 4.13.43 - दुर्भरम्
31. तु.भा. 4.13.44 - महान्नृणाम्
32. तु.भा. 4.13.45

इदानीं स्त्रीदोषान्निरूपयति । तत्र स्त्रीचेष्टितस्य दुर्ज्ञेयतामाह। षष्ठेऽष्टादशेऽध्याये दितिं प्रति कश्यपस्य परितापवाक्येन—

शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतम् ।
हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितम् ॥२४॥[33]

शरत्पद्मस्येवोत्सवो विकासो यस्मिन् क्षुरधारोपमश्चित्तम् । स्त्रीजितस्य सर्वं साधनं व्यर्थमित्याह- एकादशे षड्विंशेऽध्याये जातनिर्वेदस्य पुरूरवसो वाक्येन—

किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा ।
किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतम् ॥२५॥[34]

त्यागेन संन्यासेन[35] विविक्तेन एकान्तसेवया मौनेन वाङ्नयनेन बन्धक्लेशयोः[36] स्त्रीसङ्गतत्सङ्गिसङ्गौ हेतू इत्याह एकादशे चतुर्थेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

न तथास्य भवेत्क्लेशो बन्धश्चान्यप्रसङ्गतः ।
योषित्सङ्गाद्यथा पुंसो यथा तत्सङ्गिसङ्गतः ॥२६॥[37]

अस्य पुंसो यथा योषित् सङ्गाद्बन्धो भवेत् यथा तत्सङ्गिसङ्गतः क्लेशो भवेत् तथा अन्यप्रसङ्गतो न भवेत् । तस्मात् स्त्रीलोलुपस्याधो गमनं सदृष्टान्तमाह एकादशेऽष्टमेऽध्याये यदुं प्रत्यवधूतवाक्येन—

दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः ।
प्रलोभितस्तमस्यन्धे[38] पतत्यग्नौ[39] पतङ्गवत् ॥२७॥

तस्या भावैः प्रलोभितः अन्धे तमसि पतति । योषितीव हिरण्यादि-द्रव्येष्वासक्तो नश्यति । तत्र तद्वाक्येन—

योषिद्धिरण्या भरणाम्बरादि द्रव्येषु मायारचितेषु मूढः ।
प्रलोभितात्मा ह्युपभोगबुद्ध्या पतङ्गवन्नश्यति नष्टदृष्टिः ॥२८॥[40]

---

33. तु.भा. 6.18.41
34. तु.भा. 11.26.12
35. ओ-1, ओ-2, ओ-3, - संसेव्य । ना - सं....न (संन्यासेन)
36. ओ-1, ओ-2, ओ-3, - बन्ध इति पदं नास्ति ।
37. तु.भा. 11.14.30
38. भा. 11.8.7. - पतत्यन्धे
39. भा. 11.8.7. - तमस्यग्नौ
40. तु.भा. 11.8.8.

मया रचितेषु वस्तुतोऽसत्येषु नष्टदृष्टिर्नष्टविवेकः । न केवलं योषिदादि मायारचितं किन्तु सर्वं जगदपीत्याह एकादशे सप्तमेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ।
नश्वरं गृह्यमाणं च विद्धि मायामनोमयम् ॥२९॥[41]

मन आदिभिर्गृह्यमाणं मनोमयत्वान्मायेति विद्धि । तदपि न स्थिरं किन्तु नश्वरं विद्धि । ननु सर्वत्रानित्यता बुद्ध्या तत्तद्भोगत्यागे सद्य एव देहपातः स्यादित्याशंक्य द्वितीये द्वितीयेऽध्याये परीक्षितं प्रति श्रीशुकवाक्येन त्रिभिः ।

अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवस्यायबुद्धिः ।
सिद्धेऽन्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः ॥३०॥[42]

अतः कविर्नाममात्रेषु भोगेषु[43] यावदर्थो देहनिर्वाहो यस्य तथाभूतस्स्यात् अप्रमत्तस्तावन्मात्रेष्वनासक्तेः व्यवसायबुद्धिर्नेदं सुखमिति निश्चयवान् तदा तत्र तस्मिन्नर्थेऽन्यथैव सिद्धे प्रारब्धकर्मवशात्स्वत एव सिद्धे परिश्रमं पश्यन्नयतेतत् । अन्यथा- सिद्धमाह द्वाभ्याम् ।

सत्यां क्षितौ किं कशिपोः प्रयासै-
बाहौ स्वसिद्धे ह्युपबर्हणैः किम् ।
सत्यञ्जलौ किं पुरुधान्नपात्र्या
दिग्वल्कलादौ सति किं दुकूलैः ॥३१॥[44]

कशिपोः शय्यायाः स्वतः सिद्धे[45] बाहौ सति उपबर्हणैरुच्छीर्षकैः पुरुधा बहुप्रकारेणान्नभोजनपात्रेण । ननु दिक् सद्भावो नाम नग्नत्वमेव दुकुलमन्नं तोयं वा याच्ञा प्रयत्नं विना कथं प्राप्यते तत्राह—

चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
किं नाङ्घ्रिपाः[46] परभृतः सरितोप्यशुष्यन् ।
रुद्धा गुहाः किमजितोऽवति नोपसन्नान्
कस्माद्भजन्ति कवयो धनुदुर्मदान्धान् ॥३२॥

41. तु.भा. 11.7.7.
42. तु.भा. 2.2.3
43. ओ-1, ओ-2, ओ-3 - भोगेषु इति पदं नष्टम् ।
44. तु.भा. 2.2.4.
45. ओ-1, ओ-2, ओ-3 - सिद्धो
46. तु.भा. 2.2.5. - नैवाङ्घ्रिपाः

चीराणि वस्त्रखण्डानि परान् बिभ्रति पुष्णन्ति फलादिभिर्ये ते परभृतः गुहा गिरिदर्यः। ननु कदाचिदेषामलाभे किं कार्यं तत्राह अजितो हरिरुपसन्नान् शरणागतान् किं नावति किं न रक्षति । किं शब्दस्य सर्वत्रापि सम्बन्धः उक्तं च—

भोजनाच्छादने चिन्तां वृथा कुर्वन्ति वैष्णवाः ।
योऽसौ विश्वम्भरो देवः स किं भक्तानुपेक्षते ॥इति।

धनेन यो दुर्मदस्तेनान्धान् । धनवच्छरीरात्परेषां वृत्तिरित्येतदपि न सम्भवतीत्याह प्रथमे त्रयोदशेऽध्याये युधिष्ठिरं प्रति नारदवाक्येन—

कालकर्मगुणाधीनो देहोऽयं पाञ्चभौतिकः ।
कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथा परम् ॥३३॥[47]

कालो गुणक्षोभकः कर्म जन्म गुणनिमित्तं गुणोपादानं तदधीनः पाञ्चभौतिको जडः तद्विभागेनांशवांश्च । सर्पग्रस्तोऽजगरगलितो यथान्यं न रक्षति तद्वत् । ननु नश्वरकुटुम्बाद्यर्थं राजोपसर्पणादीनां कथमायुर्व्ययं करोति लोकस्तत्राह द्वितीये प्रथमेऽध्याये परीक्षितं[48] प्रति श्रीशुकवाक्येन—

देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि ।
तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ॥३४॥[49]

देहादिषु आत्मसैन्येषु परिकरेषु असत्सु मिथ्याभूतेष्वपि प्रमत्तः प्रसक्तः तेषां पित्रादिदृष्टान्तेन नाशं पश्यन्नपि न पश्यति नानुसन्धत्ते। पुत्रदारादीनां सङ्गमः क्षणिकः एवेत्याह । दशमे द्वाशीतितमेऽध्याये गोपिकाः प्रति भगवद्वाक्येन—

वायुर्यथा धनानीकं तृणं तूलं रजांसि च ।
संयोज्याक्षिपतेभूयस्तद[50]द्भूतानि भूतकृत् ॥३५॥

आक्षिपते आक्षिपति । पृथक्करोतीत्यर्थः । आस्तां तावत्पुत्रदारादीनां संयोगवियोग-वार्ता स्वीयोऽपि देहो न चिरस्थायीत्याह । सप्तमे सप्तमेऽध्याये गोपिकां प्रति भगवद्वाक्येन द्वाभ्याम्—

कामान् कामयते काम्यैर्यदर्थमिह पुरुषः ।
स वै देहस्तु पारक्यो भङ्गुरो यात्युपैति च ॥३६॥[51]

---

47. तु.भा. 1.13.45
48. ना- परिक्षितम्
49. तु.भा. 2.1.4.
50. भा. 10.82.44. - स्तथा
51. तु.भा. 7.7.43

कामान् भोगान् काम्यैर्विषयैः कर्मभिर्वा पारक्यः श्वादिभोग्यः नत्वात्मीयो भङ्गुरश्च—

किमु व्यवहितापत्यदारागारधनादयः ।

राज्य[52]कोष[53]बलामात्यभृत्यात्म[54]ममतास्पदाः ॥३७॥

किमु देहाद्यवहिता अपत्यादयो विषयाः पारक्या इति वक्तव्यम्, तथापि यावज्जीवं सुखं भविष्यतीति चेन्नेत्याह एकादशे दशमेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

को न्वर्थः सुखयत्येनं कामो वा मृत्युरन्तिके ।

आघातं नीयमानस्य वध्यस्येव न[55] तुष्टिदः ॥३८॥[56]

यतोऽन्तिके वर्त्तमानो मृत्युर्न तुष्टिं ददाति आघातं वधस्थानं प्रति एवं कर्मसु प्रवृत्तस्य न सुखं न च निष्कृतिरित्याह तत्रैव तद्वाक्येन—

कर्माणि दुःखोदर्काणि कुर्वन्देहेन तैः पुनः ।

देहमाभजते तत्र किं सुखं मर्त्यधर्मिणः ॥३९॥[57]

दुखोदर्काणि पश्चादुःखप्रदानि तैः कर्मभिः प्रतिकारद्वारापि दुःखनिवृत्तिर्न सम्भवतीत्याह- चतुर्थे ऊनत्रिंशेऽध्याये प्राचीनवर्हिषं प्रति नारदवाक्येन चतुर्भिः—

दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु ।

जीवनस्य[58] व्यवच्छेदः स्याच्चेत्तत्प्रतिक्रिया ॥४०॥

दुःखस्य कर्मणः प्रतीकारस्तावन्नास्ति तत्तु प्रतिक्रिया स्याच्चेत्तथापि त्रिविधेषु दुःखेषु मध्ये एकतरेणापि दुःखेन व्यवच्छेदो वियोगो नास्ति। प्रतिक्रियाशापि दुःखरूपत्वादिति सदृष्टान्तमाह—

यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन् ।

तं स्कन्धेन स आधत्ते तद्वत्सर्वाः[59] प्रतिक्रियाः ॥४१॥

तं भारम् । दुःखस्य मूलभूतानि कर्मणि प्रतिक्रियादिभिर्नैव निर्वत्तन्त इत्याह—

---

52. तु.भा. 7.7.44 - राज्यं
53. तत्रैव - कोश
54. तत्रैव - गजामात्यभृत्याप्ता
55. ओ-1, ओ-3 - च
56. तु.भा. 11.10.20
57. तु.भा. 11.10.29
58. भा. 4.29.32 - जीवस्य न
59. तु.भा. 4.29.33 - तद्वत्स्तथा

नैकान्ततः प्रतीकारः कर्मणां कर्म केवलम् ।
द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ॥४२॥[60]

न एकान्ततः अत्यन्तं भवासनं केवलं ज्ञानरहितं अविद्ययोपसृतं प्राप्तः अतोऽविरोधान्निवर्त्य निवर्त्तकत्वमिति भावः । अत्र दृष्टान्तः स्वप्ने दृष्टः स्वप्नः प्रबोधं विना यथा तं स्वप्नमत्यन्तं न प्रतिकरोतीत्यर्थः । एवमैह्यलौकिकानां सुखानामनित्यतामुक्त्वा पारलौकिकानाह एकादशे तृतीयेऽध्याये विदेहं प्रति प्रवृद्धवाक्येन—

एवं लोकं परं विद्वान्नश्वरं कर्म निर्मितम् ।
सतुल्यातिशयध्वंसं यथा मण्डलवर्त्तिनाम् ॥४३॥[61]

कर्म निर्मितत्वान्नश्वरं तथा च श्रुतिः तद्यथेह कर्मचितो लोकः क्षीयते। एवमेवामुत्र पुण्यचितो लोकः क्षीयते इति । वर्त्तमानसमयेऽपि दुःखयुक्तं पश्येदित्याह स तुल्यातिशयध्वंसं सह तुल्येनातिशयेन ध्वंसेन च वर्त्तमानं अतस्तुल्ये स्पर्धी अतिशयेऽसूया ध्वंसस्यालोचने भयाधिकत्वात्परिहार्यमित्यर्थः । व्यनक्ति एकादशे दशमेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

तावत्स मोदते[62] स्वर्गे यावत्पुण्यं समाप्यते ।
क्षीणपुण्यः पतत्यर्वागनिच्छन् कालचालितः ॥४४॥

पुण्यमग्निष्टोमादि कर्मोद्भवं कालेन चालितः पतितः[63] ब्रह्मलोकस्या-नित्यतामाह एकादशे विंशेऽध्याये भगवद्वाक्येन—

कर्मणां परिणामित्वादाविरिञ्चादमङ्गलम् ।
विपश्चिन्नश्वरं पश्यददृष्टमपि दृष्टवत् ॥४५॥[64]

आविरिञ्चाद्ब्रह्मलोकपर्यन्तम् । अदृष्टमपि सुखममङ्गलं दुःखरूपं च नश्वरं पश्येत्। लोकपालानां मनुष्यधर्मरहितत्वात्सुखमस्तीति चेत्तत्राह । एकादशे दशमेऽध्याये भगवद्वाक्येन—

लोकानां लोकपालानां मद्भयं कल्पजीविनाम् ।
ब्रह्मणोऽपि भयं मत्तो द्विपरार्धपरायुषः ॥४६॥[65]

---

60. तु.भा. 4.29.34
61. तु.भा. 11.3.20
62. भा. 11.10.26 - प्रमोदते
63. ना- पतितः इति अधिकम्
64. तु.भा. 11.19.18
65. तु.भा. 11.10.30

द्वौ परार्धौ पर आयुर्यस्य तस्य ब्रह्मणोऽपि । नन्वेवं सर्वत्रानित्यता-बुद्ध्या सञ्जातवैराग्येण किं कर्त्तव्यं तत्राह सप्तमे षष्ठेऽध्याये असुरबालकान् प्रति प्रह्लादवाक्येन—

ततो यतेत कुशलः क्षेमाय भयमाश्रितः ।
शरीरं पौरुषं यावन्न विपद्येत पुष्कलम् ॥४७॥[66]

कुशलः स्वार्थसाधकः । भयसंसारजन्माश्रितः प्राप्तः पुरुषरूपं शरीरं यावत् पुष्कलमिति न विपद्येत न विनश्येत्[67] । तावत् शीघ्रं क्षेमाय यतेत । क्षेमप्राप्तेः साधनं गुरुसेवनमित्याह एकादशे तृतीयेऽध्याये जनकं प्रति प्रवृद्धवाक्येन—

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम्[68] ॥४८॥

उत्तमं श्रेयो ज्ञातुमिच्छुः शाब्दे ब्रह्मणि वेदाख्ये निष्णातम् अन्यथा संशयनिरासकत्वायोगात् परब्रह्मणि अपरोक्षानुभवेन च निष्णातम् अन्यथा ध्यायतो बाधसञ्चारायोगात् । परब्रह्मनिष्णातत्वे द्योतकमाह उपशमाश्रयमिति । रज आदिष्वतीतेषु कथं गुरुप्रपत्त्या ज्ञानोत्पत्तिश्चेत्तत्राह सप्तमे पञ्चदशेऽध्याये युधिष्ठिरं प्रति नारदवाक्येन त्रिभिः—

रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च ।
एतत्सर्वं गुरौ भक्त्या पुरुषो ह्यञ्जसा जयेत् ॥४९॥[69]

उपशमेन शान्त्या । अञ्जसा शीघ्रम् । ननु कथं गुरौ भक्त्या सर्वस्य जयः तस्यापि मनुष्यत्वेन तदवस्थत्वात्तत्राह—

यस्य साक्षाद् भगवति ज्ञानदीपप्रदे गुरौ ।
मर्त्यासद्धीः श्रुतं तस्य सर्वं कुञ्जरशौचवत् ॥५०॥[70]

मर्त्यासद्धीः मनुष्य इति दुर्बुद्धिः तस्य शास्त्रश्रवणं कुञ्जरस्नानवद्व्यर्थम् । ननु गुरोरपि पुत्रादयस्तं नरमेव मन्यन्ते तत्राह—

---

66. तु.भा. 7.6.5
67. ओ-1 - न पश्येत्
68. ना- ग्रन्थे समा इत्येवं पाठोऽस्ति । भागवते (11.3.21) टीकायां च शमाश्रयम् इति पाठो दृश्यते - तदाधारेण पाठो गृहीतः ।
69. तु.भा. 7.15.25
70. तु.भा. 7.15.26

एष वै भगवान् साक्षात्प्रधानपुरुषेश्वरः ।
योगेश्वरैर्विमृग्याङ्घ्रिर्लोको यं मन्यते नरम् ॥५१॥[71]

एष गुरुः साक्षाद्भगवानेव । प्रधानपुरुषेश्वरः एष श्रीकृष्ण इत्यर्थः । ननु बहवो गुरवः सन्ति ते सर्वे विष्णुवत्पूज्यास्तत्रैक इति चेत् । ज्ञानप्रदो गुरुः कृष्ण एवेत्याह दशमेऽशीतितमेऽध्याये श्रीदामानं प्रति भगवद्वाक्येन त्रिभिः ।

स वै सत्कर्मणां साक्षाद् द्विजातेरिह सम्भवः ।
आद्योऽङ्ग यत्राश्रमिणां यथाहं ज्ञानदो गुरुः ॥५२॥[72]

इह संसारे यत्र सम्भवो जन्ममात्रं स पिता तावदाद्यः प्रथमो गुरुः पूज्यः । कर्मविद्याप्रदं गुरुमाह द्विजातेः सतः पुंसः सत्कर्मणां यत्र सम्भवः उपनीय वेदाध्यापक इत्यर्थः । स द्वितीयो गुरुर्यथाहमीश्वरस्तथा प्रथमादपि पूज्य इत्यर्थः । ब्रह्मविद्याप्रदं गुरुमाह आश्रमिणां सर्वेषामपि ज्ञानदो यः स तु साक्षादहमेवेति । अतो ज्ञानप्रदो गुरुरुपास्यज्ञानप्रदो गुरुर्यः सममरूपम् । ये तमाश्रित्य संसारं तरन्ति ते बुद्धिमन्त इत्याह—

नन्वर्थकोविदा ब्रह्मन्वर्णाश्रमवतामिह ।
ये मया गुरुणा वाचा तरन्त्यञ्जो भवार्णवम् ॥५३॥[73]

हे ब्रह्मन् ते ननु वर्णाश्रमवतां मध्ये ते अर्थकोविदाः इह मनुष्यजन्मनि तत्रापि वर्णाश्रमतत्त्वे सति ये मया गुरुणा गुरुरूपेण वक्त्रा वाचा उपदेशमात्रेण अञ्जः[74] सुखेनैव भवार्णवं तरन्ति । ज्ञानप्रदाद्गुरोरधिकः सेव्यो नास्तीत्युक्तं तत्सेवनाधिको धर्मो नास्तीत्याह—

नाह[75]मिज्याप्रजातिभ्यां तपसोपशमेन वा ।
तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥५४॥[76]

इज्या गृहस्थधर्मः प्रजातिः प्रकृष्टं जन्मोपनयनं तेन ब्रह्मचारिधर्मो लक्ष्यते । ताभ्यां तथा तपसा वानप्रस्थधर्मेण उपशमेन यतिधर्मेण वा अहमेव परमेश्वरस्तथा न तुष्येयं यथा सर्वभूतात्माहं गुरुशुश्रूषयेति गुरुसेवापराङ्मुखैर्मनोनियमनपरैरपि सदुस्तरो

71. तु.भा. 7.15.27
72. तु.भा. 10.80.32
73. तु.भा. 10.80.33
74. ओ-1, ओ-2, ओ-3 - अङ्गः
75. ना - आह
76. तु.भा. 10.80.34

भववारिधिरित्याह दशमे सप्ताशीतितमेऽध्याये भगवन्तं प्रति श्रुतीनां वाक्येन—

विजितहृषीकवायुभिरदान्तमनस्तुरङ्गं
य इह यतन्ति यन्तुमतिलोलमुपायखिदः ।
व्यसनशतान्विताः समवहाय गुरोश्चरणं
वणिज इवाज सन्त्यकृतकर्णधरा जलधौ ॥५५॥[77]

विजितानि हृषीकाणीन्द्रियाणि वायुः प्राणश्च यैस्तैरप्यदान्तमदमितमन्तःकरणं[78] मन एव तुरगः दुर्दमत्वसाम्यात् तं ये यन्तुं नियन्तु-मायत्तीकर्त्तुं यतन्ति प्रयतन्ते । किम्भूतमतिलोलमतिचञ्चलं गुरोश्चरणं समवहायानाश्रित्य उपायेषु खिद्यन्ते क्लिश्यन्तीति उपायखिदः व्यसनशतान्विता बहुव्यसनाकुला इह संसारे समुद्रे सन्ति दुःखमेव प्राप्नुवन्तीत्यर्थः भो अज अकृतकर्णधरा अस्वीकृतनाविका वणिजो जलधौ यथा तद्वत् । एतेन गुरूणोपददर्शितभगवद्भजनसुखानुभूतौ तु रक्त एव मनो निश्चलं भवति नान्यथेति भावः । गुरुणा भर्त्सितेन ताडितेनाऽपि तस्मिन्नेव नरैः[79] मतिर्न कार्येत्याह एकादशे सप्तदशेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

आचार्यं मां विजानीयान्नावमन्येत कर्हिचित् ।
न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः ॥५६॥[80]

आचार्यं गुरुं मां कृष्णं[81] विजानीयात् । कर्हिचित्कदाचित्प्राणात्ययेपि मर्त्यबुद्ध्या मनुष्योऽयमिति अत्र हेतुः । सर्वदेवमय इति तस्मिन् रुष्टे सर्वदेवा रुष्यन्तीति भावः। गुरुसेवकस्य धर्मानाह । एकादशे दशमेऽध्याये भगवद्वाक्येन—

अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः ।
असत्वरोऽर्थ जिज्ञासुरनसूयुरमोघवाक् ॥५७॥[82]

दक्षः अनलसः निर्ममो जायादिषु ममताशून्यः असत्वरोऽव्यग्रः अमोघवाक् व्यर्थालापरहितः । किञ्च गुरोरग्रेनीचवद्वर्त्तितव्यमित्याह एकादशे सप्तदशेऽध्याये भगवद्वाक्येन—

---

77. तु.भा. 10.87.33
78. ओ-1 - अन्तःकरणम् इति नास्ति ।
79. ना- ग्रन्थे नरैः इति नास्ति ।
80. तु.भा. 11.17.27
81. ना- कृष्णम् इति अधिकपाठः ।
82. तु.भा. 11.10.6

शुश्रूषमाण आचार्यं सदोपासीत नीचवत् ।
यानशय्यासनस्थानैर्नातिदूरे कृताञ्जलिः ॥५८॥[83]

यानशय्याशनस्थानैर्यान्तं पृष्ठतो यानेन निद्रितमप्रमत्ततया समीप-शयनेन विश्रान्तं पादसंवाहनादिभिः[84] समीपासनेन आसीनं कृताञ्जलिर्नियोगप्रतीक्षया नातिदूरेऽवस्थानेनेत्यर्थः एवमात्मसमर्पणं विना गुरुप्रत्युपकारो न भवतीत्याह । दशमेऽशीतितमेऽध्याये सान्दीपिनिवाक्यमिति श्रीदामानं प्रति श्रीभगवद्वाक्येन—

इयदेव[85] हि कर्त्तव्यं सच्छिष्यैर्गुरुनिष्कृतम् ।
यद्वै विशुद्धभावेन सर्वार्थात्मार्पणं गुरौ ॥५९॥

गुरौ निष्कृतं प्रत्युपकारः सर्वे अर्थाः पुरुषार्था यस्मात्स आत्मा देहः तस्यार्पणं विनियोगः एवं गुरुसेवनं निरूप्य गुरोः शिक्षणीयमाह एकादशे तृतीयेऽध्याये जनकं प्रति प्रबुद्धवाक्येन सप्तभिः ।

तत्र भागवतान्धर्मान् शिक्षेद्गुर्वात्मदैवत ।
अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो[85] हरिः ॥६०॥

गुरुरेवात्मादैवतं यस्य सः अनुवृत्त्या सेवया यैर्धर्मैः वस्तुतस्तु आत्मा आत्मप्रदश्च उपासकानां यथा बलिप्रभृतीनां भागवतान्धर्मानाह—

सर्वत्र[87] मनसोऽसङ्गमादौ सङ्गं च साधुषु ।
दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम् ॥६१॥

यथोचितमिति हीनेषु दयां समेषु मैत्रीम् उत्तमेषु प्रश्रयं विनयं च शिक्षयेदित्यन्वयः।

शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवम् ।
ब्रह्मचर्यमहिंसां च समत्वं द्वन्द्वसंज्ञयोः ॥६२॥[88]

शौचं बाह्यं मृज्जलादिभिः आभ्यन्तरमदम्यमानादिभिः शिक्षेत् तपः स्वधर्माचरणं तितिक्षां क्षमां मौनं वृथावाचामनुच्चरणं स्वाध्यायमधिकारानुरूपवेदपाठाद्यध्ययनम् आर्जवं स्वच्छतां ब्रह्मचर्यं यस्य यादृगुचितं ऋतुषु स्वदारनियमादिः अहिंसां

---

83. तु.भा. 11.17.29
84. ओ-1, ओ-2, ओ-3 - सम्याहनादिभिः
85. तु.भा. 10.80.41 - एतदेव हि सच्छिष्यैः कर्त्तव्यं गुरनिष्कृतम् ।
86. तु.भा. 11.3.22 - ऽऽत्मदो
87. तु.भा. 11.3.23 - सर्वतो
88. तु.भा. 11.3.24

भूतेष्वद्रोहं द्वन्द्वसंज्ञयोः शीतोष्णसुखदुःखादिरूपयोः समत्वं हर्षविषादादि-साहित्यम्—

सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतताम् ।
विविक्तचीरवसनं सन्तोषं येन केनचित् ।।६३ ।।[89]

आत्मेश्वरान्वीक्षां चिद्रूपेणात्मेक्षां नियन्तृरूपे वैश्वरान्वीक्षां च कैवल्य-मेकान्तशीलत्वमनिकेततां गृहाद्यभिमानराहित्यं विविक्तचीरवसनं विजनपतितानां शुद्धानां वा वल्कलानां परिधानम् ।

श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि ।
मनो वाक्कर्मदण्डं च सत्यं शमदमावपि ।।६४।।[90]

भागवते भागवतप्रतिपादके अन्यशास्त्रादौ या अनिन्दा तां मनसः प्राणायामैः वाचो मौनेन कर्मणोऽनीहया दण्डं सत्यं यथार्थभाषणं शमदमावन्तःकरणबाह्येन्द्रिय-निग्रहौ—

श्रवणं कीर्त्तनं ध्यानं हरेरद्भुतकर्मणः ।
जन्मकर्म गुणानां च तदर्थेऽखिलचेष्टितम् ।।६५।।[91]

हरेर्जन्मकर्मगुणानां श्रवणादि च तदर्थे कृष्णोद्देशेन सर्वं कर्म ।

इष्टदत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम् ।
दारान् सुतान् गृहान् प्राणान् यत्परस्मै निवेदनम् ।।६६ ।।[92]

विशेषतश्च यजनादिर्यत्तदर्थे शिक्षेत् । इष्टं दत्तमित्यादयो भावेनिष्ठां वृत्तं सदाचारः आत्मनः प्रियं गन्धपुष्पादि । दारादीनप्यालक्ष्य परमेश्वराय निवेदनं तत्सेवकतया समर्पणं यत्तच्छिक्षेत् । नन्वमीषां भागवतानां धर्माणां बोधका बहवः सन्ति किमेकेन गुरुणा तत्राह षष्ठे तृतीयेऽध्याये दूतान् प्रति यमवाक्येन त्रिभिः—

धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुरृषयो नापि देवाः ।
न सिद्धमुख्या असुरा मनुष्याः कुतोनु[93] विद्याधरचारणादयः ।।६७।।

मन्वादिमुखेन वर्णाश्रमादिधर्मानुक्त्वा अतिरहस्यत्वात् भगवता साक्षात्प्रणीतं स्वमुखेनोक्तम् । ननु केचिच्चेन्नजानन्ति तस्य सत्वे किं प्रमाणं तत्राह—

89. तु.भा. 11.3.25
90. तु.भा. 11.3.26
91. तु.भा. 11.3.27
92. तु.भा. 11.3.28
93. भा. 6.3.19 - कुतश्च

स्वयम्भूर्नारदः शम्भुः कुमारः कपिलो मनुः ।
प्रह्लादो जनको भीष्मो बलिर्वैयासिकिर्वयम् ॥६८॥[94]

कुमारः सनत्कुमारः वैयासिकिः शुकः वयमीत्यात्मानेमेव बहुमन्यमानो निर्दिशति।

द्वादशैते विजानीमो धर्मं भागवतं भटाः ।
गुह्यं विशुद्धं दुर्बोधं यज्ज्ञात्वामृतमश्नुते ॥६९॥[95]

एषां शिष्यप्रशिष्यादिपरम्परया भुविख्यातमिति भावः । दुर्बोधं गुरुकृपां विना गुरोरीश्वररूपत्वान्मनुष्या न विदुरिति यत्तदितरमनुष्य-विषयाम्। आस्तां तावदनुष्ठानं श्रवणादिविषयीकृतोऽपि भगवद्धर्मः पापिनोपि पुनातीत्याह एकादशे द्वितीयेऽध्याये वसुदेवं प्रति नारदवाक्येन—

श्रुतोऽनु पठितोध्यात आदृतोऽप्यनुमोदितः[96] ।
सद्यःपुनाति सद्धर्मो देवविश्वद्रुहोपि हि ॥७०॥

आदृत आस्तिक्येन गृहीतः अनुमोदितः परैः क्रियमाणः संस्तुतसद्धर्मो भागवतो धर्मः । हे देव वसुदेव इत्यर्थः यद्वा देवेभ्यो विश्वस्मै च द्रुह्यन्ति तानापि । अतो भागवतान्धर्मान् शिक्षंस्तज्जातया भक्त्या मायां तरतीति प्रकरणार्थमुपसंहरति । एकादशे तृतीयेऽध्याये जनकं प्रति प्रवृद्धवाक्येन—

इति भागवतान्धर्मान् शिक्षन् भक्त्या तदुत्थया ।
नारायणपरो मायामञ्जस्तरति दुस्तराम् ॥७१॥[97]

तदुत्थया तज्जातया अञ्जः शीघ्रम् ।

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
विरागादिविबोधिनी कला द्वितीया सम्पूर्णा[98] ॥

इति द्वितीया कला ।[99]

***

94. तु.भा. 6.3.20
95. तु.भा. 6.3.21
96. भा. 11.2.12 - वानुमोदित
97. तु.भा. 11.3.33
98. ना- ग्रन्थे कला सम्पूर्णा विरागादि विबोधिनी ।
99. ना- ग्रन्थे इति द्वितीया कला अधिकपाठोऽस्ति । सोऽत्र प्रदत्तः ।

[1]तृतीया कला

प्राक् संक्षेपेण यः प्रोक्तो भगवद्धर्मवर्णने ।
स विस्तरेण सत्सङ्गस्तृतीयायां निरूप्यते ॥१॥

प्राक् पूर्वं द्वितीयकलायां भगवद्धर्मवर्णनविषये आदौ सङ्गं च साधुष्वित्यादिना यः संक्षेपेण प्रोक्तः स सत्सङ्गः तृतीयायां कलायां विस्तरेण निरूप्यत इत्यर्थः । तत्र साधु[2] कृतः सङ्गो न सङ्गदोषायेत्याह । तृतीये त्रयोविंशेऽध्याये कर्दमं प्रति देवहूतिवाक्येन—

सङ्गो यः संसृतेर्हेतुरसत्सु विहितोऽधिया ।
स एव साधुषु कृतो निःसङ्गत्वाय कल्पते ॥२॥[3]

अधिया अज्ञानेन । सत्सङ्गलब्धा भक्तिरेव भगवत्पदप्राप्तिहेतुरित्याह एकादशे एकादशेध्याये भगवद्वाक्येन—

सत्सङ्गलब्धया भक्त्या मयि मां समुपासिता[4] ।
स वै मे दर्शितं सद्भिरञ्जसा विन्दते पदम् ॥३॥

सत्सङ्गेन मयि लब्धया भक्त्या यो भक्तः समुपासिता ध्याता भवति स एव ध्यानशीलः सद्भिर्दर्शितं वै निश्चितं सुखेनैव मम पदं प्राप्नोति । सत्सङ्गजनित-भक्तियोगं विना भवतरणे नान्य उपायोस्तीत्याह । तत्रैतद्वाक्येन—

प्रायेण भक्तियोगेन सत्सङ्गेन विनोद्धव ।
नोपायो विद्यते सम्यक्[5] प्रायणं हि सतामहम् ॥४॥

सत्सङ्गेन यो भक्तियोगस्तेन विना उपायः संसारतरणे न विद्यते सत्सङ्गेनाप्यत्र हेतुमाह । हि यस्मात् सतामहं प्रायणं प्रकृष्टमयनमाश्रयः । अतः सत्सङ्गो मय्यन्तरङ्ग इत्यर्थः । न चैतेषूपदेशापेक्षापि केवलं तत्सन्निधिरेव तारयतीत्याह । एकादशे षड्विंशेऽध्याये भगवद्वाक्येन द्वाभ्याम्—

---

1. ना- ग्रन्थे इतः प्राक् 'अथ' इति अधिकपाठः दृश्यते ।
2. ओ-1, ओ-2 - साधुषु
3. तु.भा. 3.23.55
4. ना.भा. 11.11.25. - स उपासिता, ओ-1, ओ-2, ओ-3, समुपाश्रिता । टीकाधारेण अत्र समुपासिता पाठो गृहीतः ।
5. भा. 11.11.48- सध्र्यङ्

तेषु नित्यं महाभाग महाभागेषु मत्कथाः ।
सम्भवन्ति हिता नृणां जुषतां प्रपुनन्त्यघम् ॥५॥[6]

जुषतां सेवमानानाम्—

ता ये शृण्वन्ति गायन्ति ह्यनुमोदन्ति चादृताः ।
मत्पराः श्रद्धधानाश्च भक्तिं विन्दन्ति ते मयि ॥६॥[7]

श्रवणादिभिरेव मत्पराः श्रद्धानाश्च सन्तो भक्तिं विन्दन्ति । आस्तां सङ्गदर्शनमपि साधूनां न बन्धायेत्याह । द्वादशे दशमेऽध्याये[8] नलकूबरमणिग्रीवौ प्रति भगवद्वाक्येन—

साधूनां समचित्तानां सुतरां मत्कृतात्मनाम् ।
दर्शनान्नो भवेद् बन्धः पुंसाऽक्ष्णोः सवितुर्यथा ॥७॥[9]

साधूनां स्वधर्मवर्त्तिनां समचित्तानामात्मविदां सुतरां मत्कृतात्मनां मयि कृत आत्मा मनो यैः कृपातिरेकात् सुतरामित्युक्तम् । सवितुर्दर्शनादक्ष्णोर्यथा बन्धो न भवेत्तद्वत् । तीर्थादिभ्योऽपि साधूनां पावनत्वमधिकमित्याहद्वादशे दशमेऽध्याये मार्कण्डेयं प्रति श्रीरुद्रवाक्येन—

न ह्यम्मयानि तीर्थानि न देवाश्चेतनोज्झिताः ।
ते पुनन्त्युरुकालेन यूयं दर्शनमात्रतः ॥८॥[10]

अम्मयानि तीर्थानि न भवन्ति चेतनोज्झिता मृच्छिला मया देवा न भवन्तीति न अपि तु भवन्त्येव । तथापि साधूनां तेषां महदन्तरमित्याह ते पुनन्तीति । नन्वेवं चेत्साधवः किमिति तीर्थाटनं न कुर्वन्ति । तत्राह पञ्चमे त्रयोदशेऽध्याये विदुरं प्रति युधिष्ठिरवाक्येन—

भवद्विधा महाभागास्तीर्थभूताः स्वयं प्रभो ।
तीर्थीकुर्वन्ति तीर्थानि स्वान्तस्थेन गदाभृता ॥९॥[10a]

स्वयं तीर्थभूताः मलिनजनसम्पर्केणातीर्थानि सन्ति पुनस्तीर्थीकुर्वन्ति स्वान्तं

---

6. तु.भा. 11.26.28
7. तु.भा. 11.27.29
8. ओ-1, ओ-2, ओ-3, ना- ग्रन्थे द्वादशेदशमेऽध्याये इति अस्ति । परन्तु भागवते दशमे दशमेऽध्याये ।
9. तु.भा. 10.10.41 10. तु.भा. 12.10.23
10a. तु.भा. 1.13.10 स्वयं विभो ।

मनस्तत्रस्थेन स्वान्तस्य स्थितेनेति वा । साधूनां तीर्थाटनं न स्वार्थं किन्तु तीर्थानुग्रहार्थमित्यर्थः । महापातकिनामपि शुद्धिं साधूनां दर्शनादिना भवतीत्याह द्वादशे दशमेऽध्याये मार्कण्डेयं प्रति श्री रुद्रवाक्येन—

श्रवणाद्दर्शनाद्वापि महापातकिनोपि वः ।
शुध्येरन्नन्त्यजाश्चापि किमु सम्भाषणादिभिः ॥१०॥[11]

वो युष्माकं श्रवणाद्दर्शनाद्वापि अन्त्यजा महापातकिनोऽपि शुध्येरन् किमु भवतां सम्भाषणादिभिः । सत्सङ्गेन विना तप आदिभ्योऽपि ज्ञानं न लभ्यत इत्याह पञ्चमे द्वादशेऽध्याये रहूगणं प्रति जडब्राह्मणवाक्येन—

रहूगणैतत्तपसा न याति न चेज्यया[12] निर्वपणाद् गृहाद्वा ।
नच्छन्दसा[13] नैव जलाग्निसूर्यैर्विना महत्पादरजोऽभिषेकम् ॥११॥[14]

हे रहूगण एतत्पूर्वोक्तं ज्ञानं पुरुषो न याति न प्राप्नोति इ ज्यया वैदिककर्मणा निर्वपणादन्नादि संविभागेन गृहाद्वा तन्निमित्तोपकारेण च्छन्दसा[15] वेदाभ्यासेन जलादिभिरुपासितैः । किं च साधूनां पादसंस्पर्शरहिता गृहा असेव्या इत्याह चतुर्थे द्वाविंशेऽध्याये सनकादीन् प्रति पृथुवाक्येन—

व्यालालय[16] द्रुमा ह्वे[17] तेऽप्यरिक्ता[18]ऽखिलसम्पदः ।
यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः ॥१२॥

व्यालानां सर्पाणामालयो द्रुमा एव अरिक्ताः पूर्णा अखिलाः सम्पदो येषु तादृशा अपि ये गृहास्तीर्थपादीयाः साधवस्तेषां पादतीर्थेन वर्जिताः । प्रसङ्गात्साधूनां लक्षणमाह एकादशे एकादशेऽध्याये साधुस्तवोत्तम श्लोकमतः कीदृग्विधः प्रभो इत्युद्धवप्रश्नानन्तरं भगवद्वाक्येन त्रिभिः—

---

11. तु.भा. 12.10.25
12. ओ-1, ओ-2, ओ-3 - तेज्यया
13. ओ-1, ओ-2, ओ-3 - निच्छन्दस्य
14. तु.भा. 5.12.12
15. ओ-1, ओ-2, ओ-3 -च्छन्दस्य
16. ओ-1, ओ-2, ओ-3 - व्याललया । भागवतश्लोकस्य दृष्ट्या तथा टीकाधारेण व्यालालय इति पाठो गृहीतः ।
17. भा. 4.22.11 - वै
18. ओ-1, ओ-2, ओ-3 - भक्ता

कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम् ।
सत्यसारोऽनवद्यात्मा समः सर्वोपकारकः ॥१३॥[19]

तत्राष्टविंशतिलक्षणैः सामान्यतः साधुं निरूपयति । कृपालुः परदुःखसहिष्णुः सर्वदेहिनां केषाञ्चिदकृतद्रोहः तितिक्षुः क्षमावान् सत्यं सारं स्थिरं बलं वा यस्य सः अनवद्यात्मा असूयारहितः सुखदुःखयोः समः शक्त्या सर्वेषामुपकारकः ।

कामैरहितधीर्दान्तो मृदुः शुचिरकिञ्चनः ।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः ॥१४॥[20]

कामैरयुतचित्तः दान्तः संयतबाह्येन्द्रियः मृदुरकठिनचित्तः शुचिः सदाचारः अकिञ्चनोऽपरिग्रहः अनीह इष्टक्रियाशून्यः मितभुगल्पाहारः शान्तो नियतान्तःकरणः स्थिरः सधर्ममच्छरणो मदेकाश्रयः मुनिर्मननशीलः—

अप्रमत्तो गभीरात्मा धृतिमाञ्जितषड्गुणः ।
अमानी मानन्दः[21] कल्यो मैत्रः[22] कारुणिकः कविः ॥१५॥

अप्रमत्तः सावधानः गभीरात्मा निर्विकारः धृतिमान् वित्तेपि अकृपणः जितषड्गुणः ।

क्षुत्पिपासे शोकमोहौ जरामृत्यू षडूर्मयः ।
एते चैव जिता येन स भवेज्जितषड्गुणः ॥

अमानी न मानाकाङ्क्षी[23] अन्येभ्यो मानदः कल्यः परबोधने दक्षः मैत्रः[24] अवञ्चकः कारुणिकः करुणैकाश्रयः कविः सम्यज्ज्ञानी । अथ कनिष्ठमध्यमोत्तमभेदं साधूनां निरूपयति एकादशे द्वितीयेऽध्याये जनकं प्रति हरिवचनेन नवभिः—

अर्चायामेव हरये[25] पूजायां श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥१६॥

अर्चायां प्रतिमायां पूजामीहते करोति न तद्भक्तेषु करोति स भक्तः प्राकृतः प्रकृतिप्रारम्भः । अनेनैव प्रारब्ध भक्तिः शनैरुत्तमो भविष्यतीत्यर्थः । मध्यमभक्तस्य लक्षणमाह—

---

19. तु.भा. 11.11.29
20. तु.भा. 11.11.30
21. तु.भा. 11.11.31 - कल्पो
22. ओ-1, ओ-2, ओ-3, - मैत्री
23. ओ-1, ओ-2, ओ-3, - मनाकांक्षा
24. ओ-1, ओ-2, ओ-3, - मैत्री
25. भा. 11.2.47 - पूजां यः

ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥१७॥[26]

प्रेम च मैत्री च कृपा च ता ईश्वरादिषु चतुर्षु यः करोति स मध्यमो भागवतः । एवंभूतस्य भेदस्य दर्शनात् उत्तमभागवतस्य लक्षणमाह सप्तभिः—

सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥१८॥[27]

आत्मनः स्वस्य सर्वभूतेषु ब्रह्मभावेन[28] समन्वयं पश्येत् । तथा ब्रह्मरूपे आत्मन्यधिष्ठाने भूतानि यः पश्येत् यद्वा अतत्त्वाच्च मातृत्वादात्माहि परमो हरिः इति तत्रोक्तः । आत्मनो हरेः सर्वभूतेषु मशकादिष्वपि नियन्तृत्वे न वर्त्तमानस्य भगवद्भावं निरतिशयैश्वर्यमेव यः पश्येत् न तु तस्य तारतम्यं तथा आत्मनि हरावेवम्भूतानि च पश्येत् कथंभूते भगवति अप्रच्युतैश्वर्यादिरूपे न पुनर्जडमलिन-भूताश्रयत्वेन जाड्यादिप्रसक्त्या ऐश्वर्यादिप्रच्युतिं पश्येत् सर्वत्र परिपूर्णं भगवन्तं पश्यन् भागवतोत्तम इत्यर्थः—

गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न हृष्यति ।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः ॥१९॥[29]

श्रीवासुदेवाविष्टचित्तो न गृह्णाति न द्वेष्टि तावदिन्द्रियैरर्थान् गृहीत्वा यो न हृष्यतीपि शब्दार्थः इदं विश्वम् ।

देहेन्द्रियप्राणमनोधियां[30] यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ।
संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः ॥२०॥

किञ्च देहादीनां संसारधर्मैर्जन्माप्ययादिभिर्यो हरेः स्मृत्या अविमुह्यमानः स भागवत-प्रधानः तत्र देहस्य जन्माप्ययौ प्राणस्य क्षुत् मनसो भयं बुद्धेस्तर्षस्तृष्णा इन्द्रियाणां कृच्छ्रं श्रमः तैः ।

न काम्य[31] कर्मबीजानां यस्य[32] चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥२१॥

---

26. तु.भा. 11.2.46
27. तु.भा. 11.2.45
28. ओ-1, ओ-3, - भावेन इति नष्टम्
29. तु.भा. 11.2.48
30. ओ-1, ओ-2, ओ-3, ना. - दयां, भागवताधारेण 11.2.40 पाठो गृहीतः ।
31. ओ-2, .भा. 11.2.50 - काम
32. ना - नास्य

काम्यकर्मणां बीजानां वासनाश्च तेषां वासुदेव एव एकनिलयो यस्य सः ।

न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः ।
सज्जतेऽस्मिन्नहंभावो देहे वै स हरेः प्रियः ॥२२॥[33]

जन्म सत्कुलता कर्म तपआदि जातयः अनुलोमप्रतिलोमजा मूर्धाभिषिक्तादयः । अस्मिन्देहे अहङ्कारादिरहिते सत्कुले धर्मादिलिङ्गैः स हरेः प्रियः भागवतश्रेष्ठ इत्यर्थः ।

न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा ।
सर्वभूतसमः शान्तः स वै भागवतोत्तमः ॥२३॥[34]

वित्तेषु स्वीयं परकीयमिति आत्मनि स्वः पर इति ।

त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् ।
न चलति भगवत्पदारविन्दाल्लवनिमिषार्धमपि यः स वैष्णवाग्र्यः ॥२४॥[35]

त्रिभुवन-विभवहेतवे त्रैलोक्यैश्वर्यार्थमपि भगवत्पदारविन्दभजनाद्यो न चलति स वैष्णवाग्र्यो भवति । ननु लवार्धमात्रभजनो परमे चेत्तावल्लाभो भवेतत्कुतो न चलेत्तत्राह अकुण्ठस्मृतिरिति भगवत्पदारविन्दान्यत्सारं नास्तीत्येवंरूपा अकुण्ठा अनपगता स्मृतिर्यस्य सः । भगवत्पदारविन्दादन्यत्सारं नास्तीति कुत अत आह अजिते श्रीकृष्ण आत्मा चित्तं येषां ते अजितात्मानः सुरादयस्तैर्दुर्लभात् किन्तु केवलं विमृग्यात् तदपेक्षया सर्वस्य तुच्छतां स्मरन्यो न चलतीत्यर्थः ।

विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः ।
प्रणयरशनया धृताङ्घ्रिपद्मः स भवति भागवत्प्रधान उक्तः[36] ॥२५॥[37]

यस्य हृदयं साक्षादात्मा हरिरेव स्वयं न विसृजति अवशेनाप्रणय रशनया[38] स्नेहरज्ज्वा धृतं हृदये निबद्धम् अङ्घ्रिपद्मं यस्य एवम्भूतो जनो भागवतप्रधान उक्तो भवति । पुनर्द्वाभ्यामुत्तमभागवतस्य लक्षणमाह एकादशे एकादशेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

---

33. तु.भा. 11.2.51
34. तु.भा. 11.2.52
35. तु.भा. 11.2.53
36. ना - भक्तः
37. तु.भा. 11.2.55
38. ना- रस[ग] नया इति विकल्पपाठोऽस्ति ।

आज्ञायैवं गुणान् दोषान्मयाऽऽदिष्टानपि स्वकान् ।
धर्मान् संत्यज्य यः सर्वान् मां भजेत स[39] सत्तमः[40] ॥२६॥

किञ्च मया वेदरूपेणादिष्टानपि स्वधर्मान् सन्त्यज्य यो मां भजेत् सोप्येव पूर्वोक्तवत्सत्तमः साधुश्रेष्ठ इत्यर्थः । किमज्ञानान्नास्तिकया न धर्माचरणे सत्वशुद्ध्यादिगुणान्विपक्षे दोषांश्चाज्ञाय ज्ञात्वापि मद्ध्यानविक्षेपतया मद्भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयेन धर्मान् सन्त्यज्य यद्वा भक्तेर्दाढर्च्येन निवृत्ताधिकारतया सन्त्यज्य अथवा विद्धैकादशी कृष्णैकादश्युपवासान्निवेद्य श्राद्धदयादयो ये भक्तिविरुद्धधर्मास्तान् सन्त्यज्येत्यर्थः ।

ज्ञात्वाज्ञात्वाथ ये वै मां यावान्यश्चास्मि यादृशः ।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः ॥२७॥[41]

यावान्देशकालापरिच्छिन्नः यस्य सर्वात्मा यादृशः सच्चिदानन्दरूपः तं मां ज्ञात्वाऽज्ञात्वापि यद्वा विशेषतः पुनः पुनर्ज्ञात्वा एकान्तभावेन ये भजन्तीत्युत्तमसाधुलक्षणमुक्तम्—

अलं लक्षणज्ञानेन येषु भगवत्कृपास्ति ये च तं निर्व्यलीकं भजन्ति ते साधवस्त एव देवमायां तरन्तीत्याह द्वितीये सप्तमेऽध्याये नारदं प्रति ब्रह्मवाक्येन पञ्चभिः—

येषां स एव भगवान्दययेदनन्तः
सर्वात्मनाऽऽश्रितपदो यदि निर्व्यलीकम् ।
ते दुस्तरामपि[42] तरन्ति च देवमायां
नैषां ममाहमिति धीः श्वशृ[43]गालभक्ष्ये ॥२८॥

दययेद्दयां कुर्यात् ते यदि निष्कपटमाश्रितचरणा भवन्ति ते दुस्तरां देवमायां तरन्ति च कारान्मायाविभवं विदन्ति च ते साधव इति शेषः प्रत्यक्षमेव तेषां मायातितरण-मित्याह नैषामिति श्वशृगालानां[44] भक्ष्ये देहे अन्तर्ज्ञानाभावे मायेतिज्ञानं तत्कृपया

39. भा. 11.11.32 - स, ओ-1, ओ-2, ओ-3, - ना ग्रन्थे च अस्ति ।
40. ओ-1, ओ-2, ओ-3, - मुत्तमः
41. तु.भा. 11.11.33
42. भा. 2.7.42 - मति
43. ओ-1, ओ-2, ओ-3, ना- स्व सृगाल - इति पाठः अस्ति । भा. 2.7.42 पाठो गृहीतः ।
44. ओ-1, ओ-2, ओ-3, ना- स्व सृगाल - इति पाठः अस्ति ।

बहूनामस्तीत्याह त्रिभिः—

वेदाहमङ्ग परमस्य हि योगमायां
यूयं भवश्च भगवानथ दैत्यवर्यः ।
पत्नी मनोः स च मनुश्च तदात्मजाश्च
प्राचीनबर्हिर्ऋभुरङ्ग उत ध्रुवश्च ॥२९॥[45]

यूयमिति सनकादीनन्तर्भाव्य बहुत्वम् । दैत्यवर्यः प्रह्लादः मनुः स्वायम्भुवः तस्य पत्नी च तदात्मजा पुत्रौ कन्याश्च प्राचीनबर्हिषो विसर्गलोपश्छान्दसः ।

इक्ष्वाकुरैल मुचुकुन्द विदेहगाधि-
रघ्वाम्बरीषसगरागयनाहुषाद्याः ।
मान्धात्रलर्कशतधन्वनुरन्ति देवा-
देवव्रतो बलिरमूर्तरयो दिलीपः ॥३०॥[46]

शतधनुः धनुषः सन्धिरार्षः रन्तिदेवाः पाठः सुषमः ।[47] ऐकपद्ये एतैः सहितो देवव्रत इत्यर्थः ।

सौभर्युतङ्कशिबिदेवलपिप्पलाद-
सारस्वतोद्धव[48] पराशरभूरिषेणाः ।
येऽन्ये विभीषण हनुमदुपेन्द्रदत्त-
पार्थार्ष्टिषेण-विदुर-श्रुतदेववर्याः ॥३१॥[49]

उपेन्द्रदत्तः शुकः विभीषणादयो वर्या मुख्या येषां ते । किं बहुना सत्सङ्गेन सर्वे विदन्तीत्याह—

ते वै विदन्त्यतितरन्ति च देवमायां
स्त्रीशूद्रहूणशबरा अपि पापजीवाः ।
यद्यद्भूतक्रमपरायणशीलशिक्षा-
स्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥३२॥[50]

---

45. तु.भा. 2.7.43
46. तु.भा. 2.7.44
47. ना - सुगमः
48. ना - शारद्वतोद्धव
49. तु.भा. 2.7.48
50. तु.भा. 2.7.46

अद्भुताः क्रमाः पादन्यासा यस्य हरेस्तत्परायणास्तद्भक्ता स्तेषां शीले शिक्षा येषां ते तथा यदि भवन्ति तर्हि विदन्तीति किं वक्तव्यम् । एवं सत्सङ्गमभिप्रस्तुत्य प्रसङ्गादसत्सङ्गं निन्दन्ति एकादशे षड्विंशेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

सङ्गं न कुर्यादसतां शिश्नोदरतृप्तां क्वचित् ।
तस्यानुगतस्तमस्यन्धे पतत्यन्धानुगान्धवत् ॥३३॥[51]

शिश्नोदरे तृपयन्तीति शिश्नोदरतपस्तेषां क्वचित्कदाचित् । आस्तां तावद्बहूनां सङ्गस्तस्यैकस्याप्यनुगः अनुवर्ती अन्धाननुगच्छति योऽन्धस्तद्वत् तेषां मोहं प्रपञ्चयति एकादशे पञ्चमेऽध्याये जनकं प्रति चमसवाक्येनाष्टभिः—

कर्मण्यकोविदाः स्तब्धा मूर्खाः पण्डितमानिनः ।
वदन्ति चाटुकान्मूढा यया माध्व्या गिरोत्सुकाः ॥३४॥[52]

ते असन्तः किं भूताः अकोविदा यथा बन्धकं न भवति तथा कर्तुमज्ञाः न चाभिज्ञान् पृच्छन्ति यतः स्तब्धा अनम्राः स्तब्धत्वे हेतुः यतो मूर्खा अपण्डिता वयमित्यभिमानवन्तः तथा च श्रुतिः अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतो भवन्ति । यत्र नोष्णं न शीतं स्यान्नग्लानिर्नाप्यरातय इत्यादिकया माध्व्या गिरा उत्सुकास्सन्तः मूढास्तथा चाटुकान्[53]प्सरोभिः सह विहरिष्याम इत्याह प्रियशब्दान्वदन्ति—

रजसा घोरसङ्कल्पाः कामुका अहिमन्यवः ।
दाम्भिका मानिनः पापा विहसन्त्यच्युतप्रियान् ॥३५॥[54]

घोराऽभिचार[55] सङ्कल्पो येषां ते अहिर्मन्युर्येषां ते । किञ्च तेषां कर्माभिनिवेशात् कामदम्भादयो वर्धन्त इत्याह द्वाभ्याम्—

वदन्ति तेऽन्योन्यमुपासितस्त्रियो गृहेषु मैथुन्यपरेषु चाशिषः ।
यजन्त्यसृष्टान्नविधानदक्षिणं वृत्यै परं घ्नन्ति पशूनतद्विदः ॥३६॥[56]

कामुकत्वं प्रपञ्चयति उपासिताः स्त्रियो न तु वृद्धा यैस्तैर्मैथुन्यं मिथुनसुखमिव परं न त्वतिथ्यादिषु येषु आशिषो वदन्ति—

---

51. तु.भा. 11.26.3
52. तु.भा. 11.5.6
53. ओ-1, ओ-2, ओ-3, - चाटुकार
54. तु.भा. 11.5.7
55. ओ-2, - धोरऽभिचार इति नष्टम् ।
56. तु.भा. 11.5.8

"इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥"

इत्याकारः धार्मिकतां[57] प्रपञ्चयति यजन्तीति । असृष्टान्नविधानदक्षिणं न सृष्टा न सम्पादिता अन्नविधानदक्षिणा यथा तथा यजन्ति तथा च वृत्त्यैः जीविकार्थपरं पशून् ध्नन्ति अतद्विदः हिंसादोषानभिज्ञाः—

श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्मणा ।
जातस्मयेनान्धधियः सहेश्वरान्[58] सतोऽवमन्यन्ति हरिप्रियान् खलाः ॥३७॥

मानितां प्रपञ्चयति । श्रिया धनादिसम्पदा विभूत्या ऐश्वर्येण श्रियादिना जातो यः स्मयः गर्वस्तेनान्धा धीर्येषां ते ईश्वरसहितात् सतः अवमन्यन्ते । एवं भगवत्पराङ्मुखानां बहुदोषं प्रपञ्चयन्निष्ठां प्रपञ्चयति चतुर्भिः—

द्विषन्तः परकायेषु स्वात्मानं हरिमीश्वरम् ।
मृतके सानुबन्धेऽस्मिन् बद्धस्नेहाः पतन्त्यधः ॥३८॥[59]

अभिचारादिना द्विषन्तः । मृतके देहे सानुबन्धे पुत्रादिसहिते अज्ञाततत्त्वज्ञैरनुकम्पिता स्तरन्ति तत्त्वज्ञास्तु स्वतः । ये तु नात्यन्तमज्ञानं च तत्त्वज्ञाः तेऽन्तरालवर्तिनः पतन्तीत्याह—

ये कैवल्यमसंप्राप्ता ये चातीताश्च मूढताम् ।
त्रैवर्गिका ह्यक्षणिका आत्मानं घातयन्ति ते ॥३९॥[60]

कैवल्यं तत्त्वज्ञानमसंप्राप्ता अत्र हेतु स्त्रिवर्गप्रधानाः अक्षणिका उपशान्तिक्षणरहिताः देहादौ स्थैर्यबुद्ध्यो वा स्वयमेवात्मानं धातयन्ति । तदाह—

एत आत्महनोऽशान्ता अज्ञाने ज्ञानमानिनः ।
सीदन्त्यकृतकृत्या वै[61] कालध्वस्तमनोरथाः ॥४०॥[62]

आत्मनः आत्मप्रह्वकर्त्तारः अज्ञाने कर्मणि ।

हित्वात्ममायाचरिता[63] गृहापत्यसुहृच्छ्रियः ।
तमो विशन्त्यनिच्छन्तो वासुदेवपराङ्मुखाः ॥४१॥

---

57. ओ-3, - दाम्भिकतां
58. ना- महेश्वरान्
59. तु.भा. 11.5.15
60. तु.भा. 11.5.16
61. ओ-2, - काल इति पद नष्टः
62. तु.भा. 11.5.17
63. तु.भा. 11.5.18 - हित्वात्यायासरचिता

आत्मनो हरेर्मायया रचिता गृहापत्यसुहृच्छ्रियः ता हित्वा एवंभूतानामसतां पूजामपि भगवान्नगृह्णातीत्याह चतुर्थे एकत्रिंशेऽध्याये प्रचेतसं प्रति नारदवाक्येन—

न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः ।
श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिञ्चनेषु सत्सु ॥४२॥[64]

कुमनीषिणां कुत्सितमनीषिणाम् अधनाश्च ते आत्मधना भगवद्धनाः ते प्रिया यस्य रसज्ञः भक्तिसुखज्ञाः के कुमनीषिणाः तदाह श्रुतादिनिमित्तैर्मदैर्ये सत्सु पापं तिरस्कारम्। सतां पुनर्हृदयाद्भगवान्निर्गच्छतीत्याह तत्रैव—

अपहतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः ।
निजजनवशगत्वमात्मनोऽयन्न सरति छिद्रवदक्षरः सतां हि ॥४३॥[65]

अपहता निरस्तास्सकला एषणाः कामा यस्मात्स चासावमल आत्मा मनः तस्मिन् सतां मनसि निरन्तरमेधितया भावनयोपहूतसन्निधापितस्सन्[66] अक्षरो हरिः छिद्रवत्तत्राकाशवत् ततो न सरति नापयाति किं कुर्वन् आत्मनो निजजनवशगत्वं स भक्ताधीनत्वम् अस्मिन्नवगच्छन् अतस्तेषां सङ्गोऽवश्यमन्वेषणीय इति भावः ।

ननु वित्तादिलाभं विना कथं ते मादृशां सङ्गं स्वीकरिष्यन्ति तत्राह एकादशे षड्विंशेऽध्याये भगवद्वाक्येन—

सन्तोऽनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शिनः ।
निर्ममा निरहंकारा निर्द्वन्द्वा निष्परिग्रहाः ॥४४॥[67]

अनपेक्षा अपेक्षारहिताः यतो मच्चित्ताः मयि चित्तं येषां ते न हि लब्धचिन्तामणयो वराटकं मृगयन्त इति भावः। अतः प्रशान्ताः प्रशान्तत्वे हेतुः समदर्शिनः शत्रुमित्रादि-रहिताः विशेषणाष्टकस्य यथेष्टं हेतुहेतुमद्भावः । किञ्च परिग्रहाद्यभावेऽपि सतां सुखमेतावदेवम्भूतमिति वक्तुं न शक्यते । यतः त्वत्संवेद्यं निरुपायमित्याह एकादशे चतुर्दशेऽध्याये उद्धवं प्रति भगवद्वाक्येन त्रिभिः—

निष्किञ्चना मय्यनुरक्तचेतसः शान्ता महान्तोऽखिलजीववत्सलाः ।
कामैरनालब्धधियो जुषन्ति यत् तन्नैरपेक्ष्यं न विदुः सुखं मम ॥४५॥[68]

महान्तो निरभिमानाः अनालब्धधियोऽस्पृष्टचित्ताः निष्किञ्चनत्वादीनां यथेष्टं

64. तु.भा. 4.31.21
65. तु.भा. 4.31.20
66. ना - स्सन्निधापित सन्
67. तु.भा. 11.26.27
68. तु.भा. 11.14.17

हेतुहेतुमद्भावः एवम्भूता मदीया यत्सुखं जुषन्ति सेवन्ते तत्सुखं त एव विदुर्नान्ये । कुतः नैरपेक्ष्यं नास्ति अपेक्षणीयं येषां ते निरपेक्षाः तैरेव लभ्यं न मोक्षापेक्षैरित्यर्थः यद्वा एवम्भूतास्सन्तो ये मम मां जानन्तीत्यर्थः । त एव यन्नैरपेक्ष्यं सुखं तन्नान्ये विदुरित्यर्थः ततोधिको मम प्रियो नास्तीत्याह—

न तथा मे प्रियतम आत्मयोनिर्न शङ्करः ।
न च सङ्कर्षणो न श्रीर्नैवात्मा च यथा भवान् ॥४६॥[69]

आत्मयोनिः ब्रह्मा पुत्रोपि शङ्करः मत्स्वरूपभूतोपि सङ्कर्षणः भ्रातापि श्रीर्भार्यापि आत्मा श्रीमूर्त्तिरपि यथा भक्त इति वक्तव्ये अतिहर्षेणाह भवानीति । निरपेक्षः साधुर्मया भगवताप्यनुगम्यत इत्याह—

निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम् ।
अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः ॥४७॥[69]

पूयेयेति मदन्तर्वर्ति ब्रह्माण्डानि पवित्रीकुर्यामिति भावेनेत्यर्थः । एवं वर्त्तमानानां परमानन्दप्राप्तिमाह । एकादशे तृतीयेऽध्याये जनकं प्रति प्रबुद्धवाक्येन द्वाभ्याम्—

स्मरन्तः स्मारयन्तश्च मिथोघौघहरं हरिम् ।
भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥४८॥[70]

"भक्त्या साधनभक्त्या संजातया प्रेमलक्षणया भक्त्या"[71]

क्वचिद् रुदन्त्यच्युतचिन्तया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः ॥४९॥[72]

अजं हरिमनुशीलयन्ति तत्तल्लीलया अभिनयन्ति ।[73] एवं परमेत्यप्राप्य निर्वृताः सन्तः तूष्णीं भवन्ति । अतः साधूनां सङ्गः सकलपुरुषार्थश्रेणि शिरसि नरीनर्त्तीत्याह चतुर्थे-चतुर्विंशेऽध्याये भगवन्तं प्रति रुद्रवाक्येन—

क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गि[74] सङ्गस्य मर्त्यानां किमुताशिषः ॥५०॥[75]

---

69. तु.भा. 11.14.17
70. तु.भा. 11.14.16
71. तु.भा. 11.3.31
72. तु.भा. 11.3.32
73. ओ-1, ओ-2, ओ-3, - अभिनन्दयन्ति
74. ना - सङ्ग
75. तु.भा. 4.24.57

भगवतस्तव सङ्गिनां सङ्गस्य क्षणार्धेनापि न स्वर्गं तुलये समं न गणयामि न चापुनर्भवं मोक्षं मर्त्यानामाशिषो राजाद्याः किमुत । यतः साधूनां सङ्गः सर्वतो गरीयानन्तोऽयमेव प्राथ्र्यत इत्याह चतुर्थे त्रिंशेऽध्याये भगवन्तं प्रति प्रचेतसां वाक्येन—

यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः ।
तावद्भवत्प्रसङ्गानां सङ्गः स्यान्नो भवे भवे ॥५१॥[76]

स्पृष्टा व्याप्ताः सन्तः भवन्ति । प्रकृष्टः सङ्गो येषां सङ्गोस्माकं स्यात् भवे भवे जन्मनि जन्मनि । भक्तिमार्गे प्रवृत्तान् साधूनभिनन्दनप्रकरणार्थमुपसंहरति प्रथमे तृतीयेऽध्याये शौनकादीन् प्रति सूतवाक्येन—

अथेह[77] धन्या भगवन्त इत्थं यद्वासुदेवेऽखिलविश्वनाथे ।
कुर्वन्ति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त्त उग्रः ॥५२॥[78]

यतः सा एवम्भूता अतः भगवतः सर्वज्ञा भवन्तो धन्याः कृतार्थाः कृतः यद्यस्मादित्थं प्रश्नैः वासुदेवे आत्मभावं मनोवृत्तिं कुर्वन्ति । सर्वात्मकमैकान्तिकं[79] यत्र यस्मिन् भावे सति परिवर्तो जन्ममरणाद्यावर्तो न भवति साधुभ्यः कुशलमांशसति स्वपद्येन—

अदभ्रदोषागमजं[80] तमोभरं निरस्य लोकस्य सुखोचिताः क्रियाः ।
प्रवर्त्तयन्तो भुवि भास्करा इव प्रिया मुरारेः कुशलं दिशन्ति मे ॥५३॥

मुरारेः प्रियाः साधवः किम्भूताः अदभ्रा बहवो दोषा येषु तेषामसतामागमान्मिलनात् यद्वा अदभ्रदोषेभ्यः असदागमेभ्यः आदृतेभ्यो[81] जातं तमो भरं पापातिशयं निरस्य निवर्त्य-लोकस्य जनस्य सुखोचिताः परलोकसुखोचिताः क्रियाः कर्माणि प्रवर्त्तयन्तो भुवि भास्करा इव भास्करा अपि अदभ्रेभ्यो दोषागमेभ्यो रात्र्यागमेभ्यो जातं तमोभरमन्धकारातिशयं निर्वत्य लोकस्यैहिकाय पारलौकिकाय वा

---

76. तु.भा. 4.30.33
77. ओ-2, - अथेहधन्या ..... उग्र इति पर्यन्तं नष्टम् ।
78. तु.भा. 1.3.39
79. ओ-2, - सर्वात्मक .... स्व पद्येन इति पर्यन्तं नष्टम् ।
80. ओ-2, - अदभ्रदोषागमजं ..... साधव इति पर्यन्तं नष्टम् ।
81. ओ-2, - आदृतेभ्यो .... निवर्त्य इति पर्यन्तम् कीटदष्टम् ।
82. ओ-2, - भास्करत्वनहुमुक्तम्...... र्गणैः इति पर्यन्तं नष्टम् ।

सुखायोचिताः क्रियाः प्रवर्त्तयन्ति भास्करत्वबहुत्वमुक्तम्[82] प्रतिमासं रूपं भेदापेक्षया उक्तं च द्वादशे—

द्वादशस्वपि मासेषु भगवान् कालरूपधृक् ।
लोकत्रयाय च रतिपृथग्द्वादशभिर्गणैः ॥
इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
कला तृतीया सम्पूर्णा सत्सङ्गफलशंसिनी ॥
इति[83] तृतीयाकला ।

* * *

83. ना - इति तृतीया कला श्रीः अधिकपाठोऽस्ति ।

[1]चतुर्थी कला

विश्वोपास्येषु रामादिष्ववतारेषु[2] सारता ।
श्री मद्गोकुलनाथस्य चतुर्थ्यामथ कथ्यते ॥१॥

पूर्वकलान्ते यद्वासुदेवेऽखिलविश्वनाथ इति यदुक्तं तत्र कोसौ वासुदेव इत्यपेक्षयां तमाह एकादशे तृतीयेऽध्याये जनकं प्रति पिप्पलायनवाक्येन—

स्थित्युद्भवप्रलयहेतु[3] रहेतुरस्य
यः[4] स्वप्नजागरसुषुप्तिषु सद्बहिश्च ।
देहेन्द्रियासुहृदयानि चरन्ति येन
सञ्जीवितानि तदवेहि परं नरेन्द्र ॥२॥

अस्य[2] विश्वस्य स्थित्युद्भवप्रलयानां हेतुः स्वयं चाहेतुः हेतुरहितः वासुदेव इति परमेव तत्त्वमवेहि । स्वप्नजागरसुषुप्तिषु सदनु-वर्त्तमानं यत्तद्वक्ष्यति तुरीयं त्रिषु सन्ततमिति बहिश्च समाध्यादौ यत्सत्तद्ब्रह्मेति परमेव तत्त्वमवेहि । देहेन्द्रियप्राणमनांसि येन सञ्जीवितानि चरन्ति प्रवर्त्तन्ते तत्परमात्मेति तत्त्वमवेहि । एवं लक्षणभेदैर्वासुदेवादीनामभिरुच्यमानमपि परमेकमेव तत्त्वं जानीहीति । एकस्य तत्त्वस्य नानात्वं स्पष्टयति प्रथमे द्वितीयेऽध्याये शौनकादीन् प्रति सूतवाक्येन—

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥३॥[6]

तत्त्वविदस्तु तदेव तत्त्वं वदन्ति किं तज्ज्ञानं नाम अव्ययमिति क्षणिकज्ञानपक्षं व्यावर्त्तयति । ननु तत्त्वविदोपि विगीतवचना एव मैवं तस्य तत्त्वस्य नामान्तरैरभि-धानादित्याह । औपनिषदैर्ब्रह्मेति हिरण्यगर्भैः परमात्मेति सात्त्वतैर्भगवान्वासुदेव इत्यभिधीयते । एतदयुक्तं न शास्त्रकृतामपि सम्मतत्वादित्याह अष्टमे द्वादशेऽध्याये भगवन्तं प्रति श्रीरुद्रवाक्येन—

---

1. ना- इतः प्राक् 'अथ' अधिकपाठः ।
2. ओ-2 - रामादिष्ववतारेषु......कथ्यते इति पर्यन्तं कीटदष्टम् ।
3. ओ-2 - स्थित्युद्भवप्रलयहेतु.... जागर पर्यन्तं कीटदष्टम् ।
4. भा. 11.3.36 - यत् ·
5. ओ-2 - अस्य विश्वस्य स्थित्युद्भवप्रलयानां..... पर्यन्तं नष्टम् ।
6. तु.भा. 1.2.11

त्वां ब्रह्म केचिदवयन्त्युत धर्ममेक[7]-
एके परं सदसतोः पुरुषं परेशम् ।
अन्येऽवयन्ति नवशक्तियुतं परं त्वा-
मेके[8] महापुरुषमीश्वरमात्मतन्त्रम् ॥४॥

त्वां ब्रह्मवेदान्तिनोऽवयन्ति मन्यन्ते । त्वामेव धर्मं मीमांसका-मन्यन्ते प्रकृतिपुरुषयोः परं पुमांसं सांख्याः विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वा सत्त्वेशानानुग्रहा चेति नवशक्तियुतं वासुदेवं पाञ्चरात्राः महापुरुषं पातञ्जलाः । एकस्येश्वरस्य नाना भावं दृष्टान्तेनोपपादयति तृतीये द्वाविंशेऽध्याये देवहूतिं प्रति कपिलवाक्येन—

यथेन्द्रियैः पृथग्भावैरर्थो बहुगुणाश्रयः ।
एको नानेयते[9] तद्वद्भगवान् शास्त्रवर्त्मभिः ॥५॥

यथा बहूनां रूपरसादीनामाश्रयो गुडक्षीरादिरेक एवार्थो मार्गभेदप्रवृत्तैरिन्द्रियैर्नाना प्रतीयते । चक्षुषा शुक्ला इति रसनेन मधुर इति स्पर्शनेन श्री इति यथा तथा भगवानेव तत्तद्रूपेणावगम्यते । उक्तं च नारदपञ्चरात्रे—

'मणिर्यथा विभागेन नीलपीतादिभिर्युतः ।
रूपभेदमवाप्नोति ध्यानभेदात्तथा च्युतः ॥' इति ।

एवमेकस्येश्वरस्य शास्त्रभेदाद्रूपभेदं निरूप्य तस्य कार्यवशादवतारभेदं निरूपयति । तत्र प्रथमं पुरुषावतारमाह । प्रथमे तृतीयेऽध्याये शौनकादीन् प्रति सूतवाक्येन द्वाभ्याम्—

जगृहे पौरुषं रूपं भगवान्महदादिभिः ।
सम्भूतं षोडशकलामादौ लोकसिसृक्षया ॥६॥[10]

महदहङ्कार पञ्चतन्मात्रैः एकादशेन्द्रियाणि पञ्चमहाभूतानीति षोडशकला अंशा यस्मिन् । तत्र यद्यपि भगवद्विग्रहो नैवम्भूतस्तथापि विराड्जीवान्तर्यामिनो भगवतो विराड्रूपेणोपासनार्थमेवमुक्तमिति द्रष्टव्यम् । यद्वा श्रीः भूः कीर्त्तिः इलालीला कान्तिः विद्या विमलाद्याश्च नव एताः षोडशशक्तयः कला यस्मिन् । एतत्कूटस्थ नत्वर्थाव-

---

7. भा. 8.12.9 - धर्ममेके
8. भा. 8.12.9. - केचिन्महापुरुषमव्ययमात्मतन्त्रम् ।
9. ना- ग्रन्थे नानायते । ओ-1, ओ-2, ओ-3, भागवते (3.32.33) - पृथगद्वारै)- नानेयते - अतः भागवताधारेण पाठः गृहीतः ।
10. तु.भा. 1.3.1

तारवदाविर्भावतिरोभाववदित्याह—

एतन्नानावताराणां निधानं बीजमव्ययम् ।
यस्यांशांशेन[11] सृज्यन्ते देवतिर्यङ्नरादयः ॥७॥[12]

एतदादिनारायणरूपं निधीयतेऽस्मिन्निति निधानं कार्यावसाने प्रवेशस्थानमित्यर्थः । बीजमुद्गमस्थानम् । बीजत्वेऽपि नान्यबीजतुल्यं किन्तु अव्ययं न केवलमवताराणां बीजं किन्तु सर्वप्राणिनमित्याह यस्यांशो ब्रह्म तस्यांशो मरीच्यादिस्तेन । एतत्स्पष्टयति तृतीये नवमेऽध्याये भगवन्तं प्रति ब्रह्मवाक्येन—

रूपं यदेतदवबोधरसोदयेन[13]
शश्वन्निवृत्ततमसः सदनुग्रहाय ।
आदौ गृहीतमवतार शतैकबीजं
यन्नाभिपद्मभवना दहमाविरासम् ॥८॥[14]

अवबोधरसोदयेन चिच्छक्त्या विभावेन शश्वत्सदानिवृत्तं तमो यस्मात्तस्य तव तदेतद्रूपं त्वयैव स्वातन्त्र्येण सतामुपासकानामनुग्रहाय गृहीतमाविष्कृतम् अवतारशतस्य शुद्धसत्त्वात्मकस्य यदेकं बीजं मूलं तत्प्रदर्शनार्थं गुणावतारबीजत्वं दर्शयति यन्नाभित । कत्यवतारा इत्यपेक्षायामाह प्रथमे तृतीयेऽध्याये सूतवाक्येन—

अवतारा ह्यसंख्येया[15] हरेः सत्त्वनिधेर्द्विजाः ।
यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥९॥

असंख्येयत्वे दृष्टान्तः अविदासिनः अपक्षयशून्यात् सरसः सकाशात् कुल्याः क्षुद्रप्रवाहाः । आपुरुषात् सर्वेभ्योऽपि भगवतः कृष्णस्य मुख्यतामाह तत्रैव—

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥१०॥

पुंसः पुरुषावतारस्य केचिदंशाः केचिदंशकला विभूतयः । तत्र मत्स्यादीनाम् अवतारत्वेन सर्वज्ञत्वे सर्वशक्तित्वे यथोपयोगमेव ज्ञानशक्त्याविष्करणं कुमारनारदादिष्वधिकारिषु यथोपयोगमंशकलावेशः यद्यपि परमेश्वरत्वान्मत्स्यादयोऽवताराः पूर्णा एव तथापि ऐश्वर्यमाधुर्याद्यखिलशक्तीनां प्राकट्याभावादंशा उच्यन्ते । अत

11. ओ-2 - शांशेन..... देवतिर्यङ् इति पर्यन्तं विनष्टः ।
12. तु.भा. 1.3.5
13. ओ-2 - दवबोधरसोदयेन इति नष्टम् ।
14. तु.भा. 3.9.2
15. ना- संख्याता, तु.भा. 1.3.26

आह कृष्ण इति कृष्णस्तु साक्षाद्भगवान् आविष्कृत सर्वशक्तित्वात् । उक्तं च कृष्णामृते—

'अंशत्वं नाम शक्तीनां सदाल्पांशप्रकाशिता ।
पूर्णत्वं च स्वेच्छया नानाशक्तिः प्रकाशिता ॥' इति ।

सर्वेषां प्रयोजनमाह इन्द्रारयो दैत्याः तैर्व्याकुलमुपद्रुतं लोकं मृडयन्ति सुखयन्ति ननु तर्हि सर्वेषामवताराणां निधानत्वेन प्रागुक्तः पुरुष एव कृष्णः कृष्णस्तु भगवान् स्वयम् इत्यत्र स्वयं शब्देन पुरुषस्यैव उक्तत्वादिति चेन्न पुरुषस्यापि तदंशत्वादित्याह दशमे पञ्चत्रिंशेऽध्याये श्रीकृष्णं प्रति देवकीवाक्येन—

यस्यां[16] शांशांश भागेन विश्वोत्पत्तिलयोदयाः ।
भवन्ति किल विश्वात्मंस्तं त्वाद्याहं गतिं गता ॥११॥[17]

हे आद्य सर्वेषामादिभूत यस्यांशः पुरुषः तस्यांशो माया तस्यांशा गुणास्तेषां भागेन लेशेन विश्वोत्पत्त्यादयो भवन्ति तं त्वा त्वां शरणं गतास्मि पुरुषाद्याः सर्वेऽवतारा अंशा यस्य स भगवान् कृष्णः पूर्ण इत्यर्थः । एतत् स्पष्टयति दशमेऽष्टमेऽध्याये[18]—

यस्याङ्घ्रिपङ्कजरजोऽखिललोकपालै[19]-
मौंल्युत्तमैर्धृतमुपासिततीर्थतीर्थम् ।
ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः
श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व ॥१२॥[20]

मौल्युत्तमैर्मौलियुक्तै रुत्तमाङ्गै रुत्तममौलिभिरिति वा उपासितानि तीर्थानि यैर्योगिभिस्तेषामपि तीर्थं यद्वा उपासितं सर्वैः सेवितं तीर्थं गङ्गा तस्य तीर्थत्वनिमित्तं किञ्च ब्रह्मा भवः श्रीश्चाहमपि उद्वहेम कथम्भूता वयं यस्य कलाया अंशभूतस्य पुरुषास्यांशाः किञ्च दशमे प्रथमेऽध्याये देवान्प्रति ब्रह्मणैतत् स्पष्टीकृतमित्याह—

वासुदेवे गृहे साक्षाद् भगवान्पुरुषः परः ।
जनिष्यते तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः ॥१३॥[21]

---

16. ओ-2 - यस्यां पदं नष्टम् ।
17. तु.भा. 10.85.31 विद्यते परन्तु प्रस्तुतग्रन्थे दशमे पञ्चत्रिंशेऽध्याये लिखितमस्ति ।
18. तु.भा. 10.68.37 विद्यते किन्तु प्रस्तुतग्रन्थे दशमे अष्टमेऽध्याये लिखितमस्ति ।
19. ओ-2 - लोकपालै...... धृति पर्यन्तं नष्टम् ।
20. तु.भा. 10.68.37
21. तु.भा. 10.1.23

अन्ये अवताराः पुरुषादाविर्भवन्ति अयं तु साक्षाद्भगवान् तर्हि पुरुष एव एवासौ न परः पुरुषः पुरुषादपि परःपुरुष इत्यर्थः । अस्य पुरुषात् परत्वं व्यनक्ति एकादशे षष्ठेऽध्याये भगवन्तं प्रति देवानां वाक्येन—

त्वत्तः पुमान् समधिगम्य यया स्ववीर्यं
धत्ते महान्तमिव गर्भममोघवीर्यः ।
सोऽयं तयानुगत आत्मन अण्डकोशं
हैमं ससर्ज बहिरावरणैरुपेतम् ॥१४॥[22]

त्वत्तः पुरुषो वीर्यं शक्तिं समधिगम्य प्राप्य यया मायया सह महान्तं धत्ते किमिव अस्य विश्वस्य गर्भमिव । सोऽयं महान् तया माययैवानुगतस्सन् आत्मनः सकाशादण्डकोशं ससर्ज त्वयानुगत इति पाठे तया मायया त्वयाधिष्ठितस्सन्निति।

ननु कोसौ कृष्णः यस्य पूर्णतामङ्गीकरोषि तत्राह तृतीये द्वितीयेऽध्याये विदुरं प्रत्युद्धववाक्येन—

प्रदर्श्यातप्ततपसामवितृष्ण[23] दृशां नृणाम् ।
आदायान्तरधाद्यस्तु स्वबिम्बं[24] लोकलोचनम् ॥१५॥

न तप्तं तपो यैः अतोऽवितृष्णा दृशो नेत्राणि येषां तेषां स्वबिम्बं स्वमूर्त्तिमेतावन्तं कालं दर्शयित्वायोऽन्तर्हितवान् लोकस्य लोचनमादायाच्छिद्य तादृशस्यान्यस्य विलोकनीयस्याभावात् तदेव बिम्बं वर्णयति द्वाभ्याम्—

यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम् ।
विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणाङ्गम् ॥१६॥[25]

यन्मर्त्यलीलासु औपयिकं योग्यं स्वस्यापि विस्मयजनकं यतः सौभगर्धेः सौभाग्यातिशयस्य परं पदं पराकाष्ठा भूषणानां भूषणान्यङ्गानि यस्मिंस्तत्—

यस्यानुगप्लुतहास रासलीलावलोकप्रतिलब्धमानाः ।
व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवस्तस्थुः किल कृत्यशेषाः ॥१७॥[26]

---

22. तु.भा. 11.6.16
23. तु.भा. 3.2.11 - मवितृप्त
24. ओ-1, ओ-2, ओ-3, - सं बिम्बं, भागवतस्य वृत्त्यानुसारेण पाठो गृहीतः ।
25. तु.भा. 3.2.12
26. तु.भा. 3.2.14

यस्यानुरागेण प्लुतो व्याप्तो हासो रासो विनोदो लीलावलोकश्च तैः स्वकृतहासानन्तरं धियो यासां ताः असमाप्तनृत्या एव तस्थुः तस्य गुणशालितां दर्शयति प्रथमे षोडशेऽध्याये धर्मं प्रति पृथ्व्यावाक्येन चतुर्भिः—

सत्यं शौचं दया क्षान्तिस्त्यागः सन्तोष आर्जवम् ।
शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥१८॥[27]

सत्यं यथार्थभाषणं शौचं शुद्धत्वं दया परदुःखासहनं क्षान्तिः क्रोधसंप्राप्तौ चित्तसंयमनं त्यागोऽर्थिषु मुक्तहस्तता सन्तोषोलंबुद्धिः आर्जवमवक्रता शमो मनोनैश्चल्यं दमो बाह्येन्द्रियनैश्चल्यं तपः स्वधर्मः साम्यमरिमित्राद्यभावः तितिक्षा परापराधसहनं उपरतिर्लाभ प्राप्तावौदासीन्यं श्रुतं शास्त्रविचारः—

ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः ।
स्वातन्त्र्यं कौशलं कान्तिर्धैर्यं मार्दवमेव च ॥१९॥[28]

ज्ञानमात्मविषयं विरक्तिर्वैतृष्ण्यम् ऐश्वर्यं नियन्तृत्वं शौर्यं संग्रामोत्साहः तेजः प्रभावः बलं दक्षत्वं स्मृतिः कर्त्तव्यानुसन्धानं स्वातन्त्र्यमपराधीनता[29] कौशलं क्रियानिपुणता कान्तिः सौन्दर्यं धैर्यमव्याकुलता मार्दवं चिन्ताकाठिन्यम् ।

प्रागल्भ्यं प्रश्रयं शीलं सह ओजो बलं भगः ।
गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्त्तिर्मानोऽनहंकृतिः ॥२०॥[30]

प्रागल्भ्यं प्रतिभातिशयः प्रश्रयो विनयः शीलं सुचरितं सह ओजो बलादि मनसां ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च पाटवानि भगो भोगास्पदं गाम्भीर्यमक्षोभत्वं स्थैर्यमचञ्चलता आस्तिक्यं श्रद्धा कीर्त्तिर्यशः मनः पूज्यत्वमनहंकृतिर्गर्वाभावः—

एते चान्ये च भगवन्नित्या यत्र महागुणाः ।
प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचित् ॥२१॥[31]

एते एकोनचत्वारिंशदन्ये च बृंहणत्वभक्तवात्सल्यादयो महान्तो गुणा यस्मिन् नित्याः सहजा न वियन्ति न क्षीयन्ते स्म एवम्भूतस्य शरीरपरिग्रहे कारणान्याह प्रथमे अष्टमेऽध्याये भगवन्तं प्रति कुन्तीवाक्येन पञ्चभिः—

---

27. तु.भा. 1.16.26
28. तु.भा. 1.16.27
29. ओ-1, ओ-3, - स्वातन्त्र्यमपरा.....सौन्दर्यम् इति पर्यन्तं नष्टम् ।
30. तु.भा. 1.3.28
31. तु.भा. 1.16.29

केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्त्तये ।
यदोः प्रियस्यान्ववाये मलयस्येव चन्दनम् ॥२२॥[32]

दुर्ज्ञेयत्वात् बहुधा वर्णयन्ति । तत्र केचित् पुण्यश्लोकस्य प्रियस्य युधिष्ठिरस्य कीर्त्तये यदोरेव कीर्त्तय इति वा अजं जातमाहुः मलयस्य कीर्त्तये वंशो वा चन्दनं यथेति ।

अपरे वसुदेवस्य देवक्यां याचितोऽभ्यगात् ।
अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषाम् ॥२३॥[33]

तथा वसुदेवस्य देवक्यां भार्यायामजस्त्वमभ्यगात् पुत्रत्वमिति शेषः । प्रथमपुरुषस्त्वार्षः । अर्भत्वमिति[34] पाठः । सुगमः । ताभ्यामेव पृष्णिसुतपोभ्यां याचितस्सन् अस्य जगतो मोक्षायेत्यपरे ।

भारावतरणायान्ये[35] भुवो नाव इवोदधौ ।
सीदन्त्या भूरिभारेण जातो ह्यात्मभुवार्थितः ॥२४॥[36]

उदधौ नाव इव सीदन्त्या भुवो भारावतरणायात्मभुवा ब्रह्मणार्थितो जात इत्यन्ये स्वाभिमतं मतमाह द्वाभ्याम्—

भवेऽस्मिन् क्लिश्यमानानामविद्याकामकर्मभिः ।
श्रवणस्मरणार्हाणि करिष्यन्निति केचन ॥२५॥[37]

परमानन्दस्वरूपज्ञानमविद्या ततो देहाभिमानात्कामः ततः कर्मणि तैः क्लिश्यमानानां तन्निवृत्तये श्रवणाद्यर्हणानि कर्माणि करिष्यन् जात इति केचन ।

तथा परमहंसानां मुनीनाममलात्मनाम् ।
भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः ॥२६॥[38]

परमहंसानाम् आत्मानात्मविवेकवतां मुनीनां मननशीलानां ततश्चामलात्मनां

---

32. तु.भा. 1.8.32
33. तु.भा. 1.8.33
34. ना- अर्भत्व
35. ओ-2 - भारावतरणान्वे, तु.भा.- भारावतरणान्ये, अत्र भागवताधारेण पाठो गृहीतः। वृत्तौ च गृहीतः पाठः समर्थितः। ओ-1, ओ-3 - भारावतरणायार्थे ।
36. तु.भा. 1.8.34
37. तु.भा. 1.8.35
38. तु.भा. 1.8.20

निवृत्तरागादीनामपि भक्तियोगविधानार्थम् आत्मारामाणामपि अचिन्त्य निजगुणैराकृष्य भक्तियोगं कारयितुमवतीर्णमित्यर्थः । तदाचरणस्याघटमानतां दर्शयति द्वाभ्यां तृतीये चतुर्थेऽध्याये कृष्णमिदमवोचमिति विदुरं प्रत्युद्धववाक्येन—

कर्माण्यनीहस्य भवोऽभवस्य ते दुर्गाश्रयोऽथारिभयात्पलायनम् ।
कालात्मनो यत्प्रमादायुताश्रयः स्वात्मन् रतेः खिद्यति धीर्विदामिह ॥२७॥[39]

कर्मणि अनीहस्य निस्पृहस्य निष्क्रियस्य वा अभवस्याजन्मनः भवो जन्म कालात्मन-स्तवारि भयाद्दुर्गाश्रयः पलायनं च स्वात्मनि रतिर्यस्य तस्य बह्वीभिः स्त्रीभिः गृहस्थाश्रम इति यत् इहास्मिन्विषये विदां विदुषामपि धीः संशयेन खिद्यति ।

मन्त्रेषु मां वा उपहूय यत्त्वमकुण्ठिताखण्डसदात्मबोधः ।
पृच्छेः प्रभो मुग्ध इवाप्रमत्तस्तन्मे[40] मनो मोहयतीव देव ॥२८॥

किञ्च मन्त्रेषु प्रस्तुतेषु सत्सु समाहूय ये वै अहो पृच्छेः अपृच्छः अकुण्ठितः । कालादिना[41] अखण्डः[42] सन्ततः सदा आत्मा संशयादिरहितो बोधः विद्याशक्तिर्यस्य सः मुग्धवदज्ञवत् अप्रमत्तोऽवहितस्सन् । तस्य भक्तेष्वनुवृत्तिं दर्शयति द्वाभ्यां तृतीये द्वितीयेऽध्याये विदुरं प्रति उद्धववाक्येन—

स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः ।
बलिं हरद्भिश्चिरलोकपालैः किरीटकोट्येडितपादपीठः ॥२९॥[43]

स्वयं य एवम्भूतस्तस्य कैङ्कर्ये नोऽस्मान् विग्लापयतीत्युत्तरेणान्वयः न विद्यते साम्यातिशयो यस्य यमपेक्ष्यान्यस्य साम्यमतिशयश्च नास्तीत्यर्थः । तत्र हेतवः त्रयाणां पुरुषाणां लोकानां गुणानां वा ईशः स्वाराज्यलक्ष्म्या परमानन्दस्वरूपसंपत्त्यैव प्राप्तसमस्तकामः बलिं करमर्हणं वा हरद्भिः समर्पयद्भिश्चिरकालिकैर्लोकपालैः किरीटाग्रेणेडितं स्तुतं पादपीठं यस्य प्रणमतां किरीटसंघट्टध्वनिरेव स्तुतित्वेनो-त्प्रेक्ष्यते ।

तत्तस्य कैङ्कर्यमलं भृतान्नो विग्लापयत्यङ्ग यदुग्रसेनम् ।
तिष्ठन्निषण्णं परमेष्ठिधिष्ण्ये न्यबोधयद्देव निधारयेति ॥३०॥[44]

---

39. तु.भा. 3.4.16
40. भा. 3.4.17 - स्तन्नो
41. ओ-1, ओ-2 - कालादिना इति पदं नष्टम् ।
42. ओ-2 - अखण्डितः
43. तु.भा. 3.2.21
44. तु.भा. 3.2.22

अङ्ग हे विदुर उग्रसेने यत्किङ्करत्वं परमेष्ठिधिष्णये राजासने निषण्णमासीनं स्वयं तिष्ठन् हे देव निधारय अवधारयेति यद्विज्ञापितवान् । ननु ईश्वरस्सन् कथं किङ्करकृत्ये प्रवृत्तस्तत्राह प्रथमे नवमेऽध्याये पाण्डवान्प्रति भीष्मवाक्येन—

सर्वात्मनः समदृशो ह्यद्वयस्यानहङ्कृतेः ।
तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥३१॥[45]

तत्कृतं चोच्चोच्चकर्मकृतं मम योग्यमयोग्यमिति मते वैषम्यं तस्य न क्वचिदपि कृतो निरवदस्य रागादिशून्यस्य तत्कृतोऽनहङ्कृतेः तत्कृतः अद्वयस्य तदपि कुतः समादृशः सर्वात्मनः यथेष्टं हेतु हेतु मद्भावः । एवं प्रवृत्तस्यापि ब्रह्माद्यगोचरमहिम अत आह दशमे चतुर्दशेऽध्याये भगवन्तं प्रति ब्रह्मवाक्येन—

क्वाहं तमोमहदहंखचराग्निवार्भू
संवेष्टिताण्डघट सप्तवितस्तिकायः ।
क्वेदृग्विधाविगणिताण्डपराणुचर्या
वाताध्वरामविवरस्य च ते महित्वम् ॥३२॥[46]

तमः प्रकृतिर्महानहङ्कारः खचरो वायुः अग्निर्वाः जलं भूश्च प्रकृत्यादिपृथिव्यान्तैः संवेष्टितो योऽण्डघटः स एव तस्मिन्नात्ममानेन सप्तवितस्तिः कायो यस्य सोहं महत्त्वं क्व कथम्भूतस्य ईदृग्विधानि अविगणितानि अण्डानि तान्येव परमाणवस्तेषां परिचर्या भ्रमणं तदर्थं वा अध्वनो गवाक्षा इव रोमविवराणि यस्य तव अतोऽतितुच्छत्वात् त्वयानुकम्प्योहमिति भावः । तस्याचिन्त्यशक्तितामाह दशमे एकोनसप्ततितमेऽध्याये नारदस्य स्वयं परामर्शेन—

चित्रं बतैतदेकेन वपुषा युगपत् पृथक् ।
गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥३३॥[47]

युगपदेकदा दुष्टसाहस्रं स्त्रीः उदावहत् परिणीतवान् । बहुवनितावल्लभत्वेऽपि आत्मरामतां व्यनक्ति दशमे एकषष्टितमेऽध्याये परीक्षितं प्रति शुकवाक्येन द्वाभ्याम् ।

चार्वब्जकोशवदनायतचारुनेत्र[48]
सप्रेमहासरसवीक्षितवल्गुजल्पैः ।

---

45. तु.भा. 1.9.21
46. तु.भा. 10.14.11
47. तु.भा. 10.69.2
48. भा. 10.61.3 - बाहुनेत्र

सम्मोहिता भगवतो न मनो विजेतुं
स्वैर्विभ्रमैः समशकन् वनिता विभूम्नः ॥३४॥

चारुरब्जकोशः तद्वदनंचायते चारुणी नेत्रे च स प्रेम्णा हासरसेन वल्गुजल्पश्च भगवत एतैः सम्मोहिताः स्वैरनेकैर्विभ्रमैर्विलासैः तस्य मनो भगवतो विजेतुं हर्त्तुं नहि समशकन् न शक्ता बभूवुः विभूम्नः परिपूर्णस्य । तासां विभ्रमान्वर्णयन्नेतद्विवृणोति ।

स्मायावलोकलवदर्शितभावहारि
भ्रूमण्डलप्रहितसौरतमन्त्रशौण्डैः ।
पत्न्यस्तु षोडशसहस्रमनङ्गबाणै-
र्यस्येन्द्रियं विमथितुं करणैर्न शेकुः ॥३५॥[49]

स्मायो गूढस्मितं तद्युक्तः अवलोकलवः कटाक्षस्तेन दर्शितः सूचितो भावोऽभिप्रायः तेन हारि मनोहरणशीलं तद्भ्रूमण्डलं तेन प्रहिता प्रस्थापिता ये सौरतमन्त्राः तेषु शौण्डैरनङ्गवाणैरन्यैः करणैः कामशास्त्रप्रसिद्धैः यस्येन्द्रियं मनो विमथितुं क्षोभयितुं षोडशसहस्रमपि पत्न्यो न शेकुः अबुधोजनस्तं सङ्गिनं मनुजं मन्यत इत्याह प्रथमे एकादशेऽध्याये शौनकादीन् प्रति सूतवाक्येन—

मन्यते[50] तमयं लोको ह्यसङ्गमपि सङ्गिनम् ।
आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः ॥३६॥

तं श्री कृष्णमयं प्राकृतो लोकः आत्मौपम्येन स्वसादृश्येन सङ्गिनं मनुजं मन्यते । अत्र हेतुः व्यापृण्वानं व्याप्रियमाणं यतोऽयमबुधोऽतत्त्वज्ञः । एतस्य जन्मना चङ्क्रमेणन च पूजितं यदुकुलं मधुवनं च स्तौति । प्रथमे दशमेऽध्याये भगवद्दर्शनजातं हर्षाणां हस्तिनापुरस्त्रीणां वाक्येन—

अहो अलं श्लाघ्यतमं यदो कुल-
महो अलं पुण्यतमं मधोर्वनम् ।
यदेष पुंसामृषभः श्रियः पतिः
स्वजन्मना चङ्क्रमणेन चाञ्चति ॥३७॥[51]

यद्यस्मादेष पुरुषोत्तमः श्रियः पतिः स्वजन्मना यदोः कुलमञ्चति पूजयति सत्करोति अतः श्लाघ्यतमं यत् । चङ्क्रमणेन मधोर्वनं मथुरां सत्करोति अतस्तत्पुण्यतममिति

---

49. तु.भा. 10.61.4
50. भा. 1.11.37 - तमयं मन्यते
51. तु.भा. 1.10.26

तदर्थस्याप्यतिशयत्वे अत्यन्तातिशयेऽलमिति तत्राप्याश्चर्ये अहो इति चोक्तम् । व्रज भुवः पुण्य इत्याह दशमे चतुश्चत्वारिंशेऽध्याये भगवतो मल्लयुद्धसमये पुरस्त्रीणां वाक्येन—

पुण्या बत व्रजभुवो यदयं नृलिङ्ग-
गूढः पुराणपुरुषो वनश्चित्रमाल्यः ।
गाः पालयन् सहबलः क्वणयंश्चवेणुं
विक्रीडयाञ्चति गिरित्ररमार्चिताङ्घ्रिः ॥३८॥[52]

नृलिङ्गेन मानुषदेहेन गूढः गिरित्रः शिवः रमा लक्ष्मीः ताभ्यामर्चिताङ्घ्री यस्य अयं भावः धिगिमां सभां यस्यां सोऽयं पराभूयते । अतो व्रजभुवो धन्याः यत् यासु अयं श्रीकृष्णो विविधया क्रीडया अञ्चति गच्छति । व्रजौकसां भाग्यातिशयमाह दशमे द्वादशेऽध्याये शुकवाक्येन—

यत्पादपांसुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यलभ्यः ।
स एव यदृग्विषयः स्वयं स्थितः किं वर्ण्यते दिष्टमतो व्रजौकसाम् ॥३९॥[53]

बहु जन्मभिः कृच्छ्रेण धृत आत्मा मनो यै स्तैरपि । तत्रापि गोप्यः बहुपुण्या इत्याह द्वाभ्यां दशमे चतुश्चत्वारिंशेऽध्याये मधुपुरस्त्रीणां वाक्येन—

गोप्यस्तपः किमचरन् यदमुष्य रूपं
लावण्यसारमसमोर्ध्वमनन्य सिद्धम् ।
दृग्भिः पिबन्त्यनुसवाभिनवं दुराप-
मेकान्तधाम यशसः श्रिय ऐश्वरस्य ॥४०॥[54]

अमुष्य श्रीकृष्णस्य रूपं[55] लावण्येन सारं श्रेष्ठं किञ्चासमोर्ध्वं न विद्यते । सममूर्ध्व-मधिकं च यस्य एतदपि नान्येनाभरणादिना सिद्धं किञ्चातः ऐश्वरस्य एकान्तधाम ऐश्वर्यस्याव्यभिचारि स्थानं पाठान्तरे अमुष्येश्वरस्येत्यन्वयः एवम्भूतं नवीनं रूपं या नेत्रैर्नित्यं पश्यन्ति । दर्शनप्रकारमाहुः—

प्रातर्व्रजाद् व्रजत आविशतश्च सायं
गोभिः समं क्वणयतोऽस्य[56] निशम्य वेणुम् ।

52. तु.भा. 10.44.13
53. तु.भा. 10.12.12
54. तु.भा. 10.44.14
55. ओ-2 - अमुष्य श्रीकृष्णस्य रूपं इति नष्टम् ।
56. ओ-1, ओ-3 - कृशयतो, भा. 10.44.16 - आधारेण-क्वणयतोऽस्य पाठो ग्रहणीयः ।

निर्गम्य तूर्णमबलाः पथि भूरिपुण्याः
पश्यन्ति सस्मितमुखं सदयावलोकम् ॥४१॥

या अबला अस्य वेणुं निशम्य गृहात्तूर्णं निर्गम्य मुखं पश्यन्ति अभूरिपुण्या इति । वेणुश्रीमूर्त्योर्निरतिशयमाधुर्यमाह दशमे एकविंशेऽध्याये भगवन्तमभिलक्ष्य गोपीनां वाक्येन—

कृष्णं निरीक्ष्य वनितोत्सवरूपशीलं
श्रुत्वा च तत्क्वणितवेणुविचित्रगीतम् ।
देव्यो विमानगतयः स्मरनुन्नसारा-
भ्रश्यत्प्रसूनकबरा मुमुहुर्विनीव्यः ॥४२॥[57]

हे गोप्यः आश्चर्यं शृणुत वनितानामुत्सवो यस्मात्तद्रूपं च शीलं यस्य तं श्रीकृष्णं निरीक्ष्य तेन वादित वेणो रसङ्कीर्णं गीतं च श्रुत्वा विमानैर्गच्छन्त्यो देव्यः देवानामङ्केषु स्थिता अपि स्मरेणनुन्नसारा आक्षिप्तधैर्या मुमुहुः । मोहलिङ्गमाहुः भ्रश्यत्प्रसूनाः कबरा यासां ताः न चैतदसम्भावितमचेतनानामपि मोहितत्वादित्याह दशमे ऊनत्रिंशेऽध्याये भगवन्तं प्रति गोपीनां वाक्येन—

का स्त्वङ्ग ते मृतपदामृतवेणुगीतः[58]
सम्मोहिताऽऽर्यचरितान्न चलेत्त्रिलोक्याम् ।
त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं
यद् गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥४३॥

त्रैलोक्यसौभगमिदं रूपं च निरीक्ष्य आर्यचरितात् स्वमार्गात् का स्त्री न चलेत् । द्वाभ्यां संक्षिप्य रासक्रीडां वर्णयति । दशमे त्रयस्त्रिंशेऽध्याये परीक्षितं प्रति शुकवाक्येन—

ततोति[59]शुशुभे ताभिर्भगवान् देवकीसुतः ।
मध्ये मणीनां हैमानां महामरकतो यथा ॥४४॥

महामरकतो नीलमणिरिव हैमानां मणीनां मध्ये ताभिः सुवर्णवर्णाभिराश्लिष्टाभिः शुशुभे गोपीदृष्ट्यभिप्रायेण विनैव मध्यपदा वृत्तमेकवचनम् । यथा ताभिः शुशुभे स तथा ता अपि विरेजुरित्याह—

---

57. तु.भा. 10.21.12
58. भा. (10.29.40) - कास्त्वङ्गते कलपदायतमूर्च्छितेन ।
59. भा. (10.33.7) - तत्राति

पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासै-
र्भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः ।
स्विद्यन्मुखः कबररशनाग्रन्थयः कृष्णवध्वो
गायन्त्यस्तं तडित इव ता मेघचक्रे विरेजुः ॥४५॥[60]

पटैश्च गण्डेषु चञ्चलैः कुण्डलैः स्वेदयुक्तानि मुखानि यासां ताः कवरेषु रशनासु च ग्रन्थयो यासां ताः यद्वा तेषु तासु चाग्रन्थयः शिथिलग्रन्थ[61] य इत्यर्थः । तत्र नानामूर्त्तिः कृष्णो मेघचक्र इव तासु वध्वो बहुधा तडित इव स्वेदस्तुषर इव गीतं गर्जितमिव यथासम्भवमूह्यम् । रासक्रीडां निगमयति तत्रैव—

एवं शशाङ्काशुविराजिता निशाः
स[62] सत्यकामोऽनुरताबलागणः ।
सिषेव आत्मन्यवरुद्धसौरतः
सर्वाः शरत्काव्यकथारसाश्रयाः ॥४६॥[63]

श्रीकृष्णः सत्यसङ्कल्पः अतोनुरागिस्त्रीकदम्बस्थ एव सर्वा निशाः सेवितान् शरत्काव्यकथारसाश्रयाः शरदादिभावाः[64] काव्येषु कथ्यमाना ये रसाः तेषाम् आश्रयभूता निशाः । तद्वा निशा अत्यन्तं संयोगे शृङ्गाररसाश्रयाः शरदि प्रसिद्धाः काव्येषु याः कथास्त इति एवमात्मन्यरुद्धः सौरतश्च स धातुर्न स्खलितो यस्येति कामजयोक्तिः[65] मया कल्पित स्त्री सङ्गमुदितैः पतिभिः सार्धं व्रजवधूनां सङ्गोऽपि नास्तीत्याह तत्रैव—

नासूयन् खलु कृष्णाय मोहितास्तस्य मायया ।
मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः ॥४७॥[66]

स्वान्[67] स्वदारान् स्वपार्श्वस्थान्मन्यमानाः ।

---

60. तु.भा. 10.33.8
61. ओ-2 - शिथिलग्रन्थ.....इव इति पर्यन्तं नष्टम् ।
62. ओ-2 - स सत्यकामो......रसाश्रया इति पर्यन्तं नष्टम् ।
63. तु.भा. 10.33.26
64. ओ-2 - शरदि भावाः...... अत्यन्तं इति पर्यन्तं नष्टम् ।
65. ओ-2 कामजयोक्तिः...... तत्रैव इति पर्यन्तं नष्टम् ।
66. तु.भा. 10.33.38
67. ओ-2 - स्वान् स्वान् दारान्.......जनः इति पर्यन्तं नष्टम् ।

तर्हि यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः इति न्यायेनान्योऽप्येतत्कुर्यादित्या-शङ्क्याह तत्रैव—

नैतत् समाचरेज्जातु मनसापि ह्यनीश्वरः ।
विनश्यत्याचरन् मौढ्याद् यथा रुद्रोऽब्धिजं विषम् ।।४८ ।।[68]

अनीश्वरो देहादि[69] परतन्त्रः तथा रुद्रव्यतिरिक्तो विषयमाचरन्नश्यति इदानीं सर्वान्तर्यामिणः[70] परदारसेवानाम न कदाचिदित्याह तत्रैव—

गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम् ।
योऽन्तश्चरति सोऽध्यक्ष एष क्रीडनदेह[71]भाक् ।।४९ ।।

योऽन्तश्चरति अध्यक्षो बुद्धिसाक्षी एष क्रीडनदेहभाक् नत्वस्मदादि तुल्यः येन दोषः स्यादिति । नन्वेवं चेदाप्तकामस्य कुतो निन्दिते प्रवृत्तिस्तत्राह तत्रैव—

अनुग्रहाय भक्तानां[72] मानुषं देहमाश्रितः ।
भजते[73] तादृशीः क्रीडा याः श्रुत्वातत्परो भवेत् ।।५० ।।[74]

शृङ्गाररसाकृष्टचेतसोऽतिबहिर्मुखानपि स्वपरान् कर्त्तुमिति भावः । ननु योगमाया-मुपाश्रित इत्यादिश्रवणात् भगवतो गोपीभिः सह विहरणं नाम मायैव । तन्मायाश्रवणकीर्त्तनादिना किं फलमित्याशङ्क्याह द्वितीये सप्तमेऽध्याये नारदं प्रति ब्रह्मवाक्येन—

मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः ।
शाृण्वतः श्रद्धया नित्यं माययात्मा[75] न मुह्यति ।।५१ ।।

अमुष्येश्वरस्य मायां वर्णयतोऽनुमोदतः शृण्वतश्चात्मा मायया न मुह्यति । ननु किमीश्वरस्य मायाचरणैर्विषयभोगैर्वातत्राह प्रथमे तृतीयेऽध्याये शौनकादीन् प्रति सूतवाक्येन द्वाभ्याम्—

---

68. तु.भा. 10.33.31
69. ओ-2 अनीश्वरो...... नश्यति इति पर्यन्तं नष्टम् ।
70. ओ-2 सर्वान्तर्यामिणः.......योन्तश्चरति अध्यक्षो इति पर्यन्तं नष्टम् ।
71. तु.भा. 10.33.36 - नेनेह
72. तु.भा. 10.33.37 - भूतानां
73. ओ-2 भजते..........श्रुत्वात् इति पर्यन्तं नष्टम् ।
74. तु.भा. 10.33.37
75. भा. (2.7.53) - मायायाऽऽत्मा

तर्हि यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः इति न्यायेनान्योऽप्येतत्कुर्यादित्या-शङ्क्याह तत्रैव—

नैतत् समाचरेज्जातु मनसापि ह्यनीश्वरः ।
विनश्यत्याचरन् मौढ्याद् यथा रुद्रोऽब्धिजं विषम् ।।४८ ।।[68]

अनीश्वरो देहादि[69] परतन्त्रः तथा रुद्रव्यतिरिक्तो विषयमाचरन्नश्यति इदानीं सर्वान्तर्यामिणः[70] परदारसेवानाम न कदाचिदित्याह तत्रैव—

गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम् ।
योऽन्तश्चरति सोऽध्यक्ष एष क्रीडनदेह[71]भाक् ।।४९ ।।

योऽन्तश्चरति अध्यक्षो बुद्धिसाक्षी एष क्रीडनदेहभाक् नत्वस्मदादि तुल्यः येन दोषः स्यादिति । नन्वेवं चेदाप्तकामस्य कुतो निन्दिते प्रवृत्तिस्तत्राह तत्रैव—

अनुग्रहाय भक्तानां[72] मानुषं देहमाश्रितः ।
भजते[73] तादृशीः क्रीडा याः श्रुत्वातत्परो भवेत् ।।५० ।।[74]

शृङ्गाररसाकृष्टचेतसोऽतिबहिर्मुखानपि स्वपरान् कर्त्तुमिति भावः । ननु योगमाया-मुपाश्रित इत्यादिश्रवणात् भगवतो गोपीभिः सह विहरणं नाम मायैव । तन्मायाश्रवणकीर्त्तनादिना किं फलमित्याशङ्क्याह द्वितीये सप्तमेऽध्याये नारदं प्रति ब्रह्मवाक्येन—

मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः ।
शाृण्वतः श्रद्धया नित्यं माययात्मा[75] न मुह्यति ।।५१ ।।

अमुष्येश्वरस्य मायां वर्णयतोऽनुमोदतः शृण्वतश्चात्मा मायया न मुह्यति । ननु किमीश्वरस्य मायाचरणैर्विषयभोगैर्वातत्राह प्रथमे तृतीयेऽध्याये शौनकादीन् प्रति सूतवाक्येन द्वाभ्याम्—

---

68. तु.भा. 10.33.31
69. ओ-2 अनीश्वरो...... नश्यति इति पर्यन्तं नष्टम् ।
70. ओ-2 सर्वान्तर्यामिणः.......योन्तश्चरति अध्यक्षो इति पर्यन्तं नष्टम् ।
71. तु.भा. 10.33.36 - नेनेह
72. तु.भा. 10.33.37 - भूतानां
73. ओ-2 भजते..........श्रुत्वात् इति पर्यन्तं नष्टम् ।
74. तु.भा. 10.33.37
75. भा. (2.7.53) - मायायाऽऽत्मा

न चास्य कश्चिन्निपुणेन धातुरवैति जन्तुः कुमनीष ऊतीः ।
नामानि रूपाणि मनोवचोभिः सन्तन्वतो नटचर्यामिवाज्ञः ॥५४॥[76]

धातुर्जगद्विधातुरीश्वरस्य ऊतीर्लीलाः कुमनीष ! निपुणेन तर्कादि कौशलेनावैति न जानाति । मनसा रूपाणि वचसा नामानि सन्तन्वतो विस्तारयतः वचोभिरिति बहुत्वं श्रुत्यभिप्रायेण भक्तस्तु कथञ्चिज्जानातीत्याह—

स वेद धातुः पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणेः ।
योऽमायया सन्ततयानुवृत्त्या भजेत तत्पादसरोजगन्धान् ॥५३॥[77]

अमायया अनुवृत्त्या आनुकूल्येन भजेत । वर्णितस्य कृष्णावतारस्य चरितमुपसंहरति दशमे पञ्चदशेऽध्याये परीक्षितं प्रति शुकवाक्येन—

एवं निगूढात्मगतिः स्वमायया गोपात्मजत्वं चरितैर्विडम्बयन् ।
रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्राम्यवदीशचेष्टितः ॥५४॥[78]

ईशचेष्टित इति निगूढस्वभावत्वेपि अन्तरान्तरा ईशस्यैव चेष्टितानि दृश्यन्ते यस्मिन् । स्वपद्येन भगवन्तमुपास्ते—

श्रियो निवासं नवनीरदोपमं
गृहीतवंशं शिखिपिच्छवच्छिखम् ।
विमोहयद्बल्लव वल्लभागणं
स्मिताननं धाम किमप्युपास्महे ॥५५॥

इति भागवताब्ध्युत्थे हरिभक्ति सुधाकरे ।
कला चतुर्थी सम्पूर्णा श्रीकृष्णोत्कर्षवर्णिनी ॥
इति चतुर्थी कला ।[79]

* * *

76. तु.भा. 1.3.37
77. तु.भा. 1.3.38
78. तु.भा. 10.15.19
79. ना- इति चतुर्थी कला- अधिकः पाठः । सोऽत्र प्रदत्तः ।

[1]पञ्चमी कला

कलायामथ पञ्चम्यां कृष्णस्य जगतीपतेः ।
दैवतैरप्यलभ्याया भक्तेर्माहात्म्यमुच्यते ॥१॥

पूर्वकलान्ते स वेद धातुः पदवीं परस्येत्यादिना परमेश्वरस्य पदवीं भक्तिमान्वेदेत्युक्तं तत्र कीदृशी भक्तरित्यपेक्षायां भक्तिमाहात्म्यं निरूपयितुं पञ्चमीं कलामारभते । तत्र हरिसेवायां सर्वजन्मादिकं सफलं तद्विहीनं व्यर्थमित्याह चतुर्थे एकत्रिंशेऽध्याये प्रचेतसः प्रति नारदवाक्येन पञ्चभिः—

तज्जन्म तानि[2] कर्माणि तदायुस्तन्मनो वचः ।
नृणां येन[3] हि विश्वात्मा सेव्यते हरिरीश्वरः ॥२॥

येन जन्मादिना स हरिः सेव्यते यतो जन्मादौ हरिसेवैव फलम् ।

किं जन्मभिस्त्रिभिर्वेह शौक्ल[4]सावित्रयाज्ञिकैः ।
कर्मभिर्वा त्रयीप्रोक्तैः पुंसोपि विबुधायुषा ॥३॥[5]

शुक्लसम्बन्धजन्मविशुद्धमातापितृभ्यां यदुत्पत्तिः सावित्रमुपनयनयाज्ञिकं दीक्षया विबुधानामिव दीर्घायुषा ।

श्रुतेन तपसा किं वा वचोभिश्चित्तवृत्तिभिः ।
बुद्ध्या वा किं निपुणया बलेनेन्द्रियराधसा ॥४॥[6]

वचोभिर्वाग्विलासैः चित्तवृत्तिभिर्नानाविधानसामर्थ्यैः इन्द्रियाणां राधसा पाटवेन—

किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि ।
किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥५॥[7]

योगेन प्राणायामादिना सांख्येन देहादिव्यतिरिक्तादिज्ञानमात्रेण संन्यासवेदाध्ययनाभ्यामपि अन्यैरपि व्रतवैराग्यादिभिः श्रेयस्साधनैः नन्वेषां नानाफलसाधनानां

---

1. ना- 'अथ' इति अधिकपाठोऽस्ति ।
2. ओ-1, ओ-3 - नानि
3. भा. (4.31.9) - येनेह
4. ओ-1, ओ-2, ओ-3 - शौक्त
5. तु.भा. 4.31.10
6. तु.भा. 4.31.11
7. तु.भा. 4.31.12

हरिसेवाभावमात्रेण कुतो वैयर्थ्यं तत्राह—

श्रेयसामपि सर्वेषामात्माह्यवधिरर्थतः ।
सर्वेषामपि भूतानां हरिरात्माऽऽत्मदः प्रियः ॥६॥[8]

श्रेयसां फलानामात्मैवावधिः पराकाष्ठा अर्थतः परमार्थतः आत्मार्थत्वेनैवान्येषां प्रियत्वादित्यर्थः । भवत्वात्माऽवधिः हरेः किमायातं तत्राह सर्वेषामपीति । आत्मदो हरिः अविद्यानिरासेन स्वरूपाभिव्यञ्जकः ऐश्वरेणापि रूपेण बलिप्रभृतीनामात्मदः प्रियश्च परमानन्दरूपत्वात् । नन्वस्य हरिभजनस्य सर्वपुरुषार्थाधिकत्वं कुतो ज्ञातमिति चेद्विद्वदाचरणीयत्वादित्याह चतुर्थे एकविंशेऽध्याये सभ्यान् पृथुवाक्येन द्वाभ्याम्—

मनोरुत्तानपादस्य ध्रुवस्यापि महीपतेः ।
प्रियव्रतस्य राजर्षेरङ्गस्यास्मत्पितुः पितुः ॥७॥[9]

अस्मत्पितामहस्याङ्गस्य

ईदृशानामथान्येषामजस्य च भवस्य च ।
प्रह्लादस्य बलेश्चापि कृत्यमस्ति गदाभृता ॥८॥[10]

गदाभृता श्रीकृष्णेन सेवितव्येन कृत्यमस्ति । अत एव ततः परोऽर्थः पुंसां नास्तीत्याह । सप्तमे सप्तमेऽध्याये असुरबालकान् प्रति प्रह्लादवाक्येन—

एतावानेव लोकेऽस्मिन् पुंसां[11] स्वार्थः परः स्मृतः ।
एकान्तभक्तिर्गोविन्दे यत्सर्वत्र तदीक्षणम् ॥९॥

तदीक्षणं गोविन्ददृष्ट्या सम्माननम् । सन्ति संसरन्तः पुंसो बहवो मोक्षमार्गास्तपो[12] योगादयः किन्तु समीचीनस्तु अयमेवेत्याह द्वितीये द्वितीयेऽध्याये शुकवाक्येन—

न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह ।
वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥१०॥[13]

यतोनुष्ठिताद्भक्तियोगो भवेत् ततोऽन्यः शिवरूपो निर्विघ्नश्च पन्था नास्त्येव । ननु संसृति-निवृत्ति-वैराग्य-पूर्वज्ञानादेव न तु भक्त्या तरति शोकमात्मविदितिश्रुतेः तत्राह चतुर्थे ऊनविंशेऽध्याये प्राचीनबर्हिषं प्रति नारदवाक्येन—

---

8. तु.भा. 4.31.13
9. तु.भा. 4.21.28
10. तु.भा. 4.21.29
11. ना- पुंसा, तु.भा. 7.7.55 - पुंसः
12. ओ-2 - 'मार्गास्तपोयोगादयः किन्तु' पर्यन्तं नष्टम् ।
13. तु.भा. 2.2.33

वासुदेवे भगवति भक्तियोगः प्रयोजितः[14] ।
सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ॥११॥

सध्रीचीनेन समीचीनेन । अनायासप्रकारेण हरिरेव सेव्यः सर्वकारणत्वादित्याह द्वाभ्याम् । द्वितीये पञ्चमेऽध्याये नारदं प्रति ब्रह्मवाक्येन—

नारयणपरा वेदा देवा नारायणाङ्गजाः ।
नारायणपरा लोका नारायणपरा मखाः ॥१२॥[15]

नारायणः परः कारणं येषान्ते[16] । देवाश्च तदङ्गाज्जाताः लोकाः स्वर्गादयस्तदन्यान्यस्यांशाः मखास्तत्साधनभूताः ।

नारायणपरो योगो नारायणपरं[17] तपः ।
नारायणपरं ज्ञानं नारायणपरा गतिः ॥१३॥

योगः प्राणायामादिः तपस्तत्साध्यं चित्तैकाग्र्यं ज्ञानं तत्साध्यं गतिः तत्फलम् । नारायणपराङ्मुखं प्रायश्चित्तानि शोधयन्तीत्याह षष्ठे प्रथमेऽध्याये परीक्षितं प्रति शुकवाक्येन—

प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम् ।
न निष्पुनन्ति राजेन्द्र सुराकुम्भमिवापगाः ॥१४॥[18]

महतामप्यशोधकत्वे दृष्टान्तः सुराकुम्भमापगाइवेति । भक्तिः सर्वाण्यघानि नाशयतीत्याह तत्रैव—

केचित्केवलया भक्त्या वासुदेवपरायणाः ।
अघं धुन्वन्ति कात्स्र्न्येन नीहारमिव भास्करः ॥१५॥

केचिदित्यनेन एवम्भूता भक्तिप्रधाना विरला इति दर्शयति । केवलया तपःआदिनिरपेक्षया श्रवणकीर्त्तनादिरूपया वासुदेवपरायणा इति अधिकारिविशेषणमेतत् । किन्त्वन्येषामश्रद्धया तत्राप्रवृत्तेरर्थान्तरेष्वेव पर्यवसानादनुवादमात्रम् ।

नन्वन्यानपि केचिद्भजन्तो दृश्यन्ते । सत्वप्रधाना निष्कामा अन्यान्नभजन्ते किन्तु सकामा इत्याह द्वाभ्यां प्रथमे द्वितीयेऽध्याये शौनकादीन् प्रति सूतवाक्येन—

---

14. भा. 4.29.37 - समाहितः
15. तु.भा. 2.5.15
16. ओ-2 - येषान्ते इति नष्टम् ।
17. तु.भा. 2.5.16
18. तु.भा. 6.1.18

भेजिरे मुनयोथाग्रे भगवन्तमधोक्षजम् ।
सत्त्वं विशुद्धं क्षेमाय[19] कल्पन्ते येऽनु तानिह ॥१६॥

अथातो हेतोरग्रे पुरा विशुद्धं सत्त्वं मूर्त्तिं भगवन्तमघोक्षज मतो येताननुवर्त्तन्ते इह संसारे क्षेमाय कल्पन्ते ।

रजस्तमःप्रकृतयः समशीला भजन्ति वै ।
पितृभूतप्रजेशादीन् श्रियैश्वर्यं प्रजेप्सवः ॥१७॥[20]

रजस्तमसी प्रकृतिः स्वभावो येषां ते श्रिया ऐश्वर्यं च प्रजाश्चेप्सन्ति । देवतान्तरजनितसम्पदामनित्यतामाह षष्ठे अष्टादशेऽध्याये[21] श्रीसङ्कर्षणं प्रति चित्रकेतुवाक्येन—

विषयतृषो नरपशवो य उपासते तव[22] विभूतिर्न परं त्वाम् ।
तेषामाशिष ईश तदनु विनश्यन्ति यथा राजकुलम् ॥१८॥

विषये तृट् तृष्णा येषां ते नराकाराः पशवः कुतस्तव विभूतीरिन्द्रानुपासते न तु परं त्वां ततः किं तत्राह तेषामिति तदनु-उपास्य नाशादनन्तरं यथा राजकुलनाशानन्तरं तत्सेवकानामाशिषो नश्यन्ति तद्वत् । हरौ भक्तिमुद्वहतः स्वर्गाद्यपेक्षा नास्तीत्याह षष्ठे द्वादशेऽध्याये इन्द्रं प्रति वृत्रवाक्येन—

यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे ।
विक्रीडतोऽमृताम्भोधौ किं क्षुद्रैः खातकोदकैः ॥१९॥[23]

तस्य खातकोदकैः गर्तादिजलोपमैः स्वर्गादिभिः किम् । कर्माशयरूपहृदयग्रन्थिं सन्तो यथा भक्त्या उद्ग्रन्थयन्ति तथा तपआदिना यत्र तया नेत्याह चतुर्थे द्वाविंशेऽध्याये पृथुं प्रति सनत्कुमारवाक्येन—

यत्पादपङ्कजपलाशविलासभक्त्या
कर्माशयं ग्रथितमुद्ग्रथयन्ति सन्तः ।
तद्वन्न रिक्तमतयो यतयो निरुद्ध-[24]
स्रोतोगणास्तमरणं भज वासुदेवम् ॥२०॥

---

19. ओ-1, ओ-2, ओ-3, ना- मोक्षाय । अत्र भागवतस्य (1.2.25) तथा टीकाधारेण क्षेमाय इति ग्रहणीयम् ।

20. तु.भा. 1.2.27

21. ओ-1, ओ-2, ओ-3, ना- ग्रन्थे अष्टादशेऽध्याये लिखितमस्ति परन्तु भागवते (6.16.38) श्लोकोऽयं वर्त्तते ।

22. भा. 6.16.38 - तव इति पदं नास्ति ।

23. तु.भा. 6.12.22

24. भा. 4.22.39 - ऽपि रुद्ध ।

यस्य पादपङ्कजयोः पलाशानि अङ्गुलयस्तेषां विलासः कान्तिस्तस्य भक्त्या स्मृतिरूपया कर्माशयमहदहङ्कारहृदयग्रन्थिं कर्मभिरेव ग्रथितं रिक्ता निर्विषया मतिर्येषां निरुद्धः प्रत्याहृतः स्रोतोगण इन्द्रियवर्गीयैः अरणं शरणम् । भक्तिमतां कालभयं नास्तीत्याह तृतीये एकविंशेऽध्याये भगवन्तं प्रति कर्दमवाक्येन द्वाभ्याम्—

लोकांश्च लोकानुगतान्पशूंश्च हित्वा श्रितास्ते चरणातपत्रम् ।
परस्परं त्वद्‌गुणवाद-सीधु-पीयूष-निर्यापित-देहधर्माः ॥२१॥[25]

लोकान् कामाभिभूतांस्ताननुगतान्पशूंश्च विवेके सत्यपि पुनः कर्म जडान् मादृशान् हित्वा अनादृत्य ये तव चरणरूपमातपत्रम् आश्रिताः तानेवाह त्वद्‌गुणानां वादः कथनम् एवं साधूनां नाम विस्मारकत्वात्पीयूषं रुचिकरत्वात् तेन निर्यापिता विलापिता देहधर्माः क्षुत्पिपासादया यैः एषामित्युत्तरेणान्वयः—

न तेऽजराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतं षष्टिपर्व ।
षण्णेम्यनन्तच्छदियन्त्रनाभि[26] करालस्रोतो जगदाच्छिद्य धावत् ॥२२॥

ते तव यन्त्रनाभि कालचक्रं तत् जगदाच्छिद्याकृष्य धावदपि एषां त्वद्भक्तानाम् आयुराच्छिद्यधावन्न भवति । कथम्भूतम् अजरं ब्रह्म तस्मिन् अक्षरूपे भ्रमिः भ्रममाणः भ्रमदितिवक्तव्ये अतिभ्रमणशीलत्वात् उपचारेण भ्रमिरित्यभेदनिर्देशः । अधिमासेन सह त्रयोदशमासा अरा यस्या त्रिशतं षष्टिश्चाहोरात्राणि पर्वाणि यस्य त्रिशतमित्यत्र विभक्तेरलुगार्षः । षड्‌ऋतवो नेमयो यस्य अनन्ताः क्षणलवादयः छदाः पत्राकारा यस्य त्रीणि चातुर्मास्यानि नाभयः आधारभूतानि वलयानि च करालस्रोतस्तीव्रवेगम् एतैर्विशेषणैरेव संवत्सरात्मकं चक्रमिति द्रष्टव्यम् । किञ्च भक्तिमतामकुतोभयत्वमाह षष्ठे तृतीयेऽध्याये दूतान्प्रति यमवाक्येन—

भूतानि विष्णोः सुरपूजितानि दुर्दर्श[27] लिङ्गानि महाद्भूतानि ।
रक्षन्ति तद्भक्तिमतः परेभ्यः मत्तश्च मर्त्यानथ सर्वतश्च ॥२३॥

विष्णोर्भूतानि दुर्दर्शीनि द्रष्टुमप्यशक्यानि लिङ्गानि रूपाणि येषां तानि तद्भक्तिमतो विष्णुभक्तान् परेभ्यः शत्रुभ्यः सर्वतोऽस्मदादिभ्यश्च रक्षन्ति । विष्णुभक्तिमानन्यवत्तत्संसृतिं न व्रजेदित्याह प्रथमे पञ्चमेऽध्याये वेदव्यासं प्रति नारदवाक्येन—

---

25. तु.भा. 3.21.17
26. भा. (3.21.18) - यत् त्रिणाभि
27. भा. (6.3.18) - 'दुर्दर्श' टीकायां दुर्दशानि । परन्तु ओ-1, ओ-2, ओ-3 - दुर्गाणि । अत्र भागवतटीकाधारेण पाठो गृहीतः ।

न वै जनो जातु कथञ्चन[28]व्रजेन् मुकुन्दसेव्यन्यवदङ्गसंसृतिम् ।
स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न[29] रसग्रहो जनः[30] ॥

मुकुन्दसेवी जनः जातु कदाचित्कथञ्चन कुयोनिगतोपि संसृतिं संसारं नाव्रजेत् नाविशेत् अङ्ग अहो अन्यवत्केवलधर्मनिष्ठवदिति वैधर्म्यदृष्टान्तः । कुतः इत्याह मुकुन्दचरणालिङ्गनं पुनः पुनः[31] स्मरन्विहातुं नेच्छेत् । यतोयं जनो रसग्रहः रसेन गृह्यते वशीक्रियते यद्वा रसनीये ग्रह आग्रहो यस्य तदुक्तं भगवद्गीतासु ।

यतते च ततो भूयः संसिद्धौ कुरुनन्दन ।
पूर्वाभ्यासेन तेनैव ध्रियते ह्यवशो हि सः ॥ इति ॥

अत्र हेतुमाह प्रथमे षष्ठेऽध्याये नारदं प्रति भगवद्वाक्येन—

मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित् ।
प्रजासर्ग निरोधोऽपि स्मृतिश्च मदनुग्रहात् ॥२५॥[32]

प्रजानां सर्गे सृष्टौ निरोधे संहारेपि प्रजासर्गनिरोध इति वा । अतः सर्वतो भावेन भगवानेव भजनीय इत्याह चतुर्थे एकविंशेऽध्याये सभ्यान् प्रति पृथूपदेशेन—

तमेव नित्यं[33] भजतात्मवृत्तिभिः मनोवचःकायगुणैः स्वकर्मभिः ।
अमायिनः कामदुघाङ्घ्रिपङ्कजं यथाधिकारावसितार्थसिद्धयः ॥२६॥

आत्मवृत्तिभिरध्यापनादिभिः मनोवचःकायानां गुणैर्ध्यानस्तुतिचर्याभिः अमायिनः निष्कपटाः सन्तः । ननु ब्रह्मादि सेव्ये किमस्मच्छक्त्या भविष्यति तत्राह यथाधिकारमेवावसिता निश्चिता समाप्ता वा अर्थसिद्धिर्येषाम् । यतो भक्तिमता लभ्यो भगवानित्याह द्वाभ्यां चतुर्थे चतुर्विंशेऽध्याये रुद्रगीतस्तवे श्रीरुद्रवाक्येन—

भगवान् भक्तिमता लभ्यो दुर्लभः सर्वदेहिनाम् ।
स्वराज्यस्याप्यभिमत एकान्तेनात्मविद्गतिः ॥२७॥[34]

दुर्लभत्वमेवाह स्वः स्वर्गे राज्यं यस्य तस्याप्यभिमतः स्पृहणीयः किञ्च एकान्ते यः

---

28. टीका, भा. (1.5.19) - ञ्चना
29. तु.भा. - (1.5.19)
30. तु.भा. (1.5.19) - यतः ।
31. ना- पुनः नास्ति ।
32. तु.भा. 1.6.25
33. भा. 4.21.33 - यूयं
34. तु.भा. 4.24.54

आत्मवित्तस्यापि गतिर्गम्यः शरणम् । अत स्त्वत्सेवनमन्तरेण न किञ्चिद्वाञ्छा-
मीत्याह—

तं दुराराध्यमाराध्य सतामपि दुरापया ।
एकान्तभक्त्या को वाञ्छेत्पादमूलं विना बहिः ॥२८॥[35]

तं त्वामेकान्तभक्त्या आराध्य बहिः स्वर्गादिसुखम् । लब्धोत्तमभक्तिर्मोक्षमपि नेच्छति किमुत स्वर्गादिसुखमित्याह द्वादशे दशमेऽध्याये भवानीं प्रति श्रीरुद्रवाक्येन—

नैवेच्छत्याशिषः क्वापि महर्षिः मोक्षमप्युत ।
भक्तिं परां भगवति लब्धवान्पुरुषे[36] परे ॥२९॥

महर्षिमार्कण्डेयः आशिषः अभ्युदयलक्षणाः । अत्र हेतुः भक्तिमित्यादि ये तु भगवत्कथा श्रवणादिविमुखाः काम्यकर्मपरास्ते अति मन्दा इत्याह तृतीये नवमेऽध्याये भगवन्तं प्रति ब्रह्मवाक्येन—

दैवेन ते हतधियो भवतः प्रसङ्गात्
सर्वाशुभोपशमनाद्विमुखेन्द्रिया ये ।[37]
कुर्वन्ति कामसुखलेशलवाय दीना-
लोभाभिभूतमनसोऽकुशलानि शश्वत् ॥३०॥

दैवेन ते हतधियः नष्टमतयः भवतः प्रसङ्गात् श्रवणकीर्त्तनरूपात् सर्वदुःखोपशमनात् विमुखानीन्द्रियाणि येषां ते अकुशलानि अक्षेमकराणि कुर्वन्ति । तदर्थितानां विषयाणां तुच्छतामाह तृतीये एकविंशेऽध्याये भगवन्तं प्रति कर्दमवाक्येन—

ये मायया ते[38] हतचेतस[39] स्त्वत्पादारविन्दं भवसिन्धुपोतम् ।
उपासते कामलवाय तेषां रासीश कामान्निरयेऽपि ये स्युः ॥३१॥

हे ईश ये निरयेऽपि स्युः[40] तेषां कामानां लवाय ये त्वन्मायया नष्टबुद्धय स्त एवोपासते त्वन्तु तेषां कामान् रासि ददासि । भक्तानां निष्कामानामतिसुलभो भगवान्नेतरेषा-मित्याह तृतीये नवमेऽध्याये भगवन्तं प्रति ब्रह्मवाक्येन—

---

35. तु.भा. 4.24.55
36. भा. (12.10.6) - पुरुषेऽव्यये
37. टीका, भा. 3.9.7 - ये, अन्यत्र- मे
38. ना- ते इति पदं नास्ति ।
39. भा. (3.21.14) - मेधस
40. ओ-2 - निरयेऽपि स्युः तेषाम् इति नास्ति ।

नाति प्रसीदसि[41] तथोपचितौपचारैराराधितः सुरगणैर्हृदि बद्धकामैः ।

यत्सर्वभूतदययासदलभ्य[42]यैको नानाजनेष्ववहितः सुहृदन्तरात्मा ॥३२॥

उपचितैरुर्जितैरुपचारैः पुष्पोपहारादिभिः यद्यथा[43] असतामभक्तानामलभ्यया सर्वभूतदयया प्रियत्वे हेतुः एक इत्यादि विषयाभिसम्बन्धिना बलिना कामेन हृदि अति सन्तापो भवेत् स तु भगवत्सेवानिर्वृतौ न सम्भवतीत्याह एकादशे द्वितीयेऽध्याये जनकं प्रति हरिवचनेन—

भगवत उरुविक्रमाङ्घ्रिशाखानखमणिचन्द्रिकाया निरस्ततापे ।

हृदि कथमुपसीदतां पुनः स प्रभवति चन्द्र इवोदितेऽर्कतापः ॥३३॥[44]

उरुविक्रमाङ्घ्री तयोः शाखा अङ्गुलयस्तासु नखानि तान्येव मणयस्तेषां चन्द्रिका शीतला दीप्तिस्तया निरस्तः कामादितापो यस्मिन् हृदि तस्मिन् उपसीदतां भजतां चन्द्र उदिते सति अर्कस्य ताप इवेति । तस्माद्भक्त्यैव संसारनिवृत्तिरित्याह दशमे द्वितीयेऽध्याये गर्भस्तुतौ देवानां वाक्येन—

शृण्वन् गृण्वन् संस्मरयंश्च चिन्तयन्नामानि रूपाणि च मङ्गलानि ते ।

क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचितो न भवाय[45] कल्पते ॥३४॥[46]

चकारादन्यानपि स्मारयन् । ननु विवेकिनां किमभजनेन मुक्तास्त एव तत्राहु स्तत्रैव ।

येऽन्येऽरविन्दाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ।

आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनाहतयुस्मदङ्घ्रयः ॥३५॥[47]

विमुक्तमानिनः मुक्तावयवमिति मन्यमानाः त्वयि अस्तो निरस्तो यो भावस्तस्माद् भक्त्यभावादित्यर्थः न विशुद्धा बुद्धिर्येषां ते तथा तद्वा अस्तभाव इति च्छेदः अस्तमतयः वादेष्वेव विशुद्धबुद्धयः कृच्छ्रेण बहुजन्मतपसां परं पदं मोक्षसन्निहितं सत्कुलतपः श्रुतादि ततः पतन्ति विघ्नैरभिभूयन्ते न आदृतौ युस्मदङ्घ्री यैस्ते त्वदीयाः क्वचिदपि न पतन्तीत्याहुस्तत्रैव—

---

41. भा. (3.9.12) - प्रसीदति
42. ना - सहलभ्य
43. ओ-1, ओ-2, ओ-3 - यथा
44. तु.भा. 11.2.54
45. ओ-1, ओ-2, ओ-3, ना - भयाय
46. तु.भा. 10.2.37
47. तु.भा. 10.2.32

तथा न ते माधव तावकाः क्वचिद्भ्रश्यन्ति मार्गात्त्वयि बद्धसौहृदाः ।
त्वाभिगुप्ता विचरन्ति निर्भयाद्विनायकानीकपमूर्धसु प्रभो ॥३६॥[48]

विनायका विघ्नहेतवस्तेषामनीकानि समूहाः तानि पान्ति ये तेषां मूर्द्धसु विचरन्ति विघ्नान् जयन्तीति भावः । भक्तानां विघ्नाद्यनाकुलत्वात्परमपदप्राप्तिः सुतरामित्याह चतुर्थे चतुर्विंशेऽध्याये प्रचेतसं प्रति रुद्रवाक्येन—

स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेति ततः परं हि माम् ।
अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाहं विबुधाः कलात्यये ॥३७॥[49]

स्वधर्मनिष्ठः पुमान् बहुजन्मभिः विरञ्चितां ब्रह्मत्वं प्राप्नोति, ततोऽपि पुण्यातिशयेन मामेति । भागवतस्तु अथ देहान्ते अव्याकृतं प्रपञ्चातीतं वैष्णवं पदमेति यथा अहं रुद्रो भूत्वा आधिकारिको वर्त्तमानः विबुधा देवाश्चाधिकारिकाः कालात्यये अधिकारान्ते लिङ्गभङ्गे समेष्यन्ति भगवद्भजने देशकालनियमोऽपि नास्तीत्याह द्वितीये द्वितीयेऽध्याये परीक्षितं प्रति शुकवाक्येन—

तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ।
श्रोतव्यः कीर्त्तितव्यश्च स्मर्तव्यो भगवान् नृणाम्[50] ॥३८॥[51]

तस्माद्भक्तानामेव निर्विघ्नमीश्वरपदप्राप्तिः तस्मादत्र देशकालनियमोऽपि नास्तीत्याह सर्वत्रेति । ब्रह्मानन्दादपि भजनसुखस्याधिक्यमित्याह तृतीये पञ्चदशेऽध्याये वैकुण्ठनाथदर्शनसमये सनकादीनामनुभवेन—

तस्यारविन्दनयनस्य पदारविन्द-
किञ्जल्कमिश्रतुलसीमकरन्दवायुः ।
अन्तर्गतः स्वविवरेण चकार तेषां
संक्षोभमक्षरजुषामपि चित्ततन्वोः ॥३९॥[52]

तस्य पदारविन्दकिञ्जल्कैर्मिश्रा या तुलसी तस्या मकरन्देन युक्तो यो वा वायुः स्वविवरेण[53] नासाच्छिद्रेण तेषामक्षरजुषां ब्रह्मानन्यसेविनामपि संक्षोभं चित्ते हर्ष

---

48. तु.भा. 10.2.33
49. तु.भा. 4.24.29
50. ना- भृशम्
51. तु.भा. 2.2.36
52. तु.भा. 3.15.43
53. ओ-2 - स्वविवरेण इति नष्टम् ।

तनौ रोमाञ्चं हर्षकारिताम् । भक्तिसुखमुद्दीपयति चतुर्थे द्वादशेऽध्याये ध्रुवानुभवेन—

भक्तिं हरौ भगवति प्रवहन्नजस्र-
मानन्दवाष्पकलया मुहुरर्द्यमानः ।
विक्लिद्यमानहृदयः पुलकाचिताङ्गो
नात्मानमस्मरदसाविति मुक्तलिङ्गः ॥४०॥[54]

एवमजस्रं नित्यं हरौ भक्तिं प्रकर्षेण वहन् असौ ध्रुवोऽहमित्यात्मानं न सस्मार यतो मुक्तलिङ्गः शरीराभिमानः विक्लिद्यमानं द्रवत् हृदयं यस्य पुलकैर्व्याप्ताङ्गः अभक्तानां हृदयं नन्दति । द्वितीये तृतीयेऽध्याये सूतं प्रति शौनकवाक्येन—

तदश्मसारं हृदयं बतेदं यद् गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥४१॥[55]

अश्मवत् सारो बलं काठिन्यं यस्य तत् । विक्रियालक्षणमाह अथेति गात्ररुहेषु हर्षः रोमोद्गमः । यत्र किञ्चिद्भक्तिमज्जन्मैव श्रेष्ठमित्यौत्सुक्येनाभिनन्दति दशमे चतुर्दशेऽध्याये भगवन्तं प्रति ब्रह्मवाक्येन त्रिभिः—

अहोऽतिधन्या व्रजगोरमण्यस्तन्वामृतं पीतमतीव ते मुदा ।
यासां विभो वत्सतरात्मजात्मना यत्प्रीतयेऽद्यापि नालमध्वराः[56] ॥४२॥

व्रजगोरमण्यो व्रजस्था गावो रमण्यश्च ते त्वया वत्सतरात्मजात्मना वत्सानामात्मजानां च रूपेण यस्य तव तृप्तये सर्वे यज्ञा अद्यापि नाशक्ताः येन त्वया प्रतिक्षणं तृप्यता यासां स्तन्यममृतरूपं पीतमिति । तदिन्द्रियाधिष्ठातृत्वेनात्मानं सर्वादींश्च बहुमन्वत आह—

एषां तु भाग्यमहिमाच्युत तावदास्तां
एकादशैव हि वयं बत भूरिभागः[57] ।
एतद्धृषीकचषकै रसकृत्पिबामः
शर्वादयोऽङ्घ्र्युदजमध्वमृतासवं ते ॥४३॥[58]

एषान्तु भाग्यमहिमा आस्तां कस्तं वक्तुं शक्नोति शर्वादयः सर्वेऽहङ्काराधिष्ठिता आदिर्येषां चन्द्रादीनामेकादशानां ते तथा बुद्ध्यधिष्ठातारो वयं च वयमित्यात्मानमेव बहुमन्यमानः । एवं मनोबुद्ध्यहङ्काराकर्णाधिष्ठातारस्त्रयोदशदेवा एव तावदहो

54. तु.भा. 4.12.18
55. तु.भा. 2.3.24
56. भा. (10.14.31) - चालमध्वरा
57. ना- भाजः
58. तु.भा. 10.14.33

भूरिभागः ते च यथा मनोधिष्ठाता चन्द्रः कर्णत्वङ्नेत्ररसनाघ्राणवाक्पाणिपादपायूपस्थापनामधिष्ठातारः दिग्वातार्क-प्रचेतो-श्विवह्नीन्दोपेन्द्रमित्रकाः दशकः प्रजापतिः यस्मादेतेषां व्रजस्थानां हृषीकाणीन्द्रियाण्येव चषकाणि पानपात्राणि तैश्चतुर्दशस्य चित्ताधिष्ठातुः अङ्घ्री एव उदजे वारिजे तयोर्मधुमकरन्दस्तदेवामृतं स्वादुमादकं पिबामः । एतदुक्तं भवति यदा प्रत्येकेन्द्रियाभिमानिनो वयं कीर्त्ति सौगन्धर्यसौगन्ध्यादेकदेशसेविनोपि कृतार्थाः सर्वेन्द्रियैः सर्वदेशसेविनामेतेषां किं वर्ण्यते भाग्यमिति । अतो मया प्रार्थितं तदस्तु मे नाथ स भूरिभाग इति यत्तदेतदेवेत्याह—

तद्भूरिभाग्यमिह जन्म किमप्यटव्यां
यद्गोकुलेपि कतमाङ्घ्रिरजोभिषेकम् ।
यज्जीवितं[59] तु निखिलं भगवान्मुकुन्दो-
ऽप्यद्यापि यत्पदरजः श्रुतिमृग्यमेव ।।४४।।[60]

किञ्चदिह मनुष्यलोके यत्किमपि जन्म तत्रापि अटव्यां यत् तत्र ब्रह्मभिर्जन्मभिर्वा प्रसङ्गिभिर्यौवन-सावित्र-याज्ञिकैस्त्रिभिर्जन्मभिः किं कोऽतिशयः यत्र तत्र जातः स एव सर्वोत्तम इत्यर्थः । गोकुले यत् अहो सत्यलोकं विहाय अत्र जातस्य को वा लाभः । अत आह अपि कतमाङ्घ्रिरजसाभिषेकमिति गोकुलवासिनां मध्ये अपि कतमस्य यस्य कस्यापि अङ्घ्रिरजसा अभिषेको यस्मिन् । ननु कुतो गोकुलवासिनोपि एवमतिधन्यास्तत्राह यदिति येषां जीवितं निखिलं मुकुन्द इति मुकुन्दपरमेव जीवितमित्यर्थः । दुर्लभतामाह अद्यापीति श्रुतिमृग्यं देवैरपि मृग्यत एव न दृश्यत इत्यर्थः । तत्रापि गोपीनां माहात्म्यं वर्णयति दशमे सप्तचत्वारिंशेऽध्याय उद्धववाक्येन द्वाभ्याम्—

एताः परं तनुभृतो भुवि गोपवध्वो
गोविन्द एव निखिलात्मनिरूढभावाः ।
वाञ्छन्ति यद्भवभियो मुनयो वयं च
किं ब्रह्मजन्मभिरनन्तकथारसस्य ।।४५।।[61]

एताः परं केवलं तनुभृतः सफलजन्मानः रूढभावाः परमप्रेमवत्यः अस्य रूढभावं

59. ना - मज्जीवितं
60. तु.भा. 10.14.34
61. तु.भा. 10.48.58

भवभियो मुमुक्षवो मुमुक्षवोपि वाञ्छन्ति वयं च भक्ता अपि । अतः अनन्तकथासु रसो रागो यस्य तस्य ब्रह्मभिर्जन्मभिर्विप्रसङ्गिभिः यौवनसावित्रयाज्ञिकैस्त्रिभिर्जन्मभिः किं कोतिशयः यत्र तत्र जातः स एव वेति जन्म इत्यर्थः । अथवा अनन्तस्य कथासु रसो तस्य ब्रह्मजन्मभिः चतुर्मुख जन्मभिरपि किमित्यर्थः । ता एव विशिनष्टि:—

या वै श्रियार्चितमजादिभिराप्तकामैः
योगेश्वरैरपि यदात्मनिरासगोष्ठ्याम् ।
कृष्णस्य तद्भगवतश्चरणारविन्दं
न्यस्तं स्तनेषु[62] विजहुः परिरभ्य तापम् ॥४६॥[63]

योगेश्वरैरप्यात्मन्येवार्चितं स्तनेषु परिरभ्य तापं जहुः । भगवतोपि गोपीप्रेमपरवशत्वमाह दशमे द्वात्रिंशेऽध्याये गोपीः प्रति भगवद्वाक्येन—

न पारयेहं निरवद्यसंयुजा स्वसाधुकृत्यं विबुधायुषापि वः ।
या मा भजन्दुर्जरगेहशृङ्खलां[64] संवृश्च्य तद्वः प्रतियातु साधुना ॥४७॥

निरवद्यसंयुजां निरवद्यः संयुक्तसंयोगो यासां वः विबुधानामायुषापि चिरकालेनापि स्वीयं साधुकृत्यं प्रत्युपकारं कर्त्तुं न पारये न शक्नोमि । कथं भूतानां या भवत्यः दुर्जरा अजरा योगैर्ह शृङ्खला तां संवृश्च्य निश्शेषेण छित्त्वा मामभजन् तासां मच्चित्तं भुवि बहुषु प्रेमयुक्तया नैवमेकनिष्ठां तस्माद् भो युष्माकमेव साधुना साधुकृत्येन युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतं भवतु । युष्मत्सौशल्येनैव ममानृण्यं न तु मत्कृतप्रत्युपकारेणैवेत्यर्थः । अहो विष्णुभक्तिमाञ्जनो मुक्तेभ्योपि गरीयानित्याह षष्ठे चतुर्दशेऽध्याये शुकं प्रति परीक्षित्प्रश्नवाक्येन—

मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥४८॥[65]

मुक्तानामपि सिद्धानां कोटिष्वपि नारायणपरायणो दुर्लभ इत्यर्थः । भगवति लब्धभक्तेः पूर्णकामतां कथयन् प्रकरणार्थमुपसंहरति एकादशे षड्विंशेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते ।
मय्यनन्तगुणे ब्रह्मण्यानन्दानु भवात्मनि ॥४९॥[66]

---

62. ओ-1, ओ-2, ओ-3 - स्तनेषु विजहुः नष्टः
63. तु.भा. 10.47.62
64. भा. 10.32.22 - शृङ्खलाः
65. तु.भा. 6.14.5
66. तु.भा. 11.26.30

मयि भक्तिं लब्धवतो जनस्य अन्यत्किमवशिष्यते न किञ्चिदपीत्यर्थः । अहमिव पूर्णकामः स्यादितिभावः । स्वकृतपद्येन भगवन्तं भक्तिः प्रार्थयते ।

व्रताध्वरस्पर्शनतीर्थमज्जनद्विजन्मपुण्यादिषु पुण्यसंहतिः ।
क्षमा न यस्या अपि षोडशी कला ममास्तु सा भक्ति रहैतुकी हरौ ॥५०॥

व्रतान्येकादश्यादीनि अध्वरा अश्वमेधाद्याः स्पर्शनानितुलापुरुषदानानि—

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
भक्तिं प्रशंसिनी नाम सम्पूर्णा पञ्चमी कला ॥
इति[67] पञ्चमी कला ।

***

67. ना- ग्रन्थेषु 'इति पञ्चमी कला श्री' अधिक पाठः ।

[1]षष्ठी कला

लक्षणं भक्तियोगस्य षष्ठ्यामथ निरूप्यते ।
योगादङ्गगुणादीनां भेदो नानाविधोऽस्य च ॥१॥

अङ्गानां श्रवणकीर्त्तनादीनां गुणानां सत्त्वादीनामादिशब्दादधममध्यमोत्तमोत्तमत्वानां च योगादस्य भक्तियोगस्य नानाविधो भेदश्च निरूप्यत इत्यर्थः । पूर्वकलान्ते भक्तिं लब्धवतः साधोः किमन्यदवशिष्यत इत्युक्तं तत्र का भक्तिरित्यपेक्षायां उत्तमाया भक्तेर्लक्षणमाह तृतीये पञ्चविंशेऽध्याये देवहूतिं प्रति कपिलवाक्येन—

देवानां गुणलिङ्गानामानुश्रविककर्मणाम् ।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥२॥[2]
अनिमित्ता भागवती भक्तिसिद्धेर्गरीयसी ।
जरयत्याशु[3] या कोशं निगीर्णमनलो यथा ॥३॥

एकमेकरूपमविकृतं शुद्धं मनो यस्य पुंसस्तस्य गुणा विषयालिङ्गान्ते ज्ञायन्ते यैस्तेषां देवानां द्योतनात्मकानाम् इन्द्रियाणां तदधिष्ठातृणां देवानां वा सत्त्वमूर्त्तौ हरावेव या वृत्तिः सा भक्तिः सिद्धेर्मुक्तेर्गरीयसीत्युत्तरेणान्वयः । कथम् अनिमित्ता निष्कामा स्वाभाविकी अत्यन्तसिद्धा तेषामेवंविधवृत्तौ हेतुमाह गुरोरुच्चारणमनुश्रूयते इत्यनुश्रवः तद्विहितमानुश्रविकं तदेव कर्म येषां मुक्तिश्च प्रासङ्गिकी भवत्येवेत्याह—

या भक्तिः कोशं लिङ्गं शरीरमात्मावरकमज्ञानं जयति क्षेपयति स्व प्रयत्नं विनैव सिद्धौ दृष्टान्तः निगीर्णं भुक्तमन्नं अनलो जठरो यथा जरयति इति भक्तस्यानायासेनैव मोक्षो भवतीत्यर्थः । अङ्गभेदात् भक्तिभेदं निरूपयति एकादशे एकादशेऽध्याये भक्तिस्त्वय्युपपद्यते कीदृशी सद्भिरादृतेति उद्धवप्रश्नानन्तरं भगवद्वाक्येनाष्टभिः ।

मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्च्चनम् ।
परिचर्यास्तुतिः प्रह्वगुणानामनुकीर्त्तनम्[4] ॥४॥

लिङ्गानि प्रतिमादीनि प्रह्वः प्रणामः ।

---

1. ना- श्री अथ अधिकपाठः दृश्यते ।
2. तु.भा. 3.25.32
3. भा. 3.25.33 - जरयत्यासु
4. भा. (11.11.34) - गुणकर्मानुकीर्त्तनम् ।

मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव ।
सर्वलाभोपहरणं दास्येनात्मनिवेदनम् ॥५॥[5]

सर्वलाभोपहरणं सर्वलब्धस्य समर्पणम् ।

मज्जन्मकर्मकथनं मम पर्वानुमोदनम् ।
गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः ॥६॥[6]

पर्वाणि जन्माष्टम्यादीनि । तदनुमोदनम् ।

यात्राबलिविधानं च सर्ववार्षिकपर्वसु ।
वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम् ॥७॥[7]

बलिविधानं पुष्पोपहारादिसमर्पणं वार्षिकपर्वसु चातुर्मास्यैकादश्यादिषु विशेषतः ।

मदर्चा[8] स्थापने श्रद्धा स्वतः संहत्य चोद्यमः ।
उद्यानोपवनाक्रीडपुरमन्दिरकर्मणि ॥८॥

अर्चा प्रतिमा उद्यानादिकरणसामर्थ्ये सति स्वतः असति चान्यैः संहत्योद्यमः । उद्यानं पुष्पप्रधानं वनम् उपवनं फलप्रधानं वनम् आक्रीडं क्रीडास्थानम् ।

सम्मार्जनोपलेपाभ्यां सेकमण्डलवर्त्तिनम् ।[9]
गृहसुश्लषणं[10] मह्यं दासवद् यदमायया ॥९॥

सम्मार्जनं रजसोपकरणम् उपलेप गोमयोदकादिभिरालेपः सेकस्तैरेव प्रोक्षणं मण्डलवर्त्तिनं सर्वतो भद्रादिकरणं मह्यं मम ।

अमानित्वमदम्भित्वं कृतस्यापरिकीर्त्तनम् ।
अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितम् ॥१०॥

कृतस्य धर्मस्यापरिकीर्त्तनं स्वयमन्येन वा निवेदितं दीपावलोकमपि स्वीकुर्यात् एतच्च स्थावरविषयं रागप्राप्त विषयं वा भक्त्या तद्ग्राह्यमेव न भोगकामनया ग्राह्यमित्यर्थः ।

षड्भिर्मासोपवासैश्च यत्फलं परिकीर्त्तितम्
विष्णोर्नैवेद्यसिद्धान्नं पुण्यं तद्भुञ्जतां कलौ ।

---

5. तु.भा. 11.11.35
6. तु.भा. 11.11.36
7. तु.भा. 11.11.37
8. तु.भा. 11.11.38 - ममार्चा
9. भा. (11.11.39) - वर्त्तनैः
10. भा. (11.11.39) - शुश्रूषणं

हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः
पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युतः ॥

इति वचनात् । यद्वा अन्यस्मै विनिवेदितं मे नोपयुञ्ज्यात् मह्यं न निवेदयेदित्यर्थः ।

विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम्
पितृभ्यश्चापि तद्देयं तदानन्त्याय कल्पते ।
पितृशेषन्तु यो दद्याद्धरये परमात्मने
रेतोधाः पितरस्तस्य भवन्ति क्लेशभागिनः ॥इति ।
यद्यदिष्टतमं लोके यच्चापि प्रियमात्मनः ।
तत्तन्निवेदयेन्मह्यं तदानन्त्यायकल्पते ॥११॥

यद्यप्येतानि भक्तिलक्षणानि तथापि श्रवणादीनां नवानामत्र शास्त्रे प्राधान्यमित्यभि-प्रेत्याह सप्तमे पञ्चमेऽध्याये हिरण्यकशिपुं प्रति प्रह्लादवाक्येन द्वाभ्याम्—

श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥१२॥[12]
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।
क्रियते भगवत्यद्धातन्मन्येधीत मुत्तमम् ॥१३॥[13]

श्रवणादीनां लक्षणानि तत्तत्कलायां दर्शयिष्यामः इति नव लक्षणानि यस्याः सा चेदधीतेन भगवति भक्तिः क्रियते सा चार्पितैव न तु कृतापश्चादर्प्यते तदुत्तममधीतं मन्ये न त्वस्माद्गुरोरधीतं शिक्षितं वा तथाविधं किञ्चिदस्तीतिभावः । अत्रैव ज्ञेयं श्रवणादीनां मुख्य भक्त्यपेक्षया अङ्गत्वं तत्तद्रूप-भक्ति-सञ्जात-तत्तद्रूप-सुखस्फुर्त्ति-दशायामङ्गित्वम् उक्तं च—

अङ्गित्वं श्रवणादीनां मुख्यभक्तेरपेक्षया ।
तत्तद्रूपसुखस्फूर्त्तावङ्गित्वमपि विद्यते ॥ इति ।

गुणयोगाद् भक्तियोगस्य नानाविधत्वमित्याह तृतीये ऊनविंशेऽध्याये देवहूतिं प्रति कपिलवाक्येन चतुर्भिः—

भक्तियोगो बहुविधो मार्गैर्भाविनि[14] भाव्यते ।
स्वभावगुणमार्गेण पुंसां भावो विभिद्यते ॥१४॥

---

11. तु.भा. 11.11.40
12. तु.भा. 7.5.23
13. तु.भा. 7.5.24
14. तु.भा. (3.29.7) - र्भामिनि

मार्गैः प्रकारविशेषैः । तानेवाह- स्वभावभूता ये गुणास्तेषां मार्गेण वृत्तिभेदेनेति भावः । अयमभिप्रायः फलसङ्कल्पभेदाद्भक्तिभेद इति भावः तदेवाह—

अभिसंधाय यो हिंसां दम्भं मात्सर्यमेव च[15] ।
संरम्भा मित्रदृग्भावं मयि कुर्यात्स तामसः ॥१५॥

भक्तिभेदाद् भक्तिभेदो ज्ञेयः हिंसादिकर्माभिसन्धाय सङ्कल्पक्रोधात् भिन्नदृक् भिन्नदर्शी यो भावं भक्तिं कुर्यात् सतामसस्त्रिविधः त्रैविध्यमनुक्तमपि हिंसादीनां त्रयाणां पृथङ्निर्देशात् पुराणान्तरवचनाच्च ज्ञेयम् । यथा वृहन्नायदीये—

ये चान्यस्य विनाशार्थं यजन्ते श्रद्धया हरिम् ।
खलवत् पृथिवीपाल सा भक्तिस्तामसाऽधमा ॥१६॥
योऽर्चयेत्कैतवधिया स्वैरिणी स्वपतिं यथा ।
नारायणं जगन्नाथं स वैतामसमध्यमा ॥१७॥
देवपूजापरान्दृष्ट्वा मत्सराद्योर्चयेद्धरिम्[17] ।
शृणुष्व पृथिवीपाल सा भक्तिस्तामसोत्तमा ॥१८॥

राजसमाह— विषयानभिसन्धाय यशः ऐश्वर्यमेव च ।
अर्चादावर्चयेद्यामां पृथग्भावः स राजसः ॥१९॥

पृथग्भावो भेददर्शी स त्रिविधो राजसः यथा तत्रैव[18]-

धनधान्यादिकं यस्तु प्रार्थयन्नर्चयेद्धरिम् ।
श्रद्धया परयाविष्टः सा भक्ती राजसाधमा ॥२०॥
यः सर्वलोकविख्यातां कीर्त्तिमुद्दिश्य माधवम् ।
अर्चयेत्परया भक्त्या सा वै राजसमध्यमा ॥२१॥
सालोक्यादिपदं यस्तु समुद्दिश्यार्चयेद्धरिम् ।
विज्ञाय पृथिवीपाल सा भक्ती राजसोत्तमा ॥२२॥

सात्त्विकमाह— कर्म निर्हारमुद्दिश्य परस्मिन्वा तदर्पणम् ।
यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः ॥२३॥

कर्म निर्हारं पापक्षयम् । परस्मिन् परमेश्वरे तदर्पणं कर्मार्पणं भगवत्प्रीतिमुद्दिश्येत्यर्थः ।

---

15. तु.भा. 3.29.8 - वा
16. तु. वृहन्नारदीय - 14 अध्याय श्लोक संख्या- 195-197
17. वृ.ना. - मत्सरीयोऽर्च्चयद्हरिम् ।
18. तु.वृ.ना. - 14 अध्याय, श्लोक संख्या- 198-200

स त्रिविधसात्त्विकभेद दर्शित्वमर्चादावर्चनं त्रिष्वपिसमानम् । यथा तत्रैव[19]-

यस्तु स्वकृतपापानां क्षयार्थं पूजयेद्धरिम् ।
श्रद्धया परया राजन् सा भक्तिः सात्त्विकाधमा ।।२४।।
हरेरिदं प्रियमिति शुश्रूषां कुरुते नरः ।
जने स श्रद्धया युक्तो ज्ञेया सात्त्विकमध्यमा ।।२५।।
विधिबुद्ध्यार्चयेद्यस्तु दासीवच्चक्रपाणिनम् ।
भक्तीनां प्रवरा ज्ञेया सा भक्तिः सात्त्विकोत्तमा ।।२६।।

तदेवं तामस्यादिभक्तिषु त्रयोस्त्रयो भेदाः । तासु च यथोत्तरं श्रैष्ठचम् । एवं श्रवणकीर्त्तनादयो नवापि प्रत्येकं नवभेदाः सगुणा भक्तिरेकाशीतिभेदा एकाङ्गी बहुलाङ्गीति सा भक्तिर्द्विविधा भवेत् । तत्रैकाङ्गीमाह द्वितीये चतुर्थेऽध्याये शौनकादीन् प्रति सूतवाक्येन—

वैयासिकेरिति वचस्तत्त्वनिश्चयमात्मनः ।
उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ।।२७।।[20]

वैयासिकेः शुकस्येत्येवम्भूतमात्मनस्तत्त्वनिश्चयो यस्मात्तद् वच उपधार्य आकलय्य औत्तरेयः परीक्षित् कृष्ण एव सेव्यः नान्य एवं भूतां एकश्रवणरूपं मङ्गलं यस्या सा एकाङ्गीत्यर्थः । एवं कीर्त्तनादिषु द्रष्टव्यम्—

बहुलाङ्गीमाह दशमे दशमेऽध्याये भगवन्तं प्रति नलकूबरमणिग्रीववाक्येन-

वाणी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्मसु मनस्तव पादयोर्नः ।
स्मृत्यां शिरस्तव निवासजगत्प्रणामे
दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ।।२८।।[21]

न आवयोर्द्वयोश्चेति द्विवचनस्थाने बहुवचनमस्मत्संवन्धिनां सर्वेषामित्याशयात् तव निवासभूतं यज्जगत्तस्य प्रणामेत्वन्निवास इति बहुमाने जगत्- प्रणामे शिरोस्त्वित्यर्थः भवत्तनूनां भवतोमूर्त्तीनां एकेन भक्तेन बहुनामङ्गानां याच्यमानत्वात् भक्तिर्बहुलाङ्गीत्यर्थः। तदेवं साधनात्मिकां भक्तिं निर्णीय अधिकारिणं निरूपयति एकादशे द्वाविंशेऽध्याये भगवद्वाक्येन—

---

19. तु.वृ.ना. - 14 अध्याय, श्लोक संख्या- 201-203
20. तु.भा. 2.4.1
21. तु.भा. 10.10.38

यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥२९॥[22]

यदृच्छया केनापि भाग्योदयेन उक्तं च—

नारायणेन दृष्टश्चेत्प्रतिबुद्धो[23] भवेत् पुमान् ।
एवमात्मेच्छया राजन्प्रतिबुद्धो न जायते इति ॥

न निर्विण्णः अनित्यताबुद्ध्या ऐहिकामुष्मिकभोगेषु निरक्तः प्रमत्तानां वारयति अज्ञानवदतिसक्तो न । तस्य भक्त्याधिकारिणो भक्तियोग[24] प्राप्तिप्रकारमाह तत्रैव चतुर्भिः—

जातश्रद्धो मत्कथासु निर्विण्णः[25] सर्वकर्मसु ।
वेददुःखात्मकान् कामान्परित्यागेऽप्यनीश्वरः ॥३०॥

मत्कथासु जातश्रद्धः अत एवान्येषु कर्मसूद्विग्नः न तु तत्फलेषु विरक्तः तदाह वेदेति । यद्यपि वेद तथापि परित्यागेप्यनीश्वरः अशक्तः ।

ततो भजेत् मां पीतः श्रद्धालुर्दृढनिश्चयः ।
जुषमाणश्च तान् कामान्दुःखोदर्कांश्च गर्हयन् ॥३१॥[26]

एवम्भूतो यः[27] स एव श्रद्धालुः भक्त्यैव सर्वं भविष्यतीति[28] दृढनिश्चयः सन् तत स्तदनन्तरं मां प्रीत्या भजेत् । विषयांस्तु सेवमानोऽपि प्रीतिं न कुर्यादित्याह गर्ह्यन्निति। कथं भजति किं वा ततो भवति तत्राह—

प्रोक्तेन भक्तियोगेन भजतो मासकृन्मुनेः ।
कामा हृदया नश्यन्ति सर्वे मयि हृदि स्थिते ॥३२॥[29]

मल्लिङ्गमद्भक्तजनेत्यादिना प्रोक्तेन मामसकृन्नित्यं भजतः हृदय्या हृद्गताः कामा नश्यन्ति ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि ॥३३॥[30]

---

22. तु.भा. 11.20.8 'परन्तु ग्रन्थे एकादश; द्वाविंशेऽध्याये लिखितमस्ति ।
23. ओ-2 - बुद्धो भवेत्पुमान् इति नष्टम् ।
24. ओ-2 - भक्तियोग........तत्रैव इति पर्यन्तं कीट दष्टम् ।
25. ओ-1, ओ-2, ओ-3 - निर्विणः, तु.भा. 11.20.27
26. तु.भा. 11.20.28
27. ओ-2 - यः इति नष्टम्
28. ओ-2 - भविष्यतीति कीट दष्टम् ।
29. तु.भा. 11.20.29
30. तु.भा. 11.20.30

हृदयग्रन्थिरहङ्कारः तत्पूर्वकाश्च सर्वे संशया असम्भावनादयः कर्माणि आरब्धफलानि संसारहेतुभूतानि । हरेर्भजनं योगसाधनवदति दुष्करं नेति दर्शयन् प्रकरणार्थमुपसंहरति द्वितीये द्वितीयेऽध्याये परीक्षितं प्रति शुकवाक्येन—

एवं स्वचित्ते[31] स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननन्तः ।
तं निवृतो नियतार्थो भजेत् संसारहेतूपरमश्च यत्र ॥३४॥[32]

एवं न निर्विण्णो नातिसक्तः सन् तां भजेत । भजनीयत्वे हेतवः स्व चित्ते स्वत एव सिद्धः कुतः यत आत्मा यत एव प्रियः प्रियस्य च सेवासुखरूपैव अर्थः सत्यः न तु नात्मवन्मिथ्या भगवान्भजनीय गुणः अनन्तो नित्यः य एवम्भूत स्तं भजेत नियतार्थ निश्चितः तदनुभावान्येन निर्वृत्तः सन् इति स्वतः सुखात्मकत्वं दर्शितम् । किं च यत्र यस्मिन् भजने सति संसारहेतोरविद्याया उपरमो नाशो भवति ।

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
निर्णीत भक्तिभेदाख्या षष्ठी पूर्त्तिमगात् कला ॥

इति षष्ठीकला ।[33]

***

31. ओ-2 - एवं स्वचित्ते इति नष्टम् ।
32. तु.भा. 2.2.6
33. ना- 'इति षष्ठीकला' अधिक पाठः । सोऽत्र प्रदत्तः ।

[1]सप्तमी कला

कलायामथ सप्तम्यां श्रव्यगेयो[2] रुकर्मणः ।
निरूप्यते भगवतः पुण्ये श्रवणकीर्त्तने ॥१॥

तयोर्लक्षणमाह— हरेर्नाम गुणादीनां श्रुतिभ्यां हृद्गतीकृतिः ।
श्रवणं कीर्त्तनं तेषां स्वमुखेन प्रकाशनम् ॥२॥

आदिपदेन यशोलीलाचरितानां परिग्रहः । भगवत्कथामृतश्रवणपरोहं ममतासमुत्थितमात्ममोहं परित्यजति नान्य इत्याह । चतुर्थे सप्तमेऽध्याये भगवन्तं प्रति विद्याधराणां वाक्येन—

त्वन्माययार्थमभिपद्य कलेवरेऽस्मिन्
कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः ।
क्षिप्तोऽप्यसद्विषयलालस आत्ममोहं
युष्मत्कथामृतनिषेवक उद्व्युदस्येत् ॥३॥[3]

अन्यं पुरुषार्थसाधनं कलेवरमभिपद्य प्राप्यास्मिन् त्वन्मायया ममेत्यहमित्यभिमानं कृत्वा इदमात्ममोहं युष्मत्कथामृतं निषेवक उदुच्चैर्व्युदस्येत् परित्यजेन्नान्य[4]इत्यर्थः। ननु स्वैः पुत्रादिभिरधिक्षिप्तो दुःखितः सन् परित्यजेदेव नेत्याहुः क्षिप्तोपि दुर्मतिः असत्सु विषयेषु लालसा तृष्णा यस्य आस्तां श्रवणं भगवत्कथाप्रश्नोपि वक्त्रादीन्पुनातीत्याह दशमे प्रथमेऽध्याये परीक्षितं प्रति शुकवाक्येन—

वासुदेवकथाप्रश्नः पुरुषांस्त्रीन् पुनाति हि ।
वक्तारं पृच्छकं श्रोतॄं स्तत्पादसलिलं यथा ॥४॥[5]

श्रोतॄन् पृच्छकव्यतिरिक्तान् सभ्यान् । प्रतिक्षणमच्युतस्य वार्त्ताप्रसङ्ग इति यत्सतामयं स्वभाव एवेत्याह दशमे त्रयोदशेऽध्याये परीक्षितं प्रति शुकवाक्येन—

सतामयं सारभृतां निसर्गो यदर्थवाणीश्रुतिचेतसामपि ।
प्रतिक्षणं नव्यवदच्युतस्य यत् स्त्रिया विटानामिव साधुवार्त्ता ॥५॥[6]

---

1. ना - अथ अधिकम् संयुक्तम्
2. ना- योरुकर्मणः, ओ-1, ओ-2, ओ-3 - श्रेयोरुकर्मणः, विचारः- श्रेयोरुकर्मणः पदम् अशुद्धम् । गेयोरुकर्मणः इति पाठः साधीयान् ।
3. तु.भा. 4.7.44
4. ओ-1, ओ-2 - न्नान्य इति नास्ति ।
5. तु.भा. 10.1.16
6. तु.भा. 10.13.2

सारभूतां सारग्राहिणामयं निसर्गः स्वभावः कासौ अच्युतस्य वार्त्ता प्रतिक्षणं नव्यवद्वक्तीति यत् विटानां स्त्रैणानां स्त्रियाः कामिन्या वार्त्तेव कथं भूतानां सतां या अच्युतवार्त्तैवार्थो येषां तानि वाणीश्रुतिचेतांसि येषां तथाभूतानामपि । सतां स्वभावोयमस्तु अन्योपि तत्कथारुचिं को न कुर्यादित्याह प्रथमे द्वितीयेऽध्याये शौनकादीन्प्रति सूतवाक्येन—

यदनुध्यानासिना[7] युक्ताः कर्मग्रन्थिनिबन्धनम् ।
छिन्दन्ति कोविदास्तस्य को न कुर्यात्कथारतिम् ।।६।।

यस्यानुध्यानमेवासिः खड्गः तेन मुक्ता विवेकिनः ग्रन्थिमहङ्कारं निवध्नाति यत्कर्मच्छिन्दन्ति तस्य कथायां रतिं को न कुर्यात् । तामेव विशिनष्टि तृतीये चतुर्दशेऽध्याये विदुरं प्रति मैत्रेयवाक्येन—

ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः[8] ।
मृत्योः कृत्वैव मूर्ध्न्यङ्घ्रिमारुरोह हरेः पदम् ।।७।।

यया उत्तानपदः पुत्रो ध्रुवः मुनिना नारदेन यदा ध्रुवाय सुनन्दादिभिर्विमानमानीतं तदास्य देहत्यागोपेक्षितः स्यादिति मृत्यावासन्नेपि देहं न तत्याज किन्तु सोपान इति तस्य मूर्ध्निपदं दत्त्वा विमानमारुह्य विष्णुपदमारूढः अतो हरिकथाश्रवणपरो धन्य इत्याह दशमे त्रयोदशेऽध्याये शुकं प्रति परीक्षिद्वाक्येन—

वयं धन्यतमा लोके गुरवो[9] यत्र बन्धवः ।
यत् पिबाम मुहुस्त्वत्तः पुण्यं हरिकथामृतम् ।।८।।[10]

पुनस्तदेव कथामृतं विशिनष्टि । दशमे सप्तमेऽध्याये शुकं प्रति परीक्षिद्वाक्येन—

यच्छृण्वतोऽपैत्यरतिर्वितृष्णा सत्त्वं विशुद्ध्यत्यचिरेण पुंसः ।
भक्तिर्हरौ तत्पुरुषेषु[11] सख्यं तदेव हारं वद मन्यसे चेत् ।।९।।

यच्छृण्वतः पुंसः पुरुषमात्रस्यारतिर्मनोग्लानिस्तन्मूला विविधा तृष्णा च अपगच्छति। तथा सत्त्वविशुद्धिहरिदाससख्यानि च भवन्ति तदेवं हारं हरिचरितं

---

7. तु.भा. 1.2.15 - यदनुध्यासिना
8. तु.भा. 3.14.5 - र्मकः, ना- र्भिकः ।
9. तु.भा. 10.12.43 - गुरोऽपि क्षत्रबन्धवः ।
10. ओ-1, ओ-2, ओ-3, ना - त्रयोदशेऽध्याये परन्तु भागवते दशमे द्वादशेऽध्याये श्लोकः अस्ति । तु.भा. 10.12.43
11. तु.भा. 10.7.2 - पुरुषे च ।

मनोरमं वा वद यदि मन्यसे अनुग्रहं करोषि अनशनादि तापनिवर्त्तकं हरिचरितामृतमित्याह द्वितीयेऽष्टमेऽध्याये शुकं प्रति परीक्षिद्वाक्येन—

न मेऽसवः परायन्ति ब्रह्मन्ननशनादिभिः[12] ।
पिबतोऽच्युत पीयूषं त्वन्मखाम्बुजनिःसृतम् ॥१०॥

न परायन्ति नापगच्छन्ति न व्याकुलानि भवन्तीत्यर्थः । अच्युतपीयूषं पिबतः अतिमधुरत्वात्तापहारकत्वात् तच्चरितश्रवणे तृप्तिर्महतां नोपपद्यत इत्याह प्रथमे प्रथमेऽध्याये सूतं प्रति शौनकादीनां वाक्येन—

वयन्तु[13] न वितृप्याम उत्तमश्लोकविक्रमे ।
यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥११॥

उद्गच्छति तमो यस्मात्स उत्तमस्तथाभूतः श्लोको यशो यस्य विक्रमे तु विशेषेण न वितृप्यामः । अलमिति न मन्यामहे । तत्र हेतुः यद्विक्रमं शृण्वतामिति यद्वा अन्ये तृप्यन्तु नाम वयन्तु नेति तु शब्दस्यान्वयः । अयमर्थः त्रिधाह्यलं बुद्धिर्भवति उदरादिभरणे न वा रसज्ञानेन वा स्वादुविशेषाभावाद्वा । तत्र शृण्वतामित्यनेन । श्रोत्रस्याकाशत्वान्नभरणमित्युक्तम् । रसज्ञानामित्यनेन चाज्ञानतः पशुतृप्तिर्निराकृता इक्षुभक्षणवद्रसान्तरा भावेन तृप्तिं निराकरोति पदे पदे प्रतिक्षणं स्वादुतोपि स्वादु । यतो मर्त्यानां कृष्णचरितामृतमित्याह प्रथमेऽष्टादशेऽध्याये सूतं प्रति शौनकादीनां वाक्येन—

सृज[14] जीव समाः सौम्य शाश्वतीर्विशदं यशः ।
यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः ॥१२॥

शाश्वतीः समाः अनन्तान्वत्सरान् जीव अत्यन्तसंयोगे द्वितीया विशुद्धं यशः शंससि कथयसि यद्यस्मान्मर्त्यानामृतं मरणनिवर्त्तकम् । ननु निर्गुणस्य परमेश्वरस्य कृतो यशः तच्छ्रवणे वा को लाभ स्तत्राह नवमे चतुर्विंशेऽध्याये परीक्षितं प्रति शुकवाक्येन—

कलौ जनिष्यमाणानां दुःखशोकतमोनुदम् ।
अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः ॥१३॥[15]

---

12. तु.भा. 2.8.26 - दमी, भा.- पिबतोऽच्युतपीयूषमन्यत्र कुपिताद् द्विजात् इति पाठोऽस्ति ।
13. तु.भा. 1.1.19 - वयं तु
14. ओ-2 - सूत, तु.भा. (1.18.11)
15. तु.भा. (9.24.61) व्यतनोद् यशः

यस्मिन्[16] सत्कर्णपीयूषे यशस्तीर्थवरे सकृत् ।
श्रोत्राञ्जलिरुपस्पृश्य धुनुते कर्मवासनाम् ॥१४॥

यस्मिन्यशोरूपतीर्थवरे श्रोत्रमेवाञ्जलिः पानसाधनं यस्य स पुमान् सकृदप्याचमनपात्रं कृत्वा तत्सौन्दर्याकृष्टचित्तः कर्मवासनां धुनुते । हरिचरितामृतश्रवणपरा मोक्षमपि नेच्छन्ति । किमुत स्वर्गादिसुखमित्याह दशमे सप्ताशीतितमेऽध्याये भगवन्तं प्रति श्रुतीनां वाक्येन—

दुरवगमात्मतत्त्वनिगमाय तवात्ततनोः
चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः ।
न परिलषन्ति केचिदपवर्गमपीश्वर ते
चरणसरोजहंसकुलसङ्गविसृष्टगृहाः ॥१५॥[17]

भो ईश्वर दुरवगमं दुर्बोधं यदात्मतत्त्वं तस्य निगमाय ज्ञापनाय तव आत्तजनोः आविष्कृतमूर्त्तेः दर्शितदेहस्य चरितमहाब्धिपरिवर्त्तपरिश्रमणाः चरितमेव महाभूताब्धिस्तस्मिन्परिवर्त्तो विगाहस्तेन परिश्रमणाः परिवर्जनार्थः श्रमणं श्रमः तेन विगाहस्तेन परिगतं श्रमणं श्रमो येषां गतश्रमा इत्यर्थः । अपवर्गमपि केचिन्न परिलषन्ति नेच्छन्ति कुतोन्यत् । केचिदिति एवंभूता भक्तिरसिका विरला इति दर्शयति न केवलमन्यन्नेच्छन्ति । किन्तु तेनैव सुखेन पूर्णाः सन्तः पूर्वसिद्धं गृहादि सुखमपि उपेक्षन्त इत्याह ते चरणसरोजहंसकुल सङ्गविसृष्टगृहाः तव चरणसरोजे हंसा इव रममाणा ये भक्ता स्तेषां कुलं तेन सङ्गस्तेन विसृष्टा गृहा यैस्ते तथा यत एवंभूतो हरिचरितामृतमहिमा अतः तच्छ्रवणेऽलम्बुद्धिः कस्य स्यादिति कथयन्नुपसंहरति तृतीये पञ्चमेऽध्याये मैत्रेयं प्रति प्रह्लादवाक्येन—

कस्तृप्नुयात्तीर्थ पदाभिधानात्[18] सत्रेषु वः सूरिभिरीड्यमानात् ।
यः कर्णनाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति ॥१६॥

तीर्थपदस्य कृष्णस्याभिधानात्कथामृतात् सत्रेषु समाजेषु सूरिभिर्नारदादिभिः ।

अथ कीर्त्तनमाह— तत्र हरियशः कथनादितरसाधनेन दुःखनिवृत्तिर्नास्तीत्याह प्रथमे पञ्चमेऽध्याये वेदव्यासं प्रति नारदवाक्येन—

---

16. ओ-1, ओ-2, ओ-3, ना- तस्मिन् परन्तु भा. (9.24.62) - टीकाधारेण यस्मिन् । अत्र भागवतस्य तथा टीकाधारेण पाठः गृहीतः ।
17. तु.भा. 10.87.21
18. भा. 3.5.11 - पदोऽभिधानात् ।

त्वमप्यदभ्रश्रुतविश्रुतं विभोः समाप्यते[19] येन विदां बुभुत्सितम् ।
प्रख्याहि[20] दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशन्ति नान्यथा ॥१७॥

अदभ्रमनल्पं श्रुतं यस्य हे अदभ्रश्रुतविभोर्विश्रुतं यशः प्रख्याहि कथय येन विश्रुतेन बुद्धेन विदुषां बुभुत्सितं बोद्धुमिच्छा समाप्यते यस्माद्दुःखैः पीडितानां क्लेशशान्तिं प्रकारान्तरेण मन्यते । हरिचरितगानपरस्य संसारभयं नास्तीत्याह सप्तमे नवमेऽध्याये भगवन्तं प्रति प्रह्लादवाक्येन—

नैवोद्विजे परदुरत्ययवैतरण्या-[21]
स्त्वद्वीर्यगायनमहामृतमग्नचित्तः ।
शोचे ततो विमुखचेतस इन्द्रियार्थ-
मायासुखाय भरमुद्वहतो विमूढान् ॥१८॥[22]

हे पर सर्वोत्तमत्वद्वीर्यगायनमेव महामृतं तस्मिन् मग्नं चित्तं यस्य सोहं भवदुरत्ययवैतरण्या नोद्विजे किन्तु विमूढान् शोचामि तेनैवाह ततो महामृता द्विजमुखं चेतो येषां प्रत्युत इन्द्रियार्थनिमित्तं यन्मायासुखं तदर्थं भरं कुटुम्बादिभारमुद्वहतः यत एवम् अतो हरिकथामृतगायक भाग्यं श्लाघ्यते प्रथमे षष्ठेऽध्याये शौनकादीन् प्रति सूतवाक्येन—

अहो देवर्षिधन्योऽयं यत्कीर्त्तिं शार्ङ्गधन्वनः ।
गायन्माद्यन्निदं तन्त्र्या रमयत्यान्तरं[23] जगत् ॥१९॥

माद्यन् हृष्यन् तन्त्र्या वीणया । भगवद्गानध्वनिरपि दिशाममङ्गलपरिहारीत्याह । दशमे षट्चत्वारिंशेऽध्याये परीक्षितं प्रति शुकवाक्येन—

उद्गायतीनामरविन्दलोचनं व्रजाङ्गनानां दिवमस्पृशद् ध्वनिः ।
दध्नश्च निर्मन्थनशब्दमिश्रितो निरस्यते येन दिशाममङ्गलम् ॥२०॥[24]

येन ध्वनिना दिशाममङ्गलं निरस्यते किमुत गायकस्येति भावः । परमप्राप्तिसाधनमेतदेवेत्याह तृतीये पञ्चदशेऽध्याये देवान् प्रति ब्रह्मवाक्येन—

यच्च व्रजन्त्यनिमिषामृषभानुवृत्त्या
दूरेयमा उपरि[25] नः स्पृहणीयशीलाः ।

---

19. ओ-2 - समाप्तते
20. भा. 1.5.40 - आख्याहि
21. ना- तरिण्याः
22. तु.भा. 7.9.43
23. भा. 1.6.39 - त्यातुरं
24. तु.भा. 10.46.46
25. तु.भा. (3.15.25) - ह्युपरि ।

भर्त्तु र्मिथः सुयशसः कथनानुराग-
वैक्लव्यवाष्पकलया पुलकीकृताङ्गाः ॥२१॥

यच्च वैकुण्ठं न उपरिस्थितं व्रजन्ति । के अनिमिषां देवानामृषभः श्रेष्ठः हरिस्तस्यानुवृत्त्या दूरे यमो येषां यद्वा दूरीकृतयमनियमा दूरेहमामिति पाठे दूरीकृताहङ्कारा इत्यर्थः स्पृहणीयं करुणादिशीलं येषां किञ्च भर्त्तुः हरेर्यत्सुयशस्तस्य मिथः कथने योनुरागः तेन वैक्लव्यं वैवश्यं तेन वाष्पकलया सह पुलकीकृतमङ्गं येषां यद्वा न उपरीति व्रजतां विशेषणं भगवच्चरितं गायतां मोक्षस्याप्युपेक्षामाह अष्टमे तृतीयेऽध्याये गजेन्द्रवाक्येन—

एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति ये वै भगवत्प्रपन्नाः ।
अत्यद्भुतं तच्चरितं सुमङ्गलं गायन्त आनन्दसमुद्रमग्नाः ॥२२॥[26]

यस्यैकान्त भक्ताः कञ्चनार्थं धर्मादिषु न वाञ्छन्ति.... इत्युत्तरेणान्वयः तत्र हेतुः अत्यद्भुतमित्यादि । अत्र सदाचारं प्रमाणयति द्वितीये प्रथमेऽध्याये परीक्षितं प्रति शुकवाक्येन—

प्रायेण मुनयो राजन्निवृत्ता विधिनिषेधतः[27] ।
नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ॥२३॥

विधिनिषेधतः विधिनिषेधाभ्यां निवृत्ताः नैर्गुण्ये ब्रह्मणि स्थिता अपि सुप्रसिद्धम् । भगवद्यशोवर्णनरहितं वाक् चातुर्यं निन्दति । द्वादशे द्वादशेऽध्याये शौनकादीन् प्रति सूतवाक्येन—

न तद् वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ।
तद् ध्वाङ्क्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः ॥२४॥[28]

चित्राणि पदानि यस्मिंस्तदपि जगत्पवित्रयतीति तथा तत् हरेर्यशः न प्रगृणीत न वर्णयेत् तद्वचः ध्वाङ्क्षतीर्थं काकतुल्यं नराणां रतिस्थानं न तं हंसैः सेवितम् । यथा कथञ्चिद्विष्णुनामकीर्त्तनपरो यातनां नार्हतीत्याह षष्ठे द्वितीयेऽध्याये यमदूतान्प्रति विष्णुदूतवाक्येन—

---

26. तु.भा. 8.3.20
27. भा. 2.1.7 - विधिषेधतः । परन्तु ओ-1, ओ-2, ओ-3, ना-टीकाधारेण च निषेधत पाठोऽस्ति अत्र निषेधत इति पाठः साधीयान् । छन्दोऽनुरोधात् भा. धृतः पाठः ग्राह्यः ।
28. तु.भा. 12.12.50

पतितः स्खलितो भग्नः सन्दष्टस्तप्त आहतः ।
हरिरित्यवशेनाह पुमान्नार्हति यातनाम् ॥२५॥[29]

अवशेनापि यो हरिरित्याह स यातनां नार्हति पुमानित्यनेन नात्र वर्णाश्रमादिनियम इत्युक्तम् । अवशत्वमेवाह पतितः प्रासादादिभ्यः स्खलितो मार्गे भग्नो भग्नगात्रः सन्दष्टः सर्पादिभिः तप्तो ज्वरादिना अतो द्वादशाब्दादिप्रायश्चित्तैरपि समूलमनिवर्त्तयितव्यानां महापातकानां हरिकीर्त्तनमेव मुख्यं प्रायश्चित्तमित्युपसंहरति षष्ठे तृतीये अध्याये परीक्षितं प्रति शुकवाक्येन—

तस्मात् संकीर्त्तनं विष्णोर्जगन्मङ्गलमंहसाम् ।
महतामपि कौरव्य विद्ध्यैकान्तिकनिष्कृतिम् ॥२६॥[30]

जगतो मङ्गलरूपं ऐकान्तिकनिष्कृतिं श्रेष्ठप्रायश्चित्तम् । ननु कीदृशानि चरितानि श्रवणीयानि कीर्त्तनीयानीत्यादित आरभ्य श्रीकृष्णचरितं संक्षिप्याह द्वाभ्यां नवमे चतुर्विंशेऽध्याये परीक्षितं प्रति शुकवाक्येन—

जातो गतः पितृगृहाद् व्रजमेधितार्थः
हत्वा रिपून् सूतशतानि कृतोरुदारः ।
उत्पाद्य तेषु पुरुषः क्रतुभिः समीजे
आत्मानमात्मनिगमं प्रथयञ्जनेषु ॥२७॥[31]

पूर्वं महापुरुषरूपेण जातः पश्चात् पुरुषो मनुष्याकारः सन् व्रजंगतः व्रजवासिना मेधितार्थः वर्धिपरमानन्दः रिपून्पूतनादीन् दारेषु सूतानां शतानि उत्पाद्य आत्मनिगमं स्वकीयवेदमार्गं विस्तारयन् क्रतुभिरीजे—

पृथव्याः स वै गुरुभरं क्षपयन् कुरूणा-
मन्तः समुत्थकलिलायुध[32] भूपचम्वः ।
दृष्ट्या विधूय विजये जयमुद्विघोष्य
प्रोच्योद्धवाय स[33] परं समगात् स्वधाम ॥२८॥

दृष्ट्यै भूपचमूर्विधूय विजयेऽर्जुने जयमुद्विघोष्य श्रीमदुद्धवाय तत्त्वमुद्दिश्य स्वधाम सम्यक् तेनैव रूपेण जगाम । ननु के गुणाः श्रवणीया कीर्त्तनीया इत्यपेक्षाया-

29. तु.भा. 6.2.15
30. तु.भा. 6.3.31
31. तु.भा. 9.24.66
32. भा. 9.24.67 - कलिना युधि । ओ-2 - कलिनायुध ।
33. तत्रैव - च

मानन्त्यान्नियमो न शक्य इत्याह दशमे चतुर्दशेऽध्याये भगवन्तं प्रति ब्रह्मवाक्येन—

गुणात्मनस्तेऽपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेऽस्य ।
कालेन यैर्वा विमिताः[34] सुकल्यै[35]र्भूपांसवः खे मिहिका द्युभासः ॥२९॥

गुणात्मनः गुणाधिष्ठातुस्ते तव गुणान्विमातुं एतावन्त इति गणयितुं के ईश्वरे समर्था बभूवुरित्यर्थः । दूरतस्तद्विशेषवार्त्ता कथम्भूतस्य अस्य विश्वस्य हिताय पालनाय बहुधा गुणाविष्कारेणावतीर्णस्य ननु काले न निपुणैः किंशक्यमत आह कालेनेति सुकल्यैरिति निपुणैर्बहुजन्मना कालेन भूपरमाणवः विमिता विशेषेण गणिता बभूवुरिति ते खे मिहिका हिमकला अपि तथा द्युभासः दिवि नक्षत्रादिकिरणपरमाणवोऽपि । श्रवणकीर्त्तने उपसंहरति तृतीये त्रयोदशेऽध्याये मैत्रेयं प्रति विदुरवाक्येन—

य एवमेतां हरिमेधसो हरेः कथां सुभद्रां कथनीयमायिनः ।
शृण्वीत भक्त्या श्रवयेत् वोशतीं जनार्दनोऽस्याशु हृदि प्रसीदति ॥३०॥[36]

हरति संसारं मेधा यस्य स हरिमेधाः तस्य कथनीयानि मायानि मायावन्ति चरितानि यस्य श्रवयेदित्यत्र ह्रस्वत्वमार्षम् । अन्यान् श्रावयेत्कीर्त्तयेदित्यर्थः । उशतीं कमनीयां हृदि प्रसीदति मनसि सन्तुष्यतीत्यर्थः । तस्मिन् सन्तुष्टेन किञ्चिद् दुर्लभमिति भावः । स्वकृतपद्याभ्यां श्रवणकीर्त्तने आशंसति—

शमशालिं शुकादिसाधुभिः सततं संस्तुतमात्मशर्मणे ।
शृणुतं श्रवणे श्रुतीरितं सुरसारस्य शुभावहं यशः ॥३१॥
रविसूनुरतीव रोषणो रतिरस्माकमस्त्वहर्निशम् ।
रचितोऽञ्जलिरेषतेऽधुना रसेन कीर्त्तय नेतरं हरेः ॥३२॥[37]

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
श्रुतिकीर्त्तनवत्येषा सम्पूर्णा सप्तमीकला ॥
[38]इति सप्तमीकला ।
***

---

34. भा. 10.14.7 - विमताः 35. भा. 10.14.7 - सुकल्पै
36. तु.भा. 3.13.48
37. ओ-1, ओ-2, ओ-3 - ग्रन्थेषु रविसूनुरतीव.....नेतरं हरेः श्लोको नास्ति ।
38. ना- 'इति सप्तमी कला श्री' अधिकः पाठः ।

[1]अष्टमी कला

[2] निरूप्यतेऽथस्मरणमष्टम्यां वल्लवीपतेः ।
तच्च स्थिरेण मनसा रूपादीनां विचिन्तनम् ॥१॥

लक्षणमाह । तच्चेत्यादि । आदिपदेन गुणलीलाचरितानां परिग्रहः भगवत्स्मरणाद्-धर्मज्ञानवैराग्यादयः सम्भवन्तीत्याह एकादशे ऊनविंशेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

मदात्मन्यर्पितं[3] चित्तं शान्तं सत्त्वोपबृंहितम् ।
धर्मं ज्ञानं स वैराग्यमैश्वर्यं चाभिपद्यते ॥२॥[4]

मदात्मनि[5] मयीश्वरे चित्तं समर्पितं तदा पुमान् धर्मादीन्प्राप्नोत्येव भगवद् ध्यानपराणां कामोपि कामाय न भवतीत्याह दशमे द्वाविंशेऽध्याये गोपीं प्रति भगवद्वाक्येन—

न मय्यावेशितधियां कामः कामाय चेष्यते ।[6]
भर्जिताः[7] क्वथिता धानाः पुनर्बीजाय[8] नेष्यते ॥३॥

कामाय पुनः कामभोगाय । विषयमहिम्ना कामस्यापि शान्तिहेतुत्वादिति भावः । कामाप्ररोहदृष्टान्तः भर्जिता जग्धाः क्वथिता पक्वा धाना यवादिर्बीजायाङ्कुरोद्गमाय । तस्माद्येन केनापि प्रकारेण भगवति मनोनिवेशः सद्गतिहेतुरित्याह सप्तमे प्रथमेऽध्याये युधिष्ठिरं प्रति नारदवाक्येन—

कामा द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥४॥[9]

---

1. ना - इतः प्राक् 'श्रीः अथ' इत्यधिकः पाठः ।
2. ओ-1, ओ-2, ओ-3, - श्री इत्यधिकः पाठः ।
3. ना - विकल्प पाठो निर्दिष्टः । यथा- य"दात्मन्यर्पितम् । भा.- 'यदात्मन्यर्पितं' परन्तु अत्र मदात्मनि तदपि सङ्गच्छते । मयीश्वरे इति व्याख्याबलेन ।
4. तु.भा. 11.19.25
5. ना - य"दात्मनि विकल्प पाठो निर्दिष्टः ।
6. भा. 10.22.26 - कल्पते ।
7. तत्रैव - भर्जिता
8. तत्रैव - धाना प्रायोबीजाय
9. तु.भा. 7.1.29

तदघं काम्यादिनिमित्तं पापं हित्वा । अत्र शिष्टानुभावं प्रमाणयति—

गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ।
संबन्धाद् वृष्णयः[10] स्नेहाद्यूयं भक्त्या वयं विभो ॥५॥[11]

एतद्द्रढयति भगवद्वाक्येन दशमे तृतीयेऽध्याये देवकीवसुदेवौ प्रति—

युवां मां पुत्रभावेन ब्रह्मभावेन दासकृत् ।[12]
चिन्तयन्तो कृतस्नेहौ यास्येथे मद्गतिं पराम् ॥६॥

परां मद्गतिं यास्येथे गमिष्यथः । आस्तां सर्वदा स्मरणं प्राणावसानसमये क्षणमपि भगवतः परमगतिहेतुरित्याह दशमे षट्चत्वारिंशेऽध्याये नन्दं प्रति उद्धववाक्येन—

यस्मिञ्जनः प्राणवियोगकाले क्षणं समावेश्य मनोविशुद्धम् ।
निर्हृत्य कर्माशयमाशु याति परां गतिं ब्रह्ममयोर्कवर्णः ॥७॥[13]

कर्माशयं कर्मवासनां निर्हृत्य दग्ध्वा ब्रह्ममयः सन् स्वरूपज्ञानवान् अर्कवर्णः शुद्धसत्त्वमूर्त्तिः सन् परां गतिं तत्पदं याति । ननु योगेन शरीरपरित्यागं विना क्षणमात्रं मनःसमावेशेन तादृशी गतिः कुतः सम्भवतीत्याशङ्क्याह पञ्चमे ऊनविंशेऽध्याये नारायणं प्रति नारदवाक्येन—

इदं हि योगेश्वर योगनैपुणं हिरण्यगर्भो भगवान् जगाद यत् ।
यदन्तकाले त्वयि निर्गुणे मनो भक्त्यादधीतोज्झितदुष्कलेवरः ॥८॥[14]

हे योगेश्वर हिरण्यगर्भो यत् योगनैपुणं जगाद इदमेतत् किन्तु भक्त्या अन्तकाले पुमान् त्वयि मनो धारयेदिति यत् कथं भूतस्सन् उज्झितं दुष्कलेबरं तदभिमानो येन। युगपत्सर्वाङ्गस्फूर्त्तिः स्मरणे यथा सम्भवति न तथा प्रत्यक्ष इत्याह तृतीये पञ्चदशेऽध्याये सनकादीनामनुभवेन—

ते वा अमुष्य वदनासितपद्मकोश-
मुद्वीक्ष्य सुन्दरतराधरकुन्दहासम्[15] ।

---

10. ओ-1, ओ-2, ओ-3 - कृष्णाय
11. तु.भा. 7.1.30
12. भा. 10.3.45 - चासकृत्
13. तु.भा. 10.46.32
14. तु.भा. 5.19.13
15. ना- विकल्पपाठः- कु"न्दहासम्, परन्तु भागवत- टीकाधारेण कुन्दहासम् पाठः साधीयान् ।

लब्धाशिषः पुनरवेक्ष्य तदीयमङ्घ्रि-
द्वन्द्वं नखारुणमणिश्रयणं निदध्युः ॥९॥[16]

ते वै किल वदनमेवासितपद्मस्य कोशमन्तर्भागस्तमसित पद्मकोशमित्यद्भुतोपमा। सुन्दरतरे अरुणे अधरे ओष्ठे कुन्दवत् हासो यस्मिन् तदूर्ध्वं वीक्ष्य लब्धमनोरथाङ्गः सतः नखा एवारुणमणयः तेषामाश्रयणमाश्रयभूतमङ्घ्रिद्वन्द्वं पुनरवेक्ष्य अधोदृष्ट्वा पुनः पुनरेव निरीक्ष्य युगपत्सर्वाङ्गलावण्यग्रहणाशक्तेः पश्चान्निदध्युः ध्यातवन्तः इदानीं स्मरणप्रकरणमाह एकादशे चतुर्दशेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

स्त्रीणां स्त्रीसङ्गिनां सङ्गं त्यक्त्वा दूरत आत्मवान् ।
क्षेमे विविक्त आसीनश्चिन्तयेन्मामतन्द्रितः[17] ॥१०॥

आत्मवान् क्षेमे निर्भयदेशे[18] विविक्ते विजने किं कुर्वन्तं ध्यायेत्तत्राह तृतीये अष्टाविंशेऽध्याये देवहूतिं प्रति कपिलवाक्येन—

स्थितं व्रजन्तमासीनं शयानं वा गुहाशयम् ।
प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा ॥११॥[19]

प्रेक्षणीयमीहितं लीला यस्य । ध्यानाभ्यासनमाह द्वितीये द्वितीयेऽध्याये परीक्षितं प्रति शुकवाक्येन—

एकैकशोऽङ्गानि धियानुभावयेत् पादादि यावद्धसितं[20] गदाभृतः ।
जितं जितं स्थानमपोह्य धारयेत्परं परं शुद्ध्यति धीर्यथा यथा ॥१२॥[21]

अनुभावयेत् ध्यायेत् जितं जितमयत्नतः स्फुरितं पादगुल्फादिस्थानमवयवं तत्तदुपोह्य त्यक्तापरं जान्वादिधारयेत् शुध्यति तस्मिन्निश्चला भवति । स्मितस्य ध्यानमाह दशमे त्रयोदशेऽध्याये परीक्षितं प्रति शुकवाक्येन—

श्यामं[22] हिरण्यपरिधिं वनमाल्यबर्ह-
धातुप्रवाल नटवेशमनुव्रतांसे ।

---

16. तु.भा. 3.15.44
17. ना, ओ-1, ओ-2, ओ-3 - तन्त्रितः । प्रसङ्गतो भागवत (11.14.29) धृतः पाठः साधीयान् इति संगृहीतम् ।
18. ओ-2 - क्षेमे निर्भये देशे इति कीटदष्टम् ।
19. तु.भा. 3.28.19
20. ना- द्धहितं
21. तु.भा. 2.2.13
22. ओ-2 - श्यामं इति नष्टम् ।

विन्यस्तहस्तमितरेण धुनानमब्जं
कर्णोत्पलालक कपोलमुखाब्जहासम् ॥१३॥[23]

हिरण्यवत् परिधिः परिधानं यस्य तं पीताम्बरमित्यर्थः वनमाल्यैः बर्हैं र्धातुभिः प्रबालैश्च नटवेशो यस्य अनुव्रतस्य सख्यु रंसे विन्यस्तः निहितो[24] हस्तो येन तम् इतरेण हस्तेन लीलया अब्जं धुनानं भ्रामयन्तं कर्णयोः उत्पले यस्य अलकाः कपोलयोर्यस्य मुखाब्जे हासो यस्य तं च तं च तं च ध्यायेदिति शेषः । गृहाद्वनं व्रजतोध्यानमाह दशमे एकविंशेऽध्याये परीक्षितं प्रति शुकवाक्येन—

बर्हापीडं[25] नटवरवपुः कर्णयोः कर्णिकारं
बिभ्रद् वासः कनककपीशं वैजयन्तीं च मालाम् ।
रन्ध्रान्[26] वेणोरधरसुधया पूरयन् गोपवृन्दै-
र्वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्त्तिः ॥१४॥[27]

नटवरवद् वपु र्बिभ्रत् वृन्दावनं प्राविशदिति शेषः कथं भूतं वनं स्वपदैरङ्कितै रमणं रतिजनकं गोपवृन्दैर्गीतकीर्त्तिः तथा बर्हमयमापीडं शिरोभूषणं बिभ्रत् बर्हमापीडो यस्मिन्निति वपुषो विशेषणं वा । वेणुवादनमुत्प्रेक्षते । अतो नूनमपरसुधैव पूर्णाद्वेणोरुच्चरन्ती गीतवत्प्रसर्पितुमर्हतीति भावः । वनादृगृहं व्रजतोध्यानमाह दशमे चतुर्दशेऽध्याये परीक्षितं प्रति शुकवाक्येन—

बर्हप्रसूनवनधातुविचित्रिताङ्गः
प्रोद्दामवेणुदलशृङ्गरवोत्सवाढ्यः ।
वत्सान् गुणान्ननुगगीत[28]विचित्र[29]कीर्त्ति-
र्गोपीदृगुत्सवदृशिः प्रविवेश गोष्ठम् ॥१५॥

प्रोद्दामा ये वेण्वादिरवास्तैरुत्सव[30]स्तेनाढ्यः सम्पन्नः गृणन् उपलालनैराह्वयन्

---

23. तु.भा. 10.23.22
24. ओ-2 - निहितः
25. ओ-3 -बर्हापीडं...... परीक्षितं प्रतिशुकवाक्येन पर्यन्तं नास्ति ।
26. ना - चन्द्रान्
27. तु.भा. 10.21.5
28. ना, ओ-1, ओ-2, ओ-3 - पीत (भा. 10.14.47) गीत, अत्र भागवताधारेण पाठो गृहीतः ।
29. भा. 10.14.47 - पवित्र
30. ओ-2 - स्तैरुत्सव, इति नष्टम् ।

गोपीनां दृशामुत्सवरूपा दृशि दर्शनं यस्य गोष्ठं प्रविवेशेति ध्यायेदिति शेषः । आत्मानस्य[31]ध्यानमाह दशमे द्वात्रिंशेऽध्याये परीक्षितं प्रति शुकवाक्येन—

तत्रोपविष्टो भगवान् स ईश्वरो योगेश्वरान्तर्हृदि कल्पितासनः ।
चकास गोपीपरिषद्गतोर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् ॥१६॥[32]

तत्र गोपिकोत्तरीयासने गोपीसभागतस्ताभिः सम्मानितश्चकास शुशुभे एवं ध्यायेदिति शेषः त्रैलोक्ये या लक्ष्मीस्तस्या एकमेव पदं स्थानं वपुर्दधत् । उपास्यस्वरूपभेदाद्ध्यानभेदमाह द्वितीये द्वितीयेऽध्याये परीक्षितं प्रति शुकवाक्येन—

केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ॥१७॥[33]

केचिद् विरलाः स्वदेहस्यान्तर्मध्ये यत् हृदयं तत्र योऽवकाशस्तस्मिन्वसन्तं प्रादेशस्तर्जन्यङ्गुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं यस्येति तं हृदयपरिमाणं तत्रोपचर्यते । कञ्जं पद्मं रथाङ्गं चक्रम् । तदेव पादादिक्रमेणाह तृतीये अष्टाविंशेऽध्याये देवहूतिं प्रति कपिलवाक्येन—

संचिन्तयेद् भगवतश्चरणारविन्दं
वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम् ।
उत्तुङ्गरक्तविलसन्नखचक्रवाल-
ज्योत्स्नाभिराहतमहद्धृदयान्धकारम् ॥१८॥[34]

सम्यक्चिन्तयेत् पादतले रेखात्मकानि वज्रादिलाञ्छनानि तैराढ्यं युक्तं उत्तुङ्गाश्च विलसन्तो ये नखास्तेषां चक्रबालं मण्डलं तस्य ज्योत्स्नाभिराहतो महतां[35] ध्यातॄणां हृदये अन्धकारो येन एतच्च सर्वमुपादेयं विशेषणध्येयत्वेनैवोच्यते—

यच्छौचनिःसृतसरित्प्रवरोदकेन
तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् ।
ध्यातुर्मनः शमलशैलनिसृष्टवज्रं
ध्यायेच्चिरं भगवतश्चरणारविन्दम् ॥१९॥[36]

---

31. सर्वेषु पाण्डुग्रन्थेषु अयं पाठः दृश्यते । व्याकरणदृष्ट्या अस्य पाठश्चिन्त्यः । अस्मत् चिन्तितः पाठः - आत्मनश्च । 'आत्मनास्य' इति समीचीनपाठः।

32. तु.भा. 10.32.14

33. तु.भा. 2.2.8

34. तु.भा. 3.28.21

35. ओ-1, ओ-2, ओ-3 - 'महातां' इति नष्टम् ।

36. तु.भा. 3.28.22

किञ्च यस्य[37] शौचेन क्षालनेन निस्सृताया गङ्गाया उदकेन तीर्थेन संसारतारकेण मूर्ध्नि अधिकृतेन धृतेन शिवोपि शिवोभूत अधिकसुखं प्राप्त इत्यर्थः । धातुर्मनसि यः शमलशैलः पापपर्वतस्तस्मिन्निसृष्टं क्षिप्तं वज्रमिव यत् यद्वा शमलशैल निसृष्टं लाञ्छनरूपं वज्रं[38] येन तत्—

जानुद्वयं जलजलोचनया जनन्या
लक्ष्म्याखिलस्य सुरवन्दितया विधातुः ।
ऊर्वोर्विधाय[39] करपल्लवरोचिषा यत्
संलालितं हृदि विभोरभवस्य कुर्यात् ॥२०॥

विभोर्जानुद्वयमखिलस्य विधातुर्ब्रह्मणो जनन्या लक्ष्म्या संलालितं स्पर्शचातुर्येण सेवितं संसारित्वमिव प्रणीतं वारयति उभयस्येति हृदि कुर्यात्[40] —

ऊरू सुपर्णभुजयोरधिशोभमाना-
वोजोनिधी अतसिकाकुसुमावभासौ ।
व्यालम्बिपीतवरवाससि वर्त्तमान-
काञ्चीकलापपरिरम्भि नितम्बबिम्बम् ॥२१॥[41]

सुपर्णस्य[42] भुजयोः स्कन्धयोरध उपरि ओजसो बलस्य निधी आधारौ अतसिकायाः कुसुमवत् कान्त्या अवभासमानौ व्यालम्बि गुल्फलम्बमानं पीतं वरं च वासः तस्मिन्वर्तमानः यः काञ्चनकलापस्तेन परिरम्भः संश्लेषो विद्यते- यस्य तत् विभोर्नितम्बबिम्बं च हृदि कुर्यादिति पूर्वेणैवान्वयः ।

नाभिह्रदं[43] भुवनकोशगुहोदरस्थं
यत्रात्मयोनिधिषणाखिललोकपद्मम् ।
व्यूढं हरिन्मणिवृषस्तनयोरमुष्य
ध्याये द्वयं विशदहारमयूखगौरम् ॥२२॥[44]

---

37. ना - यस्य नास्ति ।
38. ओ-3 - वज्रं नास्ति
39. भा. 3.28.23 - र्निधाय
40. ओ-2 - ध्यायते अधिकम् ।
41. तु.भा. 3.28.24
42. ओ-3 - सुपर्णस्य..... पूर्वेणैवान्वयः इति पर्यन्तं नास्ति ।
43. ओ-1, ओ-2, ओ-3, ना - नाभी । टीकाया भागवतस्य चाधारेण धृतः 'नाभि' इति पाठः साधीयान् ।

अमुष्य हरेर्नाभिह्रदं ध्यायेत् कथम्भूतं भुवनानां कोशस्य समूहस्य गृहाधिष्ठानं यदुवरं तत्रस्थं यत्र नाभिह्रदे आत्मनो ब्रह्मयोनेर्ब्रह्मणो धिषणं धिष्ण्यमखिललोकात्मकं पद्मं व्यूढं तथा हरिन्मणिवृषौ मरकतमणिश्रेष्ठाविव स्तनौ तयोर्द्वयं ध्यायेत् विशदहाराणां मयूखैर्गौरं श्वेतम् ।

वक्षोऽधिवासमृषभस्य महाविभूतेः
पुंसां मनो-नयन-निर्वृतिमादधानम् ।
कण्ठं च कौस्तुभमणेरधिभूषणार्थं
कुर्यान्मनस्यखिललोकनमस्कृतस्य ॥२३॥[45]

ऋषभस्य श्रेष्ठस्य महाविभूतेर्महालक्ष्म्या अधिवासं स्थानं वक्षः कण्ठं च तं मनसि कुर्यात् कथम्भूतं कण्ठं कौस्तुभमणिर्यो भूषणार्थं धृतस्तस्याधिकं भूषणम् अर्थः प्रयोजनं यस्य कौस्तुभमणिमेव स्वयमलं कुर्वन्तमित्यर्थः । पुंसां मातॄणां द्रष्टॄणां च मनो नयनानां निर्वृतिमादधानमित्युभयोर्विशेषणम्—

बाहूंश्च मन्दरगिरेः परिवर्त्तनेन
निर्णिक्तबाहुवलयानधिलोकपालान् ।
संचिन्तयेद्दशशतारमसह्यतेजः
शङ्खं[46] च तत्करसरोरुहराजहंसम् ॥२४॥[47]

निर्णिक्तानि उज्ज्वलीकृतानि बाहुवलयानि अङ्गदानि येषु अधिश्रितलोकपाला येषु दशशतारं चक्रम् असह्यं तेजो यस्य तत् तस्य करसरोरुहे राजहंसमिव—

कौमोदकीं भगवतो दयितां स्मरेत
दिग्धामरातिभटशोणितकर्दमेन ।
मालां मधुव्रतवरूथगिरोपजुष्टं
चैत्यस्य तत्त्वममलं मणिमस्य कण्ठे ॥२५॥[48]

अरातयो ये भटा योद्धारस्तेषां शेणितमेव कर्दमस्तेन दिग्धां लिप्ताम् अस्य कण्ठे मालां मणिं च स्मरेत् । मधुव्रतानां वरूथस्य गिरोपजुष्टं नादितं चैत्यस्य जीवस्य तत्त्वं तदुक्तं वैष्णवैः—

---

44. तु.भा. 3.28.25
45. तु.भा. 3.28.26
46. ओ-2 - शङ्खं च नष्टम् ।
47. तु.भा. 3.28.27
48. तु.भा. 3.28.28

''आत्मानमस्य जगतो निर्लेपमगुणामलम्
बिभर्ति कौस्तुभमणिस्वरूपं भगवान् हरिः'' । इति ।
भृत्यानुकम्पितधियो[49] हि गृहीतमूर्त्तेः
संचिन्तयेद्भगवतो वदनारविन्दम् ।
यद्विस्फुरन्मकरकुण्डलवल्गितेन
विद्योतितामलकपोलमुदारनासम् ॥२६ ॥

भृत्येषु अनुकम्पिता[50] कृतानुकम्पा या धीस्तया गृहीतामूर्त्तिर्येन तस्य विस्फुरन्ती ये मकराकारे कुण्डले तयोर्वल्गितेन प्रचलितेन विद्योतितौ अमलौ कपोलौ यस्मिन् उदारा[51] उन्नता नासिका यस्मिन्—

यच्छ्रीनिकेतमलिभिः[52] परिसेव्यमानं
भूत्या स्वया कुटिलकुन्तलवृन्दजुष्टम् ।
मीनद्वयाश्रयमधिक्षिपदब्जनेत्रं
ध्यायेन्मनोमयमतन्द्रित[53] उल्लसद्भ्रूः ॥२७॥

यच्च मुखं स्वया भूत्या शोभया अलिभिः परिसेव्यमानं मीनद्वयाश्रयं श्रीनिकेतनं पद्मम् अधिक्षिपद्वर्तते तद्ध्यायेत् यत्र कुन्तलैरलीनामधिक्षेपः नेत्रद्वयेन मीनद्वयस्येति द्रष्टव्यम् । अब्जे इव नेत्रे यस्मिन्नुपमानानन्तरम्[54] उल्लसन्त्यौ भ्रुवौ यस्मिन् मनोमयं मनस्याविर्भवत् ।

तस्यावलोकमधिकं कृपयातिघोर-
तापत्रयोपशमनाय निसृष्टमक्ष्णोः ।
स्निग्धस्मितानुगुणितं विपुलप्रसादं
ध्यायेच्चिरं विततभावनया गुहायाम् ॥२८॥[55]

अवलोकं ध्यायेत् कृपया अधिकमत्यर्थमक्षिभ्यां निसृष्टं प्रयुक्तं स्निग्धस्मितेनानु-गुणितं संयुतं विपुलः प्रसादो यस्मिन् गुहायां हृदि—

49. तु.भा. 3.28.29 - धियेह
50. ओ-1, - कम्पिता इति पदं नष्टम् ।
51. ओ-1, ओ-2, ओ-3 - उदारा..... यस्मिन् इति पर्यन्तं नष्टम् ।
52. ना - मलिभः
53. ना- मतन्त्रित । भा. (3.28.30) - मतन्द्रित । अयं पाठः साधीयान् ।
54. ओ-2 - नानन्तरम् इति नष्टम् ।
55. तु.भा. 3.28.31

हासं हरेरवनताखिललोकतीव्र-
शोकाश्रुसागरविशोषणमत्युदारम् ।
सम्मोहनाय[56] चरितं निजमाययास्य
भ्रूमण्डलं मुनिकृते मकरध्वजस्य ॥२९॥

अवनता नम्रा ये अखिला लोकास्तेषां तीव्रशोकेन यान्यश्रूणि तेषां सागरं विशोषयतीति तथा तं हरेर्हासं अथास्यात्युदारं भ्रूमण्डलं ध्यायेत् कथम्भूतं निजमायया मकरध्वजस्यापि सम्मोहनाय चरितं[57] मुनिकृते मुनीनामुपकाराय मुनीनां सम्मोहने प्रवृत्तं काममपि सम्मोहितुमित्यर्थः ।

मन्दहासध्यानमुक्ता स्फुटहासध्यानमाह—

ध्यानायनं प्रहसितं बहलाधरोष्ठ-
भासा[58] रुणायिततनुद्विजकुन्दपंक्ति ।
ध्यायेत्स्वदेहकुहरेऽवसितस्य विष्णो-
र्भक्त्याऽऽर्द्रयार्पितमना नपृथग्दिदृक्षेत् ॥३०॥

विष्णोः प्रहसितमुच्चैर्हसितं ध्यायेत् किम्भूतध्यानाय नमति सुन्दरतया प्रयत्नं विनैव ध्यानस्य विषयभूतं सौन्दर्यमेवाह बहलया अधिकया अधरोष्ठस्य भासा कान्त्या अरुणीभूतास्तनवः सूक्ष्मा द्विजा दन्ता एव कुन्दमुकुलानि तेषां[59] पंक्तिः स्फुरति यस्मिंस्तत् स्वहृत्कुहरे हृदयाकाशेऽवसितस्य ज्ञानस्य प्रेमरसार्द्रया भक्त्या तस्मिन्नेवार्पितमनास्सन् पृथक्तद्व्यतिरिक्तं द्रष्टुं नेच्छेत् चित्तं न चालयेदित्यर्थः । स्मरणमभिनन्दन् प्रकरणार्थमुपसंहरति चतुर्थेऽष्टमेऽध्याये ध्रुवं प्रति नारदवाक्येन—

एवं भगवतो रूपं सुभद्रं ध्यायतां मनः ।
निवृत्त्या परया तूर्णं सम्पन्नं न निवर्तते ॥३१॥[60]

तूर्णं शीघ्रं सम्पन्नं सत् ततो न निवर्त्तते विषयनिष्ठं न भवति तस्मिन्नेव निमज्जतीत्यर्थः । स्मरणमाशंसति स्वपद्येन—

---

56. तु.भा. 3.28.32 - सम्मोहनाय
57. ओ-1, ओ-2 - चर्चितम् ।
58. ओ-1, ओ-2, ओ-3, ना- हासा । भागवते (3.28.33) भासा । टीकायाः तथा भागवतस्य आधारेण पाठः गृहीतः ।
59. ओ-2 - तेषां..... ज्ञानस्य पर्यन्तं कीटदंष्टम् ।
60. तु.भा. 4.8.52

स्मर विस्मयदं स्वशोभया सुमनोबत शिखण्डशेखरम् ।
श्रितनीपमहीरुहं सुधासमवंशीस्वनितं मनः स्मर ॥३२॥

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
अगमत्पूर्णतामुक्तस्मरणैषाष्टमी कला ॥
[61]इति अष्टमीकला ।

***

60. ना- 'इति अष्टमीकला श्रीः' अधिक पाठः दृश्यते ।

[1]नवमी कला

नवम्यामथ लोकेश शिवाद्यैरभि[2]वाञ्छितम् ।
प्रोच्यते पद्मनाभस्य पुण्यं पादाब्जसेवनम् ॥१॥

तल्लक्षणमाह— छत्रचामरमुखैर्नृपोचितैः[3] श्रीहरेः सदुपचारसञ्चयैः ।
साधुभिर्विरचितामुपासनां पादसेवनमिति प्रचक्ष्यते ॥२॥

चतुर्वर्गप्राप्तेर्हरिसेवनं मुख्यं साधनमित्याह । चतुर्थेऽष्टमेऽध्याये ध्रुवं प्रति नारदवाक्येन—

धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः ।
एकमेव हरेस्तत्र कारणं पादसेवनम् ॥३॥[4]

एकं कारणं मुख्यं साधनम् । शुद्धान्तःकरणो नैतन्मुञ्चतीत्याह द्वितीयेऽष्टमेऽध्याये शुकं प्रति परीक्षिद्वाक्येन—

धौतात्मा पुरुषः कृष्णपादमूलं न मुञ्चति ।
मुक्त-सर्व-परिक्लेशः पान्थः[5] स्वशरणं यथा ॥४॥

धौतात्मा निष्पापः । शुद्धान्तःकरण इत्यर्थः । कृष्णपादमूलं न मुञ्चति । अत्र पादमूलशब्देन परिचर्या लक्ष्यते । मुक्ताः सर्वे[6] रागद्वेषादयः क्लेशा येन । पान्थः प्रवासादागतः स्वशरणं स्वगृहं यथा न मुञ्चति । लब्धकृष्णाङ्घ्रिमूलोऽन्यदपि न वाञ्छतीत्याह । चतुर्थे त्रिंशेऽध्याये भगवन्तं प्रति प्रचेतसां वाक्येन—

पारिजातेऽञ्जसा लब्धे सारङ्गोऽन्यत्र[7] सेवते ।
त्वदङ्घ्रिमूलमासाद्य साक्षात् किं किं वृणीमहि ॥५॥[8]

---

1. ना 'अथ' इति अधिक पाठम् ।
2. ओ-1, ओ-2, ओ-3 - रिभि
3. ओ-1, ओ-2, ओ-3 - तैः
4. तु.भा. 4.8.41
5. ओ-1, ओ-2, ओ-3 - पन्थः । अत्र ना, भागवतस्य (2.8.6) तथा टीकायाः आधारेण पान्थः गृहीतः ।
6. ओ-1, ओ-2, ओ-3 - सर्वरागा
7. ओ-1, ओ-2, ओ-3 - ऽन्वनुसेव्यते ।
8. तु.भा. 4.30.32

सारङ्गो भ्रमरः । पारिजाते सुखेन लब्धे सति सुलभमन्यद् वृक्षान्तरं न सेवते । तथा वयमपि साक्षात्त्वदङ्घ्रिमूलं प्राप्य किं किं वृणीमहि न किञ्चिदित्यर्थः ।[9] यद्वा किमन्यतुच्छं किमर्थं वृणीमहि अथवा यदि वृणीमहि अनन्तत्वे मनोरथानामवस्थानादित्यर्थः । अत्र सदाचारं प्रमाणयति । अष्टमे द्वादशेऽध्याये भगवन्तं प्रति श्रीरुद्रवाक्येन—

तवैव चरणाम्भोजं श्रेयस्कामा निराशिषः ।
विसृज्योभयतः सङ्गं[10] मुनयः समुपासते ॥६॥[11]

उभयत इहामुत्र च सङ्गं त्यक्त्वा भगवतः पादोपसर्पणस्य अव्यर्थतामाह । अष्टमे चतुर्विंशेऽध्याये मत्स्यरूपिणं भगवन्तं प्रति सत्यव्रता वाक्येन—

न तेऽरविन्दाक्ष पदोपसर्पणं मृषा भवेत् सर्वसुहृत् प्रियात्मनः ।
यथेतरेषां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं[12] हि नः ॥७॥[13]

हे अरविन्दाक्ष ! पृथगात्मनां देहाद्यभिमानिनां सताम् इतरेषां परेषां पादोपसर्पणं यथा मृषा भवेत् । तथा सर्वसुहृत् प्रियात्मनस्तव पादोपसर्पणं मृषा न भवेत् । यद् यस्मान्नो भक्तानाम् अद्भुतं वपुः अदीदृशः दृष्टवानसि । पृथगात्मनोऽसतामिति पाठे पृथगात्मनो भेददर्शिनः पुंसः असतां परिच्छिन्नानां पादोपसर्पणं यथा मृषेत्यर्थः । यावत् भगवत्पादपङ्कजं न सेवन्ते तया अपि तावदेवेत्याह । दशमे त्रिषष्टितमेऽध्याये भगवन्तं प्रति शिवज्वरवाक्येन—

तप्तोऽहं ते तेजसा दुःसहेन शान्तोग्रेणात्युल्बणेन ज्वरेण ।
तावत्तापो देहिनां तेऽङ्घ्रिमूलं नो सेवेरन् यावदाशानुबद्धाः[14] ॥१८॥

तेजसा त्वत्सृष्टेन ज्वरेण । शान्तोग्रेण अशितेन । परसन्तापकस्य युक्त एव ताप इति चेदत आह । तावदित । सेवायै प्रवृत्तानामनुचितमिति भावः । पादसेविनां

---

9. ओ-2, ओ-3 - किञ्चिदित्यर्थः नास्ति ।
10. ओ-1, ओ-2, ओ-3 - सङ्गि
11. तु.भा. 8.12.6
12. ओ-1, ओ-2, ओ-3 , ना - वपुरीदृशम् । परन्तु वपुरद्भुतं पाठो भागवते टीकायां च लभ्यते । अतस्तदाधारेण अत्र पाठः स्वीकृतोऽस्ति ।
13. तु.भा. 8.24.30
14. ना- निबद्धाः । ओ-1, ओ-2, ओ-3 - निरुद्धाः भा. 10.63.28 - नुबद्धाः । अत्र भागवताधारेण पाठो गृहीतः ।

ततोऽन्यत्र निस्पृहतामाह । तृतीये चतुर्थेऽध्याये भगवन्तं प्रति उद्धववाक्येन—

को[15] न्वीश ते पादसरोजभाजां सुदुर्लभोऽर्थेषु चतुर्ष्वपीह ।

तथापि नाहं प्रवृणोमि धीमन्[16] भवत्पादाम्भोजनिषेवणोत्सुकः ॥९॥

चतुर्षु अर्थेषु धर्मादिषु तथापि नाहं प्रवृणोमि । तत्र हेतुमाह । भवदित्यादि । भगवत्पादसेविनां मृत्योरपि भयं नास्तीत्याह । दशमे सप्ताशीतितमेऽध्याये भगवन्तं प्रति श्रुतीनां वाक्येन—

तव परि ये चरन्त्यखिल सत्त्वनिकेततया

उतप[17] दाऽऽक्रमन्त्यविगणय्य शिरो निर्ऋतेः ।

परिवयसे पशूनिव गिरा विबुधानपि तां-

स्त्वयि कृत[18] सौहृदाः खलु पुनन्ति[19] न ये विमुखाः ॥१०॥[20]

तवेति कर्मणि षष्ठी । त्वां ये परिचरन्ति । छन्दसि व्यवहिताश्चेति यच्छब्दव्यवधाने अप्यदोषः । केन रूपेण । अखिलसत्त्वनिकेततया । अखिलानि सत्त्वानि निकेतो वासो यस्य तस्य भावस्तत्ता तया । सर्वे[21] भूत[22] निवासतयेत्यर्थः । अत एव अविगणय्य तिरस्कृत्य त एव निर्ऋतेर्मृत्योः शिरः मूर्द्धानं नेतरे पदा पादेनाक्रमन्ति । मृत्योर्मूर्द्धि न पदं दधति । मृत्युं तरन्ति मुच्यन्त इत्यर्थः । तान् गिरावेदादिरूपया पशूनिव विबुधान् । विदुषोऽपि परिवयसे बध्नासि । कुतः त्वयि कृतसौहृदाः कृतं सौहृदं प्रेम यैः । ते खलु निश्चितं पुनन्ति पवित्रयन्ति । आत्मानमन्यानपीति शेषः । नेतरे भगवत्पादसेविनां न किञ्चिद् दुर्लभमित्याह । एकादशे ऊनत्रिंशेऽध्याये भगवन्तं प्रत्युद्धववाक्येन—

त्वं[23] त्वाखिलात्मदयितेश्वरमाश्रितानां

सर्वार्थदं स्वकृतविद् विसृजेत को नु ।

---

15. ओ-1, ओ-2, ओ-3 - को न्वीष्यते ।

16. भा. 3.4.15 - भूमन्

17. ओ-1, ओ-2, ओ-3 - उतप नास्ति ।

18. ओ-1, ओ-2, ओ-3 - कृतं

19. ओ-1, ओ-2, ओ-3 - खलु पुनः

20. तु.भा. 10.87.27

21. ओ-1 - सर्व......तयेत्यर्थः कीटदंष्टः ।

22. ओ-2 - सर्वभूत..... मूर्द्धानं नेतरे पर्यन्तं कीटदंष्टम् ।

23. ओ-1, ओ-2, ओ-3 तु.भा. 2 भ

को वा भजेत्किमपि विस्मृतयेऽनुभूत्यै ।
किं वा भवेन्न तव पादरजोजुषां नः ॥११॥

त्वां को नु विसृजेत् न भजेत[24] । कथं भूतः स्वकृतवित् । बलि प्रह्लादादिषु त्वया कृतमनुग्रहं जानन् । यद्वा । स्वस्मिन्नेवान्तर्यामितया कृतमुपकारं विद्वान् । तदेवाह अखिलात्मदयितेश्वरम् । अखिलस्य जगत आत्मानं चेतयितारम् । आत्मत्वादेव दयितं प्रेष्ठम् ।[25] सुसेव्यम् ईश्वरत्वादवश्यं भजनीयम् । किं च आश्रितानां सर्वार्थदम् । तर्हि किं फलोद्देशेनाहं सेव्यः । नहि नहि । किमपि अनिरुक्तम् अतितुच्छं त्वद्व्यतिरिक्तं स्वर्गादि त्वया[26] दत्तमपि को वा भजेत् सेवेत । कथंभूतं तत् । यत् केवलं भूत्यै इन्द्रियभोगाय अनु अनन्तरमेव त्वद्विस्मृतये भवति । यद्वा त्वद्व्यतिरिक्तं किमपि देवतान्तरं धर्मज्ञानादिसाधनं वा भूत्यैः[27] ऐश्वर्याय संसारस्य विस्मृतये मोक्षाय वा को भजेत् । न कोऽपि ननु तत्तत्साधनं विना भोगमोक्षफलं कथं स्यात्तत्राह किं वेति । तव पादरजोजुषां पादाब्ज-सेविनां किं वा न भवेत् । अनायासेन सकलं समीहितं[28] सिद्ध्यतीत्यर्थः । तदुक्तम् या वै साधनसम्पत्तिः पुरुषार्थचतुष्टये । तया विना तदाप्नोति । नरो नारायणाश्रयः इति । कायमनोवचोभिः परिचर्यमाणो भगवानभिमतं श्रेयोदिशतीति कथयन् प्रकरणार्थम् उपसंहरति । चतुर्थेऽष्टमेऽध्याये ध्रुवं प्रति नारदवाक्येन द्वाभ्याम् ।

एवं कायेन मनसा वचसा च मनोगतम् ।[29]
परिचर्यमाणो भगवान् भक्तिमत्परिचर्यया ॥१२॥[30]

एवमुक्तया । मनोगतं यथा भवति । तथा[31] कायादिभिः भक्तिमत्या परिचर्यया परिचर्यमाणो धर्मार्थकाममोक्षेषु च यदभिमतं श्रेयोदिशतीति द्वयोरन्वयः ।

---

24. ओ-1, ओ-2, ओ-3 - भवेत् ।
25. ओ-1, ओ-2, ओ-3 - श्रेष्ठम्
26. ओ-1, ओ-2, ओ-3 - तया
27. ना- भूम्यौ
28. ओ-1, ओ-2, ओ-3 - समाहितम् ।
29. ओ-1, ओ-2, - कीट दष्टम् ।
30. तु.भा. 4.8.59
31. ओ-1, ओ-2, ओ-3 - कीटदंष्टम्

पुंसाममायिनां सम्यग्भजतां भाववर्धनः ।
श्रेयो दिशत्यभिमतं यद्धर्मादिषु देहिनाम् ॥१३॥[32]

अमायिनां निष्कपटानाम् । स्वपद्येन पादसेवनमाशंसति ।

पशुप प्रमदापयोधरार्पित पत्रावलि कुङ्कुमाङ्किते ।
पुरुषोत्तमपादपङ्कजे[33] परिचर्यास्तु मम प्रथीयसी ॥१४॥

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
स्तुताङ्घ्रिसेवना पूर्त्तिमगमन्नवमी कला ॥

[34]इति नवमी कला ।

***

32. तु.भा. 4.8.60
33. ओ-1, ओ-2, ओ-3 - पङ्कजः
34. ना - इति नवमी कला अधिकः पाठः । सोऽत्र प्रदत्तः ।

[1]दशमी कला

दशाम्यामथ शर्वाद्यै[2]रप्यनुष्ठितमादरात् ।
निरूप्यतेऽर्चनं विष्णोः पुरुषार्थैकसाधनम् ॥१॥

तल्लक्षणमाह- भूतशुद्धि विधि[3]मातृकाक्षरन्यासपूर्वमुपचारसंहतैः[4] ।
दैवते[5] स्वमनुनोपपादनं[6] प्राहुरर्च्चनममन्दबुद्धयः ॥२॥

भगवदर्च्चनादेव सर्वेषां तृप्तिरित्याह । सप्तमे चतुर्द्दशेऽध्याये युधिष्ठिरं प्रति नारदवाक्येन-

जीवराशिभिराकीर्ण आण्डकोषां[7] घ्रिपो महान् ।
तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणम् ॥३॥[8]

जीवराशिभिराकीर्णो ब्रह्माण्डकोष[9] एवांङ्घ्रिपः । सर्वजीवानामात्मनश्च तर्पणम् । सर्वेषां श्रेयसां साधनमेतदेवेत्याह । दशमे एकाशीतितमेऽध्याये श्रीभगवानुवाच—

स्वर्गापवर्गयोः पुंसां रसायां भुवि सम्पदाम् ।
सर्वासामपि सिद्धीनां[10] मूलं तच्चरणार्च्चनम् ॥४॥[11]

सिद्धीना[12]मणिमाद्यष्टादशानाम् । तस्य हरेश्चरणार्च्चनम् । भगवदाराधनं श्रेष्ठं क्रियाफलमित्याह । तृतीये नवमेऽध्याये भगवन्तं प्रति ब्रह्मवाक्येन—

पुंसामतो विविधकर्माभिरध्वराद्यै-
र्दानेन चोग्रतपसा व्रतचर्यया च ।

---

1. ना - इतः प्राक् 'श्री अथ' अधिकम् ।
2. ओ-1, ओ-2, ओ-3 - सर्वादौ
3. ओ-1, ओ-2, ओ-3 - निधि
4. ओ-1, ओ-2, ओ-3 - संहतेः
5. ओ-1, ओ-2, ओ-3 - दैवत
6. ओ-1, ओ-2, ओ-3 - पादकं
7. ओ-1, ओ-2, ओ-3, ना- अण्डकोशां
8. तु.भा. 7.14.36
9. ना - कोश
10. ओ-1, ओ-2, ओ-3 - सिद्धिनां
11. तु.भा. 10.81.19
12. ओ-1, ओ-2, ओ-3 - सिद्धिना

आराधनं भगवतस्तव सत्क्रियार्थो ।
धर्मोऽर्पितः कर्हिचिद्ध्रियते न यत्र ॥५॥[13]

भगवतस्तवाराधनमेव[14] संश्चासौक्रियार्थश्चेति श्रेष्ठं क्रियाफलं श्रेष्ठत्वे हेतुः । यत्र त्वयि अर्पितोधर्मो न कदाचित् ध्रियते न विनश्यति । विष्णुं समाराध्य यो विषय-सुखमभिवाञ्छति स कुबुद्धिमानित्याह । दशमेऽष्टचत्वारिंशेऽध्याये परीक्षितं प्रति शुकवाक्येन— दुराराध्यं समाराध्य विष्णुसर्वेश्वरेश्वरम् ।
यो वृणीते मनोग्राह्यमसत्त्वात्कुमनीष्यसौ ॥६॥[15]

मनोग्राह्यं विषयसुखम् असत्वात् तुच्छत्वात्[16] तं समाराध्य ये मोक्षमपि नेच्छन्ति ते स्वकार्यसाधका इत्याह । षष्ठेऽष्टादशेऽध्याये दितिं प्रति इन्द्रवाक्येन—

आराधनं भगवत ईहमाना[17] निराशिषः ।
ये तु नेच्छन्त्यपि परं ते स्वार्थकुशलाः स्मृताः ॥७॥[18]

अपि परं मोक्षमपि । भगवदर्च्चने श्रद्धैव प्रधानं नोपचारबाहुल्यमित्याह । दशमे एकाशीतितमेऽध्याये श्रीदामानं प्रति भगवद्वाक्येन—

अण्वप्युदाहृतं[19] भक्तैः प्रेम्णा भूर्येव मे भवेत् ।
भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥८॥[20]

अण्वपि अल्पमपि । भक्तैरुपहृतम् । पूजाधिष्ठानान्याह । एकादशे एकादशेऽध्याये भगवद्वाक्येन—

सूर्योऽग्निर्ब्राह्मणो[21] गावो वैष्णवः खं मरुज्जलम् ।
भूरात्मा सर्वभूतानि भद्र पूजापदानि मे ॥९॥[22]

---

13. तु.भा. 3.9.13
14. ओ-1, ओ-3 - भगवतस्त.... ना...वा... राघनमेव, ओ-2 - पूर्णतः न दृश्यते ।
15. तु.भा. 10.48.11
16. ओ-1, ओ-2, ओ-3 - तुच्छत्वात् नास्ति ।
17. ओ-1, ओ-2, ओ-3 - इहमाना
18. तु.भा. 6.18.74
19. ओ-1, ओ-2, ओ-3 - अश्वप्युपायनां । ना- अष्व । टीकाधारेण भागवताधारेण च अत्र अण्वप्युयाहृतं पाठो धृतः ।
20. तु.भा. 10.81.3
21. ना, ओ-1, ओ-2, ओ-3 - ब्राह्मणा
22. तु.भा. 11.11.42

हे भद्र ! मे मम सूर्यादय[23] एकादशपूजापदानि प्रतिमाभेदमाह । एकादशे सप्तविंशेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

शैली दारुमयी लौही लेप्या लेख्या च सैकती ।
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥१०॥[24]

शैली शिलामयी लौही सुवर्णादिमयी । लेप्यामृच्चन्दनादिमयी हृदि पूजायां मनोमयी इदानीं पूजाविधिमाह । एकादशे सप्तविंशेऽध्याये उद्धवं प्रति भगवद्वाक्येन पञ्चविंशत्या—

शुचिः संभृतसम्भारः प्रागदर्भैः कल्पितासनः ।
आसीनः प्रागुदग् वार्च्चेदर्चया त्वथ[25] सम्मुखः ॥११॥[26]

सम्भृताः सम्भाराः पूजा[27] साधनानि येन सः । प्रागग्रैर्दर्भैः यत् वा प्रागेव सम्भृतः सम्भारः सन्नासीनः । नत्वासीनः पश्चात्सम्भारार्थं वारं वारमुत्तिष्ठेदित्यर्थः । प्राङ्मुख उदङ्मुखो वा आसीनः । अर्चायां तु स्थिरायां सम्मुखम् अर्चाभिमुखः उपविष्टस्सन् । अर्थानन्तरम् । गुर्वादिनमस्कारपूर्वकं यथोपदेशम्—

कृतन्यासः कृतन्यासां[28] मदर्चां[29] पाणिना[30] मृजेत् ।
कलशं प्रोक्षणीयं च यथावदुपसाधयेत् ॥१२॥[31]

स्वस्मिन् कृतन्यासः । कृतो मूलमन्त्रस्य न्यासो यस्यां तां मदर्चाम् आमृजेत् । निर्माल्यापकर्षादिना शोधयेत् कलशं पूर्णकुम्भम् । प्रोक्षणीयं प्रोक्षणार्थोदकपात्रम् उपसाधयेत् चन्दनपुष्पादिभिः संस्कुर्यात् ।

तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च ।
प्रोक्ष्य पात्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च साधयेत् ॥१३॥[32]

---

23. ना - स्वर्गादय
24. तु.भा. 11.27.12
25. भा - मथ संमुखः
26. तु.भा. 11.27.19
27. ना - पूजा इत्यधिकः पाठः । सोऽत्र प्रदत्तः ।
28. ओ-1, ओ-2, ओ-3 - सं
29. ओ-1, ओ-2, ओ-3 - र्चं
30. ओ-1, ओ-2, ओ-3 - प्राणिना
31. तु.भा. 11.27.20
32. तु.भा. 11.27.21

तदद्भिः प्रोक्षणीयाद्भिः । देवयजनं[33] देवपूजास्थानं पाद्यार्घ्यं त्रीणि पात्राणि कलशोदकैः पूरितानि तैस्तैर्द्रव्यैः साधयेत् । तत्र पाद्यादिद्रव्याणि ।

पाद्येऽशोकार्कदूर्वाब्जविष्णुक्रान्तादिरिष्यते[34] ।
गन्धपुष्पाक्षतयव-कुशाग्रतिल-सर्षपाः ॥
दूर्वाचेतिक्रमादर्घ्य-द्रव्याष्टकमुदीरितम् ।
जाती[35] लवङ्ग तक्कोलैर्मत मानमनीयतमिति ॥
पादार्घ्याचमनीयार्थं त्रीणि पात्राणि देशिकः ।
हृदा शीर्ष्णाथ शिखया गायत्र्या चाभिमन्त्रयेत् ॥१४॥[36]

तानि त्रीणि पात्राणि यथाक्रमं हृदयादिमन्त्रैर्गायत्र्या च सर्वाण्यभिमन्त्रयेत् ।

पिण्डे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम ।
अंश्यां[37] जीवकलां ध्यायेन्नादान्ते सिद्धिभाविताम् ॥१५॥

तदनन्तरं पिण्डे देहे वा स्वग्नि संशुद्ध इति च काष्ठगतेन वायुना शेषिते आधारपातेनाग्निना[38] दग्धे पुनः ललाटस्थ[39] चन्द्रमण्डलामृतप्लावनेनामृतमये जाते तस्मिन् हृत्पद्मस्थां परां श्रेष्ठां जीवकलां श्रीनारायणमूर्त्तिं ध्यायेत् । कथम्भूतां नादान्ते सिद्धिभाविताम् । प्रणवस्याकरोकारमकार विन्दुनादाः पञ्चाशाः । तत्र नादान्ते सिद्धैर्ध्यातां तथा च श्रुतिः यो वेदादौ स्वरः प्रोक्तवेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः[40] स महेश्वर इति ।

तयाऽऽत्मभूतया पिण्डे व्याप्ते संपूज्य तन्मयः ।
आवाह्यार्चादिषु स्थाप्य[41]न्यस्ताङ्गं मां प्रपूजयेत् ॥१६॥

---

33. ओ-2, - नष्टः
34. ओ-1, ओ-2, ओ-3 - रीक्ष्यते
35. ना - जाति
36. तु.भा. 11.27.22
37. ओ-1, ओ-2, ओ-3 - अस्यां । ना- अश्वां । भा. 11.27.23 - अण्वीं टीकाधारेण अंशे भवाः अंश्याः इति पाठो ग्रहीतुं शक्यते ।
38. ना - आधार पतेनाग्निना ।
39. ओ-1, ओ-2, ओ-3 - लीटस्थ । ना- ललाटस्थ ।
40. ओ-1, ओ-2, ओ-3 - परं
41. ओ-1, ओ-2, ओ-3, ना- स्थाणु, अत्र (भा. 11.27.24) तथा टीकाधारेण पाठो गृहीतः । व्याकरणाशुद्धौ अपि छन्दोऽनुरोधात् ।

तयात्मभूतया स्वेनैव भावेन चिन्तितया अमृतमये पिण्डे दीपस्य प्रभया गृह इव व्याप्ते सति तस्मिन्नेवादौ मानसैरुपचारैः सम्पूज्य तन्मयः सन् अर्चादिषु आवाह्य स्थापनमुद्रा स्थापयित्वा—

पाद्योपस्पर्शार्हणादीनुपचारैः[42] प्रकल्पयेत् ।
धर्मादिभिश्च नवभिः कल्पयित्वाऽऽसनं मम ॥१७॥

कथं पूजयेत्तदाह । धर्मादिभिर्ममासनं तत्र पद्मं च कल्पयित्वा उभाभ्यां वेदतन्त्राभ्यां मह्यं पाद्यादीन् प्रकल्पयेदित्यन्वयः उपस्पर्श आचमनम् । अर्हणमर्घ्यम् । उभयसिद्धये वेदतन्त्रोक्तभुक्तिमुक्तिसिद्धये अयमर्थः । धर्मज्ञानवैराग्यैश्वर्याणि आसनपर्यङ्कस्याग्नेयादिचतुष्कोणेषु पादाः । अधर्मादीनि पूर्वादिदिक्षु गात्राणि । त्रयो गुणाः पट्टकाः । तत्र पूर्वादिक्रमेण मध्ये विमलोत्कर्षणी ज्ञानाक्रियायोगाप्रह्वी सत्यईशानानुग्रहाचेति नव शक्तयः एवं यथोपदेशं धर्मादिभिर्नवभिश्च शक्तिभिरासनं कल्पयित्वा इति ।

पद्ममष्टदलं तत्र कर्णिकाकेशरो[43]ज्ज्वलम् ।
उभाभ्यां वेदतन्त्राभ्यां मह्यं तूभयसिद्धये ॥१८॥

कर्णिकाकेशरैस्तत्रस्थ सूर्यादिमण्डलैश्चोज्ज्वलमित्यर्थः । आयुधादिपूजामाह त्रिभिः ।

सुदर्शनं पाञ्चजन्यं गदासीषुधर्नुहलान् ।
मुसलं[44] कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् ॥१९॥

तत्र न्यस्ताङ्गमित्यावरणपूजा सूचिता । आसने नैव शक्त्या आवरणमप्युक्तम् । तत्र सुदर्शनादिमुसलान्तानि आयुधान्यष्टदिक्षु कौस्तुभमालाश्रीवत्सानुरसि ।

नन्दं सुनन्दं गरुडं प्रचण्डं चण्डमेव च ।
महाबलं बलं चैव कुमुदं कुमुदेक्षणम् ॥२०॥[45]
दुर्गां विनायकं व्यासं विष्वक्सेनं[46] गुरून् सुरान् ।
स्वे स्वे स्थाने त्वभिमुखान् पूजयेत् प्रोक्षणादिभिः ॥२१॥[47]

---

42. भा. 11.27.25 - नुपचारान्
43. तु.भा. 11.27.26 - केसरो
44. ओ-1, ओ-2, ओ-3 - मुषलं, तु.भा. (11.27.27) मुसलं तथा टीकाधारेण पाठः गृहीतः ।
45. तु.भा. 11.27.28
46. ओ-1, ओ-2, ओ-3 - विश्वक्सेनं
47. तु.भा. 11.27.29

तैरेव प्राणादिभिरीश्वरोद्देशेन यत् क्रियते तत्तु सत् । महाफलं भवति । कुतः अपृथक्त्वात् । ईश्वरस्य सर्वानुगतत्वात् तत्र दृष्टान्तः । यत्तरोर्मूलनिषेचनं तद्यथा सर्वस्य स्कन्धशाखादेरपि भवति । यद्वा ल्यब्लोपेपञ्चम्यां पृथक्त्वं पर्यालोच्य भेददृष्ट्या देहाद्युद्देशेन तैरेव तेष्वेव यत् क्रियते तदसत् । अपृथक्त्वं पर्यालोच्य ईश्वरदृष्ट्या तैरेव तेष्वेव यत् क्रियते तत्सम्भवतीति शेषं समानम् । दास्यं प्रार्थयन् प्रकरणार्थमुपसंहरति सप्तमे नवमेऽध्याये भगवन्तं प्रति प्रह्लादवाक्येन—

यस्मात्[11] प्रियाप्रियवियोगसयोगजन्म[12]
शोकाग्निना सकलयोनिषु दह्यमानः ।
दुःखौषधं तदपि दुःखमतद्धियाहं
भूमन् भ्रमामि वद मे तव दास्ययोगम् ॥८॥

यस्मात् प्रियैरप्रियैश्च यथासंख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयोनिषु दह्यमानोऽस्मि दुःखस्य प्रतीकारः कार्य इति चेत्तत्राह । दुःखस्यौषधं प्रतीकारः तदपि दुःखमेव एवमप्यतद्धिया देहाभिमाने न मुह्यामि । अतो हे भूमन् विभो तव दास्यरूपं योगं निस्तारोपायं वद । दास्येनैव सर्वदुःखनिवृत्तिर्नान्यथेतिभावः । स्वकृतपद्येन भगवति दास्यं प्रार्थयते ।

यदनुस्मृतिशालिनां नृणां द्रुहिणत्वाद्यपि विघ्न उच्यचे ।
प्रददातु दयानिधिर्दृढां निजपादाम्बुजदासतां स मे ॥९॥

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
दास्यानुवर्णिनी नाम सम्पूर्णा द्वादशी कला ॥
इति द्वादशी कला ।[13]

***

---

11. ओ-1, ओ-2, ओ-3 - तस्मात् । अत्र ना, भागवतस्य तथा टीकायाः आधारेण पाठो गृहीतः ।
12. तु.भा. (7.9.17), ओ-2, - जन्म, ओ-1, ओ-3, ना- दुःख ।
13. ना- इति द्वादशी कला अधिकः पाठः दृश्यते । सोऽत्र प्रदत्तः ।

[1]त्रयोदशी कला

अथ सख्यं त्रयोदश्यां वर्ण्यते जगदीश्वरे ।
विश्वासो मित्रता चेति द्विधा तदपि कीर्त्तितम् ॥१॥

तत्[2] लक्षणमाह विश्वासेत्यादिं । भगवति कृतसख्यं रिपवो[3] न बाधन्त इत्याह दशमे-ऽष्टमेऽध्याये गर्गं प्रति नन्दवाक्येन—

य एतस्मिन्महाभागाः[4] प्रीतिं कुर्वन्ति मानवाः ।
नारयोऽभिभवन्त्येतान्विष्णुपक्षानिवासुराः ॥२॥

प्रीतिमयमेव सखा बन्धुरिति विश्वासपूर्विकाम् । भगवतः प्रियत्वे हेतुमाह दशमे त्रयोविंशेऽध्याये यज्ञपत्नीः प्रति भगवद्वाक्येन—

प्राणबुद्धिमनःस्वात्म[5] दारापत्यधनादयः ।
यत्संपर्कात्प्रिया आसंस्ततः को[6] नु परः प्रियः ॥३॥

स्वा ज्ञातयः आत्मा देह एते सर्वे यत्संपर्कात् यस्याध्यासेनोपकारकत्वेन वा भगवतोऽपि मित्रवात्सल्यं निरूपयति । दशमे अशीतितमेऽध्याये परीक्षितं प्रति शुकवाक्येन—

सख्युः प्रियस्य विप्रर्षेरङ्गसङ्गाभि[7]निर्वृतः ।
प्रीतो व्यमुञ्चद[8]ब्बिन्दून् नेत्राभ्यां पुष्करेक्षणः[9] ॥४॥

अब्बिन्दूनानन्दाश्रूणि[10] भगवद्गात्राणामपरिमेयतां कथयन्नुपसंहरति दशमे

---

1. ना- ग्रन्थेषु इतः प्राक् 'श्रीमते कृष्णाय नमः' । 'अथ' इति अधिकपाठः दृश्यते ।
2. ना- तत् इति नास्ति ।
3. ओ-2, - रिपवो...... नन्दवाक्येन इति पर्यन्तं कीट दष्टम् ।
4. ना- भागे, ओ-1, ओ-2, ओ-3 , भा. (10.8.18) - भागाः ।
5. ओ-1, ओ-2, ओ-3 - स्यात्म, भा. (10.23.27) तथा टीका- स्वात्म । ना- स्स्वात्म ।
6. भा. (10.23.27) - कोन्वपर 7. तु.भा. 10.80.19- सङ्गाति
8. ओ-1, ओ-2, ओ-3 - विमुञ्चद
9. ओ-1, ओ-2, ओ-3 - पुष्यारेक्षणः
10. ओ-1, ओ-2, ओ-3 - अर्धेन्दुना नेत्राश्रूणि

द्वाविंशेऽध्याये[11] परीक्षितं प्रति शुकवाक्येन—

इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन ।
मायाश्रितानां नरदारकेण[12] सार्धं[13] विजह्रुः कृतपुण्यपुञ्जाः ।।५ ।।

सतां विदुषां ब्रह्म च सुखं चानुभूतिश्च तया स्वप्रकाशपरमसुखेनेत्यर्थः । भक्तानां परमदैवतेन आत्मप्रदेनान्येन मायाश्रितानां नरदारकतया प्रलीयमानेन[14] सह विजह्रुः कृतानां पुण्यानां पुञ्जा राशयो येषां ब्रह्मविदां तदनुभवः भक्तानामतिगौरवेण भजनम् । एते तेन सह सख्येन विजह्रुरहोभाग्यमिति भावः । स्वपद्येन भगवति प्रार्थयति ।

सुबलादिवदासनाशनभ्रमणादिष्ववियुक्तताधिया ।
अनपायि सखित्वमस्तु मे सह नित्यं वसुदेवसूनुना ।।६ ।।

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
सख्यानुवर्णिनीनाम कला पूर्णा त्रयोदशी ।।
इति[15] त्रयोदशी कला ।

***

---

11. ओ-1, ओ-2, ओ-3, ना- ग्रन्थे दशमे द्वाविंशेऽध्याये इति पाठोऽस्ति। परन्तु तु.भा. दशमे द्वादशेऽध्याये श्लोकः लभ्यते ।
12. ओ-1, ओ-2, ओ-3 - न परदारकेण इति पाठः, परन्तु भा. (10.12.11) तथा टीकायां नरदारकतया इति हेतोः नरदारकेण इति पाठः साधीयान् ।
13. भा. 10.12.11 - साकं
14. ओ-1, ओ-2, ओ-3 - प्रतीयमानेन । ना- प्रलीयमानेन इति पाठः । नागरी आधारेण प्रलीयमानेन इति पाठः गृहीतः !
15. ना- ग्रन्थे 'इति त्रयोदशीकला' 'श्री' अधिकपाठोऽस्ति ।

[1]चतुर्दशी कला

निरूप्यते चतुर्दश्यां कलायां वल्लवीपतेः ।
साधनेभ्यः समस्तेभ्यो वरमात्मनिवेदनम् ॥१॥

वरत्वे हेतुः उक्तं च—

वित्तात्कलत्रमधिकं[2] ततो देहः परस्स्मृतः ।
देहादपि परोह्यात्मा नात्मनः सदृशः क्वचित् ॥इति ।

लक्षणमाह— बुधैरत्रात्मशब्देन देहो देही च गृह्यते ।
तयोरेकस्य गोविन्देऽर्पणमात्मनिवेदनम् ॥२॥
विक्रीतस्य गवाश्वादेर्भरणादाविवेश्वरे ।
अर्पितस्यात्मनः[3] कृत्ये निश्चिन्तः स्यादिति स्थितिः ॥३॥

भगवति निवेदितदेहस्य स्वाराज्यमपि न पुरुषार्थ इत्याह । द्वितीये सप्तमेऽध्याये नारदं प्रति ब्रह्मवाक्येन—

नार्थो बलेरयमुरुक्रमपादशौचमापः शिखा धृतव्रतो विबुधाधिपत्यम् ।
यो वै प्रतिश्रुतमृते न चिकीर्षु[4]रन्यदात्मानमङ्ग मनसा[5] हरयेऽभिमेने ॥४॥

यद् विबुधाधिपत्यमिदानीं बलात्प्राप्तमग्रे दीयमानं वा अयं बलेः पुरुषार्थो न भवति। कुत इत्यत्राह आ आप इति च्छेदः । उरुक्रमस्य पादशौचं चरणक्षालनरूपा आपः आसर्वतो धृतवतः । क्व शिखायां मूर्ध्नीत्यर्थः किञ्च शुक्रेण वारितः शप्तोऽपि अङ्ग हे नारद प्रतिश्रुतं विना अन्यत्र चिकीर्षुः स्वीकर्त्तुं नेच्छते । यस्तृतीयपाद पूरणार्थं हरये आत्मानं देहमभिमेने अयमेव समर्पणीय इत्यङ्गीकृतवान् । भगवत्यर्पितदेहः सर्वत्र श्रेष्ठ इत्याह तृतीये ऊनविंशेऽध्याये देवहूतिं प्रति कपिलवाक्येन त्रिभिः ।

ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः[6] ।
अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान् स्वधर्मकृत्[7] ॥५॥

---

1. ना- इतः प्राक् 'श्री अथ' इति अधिक पाठः ।
2. ओ-2, - वित्तात्...... क्वचित् पर्यन्तं नष्टम् ।
3. ओ-2, - अर्पितस्यात्मनः ...... स्थिति पर्यन्तं नष्टम् ।
4. भा. 2.7.18 - चिकीर्षद
5. भा. 2.7.18 - शिरसा
6. तु.भा. 3.23.31b
7. तु.भा. 3.29.32a - भा- स्वकर्मकृत् इति पाठोऽस्ति । परन्तु श्लोकस्य तथा टीकायाः आधारेण स्वधर्मकृत् पाठः गृहीतः ।

चतुर्षु वर्णेषु ब्राह्मणाः श्रेष्ठा इति प्रागुक्तम् । ब्राह्मणेष्वपि वेदज्ञो ह्यधिकः । ततो वेदज्ञात् संशयच्छेत्ता मीमांसकः स्वधर्मकृत् । मुक्तसङ्गस्य लक्षणम् ।

मुक्तसङ्गस्ततो भूयान् द्रोग्धा[8] धर्ममात्मनः ।
तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः ॥६॥[9]

धर्ममद्रोग्धा निष्काम इत्यर्थः अर्पिताः अशेषाः क्रिया अर्था स्तत्फलानि आत्मा देहश्च येन अत एव निरन्तरः अव्यवहितः ।

मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः[10] ।
न पश्यामि परं भूतमकर्त्तुः समदर्शनात्[11] ॥७॥

अकर्त्तुः मर्त्तृत्वाभिमानशून्यात् । आत्मनिवेदिनां किञ्चित्प्रत्युपकर्त्तुमक्षमो भगवानृणीवास्त इत्याह ननु दशमे चतुर्दशेऽध्याये भगवन्तं प्रति ब्रह्मवाक्येन—

एषां घोषनिवासिनामुत भवान् किं देवरातेति न-
श्चेतो विश्वफलात् फलं त्वदपरं कुत्राप्ययन् मुह्यति ।
सद्वेषादिव[12] पूतनापि सकुला त्वामेव[13] देव पिता
यद्धामार्थ[14] सुहृत्प्रियात्मतनय प्राणाशयास्त्वत्कृते ॥८॥[15]

उत अपि भवानपि एषां कुत्रापि किं विश्वफलात् सर्वफलात्मकात्त्वत्तः[16] परं किं[17] फलराता दास्यतीति न श्चेतः अयत् सर्वत्र गच्छत् विचारयन्मुह्यति मामेव दत्त्वा अनृणी स्यामिति चेन्नहि नहि सद्वेषादिव[18] सतां भक्तानां यो वेषस्तदनुकारमात्रेण पापिष्ठा पूतनापि त्वामेवापिता प्रापिता । तर्हि तत्संबन्धिनामपि दास्यमिति चेत्तत्राह

---

8. तु.भा. 3.29.32b - भूयानदोग्धा इति पाठोऽस्ति ।
9. तु.भा. 3.29.33a
10. तु.भा. 3.29.33b
11. तु.भा. 3.29.33c
12. ओ-1, ओ-2, ओ-3 - सद्वेशादिव
13. ओ-1, ओ-2, ओ-3 - त्वमेव
14. ओ-1, ओ-2, ओ-3 - यद्धामार्थ
15. तु.भा. 10.14.35
16. ओ-1, ओ-2, ओ-3 - विश्वफलात्मकात्वत्तः
17. ना- किं पदं नास्ति
18. ओ-1, ओ-2, ओ-3 - सद्वेशादिव

सकुलेति बकाघासुर[19] सहिता एषामपि तावदेवेति चेदपर्याप्तं स्यादिति आह । यदिति येषां धर्मादयस्त्वत्कृते त्वदर्थमेव त्वय्यर्पिता इत्यर्थः । अस्याः श्रवणादिभक्तेः प्रेमभक्तिं प्रति साधनतां प्रदर्शयन्प्रकरणार्थमुपसंहरति एकादशे ऊनविंशेऽध्याये उद्धवं प्रति भगवद्वाक्येन—

एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् ।
मयि सञ्जायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते[20] ॥९॥[21]

धर्मैः श्रवणादिभिः साधनैर्विशिष्टानामात्मनिवेदिनां मयि भक्तिः प्रेमलक्षणा सञ्जायते। अस्य भक्तस्यान्यः कोऽर्थः साधनरूपः साध्यरूपो वा अवशिष्यते सर्वोऽपि स्वत एव सम्भवतीत्यर्थः । यद्यपि साधनाज्जायते भावः स सान्द्रः प्रेमतां व्रजेदिति क्रमोऽस्ति तथापि प्रेम्णस्तु प्रथमावस्था[22] भाव इत्यभिधीयते इति तन्त्रोक्तेः भावस्यापि प्रेमान्तरङ्गत्वेन गतार्थत्वात् पृथगुपादानमत्र न कृतम् । अन्यत्र तु कृतमेव तथाहि तृतीये श्रद्धारतिर्भक्तिरनुक्रमिष्यतीति । तत्र प्रथमं श्रद्धा साधने प्रयत्नः ततो रतिर्भाव ततो भक्तिः प्रेमलक्षणेति द्रष्टव्यं स्वकृतपद्येनात्मनिवेदनमाशंसति ।

मम तिष्ठति यद्धनादिकं सकलत्रं सकलं तदात्मना ।
विनिवेदितमस्तु वल्लवीवदनाम्भोजमधुव्रते हरौ ॥१०॥

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
कला चतुर्दशी पूर्णा निर्णीतात्मनिवेदना ॥

इति चतुर्दशी कला ।[23]

***

19. ओ-1, ओ-2, ओ-3 - वकार्धासुर
20. ना- कोऽन्योन्यस्यावशिष्यते ।
21. तु.भा. 11.19.24
22. ना- पञ्चमावस्था
23. ना- 'इति चतुर्दशी कला श्री' अधिकपाठः दृश्यते ।

[1]पञ्चदशी कला

कलायां पञ्चदश्यान्तु क्रमात्साधनभक्तितः[2] ।
व्यक्ति[3]मापन्नयोर्भावप्रेम्णोः स्थितिरुदीर्यते ॥१॥

पूर्वकलान्ते साधनं भावः प्रेमेति भक्तेरवस्थात्रयं सूचितं तदेव नारदानुभवेन विशिष्य दर्शयति । प्रथमे पञ्चमेऽध्याये[4] वेदव्यासं प्रति नारदवाक्येन त्रिभिः—

तस्मिन्निर्मनुजे[5]ऽरण्ये पिप्पलोपस्थ आश्रितः[6] ।
आत्मनाऽऽत्मानमात्मस्थं[7] यथा श्रुतमचिन्तयम् ॥२ ॥

पिप्पलोपस्थे अश्वत्थमूले आश्रित उपविष्टः आत्मना बुद्ध्या[8] आत्मस्थमात्मानं परमात्मरूपिणं भगवन्तं यथाश्रुतमचिन्तयम् । एतेन साधनभक्तिर्दर्शिता भावमाह—

ध्यायतश्चरणाम्भोजं भावनिर्जित चेतसा ।
औत्कण्ठ्याश्रुकला यस्य[9] हृद्यासीन्मे शनैर्हरिः ॥३ ॥

चरणाम्भोजं ध्यायतः शुद्धसत्वविशेषात्माप्रेमतुर्याशसाम्यभाक् । रुचिभिश्चित्त-मासृण्यकृदसौ भाव उच्यते । तेन निर्जितं वशीकृतं यच्चेतस्तेन यदौत्कण्ठ्यं तेनाश्रुकलायुक्ते अक्षिणी यस्य अक्ष्णोरश्रुकलायुक्तमुक्तम् । न तु वक्षसोऽश्रुधारा-प्लावितत्वम् एतावतोऽश्रुणो मान्द्यमुक्तम् । उक्तं च तन्त्रे—

प्रेम्णस्तु प्रथमावस्था भाव इत्यभिधीयते ।
सात्त्विकाः स्वल्पमात्राः स्युरत्राश्रुपुलकादयः ॥इति ।

---

1. ना- इतः प्राक् 'श्री अथ' इति अधिकम् ।
2. ओ-1, ओ-2, ओ-3 - भक्तिः
3. ओ-2, - भक्ति
4. ओ-1, ओ-2, ओ-3, ना- ग्रन्थेषु पञ्चमेऽध्याये लिखितमस्ति । परन्तु तु भागवते षष्ठेऽध्याये श्लोकः विद्यते ।
5. ना- तस्मिन्निमनुजे
6. तु.भा. 1.6.16 - आस्थितः अस्ति ।
7. ना- नात्मान
8. ओ-2, - बुद्ध्या इति नष्टः
9. भा. 1.6.17 - कलाक्षस्य टीकायां च परन्तु ओ-1, ओ-2, ओ-3 , ना ग्रन्थे कला यस्य पाठो दृश्यते । स समीचीनः ।

प्रेमोत्पत्तिमाह- प्रेमातिभरनिर्भिन्न[10] पुलकाङ्गोऽतिनिर्वृतः ।

आनन्दसंप्लवे लीनो नापश्यमुभयं मुने ॥४॥

प्रेमा- सम्यङ्मसृणितस्यान्तो ममत्वातिशयाङ्कितः ।

भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्यते ॥

तस्यातिनिर्भरेण पुलकान्यङ्गानि यस्य आनन्दानां संप्लवे महापूरे परमानन्दे उभयमात्मानं परं च अङ्गानां निर्भिन्नपुलकत्वेन पुलकस्याधिक्यम् । आनन्दाधिक्या-दानन्दाश्रुणि आधिक्यं चास्मिन्नुक्तम् । एतत् कपिलवचनेन स्पष्टयति तृतीयेऽष्टा-विंशेऽध्याये देवहूतिं प्रति—

एवं हरौ भगवति प्रतिलब्धभावो

भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् ।

औत्कण्ठ्यवाष्पकलया मुहुरर्द्यमान-

स्तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते[11] ॥५॥[12]

एवं ध्यानमार्गेण साधनभूतेन हरौ प्रतिलब्धभावो[13] येन सः । ततः भक्त्या प्रेमलक्षणया द्रवत् हृदयं यस्य सः एतेन साधन-भाव-प्रेम्णां क्रमो दर्शितः । भावापेक्षया प्रेम्णि पुलकाश्रुणोराधिक्यं दर्शयति । प्रमोदादुद्गतानि पुलकानि यस्य सः औत्कण्ठ्यप्रवृत्ताश्रुकलया मुहुरर्द्यमानः आनन्दसंप्लवे मज्जमानः दुर्ग्रहस्य भगवतो रूपग्रहणे बडिशं मत्स्यभेदनमिवोपायभूतं चित्तमपि ध्येयाद्वियुङ्क्ते तद् ध्यानतः शिथिलप्रयत्नो भवतीत्यर्थः प्रेमोत्पत्तौ साधने मन्दप्रयत्नो भवतीति भावः । भगवति जातस्य भावस्य लिङ्गान्याह त्रिभिः सप्तमे सप्तमेऽध्याये असुरबालकान् प्रति प्रह्लादवाक्येन—

निशम्यकर्मणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि ।

यदातिहर्षोत्पुलकाश्रुद्गदं प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥६॥[14]

गुणान् भक्तवात्सल्यादीन् अतिहर्षेण ये पुलका अश्रूणि च तैर्गद्गदं यथा भवत्येवं प्रोत्कण्ठ उद्गायति ।

---

10. ओ-1, ओ-2, ओ-3 - निभिन्न, तु.भा. 1.6.18 - निर्भिन्न, ना- निर्भिण्ण, भागवतस्य टीकायाः आधारेण पाठो गृहीतः ।

11. ओ-1, ओ-2, ओ-3 - र्वियुक्त । ना- टीका भागवताधारेण च पाठः ग्रहणीयः ।

12. तु.भा. 3.28.34

13. ओ-2, - हरौ प्रतिलब्धोभावो इति नष्टम् ।

14. तु.भा. 7.7.34

यदा ग्रहग्रस्त इव क्वचिद् सत्याक्रन्दति[15]ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे जगत्पते नारायणेत्यात्मगतिर्गतत्रपः ॥७॥
तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशया कृतिः ।
निर्दग्धबीजानुशयो महीयसा[16] भक्तिप्रयोगेण समेत्यधोक्षजम् ॥८॥[17]

तस्य भावः चेष्टा तस्य भावो भावना तेनानुकृते आशयाकृतिर्मनःशरीरे यस्य निर्दग्ध-बीजमज्ञानमनुशयो वासना च यस्य सः महीयसा भक्तिप्रयोगेण सम्यगेति प्राप्नोति। भगवति नैसर्गिकस्य भावस्य लिङ्गान्याह प्रह्लादानुभवेन पञ्चभिः सप्तमे चतुर्थेऽध्याये युधिष्ठिरं प्रति नारदवाक्येन—

न्यस्तक्रीडनको बालो जडवत् तन्मनस्तया ।
कृष्णग्रहगृहीतात्मा[18] न वेद जगदीदृशम् ॥९॥[19]

तन्मनस्तया तदेकचित्तत्वेन—

आसीनः पर्यटन्नश्नन्[20] शयानः प्रपिबन् ब्रुवन् ।
नानुसन्धत्त एतानि गोविन्दपरिरम्भितः ॥१०॥[21]

एतानि आसीनादीनि । गोविन्देन परिरम्भितः संश्लिष्टः ।

क्वचिद्रुदति वैकुण्ठचिन्ताशबलचेतनः ।
क्वचिद्धसति तच्चिन्ताह्लाद उद्गायति क्वचित्॥११॥[22]

रुदति रोदिति वैकुण्ठस्य चिन्ताया शबलादिमिश्रा विक्षिप्ता चेतना यस्य तस्य चिन्ताया ह्लादो यस्य ।

नन्दति क्वचिदुत्कण्ठो विलज्जो नृत्यति क्वचित् ।
क्वचित् तद्भावनायुक्तस्तन्मयोऽनुचकार ह ॥१२॥[23]

उत्कण्ठ उत्सुककण्ठ स्सन्[24] अनुचकार चेष्टादिकं स्वयं कृतवान् ।

---

15. भा. 7.7.35 - हसत्याक्रन्दते ।
16. ओ-1, ओ-2, ओ-3 - महीयसी
17. तु.भा. 7.7.36
18. ओ-1, ओ-2, ओ-3, ना- ग्रहीतात्मा
19. तु.भा. 7.4.37
20. ना- ञ्
21. तु.भा. 7.4.38
22. तु.भा. 7.4.39
23. तु.भा. 7.4.40
24. ओ-1, ओ-2, ओ-3 - सन्

क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः ।
अस्पन्दप्रणयानन्दसलिलामीलितेक्षणः ॥१३॥[25]

संस्पर्शः तद्भावापत्तिः तेन निर्वृतः । अस्पन्दः स्थिरो यः प्रणयः प्रेमा तेन य आनन्दस्तेन यत्सलिलं तेन आलिङ्गन्मीलिते ईक्षणे यस्य । प्रेमपरवशानां[26] श्रीगोपीकानां भावं प्रपञ्चयति त्रिभिः एकादशे द्वादशेऽध्याये उद्धवं प्रति नारदवाक्येन—

रामेण सार्धं मथुरां प्रणीते स्वाफल्किना[27]मय्यनुरक्तचित्ताः ।
विगाढभावेन न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाय ॥१४॥

स्वाफल्किना अक्रूरेण मयि प्रणीते सति मे मत्तोन्यं सुखाय ददृशुः कुतः वियोगेन तीव्रो दुस्सह[28] आधिर्यासां ताः अत्र हेतुः मयि विगाढे नातिदृढे न भावेन प्रेम्णानुरक्तानि संसक्तानि चित्तानि यासां ताः तीव्राधित्वं व्यनक्ति—

तास्ताः[29] क्षपाः प्रेष्ठतमेन नीता मयैव वृन्दावनगोचरेण ।
क्षणार्धवत्ताः पुनरङ्ग तासां हीना मया कल्पसमा बभूवुः ॥१५॥

मया सह या एवं क्षपा रात्रयः क्षणार्धवन्नीतास्ता एव मया पुनर्हीनाः तासां कल्पसमा बभूवुः कथम्भूताः ताः वाचामगोचरा इत्यर्थः किं च एवं तीव्राधयस्ता मोहमिषेण समाधिं प्राप्ता इत्याह—

अनाविदन्[30] मय्यनुसङ्गबद्धधियः स्वमात्मानमदस्तथेदम् ।
यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे ॥१६॥

मय्यनुसक्तेनासक्त्या बद्धा धियो याभिस्ताः स्वमात्मानं स्वदेहम् अदो दूरस्थमिदं सन्निहितं च नाविदन् यद्वा स्वं पतिपुत्रादि । आत्मानमहङ्कारास्पदमदः परलोकमिदं च नाविदन्निति यथा मुनयः समाधौ नामरूपे विदुः तद्वत् किन्तु अब्धितोयेन नद्य इव तासां क्षणार्धमपि भगवद्विरहासहिष्णुतामाह दशमे एकत्रिंशेऽध्याये भगवन्तं प्रति तासां वाक्येन—

अटति यद् भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखं च ते[31] जड उदीक्षतां पक्ष्मकृद् दृशाम् ॥१७॥[32]

---

25. तु.भा. 7.4.41
26. ना- प्रेमप्रवणानां
27. तु.भा. 11.12.10-श्वाफल्किना । 28.ओ-1, ओ-2, ओ-3 -दुसह
29. भा. 11.12.11 - तास्ताः, ओ-1, ओ-2, ओ-3 , ना- यास्ताः अस्ति । भागवतटीकाधारेण पाठः गृहीतः ।
30. भा. 11.12.12 - ता नाविदनं
31. ना- ते अधिकम्
32. तु.भा. 10.31.15

यद्यदा काननं वृन्दावनमटति गच्छति तदा त्वामपश्यतां प्राणिनां त्रुटिं क्षणार्धमपि युगवद् भवति अनपश्यतां प्राणिनामिति सामान्यत उक्तमपि विशिष्यात्मानमभिलक्ष्योक्तमिति द्रष्टव्यम् एवमदर्शने दुःखमुक्तम् । पुनः कथञ्चिद्दिनान्ते श्रीमन्मुखमुच्चैर्वीक्षमाणानां तेषां दृशां पक्ष्मकृद्ब्रह्मा जडो मन्द एव । निमेषमात्रमप्यन्तरमसह्यमिति दर्शने सुखमुक्तम् । एतदेव स्पष्टयति दशमे त्रिंशेऽध्याये परीक्षितं प्रति शुकवाक्येन—

तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ।
तद्गुणानेव गायन्त्यः[33] नात्मागाराणि सस्मरुः ॥१८॥

तदात्मिकाः[34] स एव आत्मा यासां ताः तन्मया इत्यर्थः । एवं भजतः संप्राप्तप्रेमलक्षणभक्तियोगस्य संसारधर्मातीतां गतिमाह । एकादशे द्वितीयेऽध्याये निमिं प्रति कविवाक्येन द्वाभ्याम् ।

एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गायत्युन्मादयन्नृत्यति लोकबाह्यः ॥१९॥[35]

एवं व्रतं यस्य सः स्वप्रियस्य हरेर्नामकीर्त्त्या जातोऽनुरागः प्रेम यस्य अत एव द्रुतचित्तः सुश्लथहृदयः कदाचिद् भक्त्या पराजितं भगवन्तमाकलय्य उच्चैर्हसति एतावन्तं कालमुपेक्षितोऽस्मीति रोदिति अत्यौत्सुक्याद्रोदिति क्रोशति अतिहर्षेण गायति जितं जितमिति नृत्यति । किं दाम्भिकवत्परान् प्रति प्रकाशयितुं न उन्मादवद्ग्रहं गृहीतवान् लोकबाह्यः विवशः नन्वियमारूढयोगिनामपि बहुजन्मभिर्दुर्लभा गतिः कथं नाम कीर्त्तनमात्रेण एकस्मिन् जन्मन्येव भवेदित्याशंक्य सदृष्टान्तमाह ।

भक्तिः परेणा[36]नुभवो विरक्तिरन्यत्र चैष त्रिक एककालः ।
प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुधासम् ॥२०॥

प्रपद्यमानस्य हरिं भजतः पुंसः भक्तिः प्रेमलक्षणा परेणानुभवः प्रेमास्पदभगवद्रूपस्फूर्त्तिः तया निर्वृतस्य ततोऽन्यत्र गृहादिषु विरक्तिः इत्येष त्रिक एककालः भजनसमकाल एव स्यात् यथा अश्नतो भुञ्जानस्य तुष्टिः सुखं पुष्टिरुदरभरणं क्षुन्निवृत्तिश्च प्रतिधासं स्युः उपलक्षणमेतत् । प्रतिसिक्थमपि यथा स्युस्तद्वत् । एवमेकैकस्मिन् भजने किञ्चित्प्रेमादिके जायमाने अनुवृत्त्या भजतः परमप्रेमादि जायते । बहुग्रासभोजिन इव परमतुष्ट्यादि । एवं वर्तमानस्याविधिकिंकरतामाह एकादशे

33. भा. 10.30.44 - गायन्त्यो
34. ओ-2, - इतः पञ्चदशीकलायां अन्तिमं यावत् नष्टम् ।
35. तु.भा. 11.2.40
36. तु.भा. 11.2.42 - परेशा

सप्तदशेऽध्याये[37] उद्धवं प्रति भगवद्वाक्येन—

ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः ।
सलिङ्गानाश्रमांस्त्यक्ता चरेदविधिगोचरः ॥२१॥[38]

बहिर्विरक्तो मुमुक्षुः सन् यो ज्ञाननिष्ठो वा मोक्षेप्यनपेक्षो मद्भक्तो वा सलिङ्गान् त्रिदण्डादिसहितान् आश्रमानाश्रमधर्मान् तदासक्तिं त्वक्त्वा अविधिगोचरोऽविधि-किङ्करः सन् चरेदित्यर्थः कथं चरेत्तदाह—

बुधोऽपि[39] बालवत् क्रीडेत्कुशलो जडवच्चरेत् ।
वदेदुन्मत्तवद् विद्वान् गोचर्यां नैगमश्चरेत् ॥२२॥

बुधो विवेकवानपि बालवन्मानापमानशून्यः कुशलो निपुणोपि जडवत् फलानुसन्धानाभावेन विद्वान् पण्डितोपि उन्मत्तवत् लोकरञ्जनाभावेन नैगमवेदार्थ निष्ठोपि गोचर्यामनियतचारमिव । अथ भक्त्यधीनं ज्ञानमिति कथयन् प्रकरणार्थमुपसंहरति । प्रथमे द्वितीयेऽध्याये शौनकादीन् प्रति सूतवाक्येन—

एवं प्रसन्नमनसो भगवद्भक्तियोगतः ।
भगवत्तत्त्वविज्ञानं मुक्तसङ्गस्य जायते ॥२३॥[40]

भगवद्भक्तियोगतः प्रसन्नमनसः अत एव मुक्तस्य निवृत्तासक्तेर्जनस्य भगवत्तत्त्वविज्ञानं जायते । भक्तेरन्यनिरपेक्षत्वादन्यस्य भक्तिसापेक्षत्वात् सर्वतो भक्तियोग एव श्रेष्ठस्तमनुतिष्ठतो न किञ्चिदवशिष्यत इति भावः ।

स्वकृतपद्येन प्रेमलक्षणां भक्तिमाशंसति ।
श्रवणाभिराशु साधनैः स्फुटभावस्य ममाघविद्विषि ।
अपि योगसमाधितत्परैर्भवतु प्रेम सुदुर्लभं नरैः ॥२४॥

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
कला पञ्चदशी पूर्णा भाव प्रेमानुवर्णिनी ॥
इति पञ्चदशी कला ।[41]

***

---

37. ओ-1, ओ-3, ना- ग्रन्थे एकादशे सप्तदशेऽध्याये लिखितमस्ति परन्तु श्लोकः भागवते, 11.18.28 विद्यते ।

38. तु.भा. 11.18.28

39. तु.भा. 11.18.29 - बुधो बालकवत् ।

40. तु.भा. 1.2.20

41. ना- 'इति पञ्चदशीकला श्री' अधिकं लिखितमस्ति ।

[1]षोडशी कला

षोडश्यामधि विज्ञप्तिपूर्वकं जगदीश्वरे ।
शरणं प्रविशन् ग्रन्थमुपसंहरति स्वकम् ॥१॥

निजार्त्तिं ज्ञापयिष्यन् सामान्यतो भक्तिहीनानां संसारसम्भवस्तापो दुर्निवार इत्याह दशमे एकपञ्चाशत्तमेऽध्याये भगवन्तं प्रति मुचुकुन्दवाक्येन—

विमोहितोऽयं जन ईश मायया त्वदीयया त्वां न भजत्यनर्थदृक् ।
सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वञ्चितः ॥२॥[1]

हे ईश योषित्पुरुषश्च द्विविधोऽयं जनः त्वदीयया मायया विमोहितः यतोऽनर्थदृक् न अर्थं सुखं परमार्थसुखं त्वां पश्यतीति अतस्त्वां न भजतीति । किञ्च परस्परं वञ्चितस्सन् । सुखेच्छया दुःखानां प्रभवो येषु तेषु गृहेषु सज्जते तेषां दुःखं प्रपञ्चयति तृतीये नवमेऽध्याये भगवन्तं प्रति ब्रह्मवाक्येन—

क्षुत्तृट्त्रिधातुभिरात्मा मुहुरर्द्यमानाः
शीतोष्णवातवर्षैरितरेतराच्च ।
कामाग्निनाच्युत रुषा च सुदुर्भरेण
संपश्यतो मन उरुक्रम सीदते मे ॥३॥[3]

क्षुच्चतृट् त्रिधातवश्च वात-पित्त-श्लेष्माणः तैरिमाः प्रजाः सुदुर्भरेण दुःस्सहेन कामाग्निना अविच्युतया रुषा अनवच्छिन्नक्रोधेन पीड्यमानाः संपश्यतो मे मनः सीदति विषादं प्राप्नोत्यर्थः तेषां निष्ठां प्रपञ्चयति दशमे त्रिषष्टितमेऽध्याये भगवन्तं प्रति रुद्रवाक्येन—

त्वन्माया[4] मोहितधियः पुत्रदारगृहादिषु ।
उन्मज्जन्ति निमज्जन्ति प्रसक्ता वृजिनार्णवे ॥४॥

पुत्रादिषु प्रसक्ता वृजिनार्णवे दुःखसागरे उन्मज्जन्ति देवादियोनिषु निमज्जन्ति स्थावरादिषु । तदुक्तं वायवीये विपर्ययश्च भवति ब्रह्मत्वस्थावरत्वयोरिति । एवं परेषां मोहं प्रपञ्च्य स्वस्य व्यर्थकालतामाह दशमे पञ्चमेऽध्याये[5] भगवन्तं प्रति

---

1. ना- इतः प्राक् 'अथ' इति अधिकपाठः ।
2. तु.भा. 10.5146
3. तु.भा. 3.9.8
4. तु.भा. 10.63.40 - यन्माया

वसुदेववाक्येन द्वाभ्याम्—

यदृच्छया नृतां प्राप्य सुकल्या[6]मिह दुर्लभाम् ।
स्वार्थे प्रमत्तस्य वयो गतं त्वन्माययेश्वरः ॥५॥

नृतां मनुष्यतां सुकल्यां पटुतरेन्द्रियाम् । स्वार्थे त्वयि । अहो किमिति मत्तोऽमीति-चेत्त्वया बहुभिः पाशैर्बद्धत्वादित्याह—

असावहं ममैवैते देहे चास्यान्वयादिषु ।
स्नेहपाशैर्निबध्नाति भवान् सर्वमिदं जगत् ॥६॥[7]

देहे अस्य देहस्यान्वयादिषु पुत्रादिषु च ममैवैते इति । एतदेव प्रपञ्चयति चतुर्भिः दशमे चत्वारिंशेऽध्याये भगवन्तं प्रति अक्रूरवाक्येन—

अहं चात्मात्मजागारदारार्थस्वजनादिषु ।
भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया प्रभो[8] ॥७॥

मूढत्वं प्रकटीकरोति—

अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहम् ।
द्वन्द्वारामास्तमोविष्टो न जाने त्वाऽऽत्मनः प्रियम् ॥८॥[9]

अनित्ये कर्मफलादौ नित्यमिति अनात्मनि देहे आत्मेति दुःखरूपे गृहादौ सुखमिति विपरीतमतिरित्यर्थः । द्वन्द्वे सुखदुःखेषु आरमति क्रीडतीति तथा सः । ननु दुःखेषु कुतो रतिस्तत्राह तमोविष्टस्तमसाव्याप्तस्सन् आत्मनः प्रियं न जाने । क इव न जानामि सदृष्टान्तमाह—

यथा बुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः ।
अभ्येति मृगतृष्णां वै हित्वा ह त्वां[10] पराङ्मुखः ॥९॥

तस्माज्जलादुद्भवतीतितदुद्भवानि जलतृष्णानि तै राच्छन्नं तथा मायाच्छन्नं त्वामहं

---

5. अत्र ग्रन्थे दशमे पञ्चमेऽध्याये इति लिखितमस्ति परन्तु भागवते दशमे पञ्चाशीतितमेऽध्याये श्लोकः विद्यते ।
6. तु.भा. 10.85.16 - कल्पा
7. तु.भा. 10.85.17
8. तु.भा. 10.40.24 - विभो
9. तु.भा. (10.40.25) त्वाऽऽत्मनः पाठोऽस्ति । ओ-1, ओ-2, ओ-3, ना- ह्यात्मनः ।
10. तु.भा. 10.40.26 - तद्वत्त्वाहं

हित्वा पराङ्मुखः देहाद्यभिमुखो वर्त इति । नन्वेवं जानतः कुतो विषयाभिमुखता तत्राह—

नोत्सहेऽहं कृपणधीः कामकर्महतं मनः ।
रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः ॥१०॥[11]

कृपणा विषयवासनायुक्ता धीर्यस्य सोहम् अत एव कामकर्मभ्यां तं क्षुभितं इन्द्रियैश्च बलिभिर्विषयसंयुक्तैरितस्तत आकृष्यमाणं रोद्धुं नियन्तुं न शक्नोमीति । एतत् स्पष्टयति सप्तमे नवमेऽध्याये नृसिंहं प्रति प्रह्लादवाक्येन द्वाभ्याम्—

जिह्वैकतोऽच्युत विकर्षति मा वितृष्णा[12]
शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ।
घ्रा[13]णोऽन्यतश्चपलदृक् क्व च कर्मशक्ति-
र्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥११॥

हे अच्युत जिह्वा अवितृष्णा सतीमा मां यतो मधुराररिरसस्त आकर्षति शिश्नोन्यतः व्यवायं प्रति उदरं च क्षुधासन्तप्तं सद्य एव यत् किञ्चिदाहारं प्रति श्रवणं शब्दं प्रति घ्राणो गन्धं प्रति चपलदृग्रूपं प्रति क्वच कदाचित् स्वविषयं प्रति कर्मशक्तिः अन्यानि कर्मेन्द्रियाणि लुनन्ति त्रोटयन्ति । एवं चेत् सर्वं परिहृत्य मत्कथासु मनोदेयं तस्मिन् मद्गतिं जानासि चेत्तत्राह—

नैतन्मनस्तव कथासु विकुण्ठनाथ
सम्प्रीयते दुरितदुष्टमसाधु तीव्रम् ।
कामातुरं च सुखं शोकभयैषणार्तं
तस्मिन् कथं तव गतिं विमृशामि[14] दीनः ॥१२॥[15]

असाधु बहिर्मुखं तीव्रं दुर्धरं हर्षशोकभयैरेषणात्रयेणार्त्तदुःखितमपि त्वत्कथासु न संप्रीयते तस्मिन्नेवंभूते मनसि कथं तव तत्त्वं विचारयामि । एवमजितेन्द्रियस्य किञ्चिज्ज्ञानशीलत्वात् संसाराद्भयभाजो मम त्वत्कृपैव शरणमित्याह तत्रैव

---

11. तु.भा. 10.40.27
12. तु.भा. 7.9.40 - वितृप्ता
13. ओ-1, ओ-2, ओ-3, ना- प्राणो, परन्तु भागवते तथा टीकायां घ्राणो विद्यते । अत्र भागवतटीकाधारेण च पाठः गृहीतः ।
14. ओ-1, ओ-3 - विमृषामि
15. तु.भा. 7.9.39

तद्वाक्येन—

त्रस्तोऽस्म्यहं कृपणवत्सलदुःसहोग्र-
संसारचक्रकदनाद् ग्रसतां प्रणीतः ।
बद्धः स्वकर्मभिरुशत्तम तेऽङ्घ्रिमूलं
प्रीतोऽपवर्गशरणं ह्वयसे कदा नु ॥१३॥[16]

दुःसहं यदुग्रं संसारचक्रे कदनं तस्मात् त्रस्तोस्मि । तत्र च ग्रसतां हिंस्राणां मध्ये स्वकर्मभिर्बद्धः सन् प्रणीतो निःक्षिप्तोस्मि हे कृपण उशत्तम कदा नु त्वं प्रीतस्सन् अपवर्गभूतः शरणं तवाङ्घ्रिकमलं ह्वयसे समाह्वयसि कृपया दास्ये नियोजयिष्यसीत्यर्थः । तापादि सन्तप्तं मम मनस्त्वां द्रष्टुमिच्छतीत्याह षष्ठे एकादशेऽध्याये सङ्कर्षणं प्रति प्रद्युम्नवृत्रवाक्येन—

अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्त्ताः ।
प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष दिदृक्षते त्वाम् ॥१४॥[17]

अजातपक्षाः खगाः क्षुधादिभिः पीडिता यथा मातरं यथा च दाम्ना बद्धा बालवत्सास्तन्यं यथा च व्युषितं प्रवासगतं प्रियं कामेन विषण्णा प्रिया तथा मनस्ताप-त्रयपीडितं कर्मभिर्बद्धं कामादिभिर्विषण्णं च त्वां दिदृक्षते द्रष्टुमिच्छतीत्यर्थः । ननु मायापरतन्त्रस्य कुतो मद्दर्शनं तत्राह दशमेऽष्टचत्वारिंशेऽध्याये भगवन्तं प्रति अक्रूरवाक्येन—

दिष्ट्या जनार्दन भवादिह[18] नः प्रतीतो योगेश्वरैरपि दुरापगतिः सुरेशैः ।
छिन्ध्याशु नः सुतकलत्रधनाप्तगेहदेहादिमोहरशनां भवदीयमायाम् ॥१५॥

नः अविवेकिनामिह गृह एव सुतादिमोहरज्जुं भवदीयमायां छिन्धि ततः किं करिष्यसि तत्राह दशमे पञ्चाशीतितमेऽध्याये भगवन्तं प्रति बलिवाक्येन—

तन्नः प्रसीद निरपेक्षविमृग्ययुष्मत्[19]
पादारविन्दधिषणान्यगृहान्धकूपात् ।
निष्क्रम्य विश्वशरणाङ्घ्र्युपलब्धवृत्तिः
शान्तो यदैक उत सर्वसखैश्चरामि ॥१६॥[20]

---

16. तु.भा. 7.9.16
17. तु.भा. 6.11.26
18. तु.भा. 10.48.27 - भवानिह
19. ओ-1, ओ-3 - विमृष्या
20. तु.भा. 10.85.45

तथा नः प्रसीद निरपेक्षैः प्राप्तकामैरपि विमृग्यं यद्युष्मत्पादारविन्दं तदेव धिषणमाश्रय स्तस्मादन्यदपि यद्गृहं तदेवान्धकूप स्तस्मान्निष्क्रम्य निर्गत्य विश्वस्य शरणं रक्षितारो ये वृक्षास्तेषामङ्घ्रिषु मूलेषु स्वत एव गलितैः फलादिभिरुपलब्धाः प्राप्ता वृत्तिर्जीविका येन सोहं शान्तस्सन् एकश्चरामि उताथवा सर्वेषां सखायो ये महान्तस्तैः सह चरामि । सहृदयानां रक्षणं प्रार्थयते द्वादशे एकादशेऽध्याये सूतवाक्येन—

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिधृग्-
राजन्यवंशदहनानपवर्गवीर्य ।
गोविन्द गोपवनितावृजभृत्यगीत
तीर्थश्रवः श्रवणमङ्गल पाहि भृत्यान् ॥१७॥[21]

हे कृष्ण कृष्णोऽर्जुनः तस्य सखा हे कृष्णसख हे वृष्णिश्रेष्ठ अननिद्रुहो ये राजन्यास्तेषां वंशस्य दहन अनपवर्गमक्षीणं वीर्यं यस्य गोपवनितानां व्रजाः समूहाः भृत्या नारदादयस्तैर्गीतं तीर्थभूतं श्रवः कीर्त्तिर्यस्य श्रवणमेव मङ्गलं यस्य । दशमे एकोनसप्ततितमेऽध्याये राजदूतवाक्येन शरणं प्रविशन्नुपसंहरति—

कृष्ण कृष्णाप्रमेयात्मन्प्रपन्नभयभञ्जन ।
वयं त्वां शरणं यामः[22] भवभीताः पृथग्धियः ॥१८॥

प्रपन्नानां शरणगतानां भयं भञ्जयतीति तथा भवभीताः संसाराद् भीताः पृथग्धियः प्राकृतबुद्धयः त्वत्स्वरूपाविदो वयं परमकृपालुं त्वां शरणं यामः—

हे कृष्ण हे कमललोचन दीनबन्धो
भक्तानुकम्पकहरे करुणैकसिन्धो ।
दीनावलम्ब जगदीश्वर पाहि दीनं
मां युष्मदीयचरणाम्बुरुहप्रपन्नम् ॥१९॥

स्वग्रन्थं भगवति समर्पयति ।

इयमच्युत हृत्सरोरुहे वसतः शासनवर्तिना तव ।
ग्रथिता शुभपद्यसंहतिस्त्वयि कारुण्यनिधौ समर्पिता ॥२०॥

अथ द्वाभ्यां सर्वशास्त्रार्थतत्त्वमाह—

---

21. तु.भा. 12.11.25
22. तु.भा.10.70.25 - यामो । अयं श्लोकः भागवतस्य (10.70.25), अस्ति परन्तु ग्रन्थे 10.69 तमेऽध्याये लिखितमस्ति ।

हे सारज्ञाः शृणुत[23] मनुजा सर्वशास्त्रार्थतत्त्वं
संक्षेपेणासकृदभिदधाम्युच्चकैरूर्ध्वबाहुः ।
संसारेऽस्मिन्परमभयदे जन्ममृत्य्वादिदुःखैः
सन्तप्तानां नहि हरिमृते विद्यतेऽन्या गतिर्वः ॥२१॥
आलोच्य[24] सर्वशास्त्राणि विचार्य च पुनः पुनः
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ।
चिन्तनीयो हरिर्नित्यं चेतसानन्दगामिना
सारोयं सर्वशास्त्राणां शोषोन्यद्ग्रन्थविस्तरः ॥
हरिः परायणं परं हरिः परायणं परम् ।
पुनः[25] पुनर्वदाम्यहं हरिः परायणं परम् ॥
तपन्तु तापैः प्रतपन्तु पर्वतादटन्तु तीर्थानि पठन्तु चागमान् ।
यजन्तु यागैर्विनयन्तु योगैर्हरिं विना नैव मृतिं तरन्ति ॥

स्मर्तव्यः सततं विष्णुरित्यादि । अत्रासम्भावनां परिहरति ।

यूयं तावद्विमृशत चिरं सन्तु दूरे गिरो मे
कामक्रोधादिभिररिवरैर्बाध्यमानेन नित्यम् ।
यामं यामं त्रुटितपरमायुर्भरेणात्र पुंसा
सेव्यो वास्यान्नहि बहुविधक्लेशहारी मुरारिः ॥२२॥

यूयं तावत्साकल्येन विमृशत विचारयत ।

रम्यं भक्तिसुधाकरं समलिखं भूरिप्रयत्नादमुं-
बोधायास तमःसमूहदमनीं टीकां च सत्कौमुदीम् ।
अत्र स्वामिकृतौ कृतं यदधिकं नूनं च पूर्वापर-
श्लोकैक्यप्रतिपत्तये सुकृतिभिस्तत् क्षम्यतां साधुभिः ॥२३॥
अच्छकौ[26]त्सकुल लब्धजन्मना कृष्णभक्तिरतदीनबन्धुना ।
ग्रन्थ एष रचितोऽस्तु सन्ततं कृष्णदाससहृदयप्रमोददः ॥२४॥

कृष्णदासानां वैष्णवानां कृष्णदासस्य स्वशिष्यस्य च हृदयप्रमोददोस्तु ।

---

23. ओ-1, ओ-2, - शृणुत इति नष्टम् ।
24. ना- आलोच्यादय
25. ओ-1, ओ-3 - नास्ति
26. ना- कौच्छ

इह क्षितौ सर्वगुणैरुपेतः सङ्गीतविद्धूरियशाः सुशान्तः ।
घोरासिविद्यार्णवकर्णधारो विभाति नारायणमङ्गराजः ॥२५॥
विप्रप्रियो विष्णुरतो वदान्यो वाग्मी विवेकी विनयी बलिष्ठः ।
विचारविद्वृद्धजनानुवर्त्ती विनिर्मितो यो विधिनावशिष्य ॥२६॥
महानदीदक्षिणभूप्रदेशे देशे त्वदीये वसता शकाब्दे ।
गते नभश्चन्द्ररसेन्दुसंख्ये विनिर्मितो भक्तिसुधाकरोऽयम् ॥२७॥
विष्णुर्यावत्कलयति तनुं दारवीं नीलशैले
तस्य क्रोडं जलनिधिसुता यावदङ्गीकरोति ।
यावच्चास्याः परिजनभृतौ चित्तवृत्तिर्दयार्द्रा
तावद्ग्रन्थोऽयमपि तनुतां सम्मदं सज्जनानाम् ॥२८॥

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
निजार्त्तिज्ञापना नाम सम्पूर्णा षोडशीकला ॥
इति षोडशी कला ।[27]
***

श्रीहरये नमः

श्रीकृष्ण केशव कृपार्णवकञ्जनाभ
कन्दर्पकोटिकमनीयकलानिधान ।
कालीयमर्दन कदम्बवनीनिकेतन-
केलिं कदा कलयसीशहृदम्बुजे मे ॥१॥
ख्यातप्रभावखलखण्डलखञ्जरीट-
खेदप्रदाक्षिशतपत्रखगेशयान ।
खद्योतमाननख खेलदपाङ्गताप-
खिन्ने खिलेश मयि पातय दृङ्मयूखम् ॥२॥
धोराघसंहतिघनाघनगन्धवाह-
घर्मांशुजाघनरसप्रभकायकान्ते ।
घोषाङ्गनास्तनतटी घृसृणाङ्किताङ्ग
घूर्णां विघट्टय भवाम्बुधिसम्भवां नः ॥३॥

27. ना- ग्रन्थे 'श्री इति षोडशीकला' अधिकः पाठः ।

गोष्ठेन्दू नन्दन गदाग्रजगोपिकेश
गोविन्द गोकुलमणे गुरुगोत्रधारिन् ।
गोपाल गेयगुणपुञ्ज गदाधरेह
गुञ्जावतंस वद को गतिदस्त्वदन्यः ॥४॥

ॐ

श्रीः

श्री[28] गुरवे नमः । श्री गौरचन्द्राय नमः । श्री नित्यानन्दचन्द्राय नमः । श्री द्वैतचन्द्राय नमः । श्री श्रीनिवासादि भक्तवृन्देभ्यो नमः । श्री गौरगदाधरीभ्यां नमः ।

श्री रूपमञ्जर्याद्यष्टमञ्जरीभ्यो नमः । श्रीललिताद्यष्टसखीभ्यो नमः । श्री राधाकृष्णाभ्यां नमः । समाप्तोऽयं हरिभक्तिसुधाकरः ।

ॐ

---

28. ना- ग्रन्थेषु श्री गुरवे नमः...... हरिभक्तिसुधाकरः ॐ पर्यन्तं नास्ति ।

द्वितीयो भागः

समीक्षात्मकमध्ययनम्

प्रथमपरिच्छेदः

भारते विशेषतः उत्कलेषु च वैष्णवधर्मस्य क्रमविकाशः

वैष्णवधर्मस्योद्भवः—

असारेऽस्मिन् मायामोहविमोहिते संसारे शान्तिकामी प्राणी अशान्तसमुद्रं निर्मथ्य तत्र शान्तिमाप्तुं चेष्टते । धर्माचरणं विना शान्तिलाभोऽसम्भवः । यतोह्य-धर्माचरणमेव अशान्तेः कारणम् । जीवस्तदानीमेव सुखं शान्तिं वा लभते, यदा असौ शान्तिलाभाय धर्ममार्गमाश्रयते । अतो धर्मो मानवानामेकमपरिहार्यमङ्गम् । यत् सदैव मानवाः धर्ममनुसरन्ति 'आचारप्रभवो धर्म' इति विष्णुसहस्रनामस्तोत्रानु-सारेण भारतीयशिष्टाः सदाचारं धर्मत्वेन समाचरन्ति । वैदिककालादारभ्य भारते तथा उत्कले यावत् धर्मः सुप्रतिष्ठितोऽस्ति । 'धर्मो रक्षति रक्षितः' इति मनुवाक्येन धर्मस्य रक्षणार्थं धार्मिकोऽपि धर्मेण रक्ष्यते ।

वैदिकसाहित्ये, रामायणे, महाभारते, पुराणेषु, स्मृतिग्रन्थादिषु धर्मस्य वर्णनमुपलभ्यते । ऋग्वेदस्यानेकेषु स्थलेषु धर्मशब्दस्योल्लेखोऽस्ति । कुत्रापि धर्मशब्दस्य नपुंसकत्वेन वा पुंलिङ्गत्वेन व्यवहारो दृश्यते । कतिपयवैदिकमन्त्रेषु[1] धर्मशब्दः धार्मिकक्रियारूपमर्थं बोधयति धार्मिकविधिरूपेण प्रयुज्यते । पुनश्च कुत्रचित् धर्मशब्दात् नियमः सिद्धान्तो वा लभ्यते । धर्मस्य यो व्यापकोऽर्थ आसीत् वैदिक-ऋत-चिन्ताधाराया धर्मे एव परिणतिर्दृश्यते । अयं धर्मः आचार लक्षण-श्चोदनालक्षणो धर्मो वा इत्युच्यते । परन्तु सम्प्रति लोकव्यवहारे सम्प्रदायरूपेऽर्थे धर्मस्य प्रयोगो रूढो दृश्यते ।

समग्रविश्वस्य धर्ममतवादेषु ब्राह्मण्यधर्मस्य रूपान्तरं 'हिन्दुधर्मः' सुप्राचीनः । प्राचीनालोचकानां मते आर्यवैदिकधर्मस्यैव आर्येतरभक्तिभावस्य सम्मिश्रणेन विश्वेऽस्मिन् हिन्दुधर्मस्य अभ्युदयः क्रमविकाशश्चाभूत् । हिन्दुजनता[2] स्वस्य धर्मं सनातनधर्मत्वेन अभिहितवती । सनातनधर्मस्य मूल उत्सो भवति वेदः । प्राचीनकाले वैदिकयुगेऽपि धर्मधारणा आसीत्, अद्यापि अस्ति । स एव सनातनधर्मः । सनातनधर्मस्य कोऽपि प्रचारक उद्भावको वा न स्यात् । भारतवर्षे यवनानां विलयानन्तरं सनातनधर्मः 'हिन्दुधर्म'नाम्ना अभिहितः[3] ।

भारतभूमौ हि बहवः सम्प्रदायाः प्रादुर्भूताः । ते सम्प्रति धर्मनाम्नाऽभिधीयन्ते । भारते हिन्दु-महम्मदीय-ख्रीष्टीय-जैन-बौद्धास्तथा अन्ये च ये धर्मावलम्बिनः सन्ति ते मिलित्वा परमानन्देन स्वस्य धर्मं सांस्कृतिक-सामाजिकरीत्या च पालयन्ति । एतेषु बहुषु धर्मेष्वपि 'हिन्दुधर्मः' शैव-शाक्त-गाणपत्य-वैष्णवादिभेदेन विभज्यते । ये वैष्णवधर्ममनुसरन्ति ते वैष्णवाः । साऽस्य देवता (४.२.२४)[4] इत्यण् । विष्णुः अस्य देवता इति वैष्णवो मन्त्रः । अस्य प्रयोग एवं भवति । विष्णो रिमे इति वैष्णवा इति व्युत्पत्तिः । वैष्णवशब्दस्य अर्थो भवति विष्णुभक्तो विष्णोरुपासकः । विष्णुनारायणोपासनामाधारीकृत्य वैष्णवधर्मस्य उत्पत्तिरभूत् ।

विशुद्धधर्मस्याऽयं प्रसारः प्रचारश्च बहुप्राचीनकालात् आरभ्यते । वैष्णवधर्मस्य मुख्योपास्यदेवो भवति विष्णुः तस्यैव भगवतः विष्णोरुपासनं वैदिककालादेव प्रचलति । ऋग्वेदादारभ्य विष्णोरुपासनं भारतवर्षे प्रचलतितराम् । सर्वप्रथमतः अग्निः वैदिककर्मकाण्डे प्रथमदेवो भवति । यथा- "ॐ अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवता"[5] । ऋग्वेदे उक्तम्— हे अग्निदेव त्वमेव वरुणः, त्वमेव मित्रः, त्वमेव इन्द्रः तथा च त्वमेव अर्यमा भूत्वा संसारेऽस्मिन् कार्यं करोषि । यथा[6]—

इन्द्रं मित्रं वरुणमग्निमाहुः दिव्यः स सुपर्णा गुरुत्मान् ।
एकं सद् विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः ॥

वस्तुतः विष्णुरेव सूर्यस्य स्वल्पविशेषः । ऋग्वेदे[7] सूर्यस्य महिमा बहुधा उच्यते । वेदेषु सूर्यस्य प्रकारेषु विष्णुर्गण्यते । स मयूखैः पृथिवीं व्याप्नोति । कदाचित् स आदित्यैः सह पृथक् परिगण्यते । अनन्तरं स आदित्येषु अन्यतमो भवति । सूर्यस्य दैनिक-वार्षिकप्रदक्षिणेषु स तस्य प्रातिनिध्यं करोति । तस्य त्रेधा विक्रमो वेदेषु प्रसिद्धः । तस्य परमपदं सूरयः पश्यन्ति । ऋग्वेदे[8] उक्तम्— 'इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्' । स धर्मान् धारयित्वा पदत्रयमतिक्रम्य त्रीणि पदानि विचक्रमे । अर्थात् विष्णुः इदं जगत् परिक्रान्तवान् । तस्य धूलियुक्तपदेन जगदिदं आवृतमभूत् । अस्य त्रेधा पदस्यायमर्थः- प्रातः मध्याह्नः सायं च । सूर्यस्य परिक्रमणेन सह विष्णोः तृतीयपदात् मधु निर्झरति । यथा[9]—

यस्य त्री पूर्णा मधुना पदानि अक्षीयमाणा स्वधया मदन्ति ।
यः ॐ इति त्रिऽधातु पृथिवी उत द्याम् एकः दाधार भुवनानि विश्वा ॥

अतः विष्णुपदसमर्थनेन आनन्दरसे निमज्जिता भवन्ति[10] । त्रिपदकल्पनेनात्र विष्णोः

वामनावतारोऽपि सूच्यते इति केषांचिद् विदुषां मतम् ।

कदा विष्णुः इन्द्रस्य युज्यसखा कदा वा महत् दैवतं विष्णोर्महत्त्वस्य प्रतिपादनावसरे उक्तम्— हे देवाः विष्णोः ये जाताः ये च जनिष्यमाणा भविष्यन्ति ते न किमपि तत्त्वं महिम्नः अपरं पारं द्रष्टुं शक्नुवन्ति । इत्यनेन विष्णोः प्राधान्यं सूचितम् । स्कन्दपुराणे[11]ऽपि विष्णोर्नामप्रयोगोऽस्ति । विष्णुधर्मोत्तर[12]पुराणेऽपि भगवतो विष्णोर्नाम वर्णितमस्ति । यथा—

धाता मित्रोऽर्यमा पूषा शक्रोशौ वरुणो भगः ।
त्वष्टा विवस्वान्सविता विष्णुद्वादशमस्तथा ॥

गरुड[13]पुराणेऽपि भगवान् विष्णुनामप्रयोगो दरीदृश्यते । विष्णुनाम्न एकवारमपि उच्चारणेन जीवो जीवन्मुक्तो भवति । ऐतरेयब्राह्मणे विष्णोः श्रेष्ठत्वं प्रख्यापितम्। शतपथब्राह्मणेऽपि वर्णितमस्ति यत् यज्ञे विष्णुः सर्वेषां देवानामपेक्षया श्रेष्ठो भवति। वैष्णवधर्मस्योपास्यदेवस्य नाम भवति नारायणः । यः वैदिकवाङ्मयान्तर्गतेषु अनेकेषु स्थलेषु परिलक्ष्यते उक्तं[14] यत्—

परोदिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
किं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त विश्व ॥

अपि[15] च तमिदगर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ।

अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः ॥

विष्णु[16]पुराणे जलं नारा इति कथ्यते । नारा अयनम् आश्रयो यस्य स नारायणः । इत्थं जले तस्य निवासः सूचितः । मनुस्मृतौ[17] मतमिदं दृढं परिलक्ष्यते । यत् 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः' । शतपथब्राह्मणे नारायणस्य नामोल्लेखः अस्ति[18] । 'पुरुषं ह नारायणम्प्रजापतिरुवाच यजस्व यजस्वेति' । तैत्तिरीयारण्यकस्य[19] दशमप्रपाठके उक्तम्—

'नारायणाय विद्महे, वासुदेवाय धीमहि, तन्नो विष्णुः प्रचोदयात् ।'

वैष्णवमन्त्रस्य प्रयोगः वैदिकसाहित्येऽपि दृश्यते । विष्णोरुपासको वैष्णवोऽथवा विष्णुर्यस्य अधिकारी । शतपथब्राह्मणे[20] तैत्तिरीयारण्यके च वैष्णवपदस्य इत्यस्मिन्नर्थे व्यवहारो भवति । महाभारतेऽपि[22] वैष्णवपदस्य व्यवहारो दृश्यते ।

अष्टादशपुराणानां श्रवणात् यत् फलं भवेत् ।
तत्फलं समवाप्नोति वैष्णवोनात्र संशयः ॥

अत एव विष्णु-कृष्णयोः अभेदत्वं महाभारतेऽपि प्रतिपादितम् । हरिवंशे विष्णुपर्वणि उक्तम्[23]—

अहं किलेन्द्रो देवानां त्वं गवामिन्द्रतां गतः ।
गोविन्द इति लोकास्त्वां स्तोष्यन्ति भुवि शाश्वतम् ॥

इत्यनेन इन्द्र-कृष्णयोः अभेदत्वं प्रतिपादितम् । छान्दोग्योपनिषदि देवकी कृष्णस्य माता उल्लिख्यते । महाभारतेऽपि कृष्णो वासुदेवस्य पुत्र इति उल्लेखो दृश्यते । वासुदेवभक्तः भागवतप्रभृतीनां शब्दानां प्रयोगोऽपि तत्र दृश्यते ।

गीतायामपि[24] वासुदेवशब्दस्य प्रयोगो दृश्यते यत् 'वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः' । विदुषां मतभेदसत्त्वेऽपि कृष्णवासुदेवयोः अभिन्नत्वं परिलक्ष्यते । अष्टाध्यायी[25] ग्रन्थेऽपि 'वासुदेवार्जुनाभ्यां वुन्' इति सूत्रे वासुदेवनामोल्लेखो दृश्यते । अतः वैष्णवधर्मस्य मूलभित्तिः वैदिककालात् आसीदिति निश्चयेन न कोऽपि दोषः परिलक्ष्यते ।

वैष्णवधर्मस्य क्रमविकाशस्य धारा

(क) भागवतधर्मः -

ऐतिहासिकदृष्ट्या भक्तिभावस्याविर्भावकालः त्रिधा विभज्यते । प्रथमोत्थाने १५०० ई.पू.तः ई.पू.५०० तममब्दं यावत् प्रथमभागः । अर्थात् वैष्णवानामुदयादारभ्य गुप्तनरपतीनामभ्युदयं यावत् परिगण्यते[26] । भागवतधर्मोदयः वैष्णवानां लीलास्थली । स्वयं कृष्णः यादववंशीयो वैष्णववंशीयश्चासीत् । अतः भागवतस्य उदयः यादववंशादारभ्यते इति अनुमीयते । वैष्णवधर्मः भारतादारभ्य दक्षिणं यावत् प्रचारितः । महाभारते नारायणपर्वणि वर्णितं यत् शुङ्गवंशीयः राजा ब्राह्मणजातीयाः । अतः ते परमवैष्णवा आसन्निति अनुमीयते । इसवीयचतुर्थ-पञ्चमशतकयोः कालः वैष्णवधर्मस्य इतिहासे सुवर्णयुगम् अभवत् । यतः कालेऽस्मिन् गुप्तनरपतयः वैष्णवाः आसन् । अस्मिन् काले पाञ्चरात्रसंहिता विरचिता। अतः वैष्णवधर्मस्य प्राचीनतमसंज्ञा भवति भागवतधर्म इति कथ्यते । तस्यैव भागवतधर्मस्योदयः द्वितीयशतकात् पूर्वमिति निश्चीयते । यतः अष्टाध्यायी-रचयिता पाणिनिः तथा महाभाष्यकारः पतञ्जलिः विक्रमपूर्वं सप्तमशतके द्वितीयशतके आविर्बभूवतुः । तस्मिन्कालेऽपि भागवतधर्मस्योदयः अभूदिति वक्तुं शक्यते । कंसवध-बलिवन्धनादिनाटकेषु उल्लिखितं यत् स्वयं विष्णुः कृष्णावतारे अवतीर्य कंसं जघान । वामनावतारे स बलिं बबन्ध, पातालं च प्रेरयामास । वैष्णवधर्मस्य जनप्रियता ख्रीष्टपूर्वद्वितीयशतके एतादृशी आसीत् यत् शैवा अपि भागवतधर्मं प्रति अनुरक्ता आसन् । अतः द्वितीयशतकात्पूर्वमेव वैष्णवानां विपुला ख्यातिरासीत् ।

प्रथमशतके नानाघातगुहाभिलेखे मङ्गलश्लोके देवतान्तरैः सह सङ्कर्षणस्य तथा वासुदेवस्य नामोल्लेखोऽपि दृश्यते[27] । वेशनगरशिलालेखात् भागवतधर्मस्य उदारता प्राचीनता च सूच्यते तत्र लिखितमस्ति हेलियडोरशा इति नाम्ना केनचित् देवाधिदेववासुदेवस्य गरुडस्तम्भो निर्मितः । हेलियडोरशस्तम्भोऽपि वैष्णव-धर्मावलम्बी, अत्र निष्कर्षः वासुदेवः देवाधिदेव इति कथ्यते । तथा तदनुसारेण भागवतस्य नाम विख्यातिं प्राप्तम् ।

भारतवर्षस्य पश्चिमोत्तरप्रदेशे वैष्णवधर्मस्य प्रभावः अस्मिन् युगे सुप्रतिष्ठितः । अन्येऽपि शैवादयः धर्माः तं स्वीचक्रुः । मथुराप्रदेशे एकस्मिन् शिलालेखे लिखितमस्ति यत् वसुनाम्ना केन व्यक्तिविशेषेण भगवतः वासुदेवस्य निर्माणादनन्तरं चतुः शालि निर्माणं कृतम्[28] । यानि मन्दिराणि अधुना मथुरायां विद्यन्ते तेषु इदं मन्दिरं प्रथमं प्राचीनतमं च । पाणिनेः अष्टाध्यायीग्रन्थानुशीलनात् ज्ञायते यत् पाणिनेः तत्रैकस्मिन् सूत्रे 'वासुदेवार्जुनाभ्यां वुन्'[29] इति प्रत्ययस्य विधानं कृतम् । यद्यपि पाणिनेः कालनिर्णयविषये विदुषां मतभेदः परिलक्ष्यते तथापि ख्रीष्टपूर्वषष्ठशतकात् पूर्वमेवास्य आविर्भाव आसीत् । स्पष्टं भवति यत् विष्णु-नारायण-वासुदेवादयः पर्यायवाचका भवन्ति । अतो विष्णु-वासुदेवस्य कालविषये धारणा सुस्पष्टा ।

(ख) सात्वतधर्मः -

भारतस्य पुरातनधर्मपरम्परायां भागवत-सात्वत-पाञ्चरात्राणां मतमुल्लेखनीयं वर्त्तते । ऐतिहासिकानां मतानुसारेण तु उत्तरभारतस्य सुरसेन मण्डलाधिकारिणः क्षत्रियगणाः सात्वतनाम्ना अभिहिता आसन् । वैष्णवधर्मप्रचारे तेषां महत् योगदानं वर्त्तते । वंशेऽस्मिन् वैष्णवधर्मस्य सुविस्तृतः प्रसारः चाभूत् । अतः मतस्यास्य नाम सात्वतमतमिति अभिधीयते । पुनश्च केचन कथयन्ति पाञ्चरात्रमतस्य नामान्तरं भवति सात्वतमतम् इति[30] । ऐतिहासिकदृष्ट्या यस्य महत्त्वं वर्त्तते । पुनश्च यदुवंशी सात्वतनाम्ना एकः राजा आसीत् । यः सात्वतवंशस्य प्रवर्त्तनमकोरत् । तस्य पितुः नाम अंशुः अयांशः वा । पुत्रस्य नाम सात्वत आसीत् । यदुवंशीयराजेन सात्वतेन सात्वतमतस्य प्रवर्त्तनं कृतम् । अस्य विस्तृतवर्णनं महाभारतस्य शान्तिपर्वणि उपलभ्यन्ते[31] । सात्वतधर्मस्य मुख्योपासको भवति श्रीकृष्णः पद्मपुराणे सात्वतानां सम्बन्धे विस्तृतं विवरणं समुपलभ्यते । कूर्मपुराणे ज्ञायते यत् तु यदुवंशस्य सात्वतराजाः अस्य सात्वतधर्मस्य प्रचारमकुर्वन्[32] । तत्रैव जगदिदं विष्णुमयमिति वर्णितमस्ति । नारदवचनात् वासुदेवार्चनरतः सात्वतः

सात्वतं धर्मं प्रवर्त्तयामास । अतः नारदप्रचारितोऽयं सात्वतधर्मः अति प्राचीनः आसीत् । ऋग्वेदात्[33] ज्ञायते यत् सात्वतधर्मस्य उपासकः आसीत् स्वयं कृष्णः। स तत्र ऋषिरूपेण वर्ण्यते ।

अयं वा कृष्णो अश्विना हवते वाजिनीवसूः ।
मध्व सोमस्य पीतये ॥
शृणुतं जरितुर्हवं कृष्णस्य स्तुवतो नरा ।
मध्व सोमस्य पीतये ॥

(ग) पाञ्चरात्रमतम् -

प्राचीनधार्मिकमतेषु पाञ्चरात्रमतस्य नामोल्लेखो दृश्यते । सम्प्रदायस्यास्य मुख्योपास्यो वासुदेवो यः सर्वव्यापकः भवति । स षड्गुण ' ज्ञान-शक्ति-बल-ऐश्वर्य-वीर्य-तेजो युक्तः तथा च हेयगुणविरहितः । अतः भगवानिति कथ्यते । अस्य मतस्य पाञ्चरात्रसंज्ञा केन प्रकारेण अभवत् तस्य व्याख्या भिन्नतया प्राप्यते । सर्वप्रथमतः महाभारतस्य शान्तिपर्वणि उक्तं चत्वारो वेदाः पाञ्चरात्र दर्शनरूपेण प्रसिद्धिं प्राप्ताः[34] ।

नरनारायणौ द्रष्टुं बदर्याश्रममाद्रवत् ।
इदं महोपनिषदं चतुर्वेदसमन्वितम् ।
सांख्ययोगकृतं तेन पञ्चरात्रानुशब्दितम् ।
नारायणमुखोद्गीतं नारदोऽश्रावयत् पुनः ॥

अत्र भगवतः पञ्च कार्याणि उपपादितानि । सृष्टिः, स्थितिः, विनाशः, निग्रहः, अनुग्रहश्च । शैवपरम्परायां महादेवोऽपि पञ्चकृत्यकारी भवति । पञ्चरात्रसंहितायां षाड्गुण्यसम्पन्नस्य भगवतो वासुदेवस्य सर्वकर्त्तृत्वं दार्शनिकसिद्धान्तरूपेण वर्णितम्।

वैष्णवधर्माणां समन्वयः —

भारतस्य पुरातनधर्मपरम्परायां सात्वत-पाञ्चरात्रधर्मयोः समन्वयात्मको भवति भागवतधर्मः । तथा च तस्य भागवतधर्मस्य पूर्णता वैष्णवधर्मरूपेण प्रकटिता अभूत् । वैष्णवधर्मस्य ऐतिहासिकपृष्ठभूमिः तत्कालप्रचलितानां जैन-बौद्ध-शैव-शाक्तधर्मादीनाम् आलोचनेन पूर्णतया ज्ञायते । विदुषां[35] मतानुसारेण वैष्णवधर्मस्योत्थाने मुख्यभूतानि चत्वारि मतानि सन्ति । तेषु प्रथमतः वैदिकदेवता विष्णुः द्वितीयतः दार्शनिकदेवता नारायणः तृतीयतः ऐतिहासिकदेवता वासुदेवः तथा चतुर्थतः आभीरदेवता बालगोपालश्चासीत् । साम्प्रदायिकदृष्ट्या वैष्णवशब्दो महाभारतस्य शान्तिपर्वणि वर्णितोऽस्ति[36] ।

अष्टादशपुराणानां श्रवणात् यत् फलं भवेत् ।
तत्फलं समवाप्नोति वैष्णवोनात्र संशयः ॥

तत्र अष्टादशपुराणश्रवणेन मानवो यत् फलं प्राप्नोति तत्तु केवलं वैष्णवेन एव लभ्यते । महाभारतयुद्धसमये अथवा महाभारतस्य प्राचीनांशस्य रचनासमये वैष्णवधर्मः सात्वतभागवतधर्मरूपेण प्रचारित आसीत् । अतः वैष्णवधर्मस्य नूतनत्वं भवति । सात्वत-पाञ्चरात्र-भागवतधर्माणां क्रमशः एकरूपताप्राप्तौ अस्य धर्मस्य व्यापकप्रसारः पौराणिकयुगे अभवत् इत्यत्र नास्ति सन्देहः ।

पुराणेषु भगवतः विष्णोः बहुविधा अवतारा वर्ण्यन्ते । तेषामवताराणामनुसारेण वैष्णवधर्मस्य प्रचारोऽधिकाधिकं विस्तृतम् अभूत् । क्रमशः वैष्णवधर्मः पौराणिकधर्मः अभूत् । यतः धर्मस्यास्य पूर्णता पौराणिकयुगे अभवत् । यद्यपि तस्य क्रमबद्धेतिहासः खीष्टतः परं तृतीयचतुर्थशताब्दीं यावत् किमपि प्राप्यते । गुप्तयुगे भागवतधर्मः पुनरुज्जीवितः सन् हिमालयादारभ्य कन्याकुमारीं यावत् व्याप्तोऽभूत् । गुप्तनरपतीनां शासनकालः २७५ तः ५१० ई. मध्ये व्याप्त आसीत्[37] तस्मिन् समये वैष्णवधर्मस्य अभूतपूर्वो विकासोऽभूत् । तदा संस्कृतसाहित्यस्य उन्नतिरभवत् । हिन्दुधर्मस्य आचाराणां विचाराणां कर्मसंस्कारस्य च प्रतिपादकानां धर्मशास्त्रीयग्रन्थानां तथा च पुराणग्रन्थानां निर्माणस्य कालकलना ततः प्रभृति ऐतिहासिकदृष्ट्या अभूत् । गुप्तयुगान्तरं सप्तमशताब्द्यां भारतस्य अन्तिमचक्रवर्त्ती सम्राट्-रूपेण हर्षवर्द्धनः आसीत् । तदा संस्कृतस्य उल्लेखनीया उन्नतिरभवत् । तस्य पूर्वजा सूर्योपासकाः आसन् ।

पुनश्च दशमशताब्द्यां वैष्णवधर्मस्य पुनराख्यानं जातम् । तदारभ्य तस्य परम्परा भारतवर्षे प्रचलिताऽस्ति[38] । वैष्णवधर्मस्य सार्थकता श्रीसम्प्रदायः-विष्णुस्वामिसम्प्रदायः-मध्वाचार्यसम्प्रदायः-रामावर्तसम्प्रदायः-वल्लभसम्प्रदायः-गौडीयसम्प्रदायः-राधावल्लभसम्प्रदायः-नारायणसम्प्रदायः-दत्तात्रेयसम्प्रदायः-महापुल्लसियामतसम्प्रदाय इति रूपेण स्वस्य अस्तित्वं महत्त्वम् अधिकलोकप्रियमकरोत् । एवं प्रकारेण ऊनविंशशताब्दीं यावत् अस्य विकाशोऽभूत् । तदा धार्मिकाः वैष्णवाचार्याः प्रस्थानत्रयस्य यथा श्रीमद्भगवद्गीतायाः ब्रह्मसूत्रस्योपनिषदामुपरि वेदान्तपरकं भाष्यं टीकादिकं विरचय्य अधिकं प्रतिष्ठां प्राप्तवन्तः । भारतीयसाहित्ये भक्तियुगस्य विकासः त्रयोदशशताब्दीतः आरभ्य सप्तदशशताब्द्या मध्ये भवतीति वर्णनं लभ्यते । तस्मिन् समये रामभक्तेः तथा कृष्णभक्तेः भावधारा जनानां कण्ठहारोऽभूत् । तदा वैष्णवधर्मस्योपासनायां द्वे प्रमुखे शाखे उपलभ्यते । एका

सगुणोपासना अपरा निर्गुणोपासना । सगुणः रामभक्तिशाखायां वल्लभाचार्यस्य पुष्टिमार्गः प्रशस्तो भवति ।

वैष्णवधर्मस्य लोकप्रियता—

समग्रभारतवर्षे वैष्णवधर्मस्य प्रचारः प्रसारः लोकप्रियता च ऋग्वेदकालात् प्रचलन्ति । वैष्णवधर्मस्य आचारो भारतवासिनां हृदयावर्जकोऽभूत्। सर्वेषां कृते अस्य मार्गः उन्मुक्तः । अतः वैष्णवधर्मः न केवलं भारतीयानां हृदयेषु सीमितोऽभूत्, अपि तु अन्येषु अपि प्रान्तेषु अस्य प्रचारः दृश्यते । ब्रह्मदेशे विष्णोः तथा लक्ष्मीदेव्याः एका दण्डायमाना मूर्त्तिः, अनन्तशायिविष्णुमूर्त्तिः, नरसिंहावतारमूर्त्तिः च अनेकेषु स्थलेषु प्राप्यते । मूर्त्तीनां सन्दर्शनेन ज्ञायते यत् एतत्सर्वं ख्रीष्टीयाष्टमशताब्दीतः दशमशताब्द्या मध्ये विनिर्मितम्[39] । पागान्-नामकस्थाने एकं विष्णुमन्दिरम् आविष्कृतम् । मन्दिरस्य भित्तिगात्रेषु भगवतो विष्णोः दशावतारचित्रं खोदितं भवति[40] । प्राचीन प्रौम् नगरे विष्णोरुपासनायाः प्राबल्यं परिलक्ष्यते । यतः अस्य अपरनाम (Bissunamya)विष्णुपरी वा भवति[41] । भगवता विष्णुना विष्णुपुरमिदं निर्मितमिति स्वेजिगन् पागोडास्थिते सुप्रसिद्धे अभिलेखे वर्णितमस्ति[42] । थाइलाण्डेऽपि वैष्णवधर्मस्य प्रसारो बहुप्राचीनकालात् भवति । १९३५मिते ख्रीष्टाब्दे क्वारिच् (Quarithchwelles) श्रीदेव नामकस्थाने आपाततः ख्रीष्टीयषष्ठशतके एकं विष्णुमन्दिरं तथा विष्णोः विग्रहस्य आविष्कृतः[43] । कम्पोज-काम्बडिआदेशे ख्रीष्टीयषष्ठशतके राजा गुणवर्मा, राज्ञी प्रभावती उभौ च वैष्णवधर्मानुरक्तौ आस्ताम् । शिलालेखातो ज्ञायते यत् गुणवर्मा चक्रतीर्थस्वामिविष्णोः मन्दिरनिर्माणमकरोत्[44] ।

चम्पाद्विपे आधुनिकभिएत्नामस्य Annam राज्ये सप्तमशतके पुरुषोत्तमदेवस्य मन्दिरं निर्मितमभूत् । इत्थं बहुषु देशेषु वैष्णवधर्मस्य विषयः इतिहासे एकं महत्त्वपूर्णं स्थानं धत्ते । जाभाद्वीपे विष्णुमूर्त्तिसमेतयाः शक्तिमय्या लक्ष्म्याः तथा वैनतेयस्य प्रतिमा अपि दृश्यते । तत्रैव एकं विष्णुमन्दिरं प्राप्यते[45] । बालिद्विपेऽपि विष्णोरुपासनायाः बहुलप्रचलनमासीत् । अधुनाऽपि तत्रैव विष्णोः उपासनाया बहुप्रचलनं दृश्यते[46] । अतः प्राचीनकालात् वर्त्तमानकालं यावत् वैष्णवधर्मस्य जनप्रियता न केवलं भारतवर्षे तस्माद् बहिरपि परिलक्ष्यते ।

उत्कलेषु वैष्णवधर्मस्य परम्परा—

"The Vaiṣṇava religion revolves round the worship of the supreme god Nārāyaṇa, Viṣṇu and his numerous manifestations. The

Epics and the Purāṇas do not differentiate between Nārāyaṇa and Viṣṇu both the names designate the same god who is considered highest by his worshippers described variously as the Bhāgavatas, Pāñcarātras, Ekāntins, Sāttvatas and Vaiṣṇavas.[47]

Vaiṣṇavism might have existed in Orissa from very early times, but we can connect it with archaeological monuments only from the early medieval period on the temples of Orissa belonging to the 7th-8th century at Bhubaneswar and other place. Viṣṇu holding Śaṅkha, Chakra, Gadā and Padma, makes his appearance as subsidiary deity"[48]

हातीगुम्फाशिलालेखातो ज्ञायते यत् ख्रीष्टपूर्व द्वितीयशतके कलिङ्गसम्राट् खारवेलः जैनधर्मावलम्बी सन्नपि अन्यधर्मस्य पृष्ठपोषकः आसीत् । सर्वदेवायतन-संस्कारकारकः इति वाक्यात् अनुमीयते यत् वैष्णवधर्मस्य प्लावनस्य स्रोतस्विनी धारा तस्मिन्कालेऽपि प्रचलिता[49] । ख्रीष्टीयचतुर्थशतके गुप्तवंशीया राजानः परमवैष्णवा आसन् । ख्रीष्टीयपञ्चमशतके माठरवंशीयाधिपानां राजत्वकाले वैष्णवधर्मो राजधर्मरूपेण गृहीतः । एतद्वंशस्य राजा प्रभञ्जनवर्मा नारायणोपासकः आसीत् । यथा[50]—

माठरकुलवर्धनः नारायणः स्वामीपादभक्तः ।
निगोण्डि ग्राण्ट् ताम्रशासन प्रभञ्जनवर्मन् ॥

राजा चण्डवर्मा विष्णोरुपासकः विष्णुभक्तश्च आसीदिति वेविल सनन्दे लिखितमस्ति[51] । माठरवंशीय नृपः प्रभञ्जनवर्मा प्रख्यातशैवक्षेत्रे भुवनेश्वरे एकं विष्णुमन्दिरं त्रयोदशशतके (१२७८ ख्रीष्टाब्दे) अपि च तृतीय-अनङ्गभीमदेवस्य दुहिता चन्द्रिकादेवी अनन्तवासुदेवमन्दिरं कारयामासतुः[52] । वैष्णवधर्मः माठरवंशीयराजानां बलिष्ठपृष्ठपोषकतया अत्यन्तं समुन्नतः । पश्चिमोत्कले कोशले वा नलवंशीयराजाः अस्य पृष्ठपोषका आसन् । अस्य वंशस्य राजा स्कन्दवर्मा भगवतो विष्णोः पादपीठस्य निर्माता 'पादमूलकृतं विष्णो राज्ञः श्रीस्कन्दवर्मणः' पोडगडशिलालेखात् ज्ञायते[53] । राजवंशीय भूपाः वैष्णवधर्मे दीक्षिता आसन् । अरङ्गफलके महाराजः सुदेवराज 'परमभागवत' इति स्वस्य परिचयो दीयते[54] । दक्षिणकोशलात् परित्यक्ताः पाण्डुवंशीयाः भूपा परमवैष्णवा आसन् । तिवरदेवोऽपि परमवैष्णवभावेन परिचित आस्ते[55] । सिरपुरमन्दिरस्य अभिलेखे दृश्यते यत् तिवरदेवस्य भ्रात्रीयः हर्षदेवः परमनैष्ठिकवैष्णवो भवति ।

उत्कले षष्ठशताब्दीतः अष्टमशताब्दीं यावत् शासितवती भौमकरराज-

वंशस्य राज्ञी दण्डीमहादेवी त्रिभुवनमहादेवी स्वस्य दानपत्रे आत्मानं परमवैष्णवी इति घोषितवती[56] । नवमशतकेऽपि उत्कले वैष्णवधर्मः प्रचलन्नास्ते । फुलवाणी-मण्डलस्थिते बौद-अञ्चलस्य गन्धराडिनामकस्थाने सिद्धेश्वरशिवमन्दिरे नीलमाधव-विष्णुमन्दिरमस्तीति हरेकृष्णमहतावस्य ओडिशा इतिहासे प्रतिपादितम्[57] । परन्तु शैलोद्भव-भौमकर-सोमवंशीयभूपानां राजत्वकाले उत्कलखण्डे शैवधर्मस्य प्राबल्यं परिदृष्टमभूत् । भुवनेश्वरस्य लिङ्गराजमन्दिरं ब्रह्मेश्वरमन्दिरं च अस्य प्रकृष्टनिदर्शनम् । उत्कले शैवधर्मस्य प्रसारात् वैष्णवधर्मः किञ्चित्कालं यावत् पराभूतोऽभूत् । पुनश्च द्वादशशतकस्य प्रारम्भे वैष्णवधर्मः राजानुग्रहं प्राप्य विकशितः। चोडगङ्गदेवः (१११०ख्रीष्टाब्दे) उत्कलाधिकारपूर्वकम् आगङ्गागोदावरीपर्यन्तं स्वस्य राज्यस्य विस्तारमकरोत् । स एव परमशिवभक्त आसीत् । परन्तु श्रीसम्प्रदायप्रवर्त्तकस्य रामानुजस्य संस्पर्शात् वैष्णवधर्मं स्वीचकार। १०८४[58] मिते ख्रीष्टाब्दे ताम्रानुशासने परमवैष्णव परमब्राह्मण्यभावेन वर्णितः[59] । समयेऽस्मिन् जयदेवस्य आविर्भावोऽभूत् । तत्प्रणीतः राधाकृष्णयोर्लीलात्मकं शृङ्गाररसाश्रितं 'गीतगोविन्द'नामकं गीतिकाव्यम् उत्कले वैष्णवधर्मस्य अभ्युत्थाने सहायकमभूत्[60] । ख्रीष्टीय १३५०[61] तः १४५० मध्ये श्रीधरस्वामिकृत-श्रीमद्भागवत-विष्णुपुराण-भगवद्गीताव्याख्यानग्रन्थाः वैष्णवधर्मदर्शने अमरकृतयो भवन्ति । अस्मिन्काले संस्कृतभाषायां वैष्णवधर्मस्यानेके भक्तिग्रन्थाः विरचिताः ।

श्रीरामानुजानन्तरं कर्णाटदेशात् परमवैष्णव-मध्वाचार्य (११७६-११९७ मध्ये) उत्कले वैष्णवधर्मप्रचारार्थं श्रीक्षेत्रमाजगाम । स एव सद्वैष्णवसम्प्रदायस्य प्रचारकः[62] । तस्य धर्मदर्शनेन सह 'पञ्चसखा'गणः प्रभावितः । माध्वाचार्यपन्थी नरसिंहमुनि-नरसिंहतीर्थः-जगन्नाथतीर्थ इत्यादयः प्रमुखा वैष्णवाः अस्य मतस्य प्रचारपूर्वकं गङ्गवंशस्य पृष्ठपोषकतां प्राप्तवन्तः । तदनन्तरं रुद्रसम्प्रदायस्य प्रवर्त्तकः विष्णुस्वामी ख्रीष्टीयद्वादशशतकस्य अन्तिमभागे द्राविडराजस्य पाण्ड्यदेशात् श्रीक्षेत्रमाजगाम । पुर्यां मार्कण्डेश्वरपुष्करण्याः समीपे विष्णुस्वामिमठः तेन स्थापितः। स एव भगवान् श्रीरामचन्द्रं भगवतो विष्णोः पूर्णस्वरूपमिति परिकल्पितवान्[63] । (स एव बालेश्वरजिल्लास्थितरेमुणानिकटवर्त्तिनि मरेईनामकग्रामे जातः[64] ।) अन्यतमवैष्णवाचार्य निम्बार्को विष्णुस्वामिनः सामकालिक एव । स भवति-द्वैतवादस्य प्रचारकः । अस्य मतवादस्य प्रभाव उत्कले प्रभूतमासीत् ।

रामानन्दिसम्प्रदायस्य प्रतिष्ठाता रामानन्दः श्रीक्षेत्रागमनं कृतवान् । स

एव एकेश्वरवादस्य प्रचारक आसीत् । रामानन्दानन्तरं दक्षिणभारतस्य प्रख्यात-वैष्णवसाधकः वल्लभाचार्यः स्वधर्मप्रचारार्थं श्रीक्षेत्रञ्च आजगाम[65] । पञ्चदशशतके उत्कलव्यासस्य सारलादासस्य महाभारतविरचनात् प्राक् उत्कले वैष्णवधर्मस्य प्रचारोऽभूत् । उत्कलीयवैष्णवसाधकः सारलादासः योगवादी, शून्यवादी, ज्ञानमिश्राया भक्तेः उपासकः आसीत् । पञ्चदशशतकस्य मध्यभागे उत्कले धर्मसाहित्यस्य रसात्मकभक्तेः निदर्शनं दृश्यते । षोडशशतकस्य प्रारम्भे श्रीचैतन्यः उत्कलागमनपूर्वकं विशुद्धवैष्णवधर्मं परिपुष्टमकोरत् । श्रीक्षेत्रधामपुरी वैष्णवक्षेत्र-भावेन विश्वविदिता । श्रीजगन्नाथो भवति अस्य उपास्यदेवता । महाविष्णुः जगन्नाथः, सदाशिवो बलभद्रः, शक्तिमयी सुभद्रादेवी अत्रैव पूजिता भवन्ति । अतः उत्कले धर्मसाहित्यस्य क्षेत्रे श्रीजगन्नाथस्य प्राधान्यमविसंवादितम् । जगन्नाथो न केवलम् अवतारी अपि तु परंब्रह्मालेखशून्यनिरञ्जनभावेन परिकल्पितः[66] ।

उत्कले वैष्णवधर्मस्य धाराद्वयं सुप्राचीनकालात् प्रवाहितम् । एका भवति कृष्णभक्तिधारा अन्या च रामभक्तिधारा । कृष्णोपासकानां मध्ये पुनः धाराद्वयं परिलक्ष्यते । एका भवति शुद्धा भक्तिः अपरा च ज्ञानमिश्रा भक्तिः । शुद्धा भक्तिधारा गौडीयवैष्णवधर्मनाम्ना भवति । ज्ञानमिश्रभक्तिमार्ग उत्कलीयवैष्णवधर्मनाम्ना अभिहितो भवति[67] ।

उत्कलीयवैष्णवधारा भागद्वयेन विभाजयितुं शक्यते । एका भवति 'उत्कलीयवैष्णवधारा' अपरा च 'गौडीयवैष्णवधारा' । श्रीचैतन्य सामसमयिको-त्कलीयज्ञानमिश्रभक्तेः अनुसरणकारिणः पञ्चसखाः तथा तेषाम् अनुगामिनः उत्कलीयवैष्णवाः, चैतन्यस्य अनुगामिनो रागानुगायाः भक्तेः अनुसरणकारिणो वैष्णवाः गौडीयवैष्णवनाम्ना अभिहिताः ।

(क) गौडीयवैष्णवः -

गौडीयवैष्णवाः श्रीकृष्णं परमपूज्यदेवमिति मन्यन्ते । यथा-'एतेचांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्'[68] । संस्कृतभागवतं गौडीय-वैष्णवानां सर्वश्रेष्ठग्रन्थः । गौडीयवैष्णवकवयः तेषां रचनासु श्रीकृष्णस्य जयगानं कुर्वन्ति । गौडीयवैष्णवकविः अभिमन्युसामन्तसिंहारः तस्य 'प्रेमचिन्तामणि'ग्रन्थे स्वस्य उपास्यदेव श्रीकृष्णस्य चिरवन्दनां करोति[69] । यथा-

जय नन्द नन्दन श्रीकमल-चरण,
सकल जनक भव बन्धन हरण ॥ (उत्कलभाषा)

श्रीचैतन्यस्य अनुगामिनो गौडीयवैष्णवाः तेषाम् इष्टदेवं श्रीकृष्णम् अवतारीति

मन्यन्ते । गौडीयवैष्णवककविर्भक्तचरणदासः स्वस्य मनशिक्षाकाव्येऽपि[70] भक्तिवादं प्रतिपादयति । गौडीयवैष्णवाः रागानुगा प्रेमभक्तिमार्गस्य अनुगामिनः । ते भक्तिमार्गेण परमपुरुषस्य सत्ताया उपलब्धिं कुर्वन्ति । तेषां मते भक्तिं विना ज्ञानोदयो न भवति । मथुरामङ्गलकाव्ये भक्तकविर्भक्तचरणदासो भक्तिमार्गे एव श्रेयः-प्रेयो मार्गः इति कथयति । वैष्णवभक्तकविर्देवदुर्लभदासः तस्य 'रहस्यमञ्जरी'काव्यस्य षष्ठच्छान्दे प्रेमभक्तेः उत्कर्षं प्रतिपादयति[71] । यथा—

चारि भक्ति मध्ये अटे सार,
से भक्ति अटइ कोठ गोपीमानङ्कर । (उत्कलभाषा)

गौडीयवैष्णवानां मते सर्वश्रेष्ठक्षेत्रं वृन्दावनम् । प्रेमभक्तिः तेषां एकान्तकाम्या । कुत्रापि मुक्तिः तेषां न परमा लक्ष्या । अपि तु श्रीकृष्णस्य चरणसेवा लक्ष्या भवति । गौडीयवैष्णवाः तथा कामगायत्र्युपासकाः ये सन्ति, तेषां मते संसारस्य उत्पत्तिः कामनातो जायते । यदा कामः शुद्धप्रेम्णा परिणतो भवति तदा भगवत्प्राप्तिर्भवति । न केवलं ते कामगायत्र्या उपासकाः अपि तु युगलमन्त्रस्य उपासकाः आसन् । गौडीयवैष्णवाः-

हरेकृष्ण हरेकृष्ण कृष्ण कृष्ण हरे हरे ।
हरेराम हरेराम राम राम हरे हरे ॥

इति मन्त्रजपं कुर्वन्ति । एतेषां मतेन उज्ज्वलरसः श्रेष्ठः रसः । उज्ज्वलरसस्य स्थायीभावो भवति श्रीकृष्णविषयक रतिभावः । संस्कृतभागवतमहापुराणस्य दशमस्कन्दः श्रीचैतन्यस्य सामसमयिकवैष्णवानां कृते श्रेष्ठग्रन्थः । तेषां मते आदौ लीला पश्चात् लयो भवति । एते परकीयाप्रीतिविश्वासिनः । संस्कृतभागवतस्य दशमस्कन्धो वेदतुल्यो मन्यते स्म । द्वैतवादिनां गौडीयवैष्णवानाम् अनुसृता नवधाभक्तिर्भवति—

श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥[72]

(ख) उत्कलीयवैष्णवः -

उत्कलीयवैष्णवानाम् आराध्यदेवो भवति श्रीक्षेत्रनिवासी श्रीजगन्नाथः । तेषां काव्येषु श्रीजगन्नाथस्य वन्दना दृश्यते[73] । यशोवन्तस्य शिष्यः सुदर्शनोऽपि तस्य 'चउराशी आज्ञा' काव्येऽपि जगन्नाथं वन्दते[74] । तेषां मते परमाराध्य श्रीजगन्नाथो हि अवतारी । जगन्नाथो भवति महाविष्णुः कृष्णाद्यवतारः तस्मात् सम्भूतः । ज्ञानमिश्रायाः प्रेमभक्तेः साधकाः उत्कलीयवैष्णवाः योगसाधना एव

श्रेष्ठमार्ग इति कथयन्ति । ज्ञानमार्गेण परमपुरुषस्य भगवत आश्लेषो लभ्यते । अनेन मार्गेण जीवन्मुक्तिर्भवति । ते राधाकृष्णयोर्मध्ये जीवपरमात्मत्वम् आरोपयन्ति । तेषां मते ज्ञानमार्गः श्रेष्ठमार्गः । उत्कलीयवैष्णवानां मते श्रीपुरुषोत्तमक्षेत्रं नित्यं धाम भवति । यशोवन्तदासः तस्य 'प्रेमभक्तिब्रह्मगीता'काव्ये श्रीक्षेत्रस्य महत्त्वं प्रतिपादयति[75] । उत्कलीयवैष्णवकविः दिवाकरदासः स्वस्य जगन्नाथचरितामृत-काव्येऽपि श्रीक्षेत्रस्य माहात्म्यवर्णनं करोति । उत्कलीयवैष्णवाः पञ्चसखासाधकाः सायुज्यमुक्तेः उपासकाः । उत्कलीयवैष्णवाः राधाकृष्णयोर्युगलगायत्रीमन्त्रस्य उपासकाः । शान्तिरसः प्रियः । तेषां मते यन्त्र-तन्त्र-मन्त्र-च्छाया-ज्योति-अवाड-हज-समाधि-रसगुणप्रभृतिर्भवति नवधा भक्तिः । यथा—

यन्त्रमन्त्रं तन्त्रञ्चैव च्छायाज्योतिरवाडकं
सहज-समाधि-रसगुणं च यो जानाति स वैष्णवः[76] ॥

उत्कलीयवैष्णवाः परकीयाप्रेम्णो विरोधिनः संस्कृतभागवतग्रन्थं श्रेष्ठग्रन्थ इति मानयन्ति । ते भागवतस्य एकादशस्कन्धं वेदतुल्यं मन्यन्ते । ते पिण्डब्रह्माण्डतत्त्वस्य प्रचारकाः भवन्ति । एतेषां मतेन आदौ लयः पश्चात् लीला । अद्वैतवादिन उत्कलीयवैष्णवाः निर्गुणोपासकाः । तेषां साहित्ये नाम्नो माहात्म्यम् अनेकत्र परिलक्ष्यते ।

साधारणतः वैष्णवधर्मो विष्णूपासनामूलकधर्मात् जायते । विष्णूपासना प्राचीनवैदिकसाहित्यात् प्राप्यते । वैष्णवाः अवतारवादोपरि विश्वासं स्थापयन्ति । अवतारवादो वेदस्य परवर्त्तिकालात् प्रचलन्नास्ते । शतपथब्राह्मणादिषु स्थलविशेषेषु वामन-मत्स्य-कूर्मोवताराः परिदृष्टाः । तैत्तिरीयब्राह्मणे वराह-नरसिंहावतारयोः परिकल्पना भवति । गीता-महाभारतादिधर्मग्रन्थेषु समाजस्य रक्षणाय भगवतो विष्णोः अवतारविषयो वर्णितोऽस्ति[77] । महाभारतस्य शान्तिपर्वणि विष्णोः दशावतारवर्णना प्राप्यते[78] । महाभारतस्य नारायणभागे वराह-वामन-नरसिंह-मनु-राम-भार्गव-राम-दशरथि-हंस-कूर्म-मत्स्य-कल्क्याद्य-वताराणाम् उल्लेखोऽस्ति[79] । जयदेवकृत 'गीतगोविन्दे' श्रीकृष्णो हि स्वयं विष्णुः । तस्मिन् काव्ये मत्स्य-कूर्म-वराह-नरसिंह-वामन-भार्गवराम-दशरथिराम-हलधरराम-बुद्ध-कल्क्यादीनां दशानामवताराणां वर्णनमस्ति[80] ।

उत्कले अवतारवादपरिकल्ना अतीव प्राचीना । खीष्टीय षष्ठ-सप्तम-शतकयोः बलाङ्गीरजिल्लास्थित-सईतालग्रामे विष्णुमन्दिरे खोदितो दशावतारविग्रहो लभ्यते । तथैव वेदेऽपि दारुब्रह्मणो जगन्नाथस्य सूचनमस्तीति केचन प्रमिण्वन्ति ।

सप्तमशतके संस्कृतसाहित्ये जगन्नाथ नाम विद्यते । स्थूलतः जगन्नाथः स्वयमेव विष्णुः । तस्य उपासना अतिप्राचीना भवति । उत्कले वैष्णवधर्मो बहुप्राचीनकालात् राम-कृष्ण-जगन्नाथान् आधारीकृत्य तिस्रो भक्तिधाराः प्रवाहिताः । सारलादास-साहित्यादारभ्य अद्यापि उत्कले रामोपासना-कृष्णोपासना-जगन्नाथोपासनाः प्रवाहिताः भवन्ति ।

(i) रामोपासना—

बहुप्राचीनकालात् रामायणस्य तथा रामचरितस्य वर्णना परिदृष्टा भवति। ऋग्वेदे सीताया धनदात्री-फलदात्रीदेवीरूपेण स्तुतिः क्रियते[81] । गवेषकाणां मते वैदिकसाहित्ये वर्णिता सीता रामायणे वर्णिता सीता अभिन्ना । जैन-बौद्धसाहित्येऽपि रामचरितस्य अवतारणा भवति 'बुद्धचरिते' । अश्वघोषः रामायणस्य सुन्दराकाण्डस्य श्लोकं गृह्णाति । रामायणस्य अन्धमुनेः उपाख्यानं, बलिरामकथोपकथनादिविषयः नाम जातकमहासुत सोमजातकग्रन्थे परिदृष्टः[82]। भारतीयसंस्कृतिं प्रति वाल्मीकिरामायणस्य महदनुदानमस्ति । अद्यापि अस्य ग्रन्थस्य प्रभावो भारतीयजनजीवने प्रतिफलितः । अस्माकं देशस्य प्राचीनसारस्वत सम्पद् भवति पुराणसाहित्यम् । भागवतपुराणे आदौ सीतादेवी लक्ष्मीदेव्या सह परिकल्पिता[83] ।

संस्कृतभाषया लिखितं काव्यं मुख्यतः रामकृष्णौ आधारीकृत्य वर्त्तते। महर्षिवाल्मीकिकृत रामायणम् उपजीव्य महाकविकालिदासः संस्कृतभाषया काव्यं विरचितवान् । ऊनविंशतिसर्गसंवलिते महाकाव्ये रघुवंशे रामचरितस्य वर्णना भवति। प्रवरसेन कृत 'सेतुबन्धकाव्ये' कुमारदासकृत 'जानकीहरणे', भट्टिस्वामिकृत 'रावणवधमहाकाव्ये', मोहनस्वामिकृत 'रामरहस्य' इत्यादि काव्येषु रामचरितवर्णनमस्ति । 'प्रतिमानाटक'-'अभिषेक'-'महावीरचरित'-'उत्तररामचरित'-'कुन्दमाला'-'बालरामायणम्'-'आश्चर्यचूडामणि'-'अभिनवराघव'-'रघुविलासः'-'रामाभ्युदयः' इत्यादीनि संस्कृतनाटकेषु राम-चरितमवलम्ब्य विरचितानि । न केवलं भारतवर्षे रामकथावर्णनं भवति, अपि तु अन्येषु प्रान्तेषु रामकथा जीविता । इण्डोचीन-श्याम-काम्बोडिया-जाभा-माल्यवर्माप्रभृतिदेशेषु रामोपासनापरम्परा बहुप्राचीनकालात् प्रचलतितराम् । प्राचीनब्रह्मदेशे रामोपासनायाः जनप्रियता प्रकृष्टनिदर्शनम् । पागाननामकस्थाने १०-११शतके निर्मिता रामचन्द्रस्य मूर्त्तिः प्राप्यते[84] । जाभाद्वीपः राम-पाण्डवानां जन्मभूमिः । अधुना तत्रैव रामायणस्य विभिन्नदृश्यं लोकनाट्यरूपेण प्रदर्शितम्[85]।

प्राचीनकाम्बोडियाराज्ये त्रिंशतः अधिकाः तालपत्रमातृकाः प्राप्यन्ते । तेषां मध्ये रामायणं महाभारतं च स्तः । मन्दिरगात्रेषु रामायण-महाभारतयोर्घटनावली खोदिता भवति[86] । स्कन्दपुराणेऽपि रामनामप्रयोगः समुपलभ्यते[87] ।

उत्कले रामोपासना बहुप्राचीना । महाकविकालिदासस्य 'मेघदूतकाव्ये' रामगिरि आश्रमः विरहिण एकस्य यक्षस्य निर्वासनस्थानम्[88] । स रामगिरिः आधुनिक-कोरापुटमण्डले अवस्थितः । रामगिरिपर्वतः रामगिरिग्रामः च अद्यापि रामचन्द्रस्य पवित्रस्मृतिं वहतः । पारलाखेमुण्डिस्थिते ताम्रशासने दुर्जयवंशी राजा पृथ्वामहाराजः स्वयं श्रीराम इव दक्षो यशस्वी राजा इति उद्घोषयति[89] । वाल्मीकिरामायणस्य लोकप्रियताहेतोः तत्कालीनमन्दिरगात्रेषु रामायणस्य कथावस्तु प्रायशः खोदितमभूत् । ख्रीष्टीयषष्ठशतके शैलोद्भववंशीयराजानां राजत्वकाले भुवनेश्वरस्थितस्वर्णजालेश्वरमन्दिरे मृगयावध-सप्ततालभेद-बालिवधादीनि दृश्यानि अङ्कितानि भवन्ति । दशमशतके निर्मित लिङ्गराजमन्दिरे समग्ररामचरितं खोदितं भवति[90] । सम्बलपुरमण्डलस्य पूजारीपल्लीग्रामस्य एकस्मिन् मन्दिरे उत्कीर्णशिलालेखात् ज्ञायते यद् एकादशशतके अत्र नारायणनामकः कविः रसमयं काव्यं रामाभ्युदयं विरचितवात्[91] ।

रामचरितमाधारीकृत्य उत्कलीयसंस्कृतपण्डितकृतेषु काव्येषु उत्कले रामोपासनायाः प्राचीनता ज्ञातुं शक्यते । अष्टम-नवमशतकयोः कविमुरारिमिश्रः 'अनर्घराघव'नाटकं व्यरचयत्[92] । तदनन्तरम् एकादशशतके नारायणसत्कविना 'रामाभ्युदय'महाकाव्यं विरचितम् । गङ्गराजत्वकाले वैष्णवश्रेष्ठकविः जयदेवः 'गीतगोविन्द'नामके काव्येऽपि श्रीरामस्य स्तुतिं करोति[93] । १४५८मिते ख्रीष्टाब्दे प्रतापरुद्रदेवस्य सभाकविर्मार्कण्डेयमिश्रो 'दशग्रीववध'महाकाव्यम् अलिखत्[94] । षोडशशतके भोईवंशीयराजस्य चक्रप्रतापस्य सभाकविश्चिन्तामणिमिश्रः रामचरितमाश्रित्य त्रिशिरोवधव्यायोगं प्रणीतवान्[95] । अष्टादशशतकस्य प्रथमार्द्धे वासुदेवप्रहराजः 'राघवयादवीयमहाकाव्य'नामकं काव्यम् अलिखत्[96] । पीताम्बरमिश्रः 'श्रीरामविरुदावली'नामकमेकं काव्यं व्यरचयत् । एतद्भिन्नाः अन्येऽपि बहवः उत्कलीयाः संस्कृतकवयः रामचरितमाश्रित्य काव्यविरचनेन संस्कृतसाहित्यं संवर्धयन्ति । अनेन प्रमाणेन ज्ञायते यद् बहुप्राचीनकालात् रामोपासना भारतवर्षे विशेषतः उत्कलप्रान्ते च दृढमूला दृश्यते ।

(ii) कृष्णोपासना—

वैदिकयुगादारभ्य साम्प्रतिकं कालं यावत् विष्णूपासनायाः प्रचलनं

भवति। वैदिकयुगेऽस्मिन् देवतासु विष्णोः विशेषेण सूर्यदेवतारूपेण गणनं भवति। अधुना तु विष्णु-कृष्ण-हरि-राम-वासुदेवरूपेण विष्णुः परिकल्पितः[97] । वैष्णवधर्मस्य उद्भवस्य विकाशस्य च विषये आलोचकाः कृष्णवासुदेवोपासनामपि वैष्णवोपासनायामन्तर्भावं कुर्वन्ति । कृष्णवासुदेवोपासना हि वैष्णवोपासनातः प्राचीनतरा । कृष्णवासुदेवोपासनायाः प्रचलनं वैष्णवधर्मस्य च प्लावनं भारतवर्षे मौर्यसाम्राज्ये प्रतिष्ठितमभूत् । मौर्ययुगादनन्तरं धर्मोऽयं लोकप्रियो भवति । ऋग्वेद-संहितायाम् अष्टममण्डलस्य[99] सूक्तस्य एवं दशममण्डलस्य[100] सूक्तस्य ऋषिः कृष्णनाम धारयति ।

स्कन्दपुराणेऽपि कृष्णनामप्रयोगो विद्यते[101] । सम्भवतः ख्री.पू. चतुर्थशतके महाभारते कृष्णस्य भूमिका मुख्या भवति । ख्री.पू. ३५०मिते काले पाणिनिरचिते अष्टाध्यायीग्रन्थे कृष्णोपासनायाः प्रामाण्यं दृश्यते । तत्र 'वासुदेवार्ज्जुनाभ्यां वुन्'[103] । ग्रीक्राजदूत मेघास्थिनिजस्य प्रायः ख्री.पू. ३२०मिते अब्दे वर्णनानुसारेण यमुनानदीकूले मथुराकृष्णपुरे कृष्णोपासना प्रचलिततराम्[104]। भगवद्गीतायां श्रेष्ठदेवता कृष्णो भवति[105] । कृष्णोपासनायाः प्राचीनताप्रमाणार्थम् अभिलेखप्रमाणस्य अभावो नास्ति । कृष्णवृत्तान्तः हरिवंशे, विष्णुपुराणे, भगवद्गीतायां, महाभारते, भागवते, पुराणादिग्रन्थेषु च दृश्यते । कुशाणराजत्वस्य प्रारम्भे (ख्रीष्टीयप्रथमशतके) मथुरानिकटस्थे गायत्रीकुन्दनामकस्थाने प्रस्तरनिर्मिता श्रीकृष्णस्य बाल्यलीलामूर्त्तिः खोदिता भवति[106] । गुप्तयुगेऽपि कृष्णोपासना प्रचलतितराम् । ६६१ ख्रीष्टाब्दे उदयपुरशिलालेखे कृष्णगोपीसम्पर्के उल्लेखोऽस्ति[107]।

कृष्णकैन्द्रिकधर्मे राधाया उपासना महत्त्वपूर्णा भवति। द्वादशशतके रचित जयदेवकृत 'गीतगोविन्द' गीतिकाव्ये श्रीराधाया नामोल्लेखोऽस्ति । ख्री. ९८१मिते अब्दे उत्कीर्णवाक्पतिमुञ्जस्य ताम्रलेखे श्रीराधायाः प्राधान्यं वर्णितमस्ति । पद्मपुराणे ब्रह्मवैवर्त्तपुराणे च राधाकृष्णयोरुपासनायाः वैष्णवसम्प्रदाये परिदृष्टिर्भवति।

समग्रे उत्कलखण्डे कृष्णचरितं प्राचीनकालात् लोकप्रियं भवति । मुख्यतः श्रीकृष्णस्य बाल्यलीला बहुलभावेन समाजे प्रचलितास्ते सप्तमशतके भुवनेश्वरस्थिते एकस्मिन् मन्दिरे श्रीकृष्णस्य कालीयदलनविग्रहोऽधुना राज्यसंग्रहालये संरक्षितः भवति[108] । प्राचीनसमाजे श्रीकृष्णः परमत्राणकर्त्तृरूपेण गृहीतः । उत्कले बहवः संस्कृतविद्वांसः कृष्णचरितस्य तथा कृष्णलीलाया वर्णनपुरःसरं संस्कृतकाव्यानि विरचयन्ति । तेषु उत्कलीयकविर्जयदेवः अन्यतमः। तस्य अमरकृतिः गीतगोविन्दं वैष्णवभक्तानां समक्षम् आदरणीयग्रन्थः ।

यतीन्द्ररघूत्तमतीर्थकृत 'मुकुन्दविलासमहाकाव्यम्', 'श्रीकृष्णविलासमहाकाव्यम्', रामचन्द्रखड्गरायस्य 'नरहरिचरितम्', हरेकृष्णपुरोहितस्य 'राधाविलास। महाकाव्यम्', कविभूषणगोविन्दसामन्तरायस्य 'व्रजयुवविलासः', 'सङ्गीतचिन्तामणिः', 'गीतमुकुन्दं' च इत्यादीनि काव्यानि कृष्णपरकत्वेन ख्यातानि[109]। एतेषु काव्येषु श्रीकृष्णस्य तथा कृष्णोपासनाया उत्कर्षो लभ्यते।

(iii) जगन्नाथोपासना—

श्रीजगन्नाथो हि उत्कलीयसंस्कृतेस्तथा धर्मस्य प्राणकेन्द्रम्। उत्कलस्य संस्कृतेर्धर्मस्य च क्रमविकाशेन सह जगन्नाथस्य ओतःप्रोतश्च सम्बन्धो वर्त्तते। जगन्नाथधर्मः सर्वधर्मसमन्वय इति कथ्यते। वैदिकयुगात् प्रागपि जगन्नाथोपासना प्रचलिता इति केषाञ्चित् मतम्। वेदभाष्यकारस्य सायणाचार्यस्य खीष्टीय १३००-१३८० कृतयो ऋग्वेदाथर्ववेदभाष्ययोः दारुब्रह्मपुरुषोत्तमभावेन परिकल्पितमिति सूच्यते। दारुपूजापद्धतिः बहुप्राचीनकालात् प्रचलिता[112]। वैदिकसाहित्यादनन्तरम् उपनिषदि वर्णितात् पुरुषस्वरूपात् अपाणिपादस्य पुरुषोत्तमस्य स्वरूपसम्बन्धे सम्यक् सूचना दीयते[113]। वाल्मीकिरामायणस्य उत्तरकाण्डे, महाभारतस्य शान्तिपर्वणि च श्रीजगन्नाथस्य उल्लेखः अस्ति। दारुविग्रह-पुरुषोत्तमजगन्नाथस्य सम्बन्धिनी विवरणी स्कन्दपुराणे प्राप्यते[114]। जगन्नाथ-इन्द्रद्युम्न-सनातन-वटकृष्णसम्बन्धितथ्यं ब्रह्मपुराणात् प्राप्यते[115]। गरुडपुराणेऽपि जगन्नाथनामप्रयोगो दृश्यते[116]। यथा—

वासुदेवो जगन्नाथो ब्रह्मात्माऽस्म्यहमेव।
देहि देहस्थितो नित्यः सर्वदेवविवर्जितः॥

अष्टमशतकस्य बौद्धव्रजयानशाखायाः प्रवर्त्तकः सम्बलराज-इन्द्रभूतिः स्वरचित ज्ञानसिद्धिकाव्यस्य मङ्गलाचरणे जगन्नाथं स्तौति।

प्रणिपत्य जगन्नाथं सर्वजिनवरार्च्चितम्।
सर्वबुद्धमयं सिद्धिव्यापिनं गगनोपमम्॥ इति।

पुनः ग्रन्थेऽस्मिन् अन्येषु चतुर्षु श्लोकेषु जगन्नाथनामोल्लेखो दृश्यते[117]। सप्तमाष्टम-शतकयोः बौद्धदेवतारूपेण ख्यातो जगन्नाथः क्रमशः ब्राह्मण्यधर्मस्य श्रेष्ठदेवतारूपेण पूजितोऽभूत्। दशमशतकस्य प्रथमार्द्धे रचिते कलिकापुराणे जगन्नाथ उत्कलीयानां प्रख्यातदेवता भवति[118]। रुद्रयामल[119] नामकस्य तन्त्रशास्त्रे जगन्नाथस्य स्तुतिः क्रियते। संस्कृतसाहित्ये गीतगोविन्दम् अद्वितीयगीतकाव्यम्। काव्येऽस्मिन् उत्कलकोकिलजयदेवोऽपि जगन्नाथं स्तौति[120]। सूर्यवंशस्य प्रतिष्ठाता

गजपतिकपिलेन्द्रदेवः स्वरचित 'परशुरामविजय'नाटके जगन्नाथस्य रुक्मिण्याः, श्रीकृष्णस्य तथा शिवस्य वर्णनां करोति । षोडशशतकस्य प्रारम्भे भक्तकविः रायरामानन्दपट्टनायकः 'श्रीजगन्नाथवल्लभ'नाटके श्रीकृष्णस्य श्रीजगन्नाथस्य च स्तुतिं करोति[121] ।

बहूनाम् उत्कलीयनरपतीनां उत्कलीयसंस्कृताभिलेखेषु उत्कलीयानाम् आराध्यदेवस्य जगन्नाथस्य सम्बन्धे बहुप्राचीनविवरणी दृश्यते । गङ्गवंशस्य प्रतिष्ठातुः श्रीजगन्नाथस्य स्तुतिं वर्णनमस्ति[122] । चोलगङ्गदेवस्य पुत्रस्य द्वितीयराज-राजदेवस्य (११७०-११९०) खीष्टाब्दे दासगोवा-ताम्रशासने जगन्नाथस्य १२०० खीष्टाब्दे भट्टदेवस्य भुवनेश्वर अभिलेखे श्रीहरेः जगन्नाथस्य स्तुतिगानं क्रियते । सूर्यवंशस्य स्थापयितुः कपिलेन्द्रदेवस्य (१४३५-१४६६) खीष्टाब्दे गोपीनाथपुर अभिलेखे जगन्नाथस्य प्रशस्तिः वर्णितास्ति[123] ।

जगन्नाथस्य उपासना कालक्रमेण नेपाल-ब्रह्मदेश-सिंहलप्रभृतिषु देशेषु प्रसारिता भवतीति ऐतिहासिकानां तथा प्रत्नतात्त्विकानां मतम् । ब्रह्मदेशस्य प्राचीन 'प्रोम' (Prome) नगर श्रीक्षेत्रनाम्ना निर्मितम्[124] । नेपाले बहुप्राचीनकालात् जगन्नाथोपासना अस्ति । अद्यापि तत्र अनेकानि जगन्नाथमन्दिराणि सन्ति । षोडशशतके तिब्बतीय ऐतिहासिको लामा-तारनाथः तस्य विवरण्यां श्रीजगन्नाथस्य सम्बन्धे बहु आख्यानं समुल्लिखति[125] । श्रीक्षेत्रस्य रीति-नीति-रथयात्रा-सम्बन्धे अधुनाऽपि सिंहलस्य दन्तमन्दिरे व्यवस्था परिपाल्यते[126] । सुदूर आमेरिकादेशेऽपि जगन्नाथमन्दिरं प्रतिष्ठितं भवति । पुनः रथयात्रा अनुष्ठिता भवति ।

श्रीजगन्नाथः उत्कलीयसंस्कृतेः तथा साहित्यस्य प्राणकेन्द्रम् । जगन्नाथः उत्कलीयानां देवता, श्रीक्षेत्रं मनुष्याणां कृते परममुक्तिपीठम् । श्रीजगन्नाथं तथा श्रीजगन्नाथपीठं च उपजीव्य उत्कलीयधर्मः साहित्यं संस्कृतिश्च विकाशं लभन्ते ।

***

सन्दर्भनिर्देशः
(Notes & Reference)

1. ऋग्वेद, 1.22.18, 4.53.3, 5.26.6, 6.70.1
2. Sudhakar Chattopadhyaya, *Evolution of Hindu Sect.* p-2
3. Ibid, p-2
4. सि.कौ. 1226
5. ऐ.ब्रा. 1.1.1
6. ऋ.वे. 1.164.46
7. ऋ.वे. 1.22.18
8. ऋ.वे. 1.22.17
9. ऋ.वे. 1.154.4
10. ऋ.वे. 1.154.5
11. स्क.पु.20.45
12. वि.ध.पु. 22.4.9
    तु- धाता मित्रोऽर्यमा रुद्रो वरुणः सूर्य एव च ।
    भगो विवस्वान् पूषा च सविता दशमः स्मृतः ।।
    एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते ।।
    तत्र आदित्य पद्यार्थे उद्धृतोऽंशः तथा च आदित्याना महं विष्णुः ।।
    - भ.गी. 5.10.21. V.S.Apte- *Practical Sanskrit English Dictionary*.
13. ग.पु. 5.2.
14. ऋ.वे. 10.82.5
15. ऋ.वे. 10.82.6
16. वि.पु. 1.4.5
17. म.स्मृ. 1.10
18. शत.ब्रा. 12.3.4.1
19. तै.ब्रा. 10.1.6
20. श.ब्रा. 1.1.3.1
21. तै.आ. 1.7.4.5
22. म.भा. 18.6.97

23. ह.वं. 62.43
24. भ.गी. 10.37
25. अष्टाध्यायी (पाणिनि) 4.3.98
26. भा.सं. पृ-91
27. भा.सं. पृ-92
28. अष्टाध्यायी 4.3.98
29. भा.सं. पृ-403
30. वैष्णवसंस्कृति और सिद्धान्त, पृ- 70
31. म.भा. (शान्तिपर्व) 348.49
32. कु.म.पु. 24.30-41
33. ऋ.वे. 8.85.3.4
34. म.भा. (शान्तिपर्व), 339.111-112
35. भारतीय धर्मशास्त्र और उनका इतिहास, पृ-85
36. म.भा. (शान्तिपर्व) 18.6.97
37. भारतीय धर्मशास्त्र और उनका इतिहास, पृ-352
38. भा.ध.शा.इ., पृ-354
39. N.R. Ray, *Brahmanical Gods in Burma,* Figures, p.10, plates- II.VIII
40. ओ.जा.इ. पृ-348
41. N.R. Ray, op cit, p-8.18
42. Ibid, p-17
43. ओ.जा.इ., पृ-395
44. Ibid, p-397
45. शैव एवं वैष्णव धर्म और दर्शन, पृ-16
46. Ibid, p-17
47. Bhandarkar, VSMRS, p-49
48. K.C. Panigrahi, *History of Orissa*, p-320
S.C. Behera, *History and Cult of Orissa*, p-374
49. *Epigraphea*, E.L.V. p-30
50. S.C. Behera, op cit, p.371
51. Ibid
52. *Epigraphea India* El., Vol. XXI, p- 153

53. *Epigraphea India* El., Vol. XXXI, p- 20
54. *History and Cult of Orissa*, op cit, p-372
55. E.L. Vol.XI, p-192
56. P.K. Mukherjee, op cit. p-101
57. H.K. Mahatab, *History of Orissa*, Part-II, p-563
58. *Inscription of Orissa,* Vol. III, Part-I, p-36
59. *J.A.H.R.S.*, Vol. I, p-113
60. *O.H.R.J.*, Vol. V, p-11
61. पञ्चसखा ओ ओडिआ साहित्य, पृ-2
62. ओ.सा.ध., पृ-223
63. ओ.सा.ध., पृ-223
64. जगबन्धु सिंह, प्राचीन उत्कल, पृ-159
65. ओ.सा.ध., पृ-224
66. ओडिशी वैष्णव धर्म, पृ-9
67. ओ.वै.ध., पृ-10
68. श्री.भा. 1.3.18
69. प्रेमचिन्तामणि, 2.41
70. मन शिक्षा काव्य, (षष्ठ अध्याय) प्रथमच्छान्द
71. रहस्यमञ्जरी- षष्ठछान्द
72. श्री.भा., 7.5.3
73. दाण्डिरामायण—

    बन्दई जगन्नाथ कमळा विलास
    श्री नीळगिरिवर शिखरे जार वास
    सुन्दर श्रीमुख चारु नीळवर्ण शोभा
    कि जाणि पटान्तर नीळवर्ण प्रभा ।। (आद्यकाण्ड प्रथमोऽध्याय)
74. चउराशी आज्ञा, "इष्ट जगन्नाथ बोलइ सेवा दारुब्रह्म अटइ" 42.280- Quoted in वंशीधर महान्ती- *ओडिआ साहित्यर इतिहास,* (तृतीय भाग), पृ.सं.-82-83
75. प्रेम भक्ति ब्रह्मगीता- पञ्चम अध्याय
76. गु.भ.ब्र.गी., २ खण्ड, ११ पटल
77. श्री.गी. 4.7.8
78. म.भा. (शान्तिपर्व), 348

79. *C.H.I.* Vol. IV, pp-133-134
80. Ibid, p. 135
81. पण्डित रामगोविन्द त्रिवेदी, वैदिक साहित्य, पृ- 66
82. बलरामदास, ओडिआ रामायण, पृ- 48
83. नरेन्द्रनाथ मिश्र, ब.ओ.रा., पृ-51
84. Ibid, p-8
85. B. Mal, *A Story of Indian Cultures*, p.287
86. डॉ. कामिल बुल्के, रामकथा उत्पत्ति और विकाश, पृ-261-285
87. स्क.पु. 20.37
88. मेघदूत, पूर्वमेघ, 1
89. *Inscriptions of Orissa*, Vol. I, Part-II, p-54-56
90. कोणार्क, ३१श संख्या, पृ-4
91. कोणार्क, ३१श संख्या, पृ-2
92. ओडिशार संस्कृत लेखा ओ लेखक, पृ-5
93. रामलीला, प्रथमभाग (मुखबन्ध), पृ-12-13
94. कोणार्क, पृ-21
95. K.N. Mohapatra, *Descriptve Catalogue of Sans MSS*, Vol. III, preface, p-CXX
96. नीलमणि मिश्रः, रामलीला (मुखबन्ध), पृ-16-11
97. ओ.सा.इ. (तृतीयभाग), पृ-1
98. P.Banerjee, *Early Indian Religions*, p-82
99. ऋ.वे. VIII. 85-87
100. ऋ.वे. X.42-44
101. स्क.पु. 20.37
102. ऋ.वे. 8.96.13
103. अष्टाध्यायी, 4.3.98
104. C.H.I., Vol.IV, p-122 and J.N. Farquhar, *Religious Literature of India*, p-49
105. C.H.I., Vol. iv, p-112
106. An rep A.S.I., 1925-26, p-184
107. Ibid, p-17
108. नवीन कुमार साहु, ओ.सा.इ., पृ-333

109. संस्कृत लेखा ओ लेखक, पृ- 12
110. ऋ.वे., X.155.3
111. अ.वे., 6.8.6
112. वेणीमाधव पाढी, दारु देवता, पृ-58
113. श्वे.उ. 3.19
114. स्क.पु. 20.72.74
115. ब्रह्मपुराण, ६३ अध्याय, ६७-७३ अध्याय
116. ग.पु. 5.3
117. ज्ञानसिद्धि, प्रथमश्लोक, 27.92., 2.28.5.8., Quoted in N.K. Sahu, *Budhism in Orissa*, page-145 and see also *Prachi Mahatmya*, Chap- VI, K.Mishra, Konark, p.39
118. कालिका पुराण, अ. 64.44
119. रुद्रयामल, (उ.त) 41.121
120. गीतगोविन्द, पृ-5
121. भगवानपण्डा, श्री जगन्नाथ, पृ-44
122. O.H.R.J., Vol. XVII, p-211
123. K.C. Mishra, *The Cult of Jagannath*, p-50
124. N.R. Ray, *Brahmanical Gods in Burma*, p-84
125. Bhupendranath Dutta, Mystic Tales of Lama Taranath and D.F. Chattopadhyaya, *Budhism in India.*
126. कोणार्क, पञ्चसखाविशेषाङ्क, सम्पादकीय ।

***

द्वितीयपरिच्छेदः

वैष्णवभक्तिकाव्यस्य परम्परा विशेषतः उत्कलेषु

किंवदन्तीतो ज्ञायते यत् वैदिकयुगेऽपि ऋषयः यथा अङ्गिरः-कण्डु-मार्कण्डेय-भृगु-पिप्पलाद-वामदेव-कपिल-दीर्घतमः प्रभृतय आगम्य उत्कलभूमेः प्रशंसां कुर्वन्ति । तथैव पुराणयुगेऽपि भगवान् रामचन्द्रः, पाण्डवाः, पराशरः, व्यासदेवः अन्ये च ऋषयः अपि स्वस्य भक्तिवादं प्रसारयन्ति । तदनन्तरं ये च साधकाः, कवयः, भक्ताः उत्कलस्य माहात्म्यं वर्द्धयन्ति तथा च भक्तेः प्रशंसां कुर्वन्ति ते भवन्ति आचार्यः शङ्कराचार्यः, आचार्यः परमपादः, शङ्करानन्दः, शिवतीर्थः, रामानुजः, यमुनाचार्यः, तिरुमल्लाचार्यः, विष्णुस्वामी, लक्ष्मीभद्रः, रामदासः, सुन्दरदासः, वासुदेवः, यशोवन्तः, माधवदासः, गुरुनानकः, कबीरः, नारायणदासः, तुकारामः, गुरुगोविन्दसिंहः, तैलङ्गस्वामी, श्रीचैतन्यः, रूपगोस्वामी, जीवगोस्वामी इत्यादयः प्रमुखाः सन्ति एते प्रमुखाः जातिधर्मवर्णनिर्विशेषेण स्वकीय धर्मधारां भक्तिवादस्य च प्रचारं प्रसारं च कृत्वा धर्मसाहित्यम् एकात्मभावेन परिणमयन्ति ।

भक्तेः स्वरूपम्—

इह हि संसारे सुखमेव मे शाश्वतं स्यात् दुःखं च कदाचिन्माभूदिति धिया दुःखं परिहातुं सुखं चोपलब्धुं सततमभिलषति प्राणिमात्रम् । न हि कोऽपि विवेकी स्वल्पेन सुखमनुभवति । सर्वोऽपि जनो निरन्तरमधिकाधिकं सुखमेवाभिलषति । जीवो यावदनन्तं सुखं न लभते तावत् प्रयतमान एव तिष्ठति । तथा च छान्दोग्योपनिषदि[1] 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमात्वेव विजिज्ञासितव्यः ।' एवं च भगवतः साक्षात्कारस्वरूपमेवात्यन्तिकमनन्तं सुखमेव जीवस्य वास्तविकं लक्ष्यं चरममुद्देश्यं मानवशरीरलाभस्य फलञ्चास्ति, आत्यन्तिक-निरतिशयसुखमेव मोक्षः । मुक्तिः परमपुरुषार्थः अपवर्गः कैवल्यं निर्वाणम् इति पर्यायान्तर्भूता । एतल्लब्ध्वा जीवः कृतकृत्यो भवति । न तस्य किञ्चिदवाप्य-मवशिष्यते । एतदेव सुखस्य चरमा सीमा परमा च गतिरस्ति । तथाचोक्तं श्वेताश्वतरोपनिषदि[2] 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनाय ।' अत एवाह बृहदारण्यकोपनिषदि[3] याज्ञवल्क्यो मैत्रेयं प्रति 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च' श्रीमद्भगवद्गीतायां च[4] —

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥

यद्यपि छान्दोग्योपनिषदि[5] 'अपाम सोमममृता अभूम' इति सोमपानादिभिर्लभ्यस्य स्वर्गादेरपि सुखं साधनत्वं प्रतीयते । तथापि 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इति गीतावचनानुसारं[6] भोगेन पुण्यक्षयानन्तरं स्वर्गच्युतिदर्शनात् स्वर्ग एव तदात्यन्तिकं सुखं मन्यते । वेदान्तसिद्धान्तानुसारमभेदोपासनाया निरतिशयानन्दरूपं पूर्णसुखस्वरूपं च ब्रह्म साक्षात्कृत्यैव जीवः सर्वदुःखविनिर्मुक्तो भूत्वा परमानन्दं विन्दते शाश्वतीं च शान्तिं लभते । पुराणानामनुसारं भेदोपासनया परमात्मनः साक्षात्कारं सम्पाद्य जन्ममृत्यु-बन्धनक्लेशरहितो जीवः सगुणस्य भगवतो नित्यलीलाधाम्नि निवसन् भगवत्सान्निध्यसुखमनुभवति । अतो भगवतः स्वरूपसाक्षात्कारमन्तरा न किमप्यस्त्यन्यद् वास्तविकं सुखम् । दिवाकरस्योदयेन नैशोऽन्धकारोऽपैति तथा सम्मुखीने साधुजने भक्तस्य पापराशिः प्रणश्यति । एवं च तस्य प्रवृत्तिः भगवदुन्मुखी भवति । अत एव साधूनां सङ्गमोऽमोघो दुर्लभश्च प्रतिपादितः ।

पदार्थवादिनि न्यायवैशेषिकदर्शने पदार्थज्ञानद्वारा निःश्रेयसपथं सूचयति । योगदर्शनं च जीवेश्वरयोरेकत्वाधिगमपूर्वकं समाधिना कैवल्यप्राप्तिं प्रतिपादयति । सांख्यदर्शनं तु प्रकृतिपुरुषयोर्विवेकात्मकज्ञानेन मुक्तिपथमुपदिशति । मीमांसादर्शनमपि वैदिकैः कर्मभिः संस्कारशुद्ध्या निर्वाणोपलब्धिं दर्शयति । अद्वैतब्रह्मज्ञानेन वेदान्तदर्शनं मोक्षाधिगममुद्घोषयति तथैव भगवतः सान्निध्योपलब्धिहेतुभूतं भक्तिदर्शनमपि भगवतत्त्वसाक्षात्कारद्वारा भक्तप्रवरान् परमपदं प्रापयति । अतो भक्त्या भगवतो वास्तविकं स्वरूपं विज्ञाय परमपुरुषार्थं निर्वाणपदं प्राप्तुं शक्यते । भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायां[7] चोक्तम्—

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥

समुद्रमध्ये तरन्त्याः तरङ्गमालाकुलायाः तरण्याश्चालकाः तथा आकाशे ध्रुवं निरीक्षमाणाः कदाचिदपि गन्तव्यपथे भ्रान्तदिशो न भवन्ति तथैव भक्तप्रवराः संसारसागरे कोटि-कोटि-जन्मभ्यो बम्भ्रम्यमाणाः ध्रुवताराररूपं भगवद्भक्तिरसमास्वादयन्तः कदापि संसारसागरे दिग्भ्रान्ताः कुपथगामिनो वा न भवन्ति । तस्मात् कारणात् भगवानेव भक्तानां हृदयमन्दिरे स्थितः सूर्योऽन्धकारमिव सर्वविधं दुर्व्यसनं निवारयति यथा भागवते[8] —

संकीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम् ।
प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्केऽभ्रमिवातिवातः ॥

पुराणानुसारं समाधिसुखस्येव भक्तिसुखस्यापि स्वतन्त्रपुरुषार्थत्वाद् भक्तियोगोऽपि परमपुरुषार्थोऽभिप्रेतः । अतः एव ज्ञानिनामपि भक्तिरावश्यकत्वेन अनिवार्या इति श्रीमद्भागवते[9] प्रतिपादिता—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥

भगवतो भक्तिर्भक्तान् दुःखबहुलसंसारात् परमानन्दपूर्णपरिस्थितौ समुपस्थापयितु-मेकमात्रसर्वसुलभं सुगमं साधनं निर्दिष्टमस्ति। एतत्तत्त्वस्य प्रतिपादनं प्रायः प्रतिपुराणं लभ्यते एव । भक्तितत्त्वस्य सर्वाङ्गीणविश्लेषणं सर्ववेदान्तसारे पुराणमूर्धन्ये वैष्णवतिलके श्रीमद्भागवतमहापुराणे प्रस्तुतमस्ति । तदनुसारं प्रेमपयोधौ पूर्णात्मनि परमात्मनि संसक्त्या भक्त्या समः कल्याणकारी कश्चन अन्यो मार्गो नास्ति । भक्त्या भक्तो यावत् पुलकिताङ्गो द्रवीभूतहृदयो विगलितानन्दाश्रुश्च न भवति तावद् आन्तरिकीं पवित्रतां नासादयति । भगवद्भक्त्या साकं परमानन्दसम्बन्धसत्त्वात् पापराशिः प्रणश्यति । यथा अग्निना सुवर्णं निर्मलं सत् स्वकीयं स्वाभाविकं स्वरूपं प्रतिपाद्यते तथैव जीवोऽपि भगवद्भक्त्या गलितमलिनसंस्कारः सन् नैजं स्वाभाविकं स्वरूपमासाद्य शाश्वतीं शान्तिमनुभवति । तथा चोक्तं श्रीमद्भागवते[10] असुरबालकान् प्रति प्रह्लादेन—

तदा पुमान् मुक्तसमस्तबन्धनस्तद्भाव भावानुकृताशयाकृतिः ।
निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥

अयमेव परमपुरुषार्थः, उत्कृष्टा सिद्धिः श्रेष्ठा च सम्पद् । अननैव मार्गेण मानवजन्मनः साफल्यम् । मानवजन्म लब्ध्वा यः आत्मज्ञानाय न प्रयतते, तस्य महती हानिर्भवति । अत एवोक्तं श्रीशङ्कराचार्यैः विवेकचूडामणि[11]ग्रन्थे । भागवते[12] अस्या तुलना एवमालोच्यते यथा—

लब्ध्वा जनो दुर्लभमत्र मानुषं कथञ्चिदव्यङ्गमयत्नतोऽनघ ।
पदारविन्दं न भजत्यसन्मतिर्गृहान्धकूपे पतितो यथा पशुः ॥

श्रीमद्भागवते[13] सर्वकामनया भगवद्भजनमेव सिद्धान्तितं यथा—

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजते पुरुषं परम् ॥

भगवतो भजनं मानवानाम् एकान्तमावश्यकम् । भागवतवचनानुसारं[14] मुक्तेः त्रीणि

साधनानि सन्ति यथा निष्कामकर्मानुष्ठानं ज्ञानं भक्तिश्चेति उक्तम्—

योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥

निष्कामकर्मणः कष्टसाध्यत्वात् भक्तिरेव सर्वसाधारणी सुसाध्या सुलभा च प्रतीयते। सत्ययुगादौ ज्ञानवैराग्ययोः मोक्षसाधकत्वेऽपि कलियुगे भक्तेः प्राधान्यमधिकं प्रतीयते । भक्तिर्भगवतः प्राणतोऽप्यधिका प्रियाऽस्ति । श्रीकृष्णः पाण्डवकुलनन्दनस्य धर्मराजयुधिष्ठिरस्य उत्कृष्टगुणगरिम्णा अभिभूय दुष्टकौरवकुलं दूरे समाक्षिप्य पाण्डवकुलस्य मङ्गलचिन्तायां नियतं व्यापृतो बभूव । सोऽपि सखा अर्जुनस्य भक्त्याकृष्टः हीनकर्म सारथ्यमपि स्वीचकार । भक्तप्रह्लादस्य भक्त्याकृष्टो विविधाभ्यो विपत्तिभ्यः रक्षितवान् । पुनश्च स एव पञ्चवर्षीयस्य ध्रुवस्य हिंस्र श्वापद समाकीर्णेऽरण्ये रक्षां चकार । द्वापरे कौरवसभायां दुष्टदुःशासनः द्रौपद्या वस्त्रं समाक्षिप्य यदा तां नग्नां कर्त्तुं प्रचक्रमे भगवानपि तदा तस्या हरिनामस्मरणमात्रेण वस्त्रदानं कृत्वा मानं रक्षति । अपि च भक्तिमर्यादां प्रचारितवान् प्रतिष्ठापितवान् च द्रौपद्याः पातिव्रत्यधर्मप्रकर्षः । महाभारतस्य सभापर्वणि एवमुक्तोऽस्ति[15] —

कृष्णं च विष्णुं च हरिं नरं च त्राणाय विक्रोशति याज्ञसेनी ।
ततस्तु धर्मोऽन्तरितो महात्मा समावृणोद्वै विविधैः सुवस्त्रैः ॥

व्रजवनितानां परमया भक्त्या प्रणयादिना समाकृष्टो भगवान् श्रीकृष्णः सर्वेषामेवाभीष्टं सम्पादयामास । सर्वदा कल्याणकरं भगवतः नामोच्चारयन्, रूपं चिन्तयन् सर्वविधाम् अलौकिकलीलामाकर्ण्यन् भगवति समासक्तो भक्तो मुक्तिं लब्ध्वा जन्ममरणचक्रे संक्रमितो न भवति । तथा चोक्तं श्रीमद्भागवते[16] —

शृण्वन् गृणन्, संस्मरयंश्च चिन्तयन् नामानि रूपाणि च मङ्गलानि ते ।
क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचेता न भवाय कल्पते ॥

अखिलब्रह्माण्डनायकस्य भगवतो नामानि गुणान्वा वर्णयितुं न कोऽपि जनः समर्थः। यतो हि भगवानस्ति अनन्तः तथैव तस्य गुणानां नाम्नां च नास्त्यन्तः । भक्त्या भगवन्नामोच्चारणेन भक्तानां मानसपटले तस्य सात्त्विकं स्वरूपं सहसा प्रतिबिम्बितं भवति । यदनुभूय भक्त्या आनन्दसागरे निमग्नाः सन्तो लोकोत्तरं सुखमाश्रयन्ते । भगवतो नामस्मरणमात्रेण हृदये विराजमानो विष्णुरपि भक्तानां सकलान् दोषान् विनाशयति । पद्मपुराणे[17] वर्णितमस्ति यद् एकवारमपि भगवन्नामोच्चारणेन मानवानामनेकजन्मभिः सञ्चितानि पापानि अपनोद्यन्ते यथाऽनलस्तुलराशिमनायासेन प्रदहति—

सकृत् स्मृतोऽपि गोविन्दो नृणां जन्मशतैरपि ।
पापराशिं दहत्याशु तुलराशिमिवानलः ॥

भगवन्नामोच्चारणेन भगवतो गुणानां ज्ञानं जायते । प्राणप्रयाणकाले दैवादपि समुच्चारितेन भगवन्नाम्ना कल्याणमेव जायते । भगवतो नामगुणकर्मणां कीर्त्तनं पापिनां मानवानां पापनाशकं महौषधम् । श्रीमद्भागवते अजामिलोपाख्यानमस्ति अतिप्रसिद्धम् ।

भगवान् सर्वसाक्षी, सर्वान्तर्यामी सर्वशक्तिमान्, सर्वेश्वरः, सर्वव्यापकः, निरतिशयज्ञानवान् सर्वज्ञश्चास्ति । यस्य भक्त्या मानवः सकलदुर्गुणदुःखविमुक्तो भूत्वा विशुद्धो भवति ।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

इति श्रीमद्भगवद्गीतायां[18] स्वकीयप्रतिज्ञानुसारं प्राणिनां कल्याणाय धर्मस्य स्थापनाय अधर्मस्य निरासाय, सतां संरक्षणाय, दुष्टानां दलनाय च समये समये स्वमायया देवमानवपश्वादियोनिषु अवतीर्य भक्तानाह्लादयति, समाजमर्यादां पालयति समस्तलोकान् सुखयति च ।

भगवद्गुणश्रवणमात्रेणैव समुद्रगामिन्या गङ्गाया अविच्छिन्नया धाराया इव भगवदभिमुखस्य समाहितस्य कामनाहीना गतिरेव भक्तियोगः प्रोक्तः, भागवतमहापुराणे[19] श्रीकृष्णेन स्वमातरं देवहूतिं प्रति उक्तम्—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥

भक्तप्रह्लादेनापि ईदृशमेव अविच्छिन्नं पूततमं प्रेम भगवन्तं नृसिंहं प्रति निवेदितमासीत् । भक्तिभावपूर्णचेतः जाह्नव्या अविरलप्रवाह इव सच्चिदानन्दसमुद्रे प्रधावेत्, सांसारिकी कापि बाधा गतिरोधं नैव करोति । यदि सर्वमपि कार्यं भगवद्भावाश्रितं कुर्यात् तदा तत्र दृढाया भक्तेरुदयो जायते । भक्तिदर्शनस्य सूत्रकाराः महर्षिनारदमहर्षिशाण्डिल्यप्रभृतयो महामुनयः स्वस्वग्रन्थेषु भक्तिलक्षणं कृतवन्तः । नारदेन स्वकीये नारदभक्तिसूत्रे[20] 'सा त्वस्मिन् परमप्रेमरूपा' इति सूत्रयता परमेश्वरे परमं

प्रेमैव भक्तिः । महर्षिणा शाण्डिल्येन शाण्डिल्यभक्तिसूत्रे[21] 'ईश्वरं प्रति परमानुराग एव भक्तिर्निगदिता' । यतो हि परमेश्वराभिमुखेन प्रेम्णैव जीवतोऽमृतरूपो मोक्षो लभ्यते । भक्तिविशेषप्रतिपादके भक्तिरसायने द्वितीय उल्लासे तु[22] —

द्रुते चित्ते प्रविष्टा या गोविन्दकारतास्थिरा ।
सा भक्तिरित्यभिहिता विशेषस्त्वधुनोच्यते ॥

रूपगोस्वामिना भक्तिरसामृतसिन्धौ[23] तु—

अन्याभिलाषिताशून्या ज्ञानकर्माद्यनावृतम् ।
आनकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥

अपि च[24] —

अनन्यममता विष्णौ ममता प्रेमसङ्गता ।
भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः ॥

भगवद्भक्तौ जीवमात्रस्यास्त्यधिकारो न्याययुक्तः । ईश्वरभक्तौ प्रधानतया मनुष्याणामेवाधिकारः अस्ति इति शास्त्रकाराः वदन्ति । भगवद्भक्तौ रूपस्यायुषश्च न मूल्यमस्ति । न च विद्यया धनस्य जातेश्चोत्कर्षोऽप्यपेक्ष्यते । न वा सदाचारस्य सद्गुणस्य च प्राधान्यमस्ति नापि बलं मुख्यं विद्यते । किन्तु प्रेमैवानन्यं प्रतीक्षते भगवान् । तथा रूपगोस्वामिना भक्तिरसामृतसिन्धौ चोक्तम्[25] —

व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का ।
का जातिर्विदुरस्य यादवपतेरुग्रस्य किं पौरुषम् ॥
कुब्जायाः कमनीयरूपमधिकं किं तत्सुदाम्नो धनम् ।
भक्त्या तुष्यति केवलं न च गुणैर्भक्तिप्रियो माधवः ॥

भक्तिर्भगवतः प्राणतोऽप्यधिका प्रियाऽस्ति । भगवत्प्रेममुग्धः भक्तः भगवदीयगुणान् कीर्त्तयन् समस्तमपि भुवनं पवित्रयति । भक्तस्य चित्ते भगवतो महत्त्वे प्रतिष्ठिते तस्य हृदयं भगवत्प्रेममाधुर्येण विजृम्भितं भवति । अहर्निशं स भगवदीयमहत्त्वं प्रकाशयितुं प्रवर्त्तते । भगवद्गीतायां चोक्तं यथा[26] —

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥

प्रगाढया भक्त्या प्रसन्नो भगवान् सर्वमपि कार्यं परित्यज्य भक्तस्य कृतेऽलौकिकं कर्म निवर्त्तयति । असम्भवञ्च कार्यं सम्भावयति । एतद्विषये श्रीमद्भागवते[27] व्यासदेवो वर्णयति यथा—

सख्युः प्रियस्य विप्रर्षेरङ्गसङ्गातिनिर्वृतः ।
प्रीतो व्यमुञ्चदब्बिन्दून् नेत्राभ्यां पुष्करेक्षणः ॥
अथोपवेश्य पर्यङ्के स्वयं सख्युः समर्हणम् ।
उपहृत्यावनिज्यास्य पादौ पादावनेजनीः ॥
अग्रहीच्छिरसा राजन् भगवांल्लोकपावनः ।
व्यलिम्पद् दिव्यगन्धेन चन्दनागुरुकुङ्कुमैः ॥

भक्तिर्भवति नवधा । तथाहि श्रीमद्भागवतस्य सप्तमस्कन्धे पञ्चमाध्याये भक्तराज-प्रह्लादेन[28] —

श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥

नवविधास्वपि भक्तिष्वेकविधया अपि भक्त्या भगवन्तं साक्षात्कृत्य भक्तोऽनायासेन संसारसागरादुत्तर्त्तुं शक्नोति । अत एव पद्मपुराणे भागवतमाहात्म्ये[29] भगवद्भक्ताना-मेवं प्राशस्त्यमुक्तम्—

निखिलभुवनमध्ये निर्धनास्तेऽपि धन्या-
निवसति हृदि येषां श्रीहरेर्भक्तिरेषा ।
हरिरपि निजलोकं सर्वथातो विहाय
प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धा ॥

वेदेषु भक्तिः—

वेदेषु एकस्यैव परब्रह्मणः स्तुतिर्बहुभिर्नामभिः रूपैश्च क्रियते । एकं सद् विप्रा बहुधा वदन्ति । कर्मकाण्ड-ज्ञानकाण्ड-उपासनात्मककाण्डस्य इष्टदेवं प्रति उपासनाकाण्डमाध्यमेन नवधाभक्तिर्बहुषु सूक्तेषु मन्त्रेषु च प्रपञ्चिताऽस्ति । तदेव भागवते स्पष्टतयोक्तं नवधाभक्तिरूपेण[30] ।

श्रवणम्— माण्डूक्योपनिषदशान्तिमन्त्रे[31] 'भद्रं कर्णेभिः शृणुयामदेवाः' । शुक्लयजुर्वेदे[32] उक्तं च- 'भद्रं कर्णेभिः शृणुयाम देवा' इति भद्रशब्दस्यार्थः कल्याणं भवति । कल्याणानां निधानम्, मङ्गलानां च मङ्गलम् इति वचनेन भगवान् परममङ्गलस्वरूपो भवति । भक्तः तमेव मङ्गलमयं परमेश्वरं संप्रार्थ्य तत्स्तुतिश्रवण-भक्तिं प्रकाशयति ।

कीर्त्तनम्— 'सुष्टुतिमिरयाभि'[33]
'इमा उ त्वा'[34]

एषु मन्त्रेषु कीर्त्तनरूपाया भक्तेर्वर्णनं भवति ।

स्मरणम्— "स्तव म त्वा स्वाध्यः"[35]
"भर्गोदेवस्य धीमहि"[36]
"हृत्पुण्डरीकमध्येषु"[37]

इत्यादिषु मन्त्रेषु परमेश्वरस्मरणरूपा भक्तिः प्रतिपाद्यते ।

पादसेवनम्— "पदं देवस्य"[38]
"इदं विष्णुः"[39]

इत्यादिमन्त्रेषु भगवत्पादसेवनरूपा भक्तिः प्रतिपाद्यते ।

अर्चनम्— "इन्द्राय मद्वने"[40]
"अर्चत प्रार्चत"[41]

अत्र भगवतः अर्चनभक्तेरुल्लेखः प्राप्यते ।

वन्दनम्— "अभि त्वा शूर नोनुमः"[42]
"समस्य मन्यवे"[43] ।

अत्र वन्दनात्मकं भक्तिवर्णनं प्राप्यते ।

दास्यम्— "यदध कच्च"[44] ।

अनेन मन्त्रेण दास्यभक्तिः प्रदर्शिता ।

सख्यम्— "देवानां सख्यमुपसेदिम वयम्"[45] ।

अनेनात्र सख्यभक्तेः वर्णनं विद्यते ।

आत्मनिवेदनम्— "यं रक्षन्ति"[46]
"मुमुक्षुर्वै शरणमहं प्रपद्ये"[47] ।

एभिर्मन्त्रैः अत्र आत्मनिवेदनात्मभक्तेः भावः दृश्यते । एवं बहुभिर्मन्त्रैः भक्तेः सुमहद् वर्णनं वेदेषु उपलभ्यते ।

उपनिषत्सु भक्तिः—

केचिद् वदन्ति उपनिषदि केवलमेव ज्ञानस्य चर्चा प्राप्यते । परन्तु ज्ञान-भक्ति-कर्मणाम् आलोचना विस्तृतया दृश्यते । उपनिषद् ज्ञानकाण्डस्य मान्यग्रन्थः भवति परन्तु भगवद्भक्तेः गरिमा अपि वर्णितोऽस्ति । ततः वैदिकयुगे स्वतःप्रवृत्ता भक्तिः इष्टदेवतां प्रति समुद्भासिता आसीत् । उपास्योपासकयोर्मध्ये सम्बन्धः अत्यन्तमोतःप्रोत आसीत् । अनन्तरं ब्राह्मणयुगे यागादिप्रधानतया साहित्यप्राबल्यात् उपास्यो देवः क्रमशः दुर्लभः समदृश्यत । पुनः एतादृशस्य रहस्यपूर्णस्य देवसम्बन्धावरकस्य सूत्रात्मकस्य साहितयस्य सत्त्वेऽपि कादाचित्कतया इष्टफलप्राप्तेः अनिष्टापत्तिप्रसङ्गात् च यागादिकं विधिं प्रति विरुद्धः स्वरः उच्चरितः ।

प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म ।
एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरा मृत्युं ते पुनरेवापि यान्ति ॥[48]

एवम् औपनिषदं साहित्यं यज्ञस्य वैफल्यमनुभावयत् विदेहात्मनः सत्तारूपेण विराजमानं देवतत्त्वं बोधयितुं समभीष्टम् । वस्तुतः अत्रापि भक्तेः धारा भिन्ना । अत्र बौद्धिकसत्तारूपेण विराजितस्य निर्गुणस्य, निराकारस्य, निष्कलस्य देवतत्त्वस्य ब्रह्मणो वा रहस्योन्मोचने परा हि विद्या उपनिषद् । अत्र भक्तस्य अन्तर्दृष्टेः उन्मीलनं बहिर्जगतः तस्या अपि सङ्कोचनम् । तद्द्वारा समाहितचेतसा च स्वेष्टानुभवसिद्धिः इति मार्गमुपनिषदुपदिशति । उपनिषदि सदैव ब्रह्मोपासना निर्दिष्टा । अपि च छान्दोग्योपनिषदि[49] मुण्डकोपनिषदि[50] च भक्तेः चारुतया वर्णनं दरीदृश्यते ।

सर्वेषां देवानामुपरि कश्चिदनिर्वचनीयो देवोप्यस्ति । यस्य तुलामिन्द्रो, वायुरग्निर्वा नार्हति । केनोपनिषदि उमा-हैमवतीसंवादे सर्वदेवमूलभूतं ब्रह्मेति प्रतिपादितम् । नेति नेति इति निषेधविशेषणद्वारा ब्रह्मणो वैशिष्ट्यं सर्वथोपपद्यते । अत्र सत्ताया निषेधो न अपि तु पारमार्थिकसत्तायाः प्रतिपादनं सर्वव्यावहारिकसत्ता-निषेधेन भवति इत्येव तत्त्वम् । औपनिषदिकचिन्तायां पारमार्थिकसत्ता स्वीक्रियते । जगदूर्ध्वं यदि जगदवच्छिन्नं भवति तस्य ईश्वरसंज्ञा भवति । अयमीश्वरः सर्वस्य शरणमुच्यते[51] । स पुनः सर्वस्य हृदयस्थ इत्युच्यते[52] । पुनरपि बहुदेवतावादः अद्वैतेन सह पर्यवस्यति । बृहदारण्यकोपनिषदि[53] याज्ञवल्क्य-विदग्धशाकल्यसंवादे अद्वैतस्यापि पराकाष्ठा सङ्केतिता । यदा शाकल्यः पृच्छति कति देवाः तदा याज्ञवल्क्यः त्रीणि सहस्राणि इति कथयति । पुनः पुनः पृष्टः एकमेव आत्मानं स प्रतिपादयति । कतम एको देव इति सर्वस्यात्मनः परायणं श्वेताश्वतरोपनिषदि एको देवः रुद्रः कथ्यते[54] ।

एको हि रुद्रो न द्वितीयाय तस्थु र्य इमान् लोकानीशत ईशनीभिः श्वेताश्वतरोपनिषदि रुद्रशिवादितत्त्वोर्ध्वं तत्त्वं रुद्र इति प्रतिपादितम् ।

यो देवोऽग्नौ योऽप्सु यो विश्वं भुवनमाविवेश[55] ।

एवं तस्य सर्वशक्तिमत्त्वं सर्वास्तित्वं, सर्वज्ञत्वं च सर्वथा प्रतिपादितम् ।

अयमात्मा समाहितचेतसा प्रसन्नात्मना एव उपलभ्यते ।
तमक्रतुः पश्यति वीतशोको धातुः प्रसादान् महिमानमात्मनः[56] ॥

आत्मनः प्रसादेनैवात्मा लभ्यते नोपदेशेन, न बौद्धिकव्यायामेन न वा व्युत्पन्नदर्शनेन ।

नायमात्मा प्रवचनेन लभ्यो न मेघया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्[57] ॥

प्रश्नोपनिषदि पैप्पलादः तपः श्रद्धां च आत्मलाभसाधनत्वेन निर्दिशति[58] । मुण्डकोपनिषदि[59] उपासनाया भावस्य च साधनतत्त्वं प्रतिपादितमस्ति । छान्दोग्योपनिषदि नारदस्य भक्तिभावस्य पराकाष्ठापि दृश्यते । ब्रह्मज्ञानार्थं च सनत्कुमारं पृच्छति । तस्याकुलता तस्यापि ब्रह्मणि निष्ठामेव प्रतिपादयति ।

उपासनाद्वारा इष्टदेवं प्रति नैकट्योपस्थितिर्लक्ष्यते । उपासनायां तत्त्वत्रयं सन्निविष्टम् । (१) उपासकः, (२) उपास्यदेव, (३) उपासनाव्यापारः च । पौनःपुनिकतया संलग्नमानसत्वेन इष्टदेवं प्रति शास्त्रविहितोपायेन ज्ञानान्तराविरुद्धत्वेन चेतसा ध्यानमेव उपासनायाः सार्थकतां समर्थयति ।

भक्तिधारायाः स्रोतः उपनिषदि नास्तीति न । उपनिषत्साहित्ये भक्तितत्त्वस्य बहुलप्रयोगः समुपलभ्यते । शरणापन्नभक्तानां भगवान् स्वस्य निर्मलदयया उद्धारं करोति । भक्तस्य कृते तदतिरिक्तम् अन्यत् किमपि कार्यं नास्ति । भागवतभावस्य धारा सूक्ष्मातिसूक्ष्मतया उपनिषदि दृश्यत एव । वासुदेवतत्त्वस्य वैष्णवतत्त्वस्य वा यत् स्वरूपमनन्तरं भक्तिपरम्परायां द्रुमायते तस्य सूक्ष्मबीजमुपनिषदि अस्ति । अतः सर्वेषामुपनिषत्सारभूतायां भगवद्गीतायामपि स्पष्टरूपेण वर्ण्यते यत्[60] —

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥

अतः भक्तिमार्ग एव श्रेष्ठमार्गः । वस्तुतः भावराजिषु तथा विरुद्धत्वं नावलोक्यते । केवलं वचनभेदमात्रं लक्ष्यते । भक्तिपरम्परायां भक्तेः पुङ्खानुपुङ्खवर्णनं चोपलभ्यते ।

पुराणेषु भक्तिः—

हिन्दुधर्मस्य क्रमविकाशस्य इतिहासो मुख्यतः भागत्रयेण विभज्यते । तद् भवति (१) कर्मप्रधानं वैदिकयुगम्, (२) ज्ञानप्रधान-औपनिषद्युगम्, (३) भक्तिप्रधानं पौराणिकयुगम् । यद्यपि बाहुल्येन प्रतिपुराणं ज्ञानकर्मयोगयोः आलोचनं भवति तथापि भक्तियोगस्य सुविस्तृतवर्णनं सर्वेषु पुराणेषु प्राप्यते । श्रीमद्भागवते भक्तिप्रसङ्गे श्रीकृष्णेन उक्तम्[61] —

यत् कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ।
योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥

कर्मतपोज्ञानवैराग्ययोगदानधर्मादिभिः यत् श्रेयः भवति तत्सर्वं भक्तियोगेन एव प्राप्यते । अतः भक्तियोगस्य श्रेष्ठत्वं च महत्त्वं सर्वेषु पुराणेषु प्रख्यापितम् । बृहन्नारदीयपुराणेषु उक्तम्[62] —

चाण्डालोऽपि मुनिश्रेष्ठः विष्णुभक्तो द्विजाधिकः ।
विष्णुभक्तिविहीनश्च द्विजोऽपि श्वपचाधिकः ॥

अत एव ईश्वरं प्रति ऐकान्तिकभक्त्या चाण्डालोऽपि ब्राह्मणापेक्षया श्रेयान् भवति । पुनश्च ब्राह्मणोऽपि यदि ईश्वरभक्तिरहितो भवति स चाण्डालात् न्यूनतरो भवति । भक्तिभावनायाः वर्णनं गरुडपुराणे एवमस्ति[63] —

यो न सर्वेश्वरे भक्तस्तं विद्यात् पुरुषाधमम् ।
नाधीतवेदशास्त्रोऽपि न कृतोऽध्वरसम्भवः ।
यो भक्तिं वहते विष्णोस्तेन सर्वं कृतं भवेत् ॥

ईश्वरं प्रति परानुरक्तेर्भक्तिभावनायाः वर्णनं विष्णुपुराणे वर्णितमस्ति यत्—

नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।
तेषु तेष्वचला भक्तिरच्युतास्तु सदा त्वयि ॥

भक्तप्रवरप्रह्लादेन उक्तं हे भगवन् अहं तु कर्मफलानुसारेण यां यां योनिं प्राप्स्यामि तासु तासु योनिषु त्वयि मम अचला भक्तिरस्तु इति अहं सततं प्रार्थये । कूर्मपुराणान्तर्गत-ईश्वरगीतायां ज्ञानिभक्तः सर्वोत्तमरूपेण वर्ण्यते । यत्[65] —

सर्वेषामेव भक्तानामिष्टः प्रियतमो मम ।
यो हि ज्ञानेन मां नित्यमाराधयति नान्यथा ॥

यस्य हृदि भक्तिर्जायते तस्य अन्यत् किमपि आवश्यकं नास्ति । अत एव भक्तिरेव मानवस्य मुख्यः पुरुषार्थ इति सिद्धम् । परां प्रसिद्धिं गतेभ्यः भिन्ना भक्तिरेव पञ्चमपुरुषार्थ इति स्वीकृतम् । मुक्तिः भक्तेरन्तरायः अवाञ्छनीया च भवति । भक्तिः स्वतन्त्ररसरूपेण अङ्गीकृता । भक्तिरस्तु आध्यात्मिकभावस्यानुभवार्थं मुख्यसारणी । भक्तिस्तु परमो धर्मः सिद्धीनां सारः । भगवतो भक्तिपरायणो भक्तः सर्वदा परमानन्दमनुभवति । पद्मपुराणे वैशाखमाहात्म्ये नारदाम्बरीषसंवादे[66] —

यथाग्निः सुसमृद्धार्च्चिः करोत्येधांसि भस्मसात् ।
पापानि भगवद्भक्तिस्तथा दहति तत्क्षणम् ॥

भागवतेऽपि उक्तिरेषा समर्थिता[67] । अपि द्वारकामाहात्म्ये चन्द्रशर्माणं प्रति भगवतो वाक्यम्[68] यथा—

मद्भक्त्या शुद्धसत्त्वस्य योगिनो धारणाविदः ।
तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता ॥

अर्थात् यथा अग्निसमिद्धमिन्धनं भस्मसात् करोति तथैव भक्तिबलेन भक्तः तस्य पापराशिं नाशयति । यथा दिवाकरस्य आगमने नैशोऽन्धकारः विनश्यति तथैव

भक्त्या उद्रेकेण सर्वाणि पापानि समूलं विनश्यन्ति अपि च भागवते पुनः[69] —

यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुरा ।
हरावभक्तस्य कुतो महद्गुणा मनोरथेना सति धावतो बहिः ॥

भगवद्भक्तिभावाप्लुता भक्ता निर्विकारभावेन हसन्ति, क्रन्दन्ति, नृत्यन्ति गायन्ति च । भगवद्भक्ता सर्वतोभावेन इतरेभ्यो विलक्षणाः । भक्तिमार्गस्य सुगमता जनप्रियता च हरिनामसंकीर्त्तनेन संसाधिता बृहन्नारदीये यथा- 'यथा समस्तलोकानां जीवनं सलिलंस्मृतम् । तथा समस्तसिद्धीनां जीवनं भक्तिरिष्यते[70] ।' मोक्षतोऽपीयमधिका । तदुक्तं विष्णुपुराणे—

'धर्मार्थकामैः किन्तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिता त्वयि[71] ।'

भक्तिर्हि भगवतोऽनुकम्पयैव लभ्यते इति देवर्षिनारदस्यास्ति मतम् । भक्तिर्निर्बाधं भगवच्चरणारविन्दं प्रापयति । भगवान् सर्वदैव भक्तानां हृदयमन्दिरे विराजते ।

प्रेम्णः रूपाणि भक्तौ बहुधा दृश्यन्ते । ज्यायासं ज्येष्ठं वा प्रति सर्वतो भावेन दृढम् आनुगत्यम् । स्वेष्टदेवं प्रति, गुरुजनं प्रति, स्वामिनं प्रति प्रेमप्रकटनं नाम भक्तिः । भक्तेः बहुधा वर्णनं विविधेषु पुराणेषु दृश्यते । श्रीमद्भागवतं प्रामाणिकतया भक्तेः पुङ्खानुपुङ्खम् उपन्यासं करोति । प्रस्तुतो हरिभक्तिसुधाकराख्यो ग्रन्थो भक्तेर्वैभवं पुष्कलतया प्रदर्शयति । तत्तु यथाप्रसङ्गं हरिभक्तिसुधाकरस्य समीक्षणावसरे प्रस्तोष्यते ।

अलङ्कारशास्त्रेषु भक्तिः—

वैदिकयुगादारभ्य अद्य यावद् भारतवर्षेऽस्मिन् भक्तिरसामृतधारा प्रवहतितराम् । भारतीयसंस्कृतौ भारतीयजीवने साहित्ये च भक्तिरेव मूलभित्तिः । वैदिकसूक्तेषु उपासनाकाण्डे इष्टदेवतां प्रति श्रद्धा निवेद्यते, उपास्योपासकयोर्मध्ये अविच्छिन्नप्रीतिधारा संलक्ष्यते । ऋग्वेदे उक्तं[72] कदा वा भक्तानां कृते मित्ररूपेण-स्वामिरूपेण-प्रभुरूपेण भक्तरक्षणं विदधाति । अद्वयब्रह्मप्रतिपादनपरोपनिषच्छास्त्रेषु ब्रह्मज्ञानापरोक्षानुभूतिसम्बलिता गुरुभक्तिः देवभक्तिश्च आम्नायते । तथा हि श्वेताश्वतरोपनिषद्युक्तम्[73] —

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

अत्र भक्तिरेव इष्टदेवं प्रति आनुगत्यं कैवल्यञ्च । गोपालतापनीयोपनिषदि कैवल्योपनिषदि च एवंविधं भक्तिस्वरूपं भगवत् प्राप्त्युपायरूपेण वर्ण्यते ।

भारतीयालङ्कारशास्त्रस्याचार्या भक्तिरहस्यज्ञा अपि आसन् । प्राचीनालङ्कारिकेण आचार्यदण्डिना काव्यादर्शस्य द्वितीयपरिच्छेदे प्रेयः इत्यलङ्कारस्य उदाहरणम् एवं कृतम्[74] —

अद्य या मम गोविन्द जाता त्वयि गृहागते ।
कालेनैषा भवेत् प्रीतिस्तव वागमनात् पुनः ॥
इत्याह युक्तं विदुरो नान्यतस्तादृशी धृतिः ।
भक्तिमात्रं समाराध्य सुप्रीतश्च ततो हरिः ॥[75]

उत्तरयोः श्लोकयोः तेन विश्वभक्तिरपि वर्णिता ।

सोमः सूर्यो मरुद्भूमिर्व्योम होतानलोजलम् ।
इति रूपाण्यतिक्रम्य त्वां द्रष्टुं देव के वयम् ॥[76]
इति साक्षात्कृते देवे राज्ञो यद्रातवर्मणः ।
प्रीतिप्रकाशनं तच्च प्रेय इत्यवगम्यताम् ॥[77]

अलङ्कारशास्त्रगुरवो आनन्दवर्द्धन-मम्मटादयः भक्तिं भावरूपेण मानयन्ति मम्मटेनोक्तम् काव्यप्रकाशे[78] — ''रतिर्देवादिविषया व्यभिचारी तथाञ्जितः भावः प्रोक्तः''। तेषां मते यद्यपि भक्तिः रसपदवीं नाधिरोहति, तथापि ते आलङ्कारिकाः भक्तिवादात् न दूरे तिष्ठन्ति । रूपगोस्वामिना कृते हरिभक्तिरसामृतसिन्धौ तु भक्तिविशेषप्रतिपादके द्वितीये उल्लासे द्रवीभूते चेतसि मनस गोविन्दकारतावृत्तिरेव भक्तिरित्युक्तम्[79] —

द्रुते चित्ते प्रविष्टा या गोविन्दकारतास्थिरा ।
सा भक्तिरित्यभिहिता विशेषस्त्वधुनोच्यते ॥

ध्वन्यालोकग्रन्थस्य मङ्गलाचरणे[80] 'स्वेच्छाकेसरिण' इति मङ्गलश्लोके नृसिंहवन्दनेन भगवतो माहात्म्यं प्रकाशयन्नपि ध्वनिसिद्धान्तप्रतिष्ठाता आनन्दवर्धनः अत्र वस्त्वलङ्काररसध्वनिसमुल्लासनम् इति प्रतिपादयति ।

ध्वन्यालोकग्रन्थे ध्वनि गुणीभूतव्यंग्योरालोचना प्रसङ्गे कति श्लोकाः आनन्दवर्द्धनेनोदाहृताः, येषु भगवतः श्रीकृष्णस्य लीला, कृष्णं प्रति गोपीप्रीतिरपि समुल्लसतितराम् । भगवतो भक्तानुकम्पा च प्रकट्यते । कृष्णमेघमण्डलीतः विद्युत्स्फुरणमिव राधायाः मानम्, गोपीनां विरहावस्थापि संलक्ष्यते । तथाहि रसतोरसवदलङ्कारस्य भेदविचारणावसरे आनन्दवर्द्धन इमं श्लोकमुदाहरति यथा[81]—

तेषां गोपवधूविलाससुहृदां राधारहः साक्षिणां
क्षेमं भद्रकलिन्दशैलतनयातीरे लतावेश्मनाम् ।

विच्छिन्ने स्मरतल्पकल्पनमृदुच्छेदोपयोगेऽधुना
ते जाने जठरीभवन्ति विगलन्नीलत्विषः पल्लवाः ॥

अस्मिन् श्लोके मथुरां प्रति प्रस्थितस्य श्रीकृष्णस्य कृते गोपीनां विरहावस्था वृन्दावनान्तर्गतलतावेश्मनां च दुरवस्थापि प्रकटीक्रियते । श्लेषशब्दशक्त्युद्भव-ध्वन्योर्भेदनिरूपणप्रसङ्गे यथा[82] —

दृष्ट्या केशव गोपरागहृतया किञ्चिन्न दृष्टं मया ।
तेनैव स्खलितास्मि नाथ पतितां किं नाम नालम्बसे ॥

इत्यादौ श्रीकृष्णं प्रति अनन्यशरणागतिभावः प्रीतिश्च संलक्ष्यते । 'दुराराधा राधा'[83] इत्यस्मिन् श्लोके खण्डित-नायिकायाः राधायाः श्रीकृष्णं प्रति मानोऽपि प्रकाशितः । 'तद्गेहं नतभित्ति मन्दिरामिदम् लब्धावगाहं दिवः'[84] इति श्लोके भक्तसुदामानं प्रति भगवदनुकम्पावर्णनमाध्यमेन भगवन्माहात्म्यं परिकीर्त्यते । ध्वनि-गुणीभूत-व्यंग्ययोः अलङ्कारैः सह सङ्कीर्णत्वप्रसङ्गे तृतीयोद्योते आनन्दवर्द्धनेन रसमयकाव्यस्य रसास्वादनापेक्षया साहित्यसमीक्षणजनितबौद्धिकानन्दापेक्षया च भगवद्भक्तेः सर्वोत्कृष्टत्वं प्रख्यापितम्[85] ।

या व्यापरवती रसान् रसयितुं काचित् कवीनां न वा
दृष्टिर्या परिनिश्चितार्थविषयोन्मेषा च वैपश्चिती ।
ते द्वे अप्यवलम्ब्य विश्वमनिशं निर्वर्णयन्तो वयं
श्रान्ता नैव च लब्धमाधिशयन त्वद्भक्तितुल्यं सुखम् ॥

इत्यत्र भगवद्भक्तावेव केवलमेव चित्तस्य विश्रान्तिरिति प्रतिपाद्यते ।

भक्तिरेव भक्तेरस्याः फलम् । भगवद्भक्तिपरायणो भक्तो न किमपि वाञ्छति ऐहिकसुखं पारमार्थिकं सुखं वा । भक्तिपरायणभक्तस्यापि लक्षणं श्रीमद्भागवते उक्तम्[86]—

न पारमेष्ठ्यं न महेन्द्राधिपत्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धिरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् ॥

अत एव एतद्वक्तुं निश्चप्रचं शक्यते यत् परवर्त्तिनि काले एताभ्यामानन्दवर्द्धनाभिनव-गुप्ताभ्यां भक्तिरहस्यमादाय गौडीयवैष्णवालङ्कारिकाचार्याः विष्णुभक्तिरसप्रपञ्चने अग्रगामिनो बभूवुरिति एतदपि वक्तव्यमवशिष्यते यद् भारतीयालङ्कारशास्त्रसाहित्ये च सर्वस्मिन् काले प्रत्यक्षाप्रत्यक्षतया वा सा भक्तिः अन्तःसलिला फल्गुरिव वहति ।

भक्तिधारायाः क्रमविकाशः—

भारतभूमिर्हि भक्तिरसस्य स्निग्धया धारया सिक्ता आप्यायिता वर्त्तते च ।

अनादिकालात् भारतवर्षेऽस्मिन् भक्तिरसस्य प्रवाह एव प्रचलन्नास्ते । स्निग्धानुरागभावप्रवणा भक्तिरसप्लाविता बहवो विद्वांसः सन्तो महात्मानश्चानायासेन परमपदम् अवाप्नुवन्ति ।

लौकिकानुरागस्तु स्नेहप्रेमश्रद्धाभेदेन त्रिविधः । पुत्रकन्याशिष्यादिषु निम्नगामी अनुरागः स्नेह उच्यते । मित्रकलत्रादिषु समानुगामी अनुरागः प्रेम निगद्यते। मातृपितृगुरुजनादिषु च मान्यगामी अनुरागः श्रद्धानाम्ना व्यपदिश्यते । अनुरागोऽपि द्विविधः, काममूलकः प्रेममूलकश्च । कामस्य मूलं स्वार्थः, तस्य लक्ष्यमनात्मेन्द्रियादिकं प्रेम्णो मूलं परार्थः तदीयलक्ष्यमात्मा । यदा कामी स्वस्वार्थपरतां परित्यजति तावत्येव तत्र परार्थपरता व्यज्यते । स एव प्रेमिको जायते। प्रेमवृद्ध्या सहैव प्रेमिकस्य स्वार्थवृत्तिरपि क्षीयते । तदन्तःकरणानुरागतरङ्गिणी कामभूमिं विहाय प्रेमभूमौ प्रवहति । स्वार्थस्याज्ञानमूलकत्वात् कामिनि विशुद्धप्रेम्णोऽभावाद् नासौ भक्तेरधिकारी । तथा चोक्तं भगवता श्रीकृष्णेन श्रीमद्भागवते[87] —

मिथो भजन्ति ये सख्यः स्वार्थैकान्तोद्यमा हि ते ।
न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा ।।

स्नेहप्रेमश्रद्धादयोऽपि तिस्रो वृत्तयः लौकिकत्वाद्विनश्वरशीलाः यतो जगतो नश्वरत्वात् तदाश्रयोऽपि विनश्वर एव । किन्तु भक्तिस्तद्विलक्षणा लौकिकव्यवहार-मनुसृत्य मित्र-पुत्र-कलत्रादिभिः सह च स्नेह-प्रेम-श्रद्धादिसम्बन्धो भवति स नश्वरे बन्धनकारणं च यतो हि तन्मूलेमोहस्य काममूलकत्व बुद्धि-सद्भावाद् जीवने बन्धनमेव लभ्यते न मुक्तिः परमेश्वरविषयकलौकिकानुरागगुणमयी भक्तिस्त्व-लौकिकी मोहातीता शुद्धसत्त्वगुणरूपा च प्रोच्यते । अतो भगवद्हृदयविहारिणी साक्षान्मुक्तिप्रदायिनी भक्तिलोकातीतेत्यत्र न कश्चित् सन्देहलवः ।

यथा हिमालयप्रदेशान्निर्गमकाले कापि धारा अलकनन्दा काचन मन्दाकिनी काचिच्च भागिरथीति गीयते । पश्चात्तिस्रो मिलित्वा समतलभूमौ प्रवहन्त्यो गङ्गानाम्ना व्यपदिश्यन्ते । तथैवानुरागमयी धारा स्नेह-प्रेम-श्रद्धारूपेण पुत्र-पति-पितृप्रभृतिषु या अनुरागोत्पत्तिर्जायते सैव पश्चात् भगवद्भावोन्मुखी ईश्वरानुरागरूपिणी भक्तिरित्यभिधीयते । जीवो हि स्वस्वरूपं विस्मृत्य प्रकृतिसम्बन्धत्वात् तद्गतीच्छासुखदुःखादिधर्मान् आत्मन्यारोपयन् घटीयन्त्रवत् जन्ममृत्युचक्रे परिभ्रमन्नाध्यात्मिकमाधिभौतिकामाधिदैविकञ्चेति दुःखत्रयमुपभुंक्ते परन्तु यदा परया भक्त्या इष्टदेवमेवावधारयति ज्ञानी भक्तः तु स्वस्वरूपमधिगच्छन्

पूर्णसच्चिदानन्दसागरे निमज्जति । श्रीमद्भागवते उक्तम्—

तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ।
ज्ञानविज्ञानसम्पन्नो भज मां भक्तिभावितः ॥[88]
ज्ञानविज्ञानयज्ञेन मामिष्ट्वाऽऽत्मानमात्मनि ।
सर्वयज्ञपतिं मां वै संसिद्धिं मुनयोऽगमन् ॥[89]
भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरम् ।
सर्वोत्पत्त्ययाप्ययं ब्रह्म कारणं मोपति सः ॥[99]

आत्मसाक्षात्कारं कुर्वता ज्ञानिना भक्तेन परमपदमधिगम्यते । आत्मानन्दस्वरूपे परमात्मनि परां भक्तिं लभमानस्य साधकस्य न किञ्चिदपि प्राप्तुमवशिष्यते । सच्चिदानन्दमहासागरे निमग्नस्य भक्तशिरोमणेः समस्तमपि संसारबन्धनं विच्छिद्यते। भक्तिप्रभावेण योगी भगवदानन्दसत्तामधिगम्य संसारचक्रजन्ममृत्युभयाद् विमुच्यते। तथा चोक्तं श्रीमद्भागवते[91] —

तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः ।
निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥

अपि च मनुनापि भक्तराजो ध्रुवः समुपदिष्टः[92] —

त्वं प्रत्यगात्मनि तदा भगवत्यनन्त-
आनन्दमात्र उपपन्नसमस्तशक्तौ ।
भक्तिं विधाय परमां शनकैरविद्या-
ग्रन्थिं विभेत्स्यसि ममाहमिति प्ररूढम् ॥

भक्तेः क्रमविकाशस्य रहस्यं सुविस्तृतम् । परन्तु ग्रन्थबाहुल्येन संक्षेपेण प्रस्तुतम्।

भक्तेर्भेदविवेचनम्—

भक्तेर्वर्गीकरणमतिकठिनम् । यतो हि भक्तिर्भवति अनेकविधा तदाधारा अपि विविधाः सन्ति । विभिन्नानां स्रोतसामाधारेण भक्तेर्विभागः सम्भवति । वैदिकी भक्तिस्तावद् द्विधा विहिताऽविहिताभेदात् । तत्र वेदविहितमर्य्यादापालनपूर्वकं भगवति मनोनिवेशो विहिता भक्तिः । मर्यादायां ध्यानमदत्त्वा भगवति मनोनिवेशोऽविहिता भक्तिः कथ्यते । तत्र विहिताया भक्तेः सर्वप्रकाशः सगुणभक्तिनाम्नाभिधीयते केवल ज्ञानमिश्रा निर्गुणा भक्तिः प्रोच्यते । रजस्तमोगुणरहितो यो वा को वा भक्तः एनामवगन्तुं शक्नोति । अविहितायाः भक्तेः चतुर्णां कामज-द्वेषज-भयज-स्नेहजानां भेदानां क्रमशः चत्वारोऽधिकारिणः सन्ति । तथा चोक्तं श्रीमद्भागवते भक्तशिरोमणिना देवर्षिनारदेन धर्मराजं युधिष्ठिरं प्रति[93] —

कामाद्द्वेषाद् भयात् स्नेहाद्यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥
गोप्यः कामाद् भयात् कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो ॥


भक्तिः

- **विहिता**
  - शुद्धा
  - मिश्रा
    - कर्ममिश्रा (गृहस्थार्थम्)
    - कर्मज्ञानमिश्रा (वानप्रस्थार्थम्)
      - अधमा (तामसी)
        - हिंसार्था
        - दम्भार्था
        - मात्सर्यार्था
      - मध्यमा (राजसी)
        - विषयार्था
        - यशोऽर्था
        - ऐश्वर्यार्था
      - उत्तमा (सात्त्विकी)
        - कर्मक्षयार्था
        - विष्णुप्रीत्यर्था
        - विधिसिद्ध्यर्था
    - ज्ञानमिश्रा
      - संन्यासार्थम्
- **अविहिता**
  - कामजा
  - द्वेषजा
  - भयजा
  - स्नेहजा

भक्तिमीमांसायामपि प्रायः एतादृशं भक्तियोगस्य वर्गीकरणं कृतमस्ति ।

नारदभक्तिसूत्रानुसारं[94] तु भक्तिस्त्रिधा विभक्ताऽस्ति । गौणीभक्ति-पराभक्ति-प्रेमभक्तिभेदात् । तत्र प्रेमभक्तिरेकापि एकादशधा विभक्ताऽस्ति । यथा- (१) गुणमाहात्म्यासक्तिः, (२) रूपासक्तिः, (३) पूजासक्तिः, (४) स्मरणासक्तिः, (५) दास्यासक्तिः, (६) सख्यासक्तिः, (७) वात्सल्यासक्तिः, (८) कान्तासक्तिः, (९) आत्मनिवेदनासक्तिः, (१०) तन्मयासक्तिः, (११) परमविरहासक्तिश्च । शाण्डिल्यभक्तिसूत्रे[95] च मुख्येतरभेदाद् द्विधा भक्तेर्विभागो दृश्यते । तत्र मुख्या परा भक्तिः, इतरा च गौणी भक्तिः ।

रूपगोस्वामिना स्वकीये भक्तिरसामृतसिन्धौ भक्तेः त्रयो भेदाः कृताः साधनभक्तिः-भावभक्तिः-प्रेमभक्तिश्च । साधनभक्तिः पुनर्द्विधा विभज्यते वैधी रागानुगा च ।[96] रागानुगाऽपि पुनः द्विधा कामानुगा सम्बन्धानुगाभेदात् । तत्र कामानुगायां भक्तौ कामतृष्णाद्वारा केवलं श्रीकृष्णस्य सुखार्थमेव यत्नः क्रियते न तु स्वसुखार्थम् । सम्बन्धानुगायां भक्तौ तु श्रीकृष्णं प्रति पितृत्वमातृत्वाद्यभिमानो दृश्यते । भक्तेरस्या उदाहरणं नन्द-यशोदा-देवकी-वसुदेवादयो गृह्यन्ते । नन्दादीनां भगवति श्रीकृष्णे नेश्वरत्वबुद्धिरासीत् अपि तु तेषु पितृत्वमातृत्वादिरूपेण रागस्यैव प्राधान्यमासीत् । सम्बन्धरूपा भक्तिः भगवतो भक्तस्य च सम्बन्धदृष्ट्या चतुः प्रकाराः दास्य-सख्य-वात्सल्य-दाम्पत्यभेदात् । कामानुगापि द्विधा दृश्यते- सम्भोगेच्छामयी तद्भावेच्छामयी च । तन्मतेन एवमस्ति भक्तेः भेद-प्रभेद-प्रपञ्चः ।



शास्त्रानुमोदिता भक्तिः वैधी । अस्या आलम्बनम् ऐश्वर्यमयी विभुः भगवान् विष्णुः । इयं कूलद्वयाबद्धा नदीव मर्यादामयी, किन्तु अनुरागप्रधाना रागानुगा भक्तिः कूलद्वयप्रभेदिनी स्वेच्छया प्रवहन्ती आपगा इव मर्यादाविहीना । रागानुगा भक्तिरेव मधुरभावस्यास्ति मूलाधारः । रागात्मिका भक्तिश्चोत्तमकोटिका भक्तिः प्रोक्ता[97] । यथा-

> अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृत्तम् ।
> आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥

उज्ज्वलनीलमणिनामके[98] भक्तिग्रन्थे एका हार्दरूपापि भक्तिः स्वीकृतास्ति यस्यां भावरूपा प्रेमरूपा चेति भक्तिद्वयमपि अन्तर्भूतं भवति । तत्र भक्तिः गौणी परा इति द्विधा ग्रहणं दृश्यते । वैधी श्रवणादिभेदेन नवधा तथा परा सप्तधा कथिता सेयं हार्दरूपा भक्तिः । भाव-प्रेम-प्रणय-स्नेह-राग-अनुराग-महाभावभेदात् सप्तधा विभक्तास्ति । तासु केवलं भावस्य प्रेम्णश्च ग्रहणं विद्यते ।

श्रीज्ञानानन्दस्वामिना सनातनकल्पधर्मद्रुमे तु सरलतमोऽप्येको भक्तिभेदप्रकारः प्रदर्शितोऽस्ति । तद्यथा भक्तिस्तावद् द्विविधा गौणी पराभेदात् गौणी पुनर्द्विधा वैधी रागात्मिका च तत्र वैधी श्रवणादिभेदेन नवधा रागात्मिका चासक्तिभेदात् सप्तधा विभज्यते । किन्तु ज्ञानस्वरूपा पराभक्तिस्तु एकधैवास्ति ।

भक्तिः

- **गौणी**
  - वैधी (नवधा)
    - श्रवणम्
    - कीर्त्तनम्
    - स्मरणम्
    - पादसेवनम्
    - अर्चनम्
    - वन्दनम्
    - दास्यम्
    - सख्यम्
    - आत्मनिवेदनरूपा
  - रागात्मिका (सप्तधा)
    - दास्यासक्तिः
    - सख्यासक्तिः
    - वात्सल्यासक्तिः
    - कान्तासक्तिः
    - आत्मनिवेदनासक्तिः
    - गुणकीर्त्तनासक्तिः
    - तन्मयासक्तिश्च
- **परा**

भक्तिभेदप्रसङ्गे पद्मपुराणस्य पातालखण्डे भक्तिविवरणप्रसङ्गे भक्तिस्तावत् त्रिविधा प्रोक्ता मानसी-वाचिकी-कायिकी चेति । तत्र ध्यानधारणादिभिर्वेदार्थ-स्मरणपूर्वकं भगवतो विष्णोः प्रीतये या भक्तिः क्रियते सा तु मानसी भक्तिरुच्यते[99]।

ध्यानधारणया बुद्ध्या वेदानां स्मरणेन च ।
विष्णुप्रीतिकरी चैषा मानसी भक्तिरुच्यते ॥

वेदमन्त्रसमुच्चारणपूर्वकमहर्निशं जपादिद्वारा या भक्तिर्विधीयते सा वाचिकी भक्तिः कथ्यते[100] ।

मन्त्रवेदसमुच्चारैरविश्रान्तविचिन्तनैः ।
जपैश्चारण्यकैश्चैव वाचिकी भक्तिरुच्यते ॥

इन्द्रियनिरोधपुरस्सरं व्रतोपवासनियमादिभिर्याऽनुष्ठीयते । सा सकलकल्याणकारिणी कायिकी भक्तिर्निगद्यते[101] ।

व्रतोपवासनियमैः पञ्चेन्द्रियजयेन च ।
कायिकी सैव निर्दिष्टा भक्तिः सर्वार्थसाधिनी ॥

पुनरपि लौकिकवैदिकाध्यात्मिकभेदादपि भक्तेस्त्रैविध्यं प्रपञ्चितमस्ति[102] ।

त्रिविधा भक्तिरुद्दिष्टा मनोवाक्कायसम्भवा ।
लौकिकी-वैदिकी चापि भवेदाध्यात्मिकी तथा ॥

इष्टदेवमुद्दिश्य पाद्याद्याचमनीय-गन्ध-पुष्प-धूप-दीप-नैवेद्यादिभिर्विविधैरुपचारैः गीतवाद्यनृत्यपूर्वकं श्रद्धया या भक्तिर्विधीयते[103] सा खलु लौकिकी भक्तिरुच्यते[104]।

पादार्घाद्युपचारैश्च नृत्यवादित्रगीतकैः ।
बलिभिर्जागरार्चाभिर्लौकिकी भक्तिरीरिता ॥

वेदमन्त्रजपपुरस्सरं तदध्ययनाध्यापनाग्निहोत्रादिभिर्वैदिकैः कर्मकलापैः क्रियमाणा भक्तिर्वैदिकी भक्तिः प्रोच्यते[105]।

क्रियते विष्णुमुद्दिश्य वैदिकी भक्तिरुच्यते ।
वेदमन्त्रहविर्यागैः क्रियया वैदिकी मता ॥
तमुद्दिश्य कृतं कर्म तत्सर्वं विष्णुदैवतम् ।
आध्यात्मिकीति विविधा ब्रह्मभक्तिः स्थिता नृप ॥[106]

आध्यात्मिकी भक्तिः च सांख्याख्या-योगजाभेदेन द्विविधा भवति । तत्र चेतनानि प्रधानादीनि चतुर्विंशतिः तत्त्वानि भोग्यानि । पञ्चविंशकः पुरुषश्चेतनो नित्योऽव्ययोऽसङ्गश्च । पुराणानुसारं तयोरुपरि षड्विंशतिकं तत्त्वान्तरं परमात्मेति ज्ञात्वा या


भक्तिर्विधीयते सा सांख्याख्या आध्यात्मिकी भक्तिर्गण्यते ।[107]

सांख्याख्यां योगसञ्जातां शृणु भूप यथोदिताम् ।
चतुर्विंशतितत्त्वानि प्रधानादीनि संख्यायाः ।।

यत्र च, प्राणायामपरायणैर्भैक्ष्यभक्षिभिः योगिभिः सर्वतः इन्द्रियाणि नियम-हृत्कर्णिकायां समासीनो वरदाभयहस्तकः देदीप्यमानमुखाम्बुजः सुलोचनो ब्रह्मसूत्रकटीतटो रक्तवक्त्रश्चतुर्भुजो विष्णुर्ध्यायते सा योगजा भक्तिर्गीयते ।[108] सा योगजा विष्णुभक्तिर्मानसी सिद्धिः सर्वोत्कृष्टा च कीर्त्यते ।[109] एवं सात्त्विकी-राजसी-तामसी भेदादपि अनन्तस्य भगवतो भक्तयोऽप्यनन्ता विहिताः ।[110]

एवं भक्तिः समुद्दिष्टा विविधा नृपनन्दन ।
सात्त्विकी राजसी चैव तामसी भेदतस्त्विमाः ।।

इत्थमेव स्कन्दपुराणे प्रभासखण्डस्य सप्तोत्तरशततमेऽध्यायेऽपि (२/१६) श्लोकैः त्रिविधभक्तिभेदविवरणं प्रस्तुतमस्ति ।[111]



यथा प्रकाशस्योदयेनान्धकारो विनश्यति तथैव निर्मलपरमपूत भगवद्भावो-दयेन पापानां स्वतः एव विनाशः भवति । यथा ज्ञानोदयेनाज्ञानस्य लेशोऽपि न दृश्यते, सत्त्वगुणोदयेन तमो विलीयते तथैव भगवतोऽनुरागोदयात् पापानां समूलं विनाश आपद्यते । अग्निना सुवर्णं निर्मलं सत् स्वकीयं स्वाभाविकं स्वरूपं प्रतिपद्यते तथा जीवो भगवद्भक्त्या मलिनसंस्कारपरिच्युतो अध्यात्ममार्गे अग्रसरो भवति । भगवद्भक्तिमासादयितुं विचारकाठिन्यं योगपरिश्रमं ज्ञानभक्तिशालित्वं किमपि नापेक्षितम् । किन्तु तदर्थं भगवन्तं प्रति चिन्तानुराग एवापेक्ष्यते । भगवद्भावभावितस्य

भावुकस्य भक्तस्य कृते सर्वोऽपि जनः समान एव । परमकृपालुः समदर्शी भगवान् स्वीयान् समस्तानपि भक्तान् समानयैव दृशा परिपश्यति । सच्चिदानन्दस्य भगवतः श्रीकृष्णस्य कृपामधिगतो भक्तः लोकोत्तरभावेन विविधबन्धनमतिक्रामन् सदा आनन्दसागरे निमज्जति । अस्मिन् प्रसङ्गे श्रीमद्भागवते[112] स्पष्टमुपदिष्टमस्ति यद् यावत् सर्वभूतेषु ब्रह्मसद्भावना न भवेत् तावत् मनसा-वाचा-कर्मणा-कायेन च परमेश्वरोपासना कर्त्तव्या—

यावत् सर्वेषु भूतेषु मद्भावो नोपजायते ।
तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः ॥

वैष्णवभक्तिकाव्यस्य पर्यालोचनम्—

चित्तवृत्तिनिरोधपूर्वकमन्तःकरणं निर्मलं विधाय साधको भक्तेः प्रभावेण भगवन्तं साक्षात्कृत्य तत्सन्निधानं लभमानम् आत्मज्ञानमधिगम्य निर्वाणपदं प्राप्तुं शक्नोतीति निश्चित्य उपासनापरिपुष्टये विश्वकल्याणकामनया महर्षिभिः सुगमोपायं भक्तिशास्त्रम् आविष्कृतम् । तत्र देवर्षिनारदेन भक्तिविषयकाणि चतुरशीतिसंख्यकानि (८४) सूत्राणि निर्मितानि । महर्षिशाण्डिल्येन च तदपेक्षया द्व्यधिकशतानि (१०२) सूत्राणि निर्मितानि । तत्र देवर्षिनारदभक्तिसूत्रापेक्षया महर्षिशाण्डिल्यस्य भक्तिसूत्रं भक्तिसम्प्रदाये विशिष्टं स्थानं महत्त्वं च बिभर्त्ति । अत एव तत्र द्वाभ्यां स्वप्नेश्वर-भवदेवमिश्राभ्यां पृथक् पृथक् स्वतन्त्रं भाष्यद्वयं कृतम् । श्रीस्वामिना नारायणतीर्थेन च विशदभावपूर्णचन्द्रिकाख्या व्याख्या विहितास्ति । एवं शाण्डिल्यभक्तिसूत्रस्य भक्तसमाजे विपुलोऽस्ति प्रचारः प्रसारः समादरश्च ।

वर्त्तमानयुगे प्रामाणिकतया समुपलब्धस्य पूर्वोक्तमहर्षिद्वयस्य प्रणीतस्य भक्तिसूत्रद्वयस्य पर्यालोचनया प्रतीयते यदाभ्यां द्वाभ्यां भक्तेराचार्याभ्यां देवर्षिनारदमहर्षिशाण्डिल्याभ्यां पूर्वमपि आसन् भक्तिशास्त्रस्यानेके आचार्या स्तद्ग्रन्थाश्च । परन्तु अस्माकं दौर्भाग्याद् बहुविधग्रन्थरत्नस्य दर्शनं न जायते । किन्तु केवलं शाण्डिल्यभक्तिसूत्रे भक्तिविषयकमतान्तरप्रतिपादनप्रसङ्गे येषां पूर्वाचार्याणां चर्चाऽस्ति, ते सन्ति काश्यप-बादरायण-शाण्डिल्य-जैमिनिमुनयः तथाहि- (क) तामैश्वर्यापरां काश्यपः परत्वात् । (१.१.३), (ख) आत्मैकपरां बादरायणः (२.९.४) । (ग) उभयपरां शाण्डिल्यः शब्दोपापत्तिभ्याम् । (२.१.५), (घ) नाम्नेति जैमिनिः सम्भवात् । (२.२.६), एतेषां मध्ये (२.१.५) सूत्रे प्रोक्तः शाण्डिल्योऽयमेतस्माद् भक्तिसूत्रनिर्मातुः शाण्डिल्यादन्यः प्रतीयते ।

यतो हि शाण्डिल्याभिधा अनेके महर्षयस्ततद्ग्रन्थेषु श्रूयन्ते । (१) एकस्तावत् शाण्डिल्यो भक्तिसूत्रस्य प्रणेता महर्षि शाण्डिल्यः । (२) अपरे बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य वंशनिरूपके षष्ठे ब्राह्मणे प्रथममन्त्रे कौशिकात् कौशिकः कौण्डिन्यात् कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः (४.६.१) सूत्रे वर्णितो वंशर्षिः शाण्डिल्यः, (३) अन्यो व्यासशिष्यः शाण्डिल्यः संहिताप्रणेता महर्षि शाण्डिल्यः इतरस्तु जयसंहिता निर्माता नारदशिष्यत्वेन प्रथितयशा महर्षिः शाण्डिल्यः । परन्तु एषु भक्तिसूत्रप्रणेता महर्षिशाण्डिल्यः पञ्चरात्रानुयायीति प्रतिभाति ।

तथा हि नारदभक्तिसूत्रे स्मृता भक्तेराचार्याः सन्ति । पराशर्य-गर्ग-शाण्डिल्य-ब्रह्मकुमार-व्यास-शुक-विष्णुकौण्डिन्य-शेष-उद्धव-आरुणि-बलि-हनुमद्विभीषणादयः- (क) पूजादिषु अनुराग इति पराशर्यः (१६), (ख) कथादिषु इति गर्गः (१७), (ग) आत्मरत्याविरोधेनेति शाण्डिल्यः (१८), (घ) नारदस्तु तदर्पिताखिलाचारिता तद्विस्मरणे परमव्याकुलतेति, (ङ) तस्या ज्ञानमेव साधनमित्येके (२८), (च) अन्योन्याश्रयत्वमित्यन्ये (२९), (छ) स्वयं फलरूपतेति ब्रह्मकुमाराः (३०), (ज) इत्येवं वदन्ति कुमार-व्यास-शुक-शाण्डिल्य-गर्ग-विष्णु-कौण्डिन्यशेष-उद्धव-आरुणि-बलि-हनुमद्विभीषणादयो भक्ताचार्याः (४३) ।

नारदभक्तिसूत्र-शाण्डिल्यभक्तिसूत्रातिरिक्तान्यपि कियन्ति भक्तिसूत्राणि साम्प्रतं दृष्टिगोचरमायन्ति यथा श्रीहरिहरारण्यस्वामिभिर्विरचितानि षड्विंशति (२६) संख्यकानि भक्तिसूत्राणि श्रद्धेय महामहोपाध्यायगोपीनाथकविराज-महोदयद्वारा विवरणादिभिः सनाथीकृत्य सरस्वतीभवनग्रन्थमालातो मुद्रिते भक्तिमीमांसानामके ग्रन्थेऽज्ञातकर्त्तृकाणां द्व्यधिकशत (१०२) सूत्राणि भारत धर्ममहामण्डलतो मुद्रिते जैमिनीयमीमांसादर्शने(३४२) सूत्राणि सत्यनारायणशर्मणो भक्तिसूत्रं च भगवद्भक्तानां हृदयान्यावर्जयन्ति ।

एतद्भगवद्भक्तिसूत्रातिरिक्ता अनेकैर्भक्तिशिरोमणिभिर्भक्तिविषयमधिकृत्य अनेके ग्रन्थाः विविधा निबन्धाश्च लिखिताः । श्रीमधुसूदनसरस्वतीस्वामिना कृतं भक्तिरसायनम् । श्रीस्वामिनारायणतीर्थानां भक्त्यधिकरणमाला-श्रीनृसिंहभारती-महोदयानां भक्तिसुधातरङ्गिणी। हरिहरानन्दसरस्वतीनां भक्तिसुधा, श्रीरूपगोस्वामिनः उज्ज्वलनीलमणिः, भक्तिरसामृतसिन्धुः, दानकेलिकौमुदी च, श्रीगीतास्वामि-विजयस्य नवभक्तिरसायनम्, श्रीवोपदेवस्य यथा वैष्णवतोषिणी, नवभक्तिरसायनम्,

मुक्ताफलकं च अति प्रसिद्धाः अपि च श्रीरघुनाथशास्त्रिणः भक्तितरङ्गिणी, श्रीनारायणभट्टस्य भक्तिसागरः, जीवगोस्वामिनः षट्सन्दर्भः, श्रीअनन्तदेवस्य भक्तिनिर्णयः, श्रीलक्ष्मीधरस्य भगवन्नामकौमुदी एव प्रामाणिकाः प्रसिद्धाः ग्रन्थाः सन्ति ।

एवं वेदेषु बीजरूपेण स्थितस्य भक्तितत्त्वस्य बहुधाराभिः प्लावनं सकले भारतवर्षे दृश्यते । इतिहास-पुराणेषु विशेषतः श्रीमद्भागवते, सूत्रकाराणां नारद-प्रभृतीनां सूत्रग्रन्थेषु भक्तिवादस्य आचार्याणां च भक्तिपरिपूरितानां ग्रन्थानां बहुधा प्रसारो भारते दृश्यते । ज्ञान-वैराग्य-पोषिका-भक्तिः कलौ प्रशस्यते । काव्यशास्त्रेऽपि भक्तेः रसतत्त्वरूपेण स्वीकारात् नानाभावसम्प्रदायानां विकाशात् च भारते भक्तिर्गङ्गोत्री नामरूपाभ्यां व्याकृता सती अद्यापि प्रवहन्ती दृश्यते जनमानसेषु ग्रन्थराजिषु च, इति भक्तेः भारत्यां च पुष्पलतया पुष्पफलोद्गमाद्भक्तेर्वैचित्र्यं सर्वथा सहृदयहृदयावर्जकं भवति इति निःसन्देहम् ।

उत्कलेषु वैष्णवभक्तिकाव्यस्य परम्परा—

उत्कलप्रान्ते संस्कृतसाहित्यस्य साधना बहुप्राचीनकालादारभ्य प्रचलति। देशेऽस्मिन् संस्कृतभक्तिसाहित्यशास्त्रचर्चाया एका अखण्डपरम्परा सुरक्षिता । भक्तिकाव्यस्य भक्तिवादस्य तथा भक्तकवीनां परम्परा एका सुदृढा स्रोतस्विनी इव प्रवाहिता । यतो हि पवित्रपरम्परातरङ्गिणीनिष्णाताः कवयः उत्कलभूमिं 'देवभूमिः' उत्कल इति स्वीकुर्वन्ति । समग्रभारतवर्षात् वाग्देवी-पदारविन्दचर्चरीकायमाणाः साहित्यसरोवरविहाररसिकाः प्रख्यातकीर्त्तयः बहवः कवयः सुनिपुणं सरस्वत्या उपासनं विदधुः । एतद् अस्माकं कृते महागौरवावहम्। कस्यचित् देशस्य साहित्यशास्त्रस्य परम्परायाः प्रभावः तत्रत्य कविकृतकृतिषु सुष्ठु लक्ष्यते । पुनश्च उत्कले वैष्णवसाहित्यस्य विकासोऽविस्मरणीयः । वैष्णवकवेः दीनबन्धुमिश्रस्य भक्तिशास्त्रस्यालोचनया सह एतद्देशप्रसूतानां कविपण्डितानां वैष्णवभक्तिसाहित्यस्य क्षेत्रे चर्चायाः आवश्यकता अस्ति इति स्वीकृत्य परिसरेऽस्मिन् उत्कलीयसंस्कृतभक्तिसाहित्यिकानां तथा तेषां कृतीनां च यथाशक्ति परम्परापरिचयः प्रस्तूयते ।

श्रीपुरुषोत्तमदेवलीला पवित्रीकृते उत्कलदेशे अनेके विश्वविश्रुताः वैष्णवभक्तकवयः प्रादुर्भूताः । तेषु कानिचित् नामानि इतिहासदृष्टिगोचरीभूतानि न भवन्ति । किन्तु कुत्रचित् तेषां कृतयः प्राप्यन्ते । कुत्रचित् नामानि प्राप्यन्ते परन्तु कृतयः न दृष्टिपथमावर्जयन्ति एवमन्यत्रापि नामानि तथा कृतयोऽपि न सन्ति।

केदारनाथमहापात्रमहोदयानां "*A Descriptive Catalogue of Sanskrit Manuscripts of Orissa*" इति पुस्तके, नीलमणिमिश्रस्य "ओडिशार संस्कृत लेखा ओ लेखक" इति ग्रन्थे, ओडिशा साहित्य एकाडेमीपक्षतः "ओडिशार संस्कृत चर्चार परम्परा" इति पुस्तके तथा ओडिशा कल्चराल फोरम् द्वारा प्रकाशिते "ओडिशार सांस्कृतिक इतिहास" इति पुस्तके च अस्मिन् विषय यानि विवरणानि प्रदत्तानि तानि तथा कांश्चन पाण्डुग्रन्थान् स्वयमधीत्य प्रस्तावोऽयं पुरिष्क्रियते ।

उत्कलभूमेः परमाराध्यस्य श्रीजगन्नाथस्य प्रभावात् उत्कलदेशीयाः प्रायशः वैष्णवाः । कविष्वपि विष्णुसेवकाः तद्भक्तिरसोपासकाः अधिका दृश्यन्ते । ततोऽधिकाः ग्रन्थान्तरेभ्यः वैष्णवग्रन्थाः दृश्यन्ते च । वैष्णवानामपि बहवः सम्प्रदायाः सन्ति । तेषु सर्वेषु गौडीयवैष्णवानां प्रभावः सर्वातिशायी । वैष्णवग्रन्थेषु अधिकाः ग्रन्थाः श्रीराधाकृष्णपरका दृश्यन्ते । श्रीचैतन्यदेवस्य उत्कलागमनात् (१५०९ ख्री.) प्रागेव उत्कले राधाकृष्णयोः गोपलीला प्रचारिता आसीत् । जयदेवकृतं 'गीतगोविन्दम्' तस्य चरमनिदर्शनम् ।

गीतगोविन्दकार गोस्वामी कविराज-श्रीजयदेवः तस्य गीतगोविन्द-महाकाव्यम्—

विश्वविश्रुतोत्कलीय-वसन्तकोकिल-वैष्णवभक्तकवि-जयदेवकृतं 'गीतगोविन्दम्' वैष्णवसाहित्यस्य एकः समुज्ज्वलतममणिः । समग्रभारतवर्षे श्रीजगन्नाथस्य लीलात्मकं गीतमयं काव्यमिदं लोकप्रियमभूत् । कान्तकोमल-पदावली विमण्डितानां चतुर्विंशतिसंख्यकानां गीतानां तथा द्विसप्ततिसंख्याकानां सुमधुरश्लोकानां समावेशो दृश्यतेऽस्मिन् काव्यविशेषे उत्कलेषु वैष्णवधर्मस्य अभ्युत्थानं 'गीतगोविन्दस्य' माधुर्येण प्रभावितम् । प्राच्यपाश्चात्यविपश्चितो विमुग्धाः स्वस्वभाषया मनोज्ञमनुवादं कुर्वन्ति । यतः गीतगोविन्दग्रन्थे व्यवहृतानि छन्दांसि स्वरास्तालाश्च अस्य देशस्य परवर्त्तिपण्डितानां ग्रन्थेषु व्यवहृता अवलोक्यन्ते ।

गीतगोविन्दकाव्यस्य रचयितुः जयदेवस्य जन्मस्थाननिरूपणम् एका विवादसम्बलिता घटना । बहवः कवयो वङ्गीया इति अपरे तम् उत्कलीय इति प्रतिपादयितुं यतमाना दृश्यन्ते । भारतवर्षस्यान्यप्रान्तीया जयदेव उत्कलीयः इति कथयन्ति । मिथिलायाः चन्द्रदत्तः संस्कृत "भक्तमाला" ग्रन्थे एवं लिखति ।[113]

जगन्नाथपुरीप्रान्ते देशे वै चोत्कलाभिधे ।

केन्दुविल्व इति ख्यातो ग्रामो ब्राह्मणसङ्कुलः ॥
तत्रोत्कले द्विजो जातो जयदेव इति श्रुतः ।
विद्याभ्यासरतः शान्तः पुरुषोत्तमपूजकः ॥

ऐतिहासिक-केदारनाथमहापात्रः "श्रीजयदेव ओ श्रीगीतगोविन्द" ग्रन्थे कवेरुत्कलीयत्वं प्रमाणीकरोति ।[114] गङ्गवंशस्य प्रतिष्ठापकस्य चोडगङ्गदेवस्य पुत्रस्य राघवदेवस्य (११५९-११७० ख्रीष्टाब्दे) शासनकाले जयदेवः पुण्यतोयायाः प्राचीनद्याः तीरे केन्दुलिग्रामे जातः ।[115] तस्य पितृपादो भोजदेवो माता च राधादेवी। श्रीजगन्नाथदेवस्य प्रियगीतरूपेण दशावतारवर्णनां राधामधवोपासनां च विश्लेषयन् द्वादशशताब्द्यां निरूपयन् कविः उत्कलदेशे जात इति केदारनाथमहापात्रो दर्शयति।

पुर्यां श्रीजगन्नाथमन्दिरे तथा उत्कलस्य ग्रामे ग्रामे गीतगोविन्दस्य नित्यगानं प्राचीनकालात् प्रचलतितराम्, 'गीतगोविन्दम्' कविराजजयदेवस्यैकेवामरकृतिः। श्रीराधामाधवयोः वृन्दावनपुलिनकाननविलासविजृम्भितं काव्यमिदं काले काले सुधामधुररसनिर्झररूपं श्रवणपुटयोः श्रीहरिकेलिदिव्यमधु परिवेष्यति । यतः गीतगोविन्दस्य कोमलरसालकान्तपदावली सहृदयहृदयमाह्लादयति । विश्वसाहित्ये गीतगोविन्दस्य स्वकोटौ मूर्धन्यस्थानं दृश्यते । ग्रन्थोऽयं सर्वेषां विशेषतः वैष्णवानां परमप्रामाणिकः सर्वाधिकमादरणीयो ग्रन्थः ।

कविराजनारायणदासः—

गीतगोविन्दस्य लब्धा 'सर्वाङ्गसुन्दरी' सर्वप्राचीनटीका नारायणस्य कृतिः। कविः नारायणदासः कपिञ्जलवंशस्य प्राचीनतमसाहित्यिकचण्डीदासस्य पितामह इति । उतकलेषु संस्कृतसाहित्यक्षेत्रे 'कपिञ्जल' वंशस्य साहित्यिकाः प्रख्याता इति सूरिभिः समाकलितम् । नारायणदासः द्वितीयनरसिंहदेवस्य राजसभामलमकार्षीदिति ऐतिहासिकाः अभिप्रयन्ति ।

राजा द्वितीयनरसिंहदेवः रेमुणा-अलारपुर-शारकण इत्यादिस्थानेषु गोपीनाथमन्दिराणि कारयामास । तत्सभाकविः नारायणदासः गोपीनाथविलास-वर्णनकुशलकाव्यस्य टीकां कर्त्तुं प्रवृतोऽभूदिति सम्भाव्यते स श्रीहरेश्चरणसेवकः तथा 'कविराज' आसीदिति तेनैव सर्वाङ्गसुन्दरीटीकाग्रन्थे प्रतिपादितम् ।

नत्वा श्रीहरिचरणं कुरुते सर्वाङ्गसुन्दरीटीकाम् ।
श्रीनारायणदासः कविराजोऽयं गीतगोविन्दम् ॥ इति ।[116]

नारायणस्य कालः त्रयोदशशतकस्यान्तिमभागे भवेत् ।

श्रीधरस्वामी[117]—

श्रीमद्भागवतस्य 'भावार्थदीपिका' टीकाकारः श्रीधरस्वामी उत्कलदेशे सर्वविद्वज्जनविदितः । सोऽयं पुरीगोवर्द्धनपीठाधिपतिः तथा परमानन्दनरसिंहशिष्य आसीत् । स विष्णुपुराणोपरि 'आत्मप्रकाशटीकां', देवस्तुतिटीकां' भगवद्-गीतोपरि सुबोधिनीटीकामपि रचयामास । परमवैष्णवोऽयं भक्तकविरासीत् । कृष्णप्रेमवर्णनं तस्य उद्देश्यम् । उल्लिखितान् भक्तिग्रन्थान् रचयित्वा स समग्रोत्कलीय वैष्णवसाहित्यं परिपोषयति । तस्य कालः प्रायः चतुर्दशशताब्दी भवति । भक्तकवि परमवैष्णवोऽयं निम्नोक्तश्लोके दर्शयति यथा[118] —

परमानन्दपादाब्जभृङ्गश्री श्रीधरोऽकरोत्
प्रीयतां परमानन्द नृहरिः सद्गुरुः स्वयम् ।
विवृतं तन्मतेनेदं न तु सम्मति वैभवात्
मन्दबुद्धिरहं कृष्णप्रेम किं किं न कारयेत् ? ।।

गजपतिः कपिलेन्द्रदेवः—

उत्कले सूर्य्यवंशस्य नरपुङ्गवः गजपतिः कपिलेन्द्रदेवः कवि-पण्डितसमादर बलवीर्यप्रसारः जगन्नाथधर्मप्रचारकः बभूव । यतः उत्कले सूर्यवंशशासनकालः एक गौरवोज्ज्वलसमयः अयं विशालपराक्रमः आगङ्गागोदावरि अतिबृहन्मध्यभागं स्वशासनाधीनं कृतवान् । तस्य उपाधिरासीत् श्रीश्री गजपति गौडेश्वर नवकोटि-कर्णाटोत्कल कलवर्गेश्वरः' इति । 'परशुरामविजय' व्यायोगः तस्य साहित्यिक-कृतिरिति ज्ञायते । व्ययोगोऽयं प्राची (The Prachi) पत्रिकायां प्रकाशितः[119] । अस्याभिनयः पुर्यां श्रीजगन्नाथस्य एकस्यां यात्रायां प्रदर्शितोऽभूदिति सूत्रधारवचनादगम्यते—

नीलकन्दरनाथस्य महोत्सवसभासदः ।
मत्काव्याभिनयेनाद्य विनोदय कुशीलव ।। इति ।

ग्रन्थस्य मङ्गलाचरणपञ्चके विष्णु-जगन्नाथ-रुक्मिणी-कृष्ण-शिवाः समाराधिताः । कपिलेन्द्रः परशुरामे भक्त्याधिक्यं दर्शयति । तस्य शासनकालः १४३५ ख्रीष्टीयात् अब्दात् १४६६ मितं यावद्भवति ।

गजपतिप्रतापरुद्रदेवः—

महामहिमविमण्डितः गजपतिप्रतापरुद्रदेवः सूर्यवंशस्यान्तिमो नरपतिः भवति । स स्वयं विद्वदग्रेसरः पण्डितानां पृष्ठपोषकः सुरभारतीसेवकः इति जगति प्रख्यातः । विद्यानुरागी सूर्यवंशस्य दिवाकरोऽयं व्यभ्राजत । अस्य राजत्वकाले श्रीचैतन्यदेवः श्रीक्षेत्रमागच्छत् । गौडीयवैष्णवप्रचारकः श्रीचैतन्यमतावलम्बी

उत्कलीयगौडीयवैष्णवमूर्धन्यः । अयं तु अविचलनकीर्त्तिराज्योपभोक्ता विदुषां पृष्ठपोषकः धार्मिकः सुकविः च आसीत् । प्रतापरुद्रदेवस्य 'सरस्वतीविलासः', 'प्रतापमार्त्तण्डः', 'निर्णयसंग्रहः', 'कौतुकचिन्तामणि'श्च चतस्रः कृतयो भवन्ति। प्रथमद्वयं धर्मशास्त्रीयं, तृतीयो न प्राप्तः, चतुर्थः प्राप्तो न प्रकाशितः । चित्रबन्ध-प्रहेलिका-इन्द्रजालविद्यादि वर्णितग्रन्थेषु श्रीकृष्णः आधारितः ।

व्यामोहप्रशमौषधं मुनिमनोमुक्तिप्रवृत्तौषधम् ।
दैत्येन्द्रान्तकरौषधं त्रिभुवने संजीवनैकौषधम् ॥
भक्तार्त्तिप्रशमौषधं भवभयप्रध्वंसनैकौषधम् ।
श्रेयः प्राप्तिकरौषधं पिब मनः श्रीकृष्णदिव्यौषधम् ॥
रुचं रुचं चिरारे चिचश्चच्चारुरुचा रुचः ।
चचार रुचिराचारश्चारेराचारचश्चुरः ॥

ग्रन्थपुष्पिकासु इति 'महाराजाधिराज प्रतापरुद्रदेवकृते चिन्तामणिग्रन्थे कौतुक-निरूपणं नाम तृतीया दीप्तिः समाप्ता'[120] इति । प्रतापरुद्रदेवस्य शासनकालः १४९७ मितात् खीष्टीयाब्दात् १५३५मितं यावद्भवति ।

कविडिण्डिमजीवदेवाचार्यः—

उत्कलीयसंस्कृतसाधकेषु कविडिण्डिमजीवदेवाचार्यः अग्रेगण्यः । तत्कृत 'भक्तिभागवतमहाकाव्य'मिति श्रेष्ठोपादेयो ग्रन्थः । ग्रन्थस्यास्य संक्षिप्त-परिचयं पण्डितग्रणीर्महामहोपाध्यायः हरप्रसादशास्त्री प्रादात्[121] ।

कविडिण्डिमजीवदेवाचार्यः गजपतिप्रतापरुद्रदेवस्य (१४९७-१५३५ खीष्टाब्दे) गुरुः सेनाध्यक्षस्य आसीत्[122] । श्रीमद्भागवतमुपजीव्य भक्तिभागवत-महाकाव्यं प्रणीतवान् । एष कविः श्रीकृष्णस्य परमभक्तः अभवत् । भोजवंश-शासनकाले जीवदेवस्य पूर्वजाः वत्सगोत्रीया आसन् । तस्य पिता राजगुरुः त्रिलोचन आचार्यः माता च रत्नादेवी तस्य पूर्वपुरुषाः क्रमान्वयेन भोज-केशरि-गङ्ग-सूर्यवंशस्य उत्कलाधिपानां कुलगुरवः आसन् ।

(क) कविडिण्डिमजीवदेवाचार्यः गजपतिप्रतापरुद्रदेवस्य राजत्वकाले सप्तदशे अङ्के कर्णाटाधिप कृष्णदेवरायेण सह सञ्जातस्य संपरायस्य समये गोदावरीनदीतटे वसतिकाले मकरमासे उक्तमहाकाव्यं रचयामास । द्वात्रिंशदध्यायात्मकं भक्तिभागवतमहाकाव्यमिदं संस्कृतवाङ्मयस्य रत्नस्वरूपम् । भागवतसदृशी अनवद्यकाव्यरचना न दृश्यते इति प्रशस्तिरस्ति[123] ।

श्रीरुद्रदेवनरपते रथवेङ्कटादौ ।

कर्णाटदेशविजयेन वसत्युदरे ॥
तेनास्य शीघ्रकविना जगदीश्वरस्य ।
काव्यं निबद्धमिदमुज्ज्वलभक्तिसिद्धम् ॥

असाधारणपाण्डित्येन आशुकवित्वबलेन च कविः डिण्डिमजीवदेवाचार्यः प्रहरकेण प्रबन्ध-काव्यं रचयितुं शक्तोऽभूत् । भगवद्वासुदेवभक्तेः श्रेष्ठत्वप्रतिपादने अस्य असाधारणी प्रतिभा आसीत् ।

(ख) भक्तिवैभवनाटकम्—

कवि जीवदेवाचार्यस्य 'भक्तिवैभवनाटकम्' अन्यतमा कृतिः । अस्य नाटकस्य पाण्डुग्रन्थः कलिकतास्थिते एसिआटिक् सोसाइटि ग्रन्थभण्डारे संरक्षितः । अस्ति महामहोपाध्याय-स्वर्गतःहरप्रसादशास्त्री अस्य सूचनां सोसाइटिद्वारा प्रकाशितायां ग्रन्थसूच्यां सप्तमभागे प्रकाशयति[124] ।

ग्रन्थानुशीलनात् ज्ञायते यत् श्रीकृष्णस्य भक्तिवैभवप्रदर्शने तात्पर्यम् अत्र । अत्र नवाङ्काः सन्ति । भारतवर्षे प्रचलितानां विभिन्नधर्ममतानां खण्डनपूर्वकं श्रीकृष्णभक्तेः प्रतिपादनं तस्य उद्देश्यम् । यतः श्रीकृष्णस्य भक्तिरेवात्र मुख्यो विषयः ।

ज्ञानं कर्म समुच्छ्रितं पुनरिदं योगेऽथ सर्वमतं
तत्तद्वार्त्तिकवृत्तिसूत्रागलितं नानानिबन्धस्थितम् ।
शैवपाशुपतं तथागतमतं निर्म्मौलिकं कौलिकं
सर्वन्यायशतैर्निरस्य निहितं कृष्णस्य शुद्धमतम् ॥ इति ।

''भक्तिभागवतमहाकाव्यम्'', ''भक्तिवैभवनाटकम्'' पुष्पिकानुसन्धानेन ज्ञायते भक्तिभागवतमहाकाव्यस्य रचनासमये स व्यवहर्तृ महापात्र 'कविडिण्डिम'राजगुरुः आसीत् । परन्तु नाटकरचनासमये श्रीमन् महामहोपाध्यायश्रीभागवतवासुदेव भक्तिप्रस्थानं प्रणयन् परमाचार्यः कविडिण्डिमवाहिनीपति राजगुरु श्रीजीवदेवाचार्य इति नाम्ना विमण्डितः ।

प्रतापरुद्रदेवस्य सप्तदशाङ्कः ख्री.अ. १५१० मितो भवति । अत एव कविडिण्डिमजीवदेवाचार्यस्य जनिकालः प्रायः १४७५ मितः ख्रीष्टाब्दः भवति ।

कविचन्द्ररायदिवाकरमिश्रः—

गजपतिप्रतापरुद्रदेवस्य राजसभायाम् अलङ्कृतेषु कविषु कविचन्द्ररायदिवाकरमिश्रस्य नाम उल्लेखयोग्यम् । कविचन्द्रस्य पिता वैद्येश्वरः माता च गुणवती मुक्ता आसीत् । कविभरद्वाजसगोत्रीय आसीत् । तस्य प्रशस्तिर्न केवलम्

उत्कले सीमिता भवति अपि तु कर्णाटकराज्याधिपतेः कृष्णदेवरायस्य राजधान्यां विजयनगरे कियत्कालावस्थानपूर्वकं स्वस्य पाण्डित्यकवित्वबलेन तत्र राजसभायां सम्मानितोऽभूत् ।

'अभिनवगीतगोविन्दम्' दिवाकरस्य कृतिः । गीतगोविन्दकाव्यानुसरणेन कविचन्द्ररायदिवाकरमिश्रपादः ''अभिनवगीतगोविन्द''नामकं दशसर्गात्मकं महाकाव्यं रचयित्वा स्वीय पृष्ठपोषकपुरुषोत्तमदेवस्य नाम्ना भणितमकरोत् । यथा[125] —

राधामुरारि रमणीय रहस्यलीला-
सङ्गीत-सुन्दर-समन्दपुराभिरामम् ।
साहित्यसार-समुदाय-बुध-प्रबन्ध-
मेतं करोति पुरुषोत्तम-भूमि-भर्त्ता ॥

कविचन्द्रदिवाकरमिश्रः श्रीकृष्णभक्तः आसीत् । तस्य विपुलसंख्यकाः कृतयः सन्ति परन्तु नेदानीं लोकलोचनगोचरीभूताः सन्ति । ग्रन्थानां मध्ये भारतामृतम्, ध्रुवचरितम्, अद्रिराज-दुहितुःशतकम्, देवीशतकम्, रसमञ्जरी, अभिनवगीत-गोविन्दम्, प्रभावतीनाटकम्, हरिचरितचम्पूः, लक्षणादर्शमहाकाव्यम्, पारिजातहरणम् इति कृतयः सन्ति । भारतामृतमहाकाव्यं चत्वारिंशत्सर्गैः सम्बलितं श्रीमहाभारतस्य विषयवस्तु आधारीकृत्य विनिर्मितम् । अप्रकाशितस्य ग्रन्थस्य चतस्रः तालपत्रप्रतिलिपयः Orissa State Museum ग्रन्थागारे संरक्षिताः सन्ति । दिवाकरः गजपतिपुरुषोत्तमदेवस्य सभायां बहुमानं समधिगतवान् यतः तत्र प्रणीत- 'अभिनवगीतगोविन्दम्' प्रत्यहं श्रीमन्दिरे गेयं भवितेति पुरुषोत्तमदेवस्य अनुशासनं श्रीमन्दिरे जयविजयद्वारे इदानीमप्यस्ति । अनन्तरं प्रतापरुद्रस्य राजसदसि सः तथैव समादरं लेभे ।

'भारतामृतं' कविचन्द्रस्य श्रेष्ठा कृतिः महाकविः डिण्डिमः भागवतस्य केवलं दशमस्कन्धमादाय 'भक्तिभागवतं' प्रणीतवान् । किन्तु दिवाकरः समग्रमहाभारतस्य विषयं गृहीत्वा भारतामृतं रचयामास । दिवाकरस्य समयः १४५०तः १५२० ख्री.अ. मध्ये भवितुमर्हति ।

कविचन्द्रमार्कण्डेयमिश्रः—

वैष्णव-भक्तकविषु वीरप्रतापपुरशासने काश्यपगोत्रे सम्भूतः श्रीमतो मङ्गलदेवस्य सूनुः कविराजचक्रवर्त्ती मार्कण्डेयमिश्रः 'दशग्रीववधमहाकाव्यम्' व्यरचयत् । तत् ओडिशासाहित्य एकाडेमीपक्षतः प्रकाशितम् । महाकविः

कालिदासस्य काव्यानुसारेण कविमार्कण्डेयो रामायणस्य कथावस्तु उपजीव्य काव्यमिदं प्रणीतवान् । ग्रन्थसमाप्तौ कविः स्वस्य वंशस्य संक्षिप्तं परिचयं प्रदत्तवान् । तथा[126] अत्र ग्रन्थे विंशतिः सर्गाः । समग्ररामायणस्य कथा काव्याकारेण रूपान्तरिता । कवीन्द्रस्य रचनाशैली अतीव सरला । दशग्रीववधस्य अन्तिमभागे कविनाऽऽत्मपरिचयः प्रदत्तः[127] । तत्र सुव्यक्तमिदं यत् सूर्यवंशीयकपिलेन्द्रपुत्रस्य पुरुषोत्तमस्य तनये प्रतापरुद्रदेवे पृथिव्यां शासति सति मार्कण्डेयः महाकाव्यमिदमरचयत्—

भास्वद्वंशमणेर्बभूव कपिलक्षौणीपतेर्नन्दनो
वीरः श्रीपुरुषोत्तमो गजपतिर्भाग्यं भुवो मूर्त्तिमत् ।
आकौमारदिनान्महाप्रियसुहृत् तस्याभवत् काश्यपः
श्रीमन्मङ्गलदेव इत्यभिमतो गोष्ठीषु विद्यावताम् ॥[128]
श्रीरुद्रे पुरुषोत्तमेन्द्रतनये प्रोद्दामदोर्मण्डली-
क्रीडाखण्डितशात्रवे वसुमतीमासागरं शासति ।
श्रीमान्मङ्गलदेव सूनुरमनागाराध्य वाग्वादिनीं
मार्कण्डेय कविस्तदेत दतनोत् काव्यं हरेः प्रीतये ॥[129]

कवेः अन्तिमश्लोकः काव्यप्रशंसापरकः यथा[130]—

भोगाभोगमुररीकरोति धरणी तावद्भुजङ्गेशितु-
र्लोकालोकगिरिं प्रदक्षिणयते यावत्त्विषामीश्वरः ।
श्रीरामस्य गुणाम्बुधेर्गणलवेनारब्धमेतन्नवं
काव्यं मे विदधातु तावदसकृत् प्रीतिं प्रसन्नात्मनाम् ॥

काश्यपवंशजः मङ्गलदेवः प्रसिद्धवीरगजपतेः कपिलेन्द्रदेवतनयस्य पुरुषोत्तमदेवस्य प्रियबन्धुर्विद्वत्सु बहुमानं प्राप्तवान् । तस्य पुत्रः मार्कण्डेयः प्रतापरुद्रस्य शासनसमये सरस्वतीं समाराध्य श्रीहरेः प्रसादार्थं महाकाव्यमिदमकार्षीत् । पुष्पिकायां स्वगोत्रनाम-पितुर्नाम, सोपाधिकं स्वनाम च प्रददाति ।

अस्य महाकवेः उपाधिः 'कविराजचक्रवर्त्ती' आसीत् । यद्यपि महाकाव्यमिदं पुरुषोत्तमस्य शासनकाले लिखितं तथापि प्रतापरुद्रस्य शासनसमये समाप्तिमगमत् । गजपतिपुरुषोत्तमदेवस्य शासनकालतः (१४६६-१४९७ ख्रीष्टाब्दः) गजपतिमुकुन्ददेवस्य शासनकालं यावत् (१५५९-१५६५ ख्रीष्टाब्दः) विद्यमान आसीत् । अतः मार्कण्डेयस्य समयसीमा पञ्चदशशतकस्य अन्तिमचरणात् षोडशशतकस्य द्वितीयचरणमध्ये भवितुमर्हति ।

रायरामानन्दपट्टनायकः—

गजपतिप्रतापरुद्रदेवस्य राजत्वकाले भवानन्दपट्टनायकस्य पुत्रः करणवंशजः रायरामानन्दः राजमहेन्द्रीप्रदेशस्य शासकः आसीत् । गीतगोविन्दस्य काव्यानुसरणेन, कविचन्द्ररायदिवाकरस्य अभिनवगीतगोविन्दसदृशं रामानन्द-पट्टनायकः राधाकृष्णयोः लीलासम्बलितसुमधुररससमन्वितं जगन्नाथवल्लभनाटकं रचयामास[131] । राधाकृष्णोपासना वैष्णवानां शिरोधार्यत्वेन करणीया आसीत् । विषयेऽस्मिन् रामानन्दस्यानुदानं महत्त्वपूर्णम् । गीतगोविन्दस्य तथा च अभिनवगीतगोविन्दस्य प्रभावः अस्मिन् ग्रन्थोपरि प्रभूतोऽस्ति । नाटकमिदं पञ्चाङ्क-विशिष्टम् ।

लोकप्रियनाटकमिदं गौडीयवैष्णवकविः श्रीचैतन्यस्य १५०९ मिते ख्रीष्टाब्दे श्रीक्षेत्रे आगमनात् प्राक् विरचितम् । वैष्णवसमाजे अस्य लोकप्रियता प्रभूता आसीत् । परवर्त्तिकाले उत्कलीयशास्त्रप्रणेता रामानन्दप्रणीत 'जगन्नाथवल्लभ'नाटकस्य सङ्गीतम् उदाहरन्ति । अतः युगेऽस्मिन् स प्रख्यातवैष्णव-भक्तकविः सङ्गीतज्ञश्च आसीत् । जगन्नाथवल्लभस्य रचनाकालः १५०९ ख्रीष्टीयाब्द इति प्रायशः स्थिरीक्रियते ।

श्रीजयदेव-आचार्यः—

सुनामधन्यकविडिण्डिमजीवदेवाचार्यस्य पुत्रः श्रीजयदेवआचार्यः श्रीराधाकृष्णयोः प्रेमलीलापरकम् एकाङ्कविशिष्टं ''पीयूषलहरी'नामकं रूपकं विरचितवान् । ग्रन्थोऽयं केदारनाथमहापात्रः तथा P.C. Rath महोदयेन "The Journal of Kalinga H.P. Society" पुस्तके आंग्लोभाषया अनुवादो विहितः[132] । ग्रन्थे सर्वोपरि गोपीपरिवेष्टितः कृष्णः आराधितः । अध्यापकलिङ्गराजमिश्रः पुर्यां श्रीमुकुन्दपुरशासनात् अपि च गञ्जाममण्डलस्थित शेरगडस्थानात् अस्य ग्रन्थस्य द्वे तालपत्रमातृके प्राप्तवान् । ग्रन्थस्यास्य अन्तिमपुष्पिकासु उल्लेखोऽस्ति यत् इति 'श्रीमत् कविडिण्डिम पण्डित-भूजीवजीवदेवोद्भव-जयदेवकृत-कृष्णलीला-विधायिनी-पीयूषलहरी समाप्ता[133] ।

श्रीजगन्नाथदेवस्य मन्दिरभागे अभिनीतमिदं नाटकम् । ग्रन्थरत्नस्य निर्विघ्नं परिपूर्त्त्यर्थं ग्रन्थारम्भे मङ्गलाचरणश्लोके हरगौर्योर्नृत्यं तथा द्वितीयश्लोके गोपीपरिवेष्टितस्य श्रीकृष्णस्य रासलीला वर्णिता । अन्तिमे च उत्कलनाथ कपटदारुविग्रहो जगदीश्वरः श्रीजगन्नाथः सम्प्रार्थितः[134] ।

शुभमस्तु सर्वजगतां निरन्तरं
न रिपोरपि स्फुरतु वै पदं पदम् ।
जगदीश्वरकपटदारुविग्रहः
करुणाकटाक्षलहरीं विमुञ्चतु ॥

पीयूषलहरीनाटकस्य नामान्तरं वैष्णवामृतगोष्ठीरूपकर्म । गोपगोविन्दं तस्य अन्या कृतिः । ग्रन्थरचनाकालः १५२५तः १५३५ ख्री.अ. मध्ये सम्भाव्यते ।

कृष्णदासबडजेनामहापात्रः—

सङ्गीतशास्त्रविशारदस्य वैष्णवकवेर्बडजेनामहापात्रस्य 'गीतप्रकाशः' प्रसिद्धा कृतिः । अस्य ग्रन्थस्य एका जीर्णशीर्णकीटदंष्टमातृका ओडिशाराज्य-संग्रहालये अस्ति[135] । अत्र सप्तोल्लासाः सन्ति । पुष्पिकायां ग्रन्थकारस्य नामापि उल्लिखितं दृश्यते । 'इति श्रीकृष्णदासबडजेनामहापात्रकृते गीतप्रकाशे छायालग-निर्णये द्वितीयोल्लासः ।

भक्तकविकृष्णदासः स्वग्रन्थारम्भे श्रीजगन्नाथं वन्दते । अत्र मङ्गलाचरणे स कविस्तस्य स्तुतिं करोति ।

कामदं नीलशैलस्थं करुणावरुणालयम् ।
शरणं सर्वसत्त्वानां शाश्वतं धाम कामये ॥

सोऽपि उत्कलस्य अन्तिमस्वाधीननरपति-मुकुन्ददेवस्य सभामण्डनम् अकरोत् । कृष्णदासबडजेनामहापात्रः ओडिशीसङ्गीतस्य जन्मदाता । न केवलं तस्य संस्कृत-भाषायां पारदर्शिता आसीत् । ओडिआ-व्रजबोलि-भाषासु अपि पारदर्शिता आसीत् । तस्य 'गीतप्रकाश' काव्यम् उत्कले वैष्णवसमाजे सम्मानितमभूत् । 'गीतप्रकाश' व्यतिरेकेण श्रीगीतगोविन्दानुकरणेन राधामाधवकेलिकथा रचितं गीतिकाव्यं तस्य कृतिः तस्मात् कतिपयानि पद्यानि उद्धृतानि ।

नटरागेण किमिति करोषि कृशोदरिरोषं ।
वदन महानन्द विकलशरीरं......विभापरि-
वचन मुदीरय मधुरयामिनी मृदुमदास्तितकान्तं
किञ्चन सिंच सुधारसबिन्दुभिरङ्गमिदं ममतान्तं
राधामाधव केलिकथारसखचितं नवमविधिगीतं
सुखयतु सज्जनचित्तमन्ततं कृष्णदासकविगीतम् ॥[136]

अस्य कवेः कालः १५५०-१५७० खीष्टाब्दः मध्ये भवेत् ।

यतीन्द्र-रघूत्तमतीर्थः—

यतीन्द्ररघूत्तमतीर्थः मुकुन्दविलासमहाकाव्यस्य प्रणेता । अनुमीयते यत् कविर्यतीन्द्ररघूत्तमतीर्थः पुर्य्यां स्थिते गोपालमठे संन्यासी आसीत्[137] । मुकुन्दविलासमहाकाव्यं जयदेवकृतगीतगोविन्दस्य तथा कविचन्द्ररायदिवाकर-प्रणीतस्य अभिनवगीतगोविन्दस्यावलम्बनेन विरचितम् । नटवरनागर-श्रीकृष्णस्य गोपयुवतिभिः रासक्रीडावर्णनं मुकुन्दविलासस्य प्रतिपाद्यविषयवस्तु । द्वादशसर्गविशिष्टमहाकाव्यमिदम् । गीतगोविन्दे प्रतिपादिताः गुज्जरी-वसन्त-भैरव-मालवादिरागाः अन्यत्र प्रयुक्ताः ।

'मुकुन्दविलास'महाकाव्यस्य ग्रन्थारम्भे मङ्गलाचरणानन्तरं दशावतार-वर्णना दृश्यते । परन्तु श्रीजयदेवप्रणीतगीतगोविन्दे कान्तकोमलपदावलीव अत्र रचना तथा श्रुतिसुखावहा न भवति । गीतगोविन्दप्रयुक्तानां गीतच्छन्दसां व्यवहारः अत्र बाहुल्येन कृतः । प्रतिसर्गं पुष्पिकासु कवेर्नामास्ति इति श्रीमन्मुकुन्दविलास-महाकाव्ये यतीन्द्ररघूत्तमतीर्थपादकृतौ गोपीपूर्वरागप्रकटनो नाम प्रथमः सर्गः ।' प्रायशः त्रिंशत् संख्यकानि रामनामानि प्राप्यन्ते । ग्रन्थरचनासमयः १५९९ शकाब्दः अथवा १६६७ खीष्टीयवर्षं भवति ।

दीनबन्धुमिश्रः—

श्रीमद्भागवतरसरसिकः कविवरो दीनबन्धुमिश्रः 'हरिभक्तिसुधाकर'नामकं भक्तिभावपूर्णग्रन्थं रचयामास । असौ परमवैष्णवश्चासीत् । अस्य ग्रन्थस्य द्वे तालपत्रमातृके ओडिशाराज्यसंग्रहालये संरक्षिते स्तः[138] । अन्या च Government Oriental Manuscript Library, Madras इत्यत्र विद्यते[139] । अयं ग्रन्थः नारायणमङ्गराजनाम्ना भणितः । परन्तु ऐतिहासिक केदारनाथमहापात्रमतेन ग्रन्थममुं दीनबन्धुमिश्रः कृतवान् । वनमालीरथः तस्य *Glimpses of Vaisnavism in Orissa* पुस्तके लिखति यत्[140] यथा- Dinabandhu Mishra Khadgaraya, the court poet of King Narayana, wrote in fact Haribhakti Sudhakara and attributed its authorship to his patron king Narayana Mangaraja. The Oriya Bhagavata popularly known as Khadanga Bhagavata is another work of the same author. The Sangita Narayana a treatise on music was composed by Dinabandhu under the patronage of king Narayana who happened to be his disciple."

अपि च चन्द्रशेखरमिश्रप्रणीतात् Life History of Samanta Chandrasekhara इति पुस्तकात् ज्ञायते यत् तदानीन्तनस्य भक्तप्रवरनृपतेः

नारायणमङ्गराजस्य राजगुरुः दीनबन्धुमिश्रः आसीत्[141] । दीनबन्धुमिश्रस्य अष्टादश-सहस्रपरिमिताः भागवतश्लोकाः कण्ठस्थाः आसन् । दीनबन्धुमिश्रः कौत्ससगोत्रीयः। ग्रन्थपुष्पिकासु ज्ञायते यत् हरिभक्तिसुधाकरनामकं भक्तिग्रन्थं दीनबन्धुः प्रणीतवान् । यत् हरिभक्तिसुधाकरग्रन्थस्य तथा ग्रन्थकर्त्तुः दीनबन्धुमिश्रस्य विषये विशदं व्याख्या च तृतीयपरिच्छेदे वर्णिता क्रियते[142] ।

भक्तशिरोमणेः दीनबन्धोर्जन्मकालविषये ग्रन्थे कापि सूचना न दीयते । ग्रन्थरचनाकालः तस्य ग्रन्थतः प्रतीयते यत् स ख्रीष्टीये अष्टादशशतके आविर्भूतः। तस्य स्थितिकालः १६७०-१७३५ मध्ये स्थिरीक्रियते ।

***

सन्दर्भनिर्देशः
(Notes & Reference)

1. छान्द.उप., 7.23.1
2. श्वेता. उप., 3.8
3. बृ.आ.उप., 2.4.3
4. श्री.भ.गी. 6.22
5. छान्द.उप. 5.3.11
6. श्रीमद्भ.गी., 6.21
7. श्रीमद्भ.गी., 18.55
8. श्री.भा. 12.12.47
9. श्री.भा. 1.7.10
10. श्री.भा. 7.7.36
11. वि.चू., श्लोक-4
12. श्री.भा. 10.51.47
13. श्री.भा. 2.3.10
14. श्री.भा., 10.20.6
15. म.भा. (सभापर्व), 68.46
16. श्री.भा. 10.2.37
17. पद्म.पु. 2.9.75
18. श्री.भा.गी. 4.7.8
19. श्री.भा. 3.29.11-12
20. ना.भ.सू., सू.सं. 2
21. शा.भ.सू. 1.2-1.3
22. भक्तिरसायन, 2.11
23. भ.र.सि. (पूर्वभाग) 1.11
24. भ.र.सि. (पूर्वभाग) 1.11
25. भ.र.सि. (पूर्वभाग) 2.5
26. श्री.भ.गी. 10.9
27. श्री.भा.10.80,19.20-21
28. श्री.भा. 7.5.23
29. प.पु.भा.मा. 27.3
30. श्री.भा. 7.5.23
31. मा.उप. (शान्तिमन्त्र)
32. शु.यजु. 25.21
33. ऋ.वे. 2.23.8
34. साम.वे. 1.32.18
35. ऋ.वे., 1.16.9
36. ऋ.वे. 3.62.10
37. साम. (मैत्रेयोपनिषद्) 1.4.8
38. ऋ.वे. 1.98.8
39. ऋ.वे. 8.102.15
40. ऋ.वे. 1.22.17
41. ऋ.वे. 8.92.19
42. ऋ.वे. 7.32.22
43. साम.वे. 1.2.153
44. ऋ.वे. 8.93.4
45. ऋ.वे. 1.89.2
46. साम.वे. 1.2.2.5
47. श्वेता.उप. 6.18
48. मा.उप. 1.2.7
49. छा.उप. 3.14.1
50. मा.उप. 2.2.3
51. श्वे.उप,(सर्वस्य शरणं बृहत्)3.17
52. श्वे.उप.(जनानां हृदये सन्निविष्ट)3.13
53. बृ.आ.उप. 3.9.1.10
54. श्वे.उप. 3.2
55. श्वे.उप. 3.17
56. कठ.उ. 1.2.20

57. कठ.उप. 1.2.22, तुल.मु.उप. 3.2.3
58. प्र.उप. 1.2
59. मु.उप. 2.2.3
60. श्रीभद्ग.गी. 18.55
61. श्री.भा. 11.20.32
62. बृ.ना.पु. 32.39
63. ग.पु. 2.19.17
64. वि.पु. 1.20.19
65. कूर्म.पु. (उत्तरार्द्ध) 4.25
66. प.पु.(पातालखण्ड)85.32
67. श्री.भा. 11.14.19
68. श्री.भा. 11.15.28
69. श्री.भा. 5.18.12
70. ह.भ.वि. 11.327
71. ह.भ.वि. 11.340
72. ऋ.वे. 1.19
73. श्वे.उप. 6.23
74. काव्यादर्श 2.276
75. काव्यादर्श 2.277
76. काव्यादर्श 2.278
77. काव्यादर्श 2.279
78. काव्यप्रकाश(चतुर्थ उल्लास) सू.-४७, पृ- 117
79. भ.र.सि. 2.11
80. ध्वन्यालोक (मङ्गलाचरण), पृ- 3
81. ध्वन्यालोक, 2.214
82. ध्वन्यालोक, 2.257
83. ध्वन्यालोक, 2.514
84. ध्वन्यालोक, 2.390
85. ध्वन्यालोक, 3.541-542
86. श्री.भा., 11.14.14
87. श्री.भा. 10.32.17
88. श्री.भा. 11.19.5
89. श्री.भा. 11.19.6
90. श्री.भा. 11.18.45
91. श्री.भा. 7.7.36
92. श्री.भा. 4.11.30
93. श्री.भा. 7.1.29-30
94. ना.भ.सू. 82
95. शा.भ.सू., सू- 10
96. भ.र.सि (पू.द्वितीयलहर्या) 2.3.79
97. भ.र.सि.(पू.वि.) 1.11
98. उज्ज्वलनीलमणि, पृ- 416
99. पद्म.पु. (पा.खण्ड) 85.5
100. पद्म.पु. (पा.खण्ड) 85.6
101. पद्म.पु. (पा.खण्ड) 85.7
102. पद्म.पु. (पा.खण्ड) 85.8
103. पद्म.पु. (पा.खण्ड) 85.9
104. पद्म.पु. (पा.खण्ड) 8.11-12
105. पद्म.पु. (पा.खण्ड) 85.15
106. पद्म.पु. (पा.खण्ड) 85.16
107. पद्म.पु. (पा.खण्ड) 85.29
108. पद्म.पु. (पा.खण्ड) 85.22
109. पद्म.पु. (पा.खण्ड) 85.30
110. स्क.पु. (प्रभासखण्ड)श्लो-१९
111. श्री.भा. 11.29.17
112. भक्तमाला, 39.40-41 (सर्ग)

113. श्री जयदेव ओ गीतगोविन्द, पृ-5
114. ओडिशार सांस्कृतिक इतिहास, पृ-202
115. ओडिशार संस्कृत लेखा ओ लेखक, पृ-15
116. तत्रैव- पृ-15
117. तत्रैव, पृ-21
118. व्रज.यु.वि., पृ-92
119. The Prachi (Quarterly English Journal, now defunct), Vol.2, Parts-III and IV, 1932, pp. 97-121.
120. व्रज.यु.वि., पृ-97
121. *Report on the Search of Sanskrit Manuscripts*, 1901, 1906 by H.P.Sastri, pp- 14-16
122. ओडिशार सांस्कृतिक इतिहास, पृ-196
123. कोणार्क (पञ्चसखा विशेषाङ्क) पृ- 11.12
124. *Descriptive Catalogue of Sanskrit Manuscripts*, Vol-VII, p-274-278
125. *O.H.R.J.*, Vol.-IX, 1960 No. 3.4., pp-51-68
126. दशग्रीववध महाकाव्य, पृ- 1.24
127. तत्रैव, पृ-1.24
128. दशग्रीववध महाकाव्य, (विंशतिसर्ग) श्लोक.सं. -57
129. दशग्रीववध महाकाव्य, (विंशतिसर्ग) श्लोक.सं. -58
130. दशग्रीववध महाकाव्य, (विंशतिसर्ग) श्लोक.सं. -59
131. रायरामानन्द श्रीमती सारलादेवी (ओ.सा.ए.), पृ -5
132. *The Journal Kalinga* (H.P. Society), Vol-I, No.4, March, 1947, pp-291-320
133. नवभारत षष्ठवर्ष पञ्चमसंख्या (लिङ्गराजमिश्रः), Oriya monthly magazine, Vol.-VI, No.5
134. *The Journal Kalinga*, p-320
135. O.H.R.J., Vol.-VII, July, 1958, No.2, pp-73-42
136. कोणार्क (पञ्चसखा विशेषाङ्क), पृ-40
137. ओडिशार संस्कृत लेखा ओ लेखक, पृ-53
138. *Descriptive Catalogue of Sanskrit Manuscripts*, VII

139. *An Alphabetical Index of Sanskrit Manuscripts*, Part-II
140. B. Rath, *Glimpses of Vaisnavism in Orissa*, p-18
141. *Life History of Samant Chandrasekhar*, p-19
142. हरिभक्तिसुधाकर समीक्षात्मकमध्ययनम्, प्रस्तुत शोधप्रबन्धस्य तृतीय परिच्छेदः, पृ- 255

***

तृतीयपरिच्छेदः

ग्रन्थकर्ता दीनबन्धुमिश्रः

ग्रन्थकर्त्तुः देशकालकृत्यादीनां परिचयः—

'महतां संस्तव एव गौरवाय' इति न्यायात् ग्रन्थकर्त्तुः विषये किञ्चित् वक्तुं बहु मन्ये । अथेदानीं 'हरिभक्तिसुधाकर'नामकस्य श्रीमद्भगवद्भक्तिप्रतिपादकस्य अपूर्वग्रन्थरत्नस्य सामग्र्यनुसन्धानात् श्रीमद्भागवतरसरसिकः परमहंसवर्यः कविवरः दीनबन्धुमिश्रः ग्रन्थस्य सङ्कलयिता रचयिता इति निश्चप्रचं वक्तुं शक्यते ।

प्रायः शतद्वयवर्षेभ्यः पूर्वं खण्डपडाराज्ये खड्गरायोपाधिकः दीनबन्धुमिश्र नामको भक्तकविरासीत् । तस्य राजदत्तोपाधिः खड्गरायः (खाडङ्गा) भवति । असौ महान् पण्डितः परमवैष्णवश्चासीत् । संस्कृते भागवते तस्य प्रगाढं पाण्डित्य-मासीत् । १६७३ खीष्टाब्दे खण्डपडाराज्यस्य द्वितीयो राजा नारायणमङ्गराजः राज्यशासनं कृत्वा १७०७ खीष्टाब्दे दिवंगतः । नारायणमङ्गराजः अतिवडि-जगन्नाथस्य वैष्णवमार्गी आसीत् । अस्मिन् काले परमभागवतः खाडङ्गा दीनबन्धुमिश्रः आविर्बभूव[1] । पण्डितचन्द्रशेखरमिश्रप्रणीतात् पुस्तकात् ज्ञायते यत् तदानीन्तनस्य भक्तप्रवरस्य नृपतेः नारायणमङ्गराजस्य राजगुरुः दीनबन्धुमिश्र आसीत्[2] । प्रत्यहं सायं गुरुदेवः श्रीमद्भागवतस्य तात्त्विकार्थं करोति अपि च शिष्यः आनन्दोन्मुखं शृणोति । भक्तप्रवर दीनबन्धुमिश्रस्य अष्टादशसहस्रपरिमिताः भागवतश्लोकाः कण्ठस्थाः इति जनश्रुतिः । वास्तवेन कविवरो दीनबन्धुमिश्रो दीनबन्धुरासीत् । गुरुदत्तोपढौकनात् अर्द्धांशं दरिद्रेभ्यः प्राददात् । वितरणं तस्य जीवनस्य परमव्रतमासीत् । खण्डपडाराज्यस्य लोकोक्तिषु ज्ञायते यत् भोजनार्थ-मुपविष्टोऽसौ जानाति चेत् यदि कश्चन क्षुधार्त्तः अतिथिरुपस्थितः तर्हि स्वस्य भोजनं दत्त्वा परमसन्तोषं प्राप्नोति स्म[3] ।

नारायणमङ्गराजस्यानन्तरं तस्य पुत्रः बालुङ्केश्वरमङ्गराज इति उपाधिधारण-पूर्वकं १७०७मिते खीष्टाब्दे राजाऽभूत् । मन्यते सम्भवतः राज्ञः पृष्ठपोषकतां प्राप्य तस्य एकान्तानुरोधेन भक्त-दीनबन्धुमिश्रः श्रीधरस्वामिकृतायाः संस्कृतभागवत-टीकायाः सरल-ओडिआ-नवाक्षरीवृत्तेन अनुवादं चकार । खाडङ्गाभागवत-रचनाप्रसङ्गे षष्ठस्कन्धे अन्तिमे लिखितमस्ति[4] ।

मोहर दीनबन्धु नाम । खण्डपडा दुर्गे विश्राम ॥
करिछि तहिँर भूपति । से गुरु वैष्णवे भगति ॥
से दाताधीर सत्याभासी । श्रीभागवत ग्रन्थाभ्यासी ॥
नाम अटइ ताहाङ्कर । मङ्गराज बालुङ्केश्वर ॥
ताङ्क प्रीतिरे वश हेलि । भागवतकु गीत कलि ॥[5]

दीनबन्धुमिश्रकृत खाडङ्गाभागवतस्य एकादशस्कन्धः प्राचीसमितिपक्षतः सङ्कलितः प्रकाशितश्च आसीत्[6]। परन्तु सम्पूर्णभागवतस्य पाण्डुलिपिः भुवनेश्वर-श्रीजयदेवराज्यसंग्रहालये संरक्षिता भवति । ग्रन्थरत्नस्य रचयिता दीनबन्धुमिश्रः कौत्ससगोत्रीयः। स्वस्य भक्तकृष्णदासस्य अथवा कृष्णभक्तानां चित्ताह्लादनार्थं हरिभक्तिसुधाकरनामकं ग्रन्थरत्नं प्रणीतवान् इति ग्रन्थपुष्पिकासु ज्ञायते ।

श्रीमद्भागवताम्भोधेर्हरिभक्तिसुधाकरः ।
प्रकाश्यते दीनबन्धुमिश्रेण प्रीतये सताम् ॥[7]

अच्छ कौत्सकुललब्धजन्मना कृष्णभक्तिरतदीनबन्धुना ।
ग्रन्थ एष रचितोऽस्तु सन्ततं कृष्णदास हृदये प्रमोददः ॥[8]

केचन आलोचकाः प्रमादवशतः सोऽयं हरिभक्तिसुधाकरः महाराजनारायण-मङ्गराजेन लिखित इति मन्यते । परन्तु ग्रन्थपुष्पिकासु स्पष्टं ज्ञायते यत् कविदीनबन्धुमिश्रः नारायणमङ्गराजस्य सामकालिकः । नारायणमङ्गराजः सङ्गीतपेशलः कृष्णभक्तः च आसीत् ।

इह क्षितौ सर्वगुणैरुपेतः सङ्गीतविद्भूरियशाः सुशान्तः ।
घोरासिविद्यार्णवकर्णधारो विभाति नारायणमङ्गराजः ॥[9]

दीनबन्धुमिश्रः आनन्दरसस्वरूपं भक्तिग्रन्थं १६१० मिते शकाब्दे ख्रीष्टीये १६८८ मितेऽब्दे रचितवान् । दीनबन्धुमिश्रः स्वकृत 'हरिभक्तिसुधाकरे' इत्थं लिखति ।

महानदी दक्षिणभूप्रदेशे देशे तदीये वसता शकाब्दे ।
गते नभश्चन्द्ररसेन्दुसंख्ये विनिर्मिता भक्तिसुधाकरोऽयम्[10] ॥

(१) कवेः वंशावली—

खाडङ्गा-कवि-दनिबन्धुमिश्रः कौत्ससगोत्रीय-वाजपेयिवामदेवस्य वंशधरो भवति । वाजपेयिवामदेवमिश्रः प्रतापरुद्रदेवस्य राजगुरोर्वाजपेयि-बलभद्रमिश्रस्य ज्येष्ठभ्राता । वाजपेयिवामदेवस्य समयः प्रायशः १५२०-१५५० ख्रीष्टाब्दः। दीनबन्धुः तस्य अधस्तनः सप्तमपुरुषः अपि च मधुसूदनमिश्रस्य पुत्रः आसीत् । खाडङ्गा-भागवतस्य रचनाकालविषये कापि सूचना नास्ति । परन्तु

खाडङ्गाभागवतस्य रचयिता दीनबन्धुमिश्रः प्रस्तुतहरिभक्तिसुधाकरस्यापि रचयिता कौत्ससगोत्रीयः । तस्य वंशरेखा ईदृशी ।

वामदेव वाजपेयी[11]

|

सर्वेश्वर वाजपेयी

|

दुर्गादास वाजपेयी

|

बालुङ्कि दीक्षितः

|

जीवदासमिश्रः

|

मधुसूदनमिश्रः

|

दीनबन्धुमिश्रः

खाडङ्गाभागवतस्य द्वादशस्कन्धस्य अन्तिमे स्कन्धे कविः स्वस्य वंशावलीं प्रददाति। प्राचीसमितेः सङ्कलितखाडङ्गाभागवतस्य एकादशस्कन्धस्य मुखबन्धेऽपि इदं वर्णितम्[12] ।

(२) कवेः कालः—

भागवतप्रेमी कविर्दीनबन्धुः स्वस्य जन्मकालसम्बन्धे ग्रन्थे किमपि प्रमाणं न ददाति । किन्तु तस्य रचनात् प्रतीयते यतः स खीष्टाब्दानाम् अष्टादशशतके आविर्भूतः । खीष्टीयः १६७०-१७३५मितः कालः इति स्थिरीक्रियते । दीनबन्धुमिश्रः खण्डपडाराज्यस्य प्रसिद्धदेवस्य भगवतः श्रीनीलमाधवस्य उपासकः आसीत् । अतः स तदीयरचित'हरिभक्तिसुधाकर'नामकं ग्रन्थरत्नं भगवते समर्पयति[13]।

हे कृष्ण ! हे कमललोचनदीनबन्धो
भक्तानुकम्पकहरे करुणैकसिन्धो ।
दीनावलम्बजगदीश्वर पाहि दीनं
मां युस्मदीय-चरणाम्बुरुह-प्रपन्नम् ॥
इयमच्युत हृत्सरोरुहे वसतः शासनवर्त्तिना तव ।

ग्रथिता शुभपद्यसंहति स्त्वयि कारुण्यनिधौ समर्पिता ॥

(३) कवेः कृतिः—

ग्रन्थकारस्य दीनबन्धुमिश्रस्य 'हरिभक्तिसुधाकरः' तथा अन्याः कृतयोऽपि सन्ति । यथा- खाडङ्गाभागवतम् (उत्कलभाषायाम्), भागवतभक्तिशतकम्, उपदेशशतकम्, स्तवमुक्तावली, रामलीलामृतम्, स्मरणामृतस्तवः, अपराधभंजनम् इत्यादयोऽप्रकाशिता ग्रन्थाः सन्ति । तस्य पौत्रः राजवल्लभमिश्रः तेन रचिता 'भक्तिरत्नमाला'पुस्तिकाऽपि सङ्कलिता । परन्तु अधुना दुष्प्राप्या[14] । तत्प्रणीतं 'श्रीकृष्णस्तवरत्नम्' अद्यापि खण्डपडाग्रामे बहुधार्मिकाः सन्ध्याविधौ नित्यकर्म-समये पठन्ति । यथा-

जय जय कृष्ण कृपामयसिन्धो
व्रजवनिताजन-जीवन-बन्धो ।
अधिमुनिमानसमुल्लसदमलं
वन्दे नित्यं तव पदकमलम् ॥

\+ \+ \+ \+

धर्मं चार्थं कामं मोक्षं
याचे नाहं किमपि परोक्षम् ।
तव चरणाम्बुजसेवामेव
प्रवितर मह्यं मुरहर देव ॥

श्रीकृष्णस्तवरत्नपठने भक्तिसुधाकरादिभ्यो ग्रन्थराजिभ्यश्च ज्ञायते यद् दीनबन्धुमिश्रः परमवैष्णवो भक्तकविश्चासीत्[15] । सप्तदशशताब्द्यां वैष्णवपरम्परायाः सुवर्णयुगे तस्य प्रौढरचनाभिः संस्कृतवाङ्मयभाण्डागारं रत्नमण्डितं कृत्वा उत्कलीयधर्मधारायाः परम्परायां स्तम्भ इवास्ते इति निश्चप्रचम् ।

(४) हरिभक्तिसुधाकरग्रन्थस्य पृष्ठभूमिः—

वर्षाणां भारतः श्रेष्ठो देशानामुत्कलः स्मृतः ।
उत्कलस्य समो देशो, देशो नास्ति महीतले ॥[16]

भारतस्य पूर्वदिग्भागेऽवस्थितस्य उत्कलराज्यस्य धर्मधारायाः तथा भगवद्भक्तेः विस्तृतपरम्परा बहुप्राचीनतमा । याम् आश्रित्य उत्कलीयसंस्कृतेः विकाशो जातः । वेद-उपनिषत्-पुराण-ज्योतिष-काव्य-नाटकादयः तस्या लिपिबद्धा प्रतिनिधि-स्वरूपा इति कृत्वा हरिभक्तिसुधाकरग्रन्थरचनायाः पृष्ठभूमिरूपेण भगवद्भक्तेः

परम्परायाः संक्षिप्तसूचना अत्र दीयते ।

हरिभक्तिसुधारकरे वर्णितपद्यानां विषयस्य संवादः श्रीमद्भागवते वर्णितपद्यैः सह युज्यते । बृहन्नारदीयपुराणस्य च प्रभावः कविदीनबन्धुमिश्रस्य वर्णितविषयोपरि निपतति । अतः कविवरमिश्रमहोदयेन नूनं तेषामेव ग्रन्थानां विषयेण प्रभावित इत्यत्र नास्ति सन्देहस्य अवकाशः । परन्तु श्रीमद्भागवतस्य अमृतवर्षिकान्तकोमलमधुरपद्यानां शाश्वतप्रेरणा कविवरस्य दीनबन्धुमिश्रस्य स्वकीयदिव्यप्रतिभा च सम्भूय तं हरिभक्तिसुधाकरग्रन्थ दिव्यरसपरिवेषणार्थं प्रचुरप्रभावं प्रचोदयामासतुः ।

कवेः दीनबन्धुमिश्रस्य भक्तिग्रन्थो हरिभक्तिसुधाकरः संस्कृतसाहित्यस्य एकोऽनुपममणिः । अस्य ग्रन्थस्य वर्णितस्य असाधारणभक्तिविभवस्य वर्णनमत्यन्तं व्यापकम् । ग्रन्थस्यास्य लोकोत्तरचमत्कारिता च साधारणजनानां हृदयानि हरति हारयति च । हरिभक्तिसुधाकरः संस्कृतभक्तिसाहित्ये अभिनवमार्गं प्रदर्शितवान् । यतो हि भक्तिग्रन्थेषु अयं भक्तिश्रेण्यामन्तर्भवति ।

भक्तिरनन्ता व्याप्ता पुष्कला च । तस्याः शाखा अशेषाः । वैष्णवभक्तानां सरल-शृङ्खलित-भक्तिमार्गः अनेनैव ग्रन्थेन निर्णीयते । वैष्णवधर्मस्योपरि यतो हि अयं ग्रन्थः विरचितः ततो हि भक्तेः माहात्म्यविषये काऽपि चर्चा अपेक्षिता वर्त्तते।

कलियुगेऽस्मिन् भक्तिं विना आत्मोद्धाराय नान्यः सुगमः उपायोऽस्ति । अतः मानवाः भक्तिसाधनतत्परा भवन्ति । मानुषमेव जन्म सर्वतो भगवत्प्रियम् । भक्त्या भगवतो वास्तविकं स्वरूपं विज्ञाय परमपुरुषार्थं निर्वाणपदं प्राप्तुं समर्थो भवति । श्रीमद्भगवद्गीतायां स्वयमेव श्रीकृष्णेन उक्तम्[17]—

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥

प्रलयाभिमुखिनि संसारेऽस्मिन् परमात्मनि संसक्त्या भक्त्या समः कश्चन मङ्गलकारी मार्गो दृष्टिगोचरो न भवति । भगवति वासुदेवे प्रयोजिता अहैतुकी भक्तिः पुंसां परमो धर्म इति सिद्धान्तयन् शौनकं प्रति सूतवाक्येन आह[18]—

स वै पुंसां परो धर्मो यतो भक्तिरधोऽक्षजे ।
अहैतुक्यप्रतिहता ययात्मा सुप्रसीदति ॥

भगवति श्रीकृष्णे अहैतुक्या-अनिमित्तिकया भक्त्या अन्तःकरणं सत्त्वप्रधानतया निर्मलं प्रसन्नं भवति । एवं च तत्त्वज्ञानोदयश्च जायते । भगवति वासुदेवे श्रीकृष्णे कृतः भक्तियोगः शीघ्रं निष्कामज्ञानं वैराग्यं च जनयति । तदर्थं भगवद्भजनमेव

आवश्यकं भवति । अत उक्तम्[19]—

वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ।।

प्रकृतेः सत्त्वं, रज, स्तमः इति त्रयः प्रधानगुणाः सन्ति । तेभ्यः परः एकः श्रेष्ठपुरुषो भवति भगवान् नारायणः अस्य विश्वस्य सृष्टि-पालन-प्रलयार्थं ब्रह्म-विष्णु-महेश्वर रूपाणि धत्ते । तेषु सत्त्वप्रधानो भगवान् वासुदेवो मानवानां कल्याणकारी । एतदर्थं सत्त्वशरीराद् समुद्भूतो वासुदेव एव सेवनीयः । वासुदेवः सर्ववेदप्रतिपाद्यः । यागयज्ञादिवासुदेव-तात्पर्यको भवति । अतः गीतायाम् उक्तम्[20]—

यत् करोति यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।।

अतः गीतावचनानुसारं यज्ञानां वासुदेवार्पकत्वेन ते वासुदेवप्रतिपादकाः इति स्पष्टम् । आसनप्राणायामादियोगक्रियाः भगवज्ज्ञानोपायत्वेन प्रसिद्धाः । ज्ञानतपोधर्मादीनां वासुदेवपरत्वम् । स्वर्गादिगतिश्च वासुदेवः परम इति निश्चप्रचम् । अतः वासुदेवस्यैव भजनं मानवमात्रस्यास्ति मुख्यं कर्त्तव्यम् । कामलोभाभ्यामासक्तानां मनः यमनियमादि अष्टाङ्गयोगमार्गैः न शाम्यति । यद्वत् मनो निरतमुकुन्दपूजया भक्त्या यथा सुप्रसीदति न तथा यमादिना अष्टाङ्गयोगसाधनद्वारा[21] ।

यमादिभिर्योगपथैः कामलोभहतो मुहुः ।
मुकुन्दसेवया यद्वत्तथात्माद्धा न शाम्यति ।।
भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले ।
अपश्यत् पुरुषं पूर्णं मायां च तदुपाश्रयाम् ।।[22]

वेदसङ्कलनस्य महाभारतरचनायाः ब्रह्मसूत्रस्य सप्तदशानां पुराणानां च रचनानन्तरं महर्षेर्व्यासस्य मनसि शान्तिर्न आयाति । अतः निश्चलो भूत्वा तिष्ठति । तदा नारदस्तस्य समीपम् आगत्य भक्तिप्रधानाष्टादशपुराणप्रणयनार्थम् उपदेशं ददाति स्म । तदनन्तरं शान्तिसाधनार्थम् एकमात्रभक्तियोगो मुख्यो भवति इति विचार्य तेन श्रीमद्भागवतप्रणयनं कृतम् । भागवतश्रवणेन हृदये प्रेममयी भक्तिरुदेति । निष्कामभक्त्या अज्ञानम् अपनीयते । यथा जठराग्निर्भुक्तमन्नं झटिति पाचयति । भगवद्भक्तौ मुक्तिसुखं तु आनायासेन भवतीत्याह[23] —

तैर्दर्शनीयावयवैरुदार-विलास-हासेक्षित-वाम-सूक्तैः ।
हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुङ्क्ते ।।

सर्वभूतानाम् अन्तर्यामिणो भगवतो भजनं विना तीव्रकालभयं न विनश्यति । अतः

प्रीत्या भगवतो गुणाश्रयो भक्त्या तत्पदाम्बुजभजनमेव कर्त्तव्यम् । यो जनः प्रकृतिपुरुषयोर्नियन्तारं भगवन्तं वासुदेवं सर्वभावेन प्रपन्नः शरणागतः हि एव विष्णुभक्तः रुद्रस्यापि प्रियो भवति । अत एव देवतान्तरोपासनापि भगवद्भक्तौ अन्तर्भवति । यस्य भगवति श्रीकृष्णे निष्कामा भक्तिरस्ति । तस्मिन् जने सकला देवाः ज्ञानवैराग्यैश्वर्यादिभिः सह नित्यं वसन्ति । श्रीमद्भागवतस्य सन्तोषकारणं न सौन्दर्यं, न मधुरवाणी, न शुद्धि र्न शोभना आकृतिरावश्यकी अस्ति । अल्पप्रमाणं धान्यं परित्यज्य अन्तःकरणहीनानां स्थूलधान्यावभासानां तुषाणां कृते न किमपि फलं हस्तगतं भवति । तथैव भक्तिं तुच्छीकृत्य ये केवलं ज्ञानाय प्रयतन्ते तेषामपि किञ्चित् फलं न जायते । पूर्वकाले अनेकेऽपि योगिनः योगमार्गेण असफलतया स्वकीयैः कर्मभिः भगवति अर्पितात्मानः भगवत् कथा-श्रवण-कीर्त्तनादि-प्रसादादुत्पन्नया भक्त्या एव आत्मानं ज्ञात्वा मोक्षं प्राप्ता । भगवति भक्तिमात्रग्राह्यत्वे विपर्ययशङ्का नास्ति । ब्रह्मणः निरुपाधेः सर्वात्मनः सर्वान्तर्यामिणः समदृशः सर्वत्र सममात्मानमेव पश्यतीति । सुखानुभूतेः स्वात्मानन्दभगवतः श्रीकृष्णस्य स्वपरभेदो नास्ति । यो यादृशीं सेवां करोति स तदनुरूपफलं लभते । कालवशात् स्वधर्मभ्रष्टा अपि यदि वासुदेवपरा स्तर्हि ते भागवता कृतार्थाः ।

घोरे कलियुगे प्राप्ते सर्वधर्मविवर्जिते ।
वासुदेवपरा मर्त्यास्ते कृतार्था न संशयः ॥[24]
संसारकूपपतितं विषयैर्मुषितेक्षणम् ।
ग्रस्तं कालाहिनात्मानं कोऽन्यस्त्रातु मिहेश्वरः ॥[25]

पाकाद्यर्थं प्रज्वलिते वह्निः काष्ठानि भस्मीकरोति तथैव रागादिवासनामपि कथञ्चित् भगवद्विषया सती भक्तिः भक्तस्य समस्तान् पापराशीन् भस्मस्मात् कुरुते । अतो भक्तियोग एव परमं कल्याणसाधनमस्ति । ये भगवदुपासकाः भगवता आदिष्टान् उपदिष्टान् च भगवतो मार्गान् अनुतिष्ठन्ति ते शुभे काले भगवत्स्थानं लभन्ते । सर्वदा भागवतानां सेवया परिचर्यया श्रीमद्भागवतस्याध्ययनेन पापादिषु क्षीणत्वं गच्छत्सु भगवति श्रीकृष्णे नैष्ठिकी भक्तिर्जायते । भगवति वासुदेवे निरन्तरं भक्तिं कुर्वन्तो निर्मलान्तःकरणाः सज्जना भगवद्गुणकथामृतपानमत्ताः सन्तः संसारसमुद्रम् अयत्नतः पारं यान्ति । सत्सङ्गतीर्थान्यपि शुद्धयन्तीत्याह[26] —

तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया ।
भीतस्य किन्न रोचेत तावकानां समागमम् ॥

सत्सङ्गं विना संसारे निस्तारो नास्ति ।

अखिलेषु जन्मसु शोभनं मनुष्यजन्म एव । परलोके स्वर्गेऽपि अपरैः जन्मभिः देवादिभिः किं नैवास्ति किञ्चित्फलम् । यत्र यस्मात् देवादिर्जन्मसु स्वर्गे किं फलम् ? भगवतो यशसा पूतम् अन्तःकरणं येषां तेषां जडभरतादीनां महात्मनां भगवद्भक्तानां जनानां स्वर्गेऽपि समागमः न भवति । तैः भगवत्सङ्गरहितैः देवादिजन्मभिः अपि किमपि फलं न । अग्निः, सूर्यः, चन्द्रमाः, तारका, पृथ्वी, जलम्, आकाशः, वायुः, वाणी, मनः सर्वे सेविता अपि भेदबुद्धिं कुर्वतः पुंसः पापं न हरन्ति । परन्तु तत्त्वज्ञानिनः मुहूर्त्तसेवया क्षणमात्रसेवया च पापं दूरं गच्छति।

दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः ।
तत्रापि दुर्लभं मन्ये बैकुण्ठप्रियदर्शनम् ॥[27]

शरीरिणां क्षणमात्रेण विनाशशीलः मानुषो देहः दुर्लभः परमपुरुषार्थसाधकत्वात् । भगवन्तं सेवमानस्य शीतं भयं तमश्चेति नश्यति तथा साधून् संसेवमानस्य शीतं कर्मादिजाड्यभयं संसारभयं सन्मूलमज्ञानं च भक्तिं प्राप्य नश्यति । महतां भगवद्भक्तानां शरणभूतस्य भगवतः श्रवण-कीर्त्तन-स्मरण-पादसंवाहनादिरूपा पूजा नमस्कारः दास्यं सख्यम् आत्मसमर्पणं च एतावानेव मानवानां परमो धर्मः । हृदये भगवान् संकीर्त्तितः मानवानां दशसहस्रजन्मनां पापनाशो याति । भगवत्प्रार्थनायामपि च श्रवणपरायणानां संसारोऽपि न दुःखायते ।

भगवान्नारायणो नित्यं श्रद्धया लीलाकर्म शृण्वतः गृणतः कीर्त्तयतः पुरुषस्य हृदि अन्तःकरणे स्वल्पेन कालेन प्रकाश्यते ।

यत्र स्थाने जनाः ऐहिकेषु पारलौकिकेषु च कर्मसु भगवतः श्रीकृष्णस्य श्रवणादीनि न कुर्वन्ति तत्र हि राक्षसाः प्रभवन्ति । यो हि मानवः भागवतांघ्रिरेणुं तथा कदाचित् भगवद्भक्तानामङ्घ्रिरेणुं न स्पृशेत् तस्य जीवनं मृतवत् भवति । भगवतः श्रीकृष्णस्य स्थावरं जङ्गमं च चराचरं जगत् भगवतः भक्तरूपं मत्वा प्रणमेत् स एव सफलम् । ये जनाः भक्तानां मुखेभ्यः सर्वस्वरूपेण वर्त्तमानस्य भगवतः श्रीकृष्णस्य कथामृतं श्रद्धया शृण्वन्ति ते विषयदूषिताशयमन्तःकरणं पुनन्ति अपि च भगवतः श्रीकृष्णस्य चरणसरोरुहयोः सामीप्यं लभन्ते[28] ।

पिबन्ति ये भगवत आत्मनः सतां मुखात्
कथामृतं श्रवणपुटेषु संभृतम् ।
पुनन्ति ते विषयविदूषिताशयं
व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥

ये भक्तजना ज्ञानमार्गे प्रयत्नमुत्सृज्य स्वस्थाने स्थिता तीर्थादिभ्रमणक्लेश-

रहिताः सन्तः साधुजनकीर्त्तिता भगवच्चरितं कायवचनान्तःकरणैः एव जीवन्ति ते धन्याः । ते अचिरेण परमपदं प्राप्नुवन्ति । अतः भगवद्भक्ताः भगवद्दर्शनश्रवण-कीर्त्तनादिकं विहाय न किञ्चिदन्यदपि वाञ्छन्ति । तपोदानादिप्रायश्चित्तमपि न सर्वथा सर्वेषां पापं दूरीकरोति । परन्तु हृदि प्रविष्टमात्रो भगवान् श्रीकृष्णः सर्वपापं निरवशेषं हरति । भगवतः श्रीकृष्णस्य नाम यः कर्णपथं न कदाचिदपि धत्ते स पुरुषः ग्रामसूकरैः श्वभिः उष्ट्रैः तथा भारवाहिगर्दभैः तुल्यो भवति । ते भगवत्कथां त्यक्त्वा असद्गाथां शृण्वन्ति ते पशुष्वपि अधमा भवन्ति । अतः असत्कथां विहाय भगवत्कथाश्रवणमेव पुरुषस्य कर्त्तव्यम् । ये भगवन्तं कीर्त्तयन्ति ते जन्मान्तरे शुभं फलं प्राप्नुवन्ति । ये भगवन्तं न कीर्त्तयन्ति तेषां सर्वमेतद् व्यर्थं भवति । श्रीहरिकीर्त्तनं विना कस्यापि चित्तं न तत्त्वाभिमुखं भवति । अतः सदा भगवत्संकीर्त्तनं फलम् अन्तःकालेऽपि कृतं तन्मोक्षाय भवतीति । अतः हरिकीर्त्तनपरा एव धन्या भवन्ति । भगवान् तेषाम् अखिलानि पापानि घ्नन्तीति । एवं च ते स्वगुणकर्मजन्मभिः पुनन्ति तस्मात् कीर्त्तनमेव परमा भक्तिरिति श्रीशुकदेववचनेन[29] —

इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शन्तमानि ।
अन्यत्र चेह च श्रुतानि गृणन् मनुष्यो, भक्तिं परां परमहंसगतौ लभेत ॥

भगवत्स्मरणशीला मानवाः जायन्ते कृतार्थाः । भगवद्वासुदेवस्य चरणकमलयोः अविस्मरणं सर्वदा ध्यानं च पापानि क्षिणोति । अपि च चित्तस्य शुद्धिः परमात्मभक्तिः च विषयवैतृष्ण्येन च ज्ञानं वर्द्धयति । भगवत्स्मरणमात्रमेव सर्वपुरुषार्थहेतुः । भक्तवत्सलाः साधवः ज्ञानानन्तरमपि भजन्ति तेषां निमित्तं किमपि न प्रयोजनम् ।

श्रीकृष्णसक्तमानसा यादवाः एकत्र शयनम्, उपवेशनम्, भ्रमणम्, कथोपकथनम्, क्रीडनं, स्नानं, भोजनादि कुर्वन्ति । तेषाम् आत्मस्वरूपं देहेन्द्रियादि जन्यं दुःखं न ज्ञातव्यम् । भगवत्स्मरणाद् विषयसुखं निकृष्टतरं भवति । अर्पितात्मनः सर्वप्रकारेण सर्वविषयेषु कामनाशून्यस्य पुंसः परमानन्दस्वरूपेण यत् सुखं भवेत् तत् कुतः सम्भवेत् । विषयान् चिन्तयतः मनो विषयेषु विषयाकारं भवति एवं च भगवन्तमनुस्मरतः अनुक्षणं चिन्तयतो जनस्य चित्तम् एव प्रविलीयते । यस्मात् स्मरणमुखं सर्वतो गरीयः भवति । समस्तानां सत्त्वगुणानाम् आश्रयभूतां भगवन्तं वासुदेवं चित्ते ध्यायन् भगवत्पादपोतेन भगवच्चरणनौकया संसारसागरं गोवत्सचरणवत् अनायासेन तरति । अतः भगवच्चरणारविन्दयोः प्रसादात् यद् भवति तत् कुतोऽपि न भवति । यद् भगवन्तं देवाः, गुरवः, जनाः च मिलिताः

स्वयं भगवन्निरपेक्षाः भगवत्प्रसादयुक्तभागलेशं कर्त्तुम् आचरितुं न प्रभवन्ति । भगवत्पादसेवा न त्याज्या । नित्य भगवद्ध्यानमेव कर्त्तव्यम् । कर्मणाऽपि मनः शुद्धिर्भवति । भगवत्पादसेवनं विना जीवनं मृतमिव । वस्तुतः भगवद्भक्ताः न किमपि वाञ्छन्ति । योगिनः भगवत्पादसेवाकर्त्तव्यतया ज्ञानवैराग्ययुक्तेन भक्तियोगेन निःश्रेयसलाभाय भगवत्पादमूलं सेवन्त इति स्वमातरं प्रति कपिलवाक्येन[30] —

ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः ।
क्षेमाय पादमूलं ते प्रविशन्त्यकुतोभयम् ॥

ततः भगवतः श्रीकृष्णस्य चरणकमलं भक्त्या सेवमानस्य भक्तस्य प्रेमलक्षणं भगवत्यनुरागः अन्तःकरणप्रकाशः तत्त्वज्ञानं विरक्तिः वैराग्यम् । यतः अविलम्बेन आत्यन्तिककल्याणं प्राप्नोति । यथा हि तरोः वृक्षस्य मूलेऽवसेचनं स्कन्धशाखानां सेचनं भवति तथैव आत्मनः परमात्मनो विष्णोः आराधनं हि सर्वेषां देवानामाराधनं भवति । भगवति पूजिते तदात्मकं जगत् एव पूजितं भवतीत्यर्थः । तथा च ये जनाः भगवन्तमेव पूजयन्ति ते एव वेदांगतत्त्वज्ञाः स्युः । भगवदर्चनमेव चित्तस्य उपशमः, योगः सुगमः मोक्षोपायः । अतः भगवत्पूजायां सर्वस्यैवाधिकारो वर्त्तते। भगवत्पूजायां भावशुद्धिरेव परमा सामग्री । यो जनः भक्त्या भगवतः श्रीकृष्णस्य पदपङ्कजं ध्यायेत्, नमस्यति तस्य जीवनं सार्थकं भवति । सर्वविधममङ्गलं निवारयति। अतःआकाशः, वायुः, अग्निः, सलिलं, पृथ्वी, चन्द्रमाः, सूर्यादीनि नक्षत्राणि, जीवजन्तवः, दिशः, वृक्षः, नदी, समुद्राश्चेति स्थावरजङ्गमात्मकं वस्तु सर्वं हरेः भगवतो विष्णोः शरीरं मत्वा भक्तः प्रणमेत् । स सर्वविधपातकात् मुक्तो भवति । परमानन्दः निरतिशयसुखं सर्वतः परिपूर्णं शाश्वतं ब्रह्मस्वरूपं येषां मित्रत्वेन प्राप्तं तेषां महद् भाग्यम् । भगवति वासुदेवे परमप्रेमलक्षणा भक्तिः न जायते तावत् जनः संसारात् न मुच्यते । भगवति वासुदेवे आत्मनिवेदने भक्तस्य मनसो नैर्मल्यं भवति । भगवच्चरणमुपगतो देवादिसेवात्यागेऽपि सिद्धिं प्राप्नोति । हरिभक्तानां शरीरादिक्लेशबाधा न विद्यते । यथा[31] —

शारीरा मानसा दिव्या वैयासे ये च मानुषाः ।
भौतिकाश्च कथं क्लेशा बाधन्ते हरिसंश्रयम् ॥

भगवच्चरणागतस्य भक्तस्य विश्वसंहर्त्ता कालोऽपि न किमपि कर्त्तुं प्रभवति । भगवन्तं विहाय यः परमाश्रयेत् सोऽज्ञः । श्रीमद्भागवतवचनानुसारं जीवन्मुक्तेः त्रीणि साधनानि सन्ति । निष्कामकर्मानुष्ठानं, ज्ञानं, भक्तिश्चेति[32] ।

योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।

ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥

निष्कामकर्मणश्च कष्टसाध्यत्वात् कष्टसाध्यं भवति पुनश्च ज्ञानयोगः सर्वसुलभाऽभावत्वात् सिद्धिमानेतुं न पारयति । परन्तु भक्तिरेव सर्वसाधारणी, सुलभा, सुसाध्या च प्रतीयते । अतः कथ्यते भक्तिर्भगवतः प्राणतोऽप्यधिका प्रियाऽस्ति । यतः भक्त्या कृष्णो भगवान् स्वयं भक्तस्य सर्वविधां विपदं निवारयति मनोरथं च पूरयति ।

इत्थं श्रीदीनबन्धुमिश्रो भक्ते महिमानं गायति । श्रीमद्भागवत-बृहन्नारदीय-पुराण-भक्तिरत्नावल्यादीनां ग्रन्थानामाधारेण वैष्णवदर्शनप्रतिपादकानां ग्रन्थानां चाधारेण कलियुगस्य सर्वसाध्याया भक्तेः परमश्रेयः साधकत्वमस्तीति विवक्षया भक्तिं विस्तरशः प्रपञ्चयति स्व ग्रन्थे । यथाऽवसरं यथा प्रसङ्गं च तद्विषयस्य विवेको भविष्यति ।

***

सन्दर्भनिर्देशः
(Notes & Reference)

1. खण्डपडा इतिहास, पृ-22
2. *Life History of Samant Chandrasekhar,* p-19
3. *Life History of Samant Chandrasekhar,* p-19
4. खण्डपडा इतिहास, पृ-23
5. खाडङ्गाभागवत, (षष्ठस्कन्ध) अन्तिमश्लोक ।
6. खुरुधा इतिहास, पृ-238
7. ह.भ.सु, 1.13
8. ह.भ.सु, 16.24
9. ह.भ.सु, 16.25
10. ह.भ.सु, 16.27 (1610 A.D.)
11. खुरुधा इतिहास, पृ-238
12. खा.मा. (एकादशस्कन्ध मुखबन्ध), पृ-२
13. ह.भ.सु, 16.19-20
14. खण्डपडा इतिहास, पृ-87
15. *Life History of Samant Chandrasekhar,* p-21
16. रत्नाकर गर्गवटु- कपिल संहिता, पृ-1.8
17. श्री.भा.गी., 18.55
18. भ.र. 1.10, भा. 1.2.6
19. श्री.भा., 1.2.28, भ.र., 1.11
20. श्री.भा.गी. 9.27
21. भ.र. 1.18
22. भ.र. 1.9
23. भ.र. 1.24

24. भ.र. 1.82
25. भ.र. 1.83
26. भ.र. 2.22
27. भ.र. 2.50
28. भ.र. 4.2
29. भ.र. 5.57
30. भ.र. 7.32
31. भ.र. 13.3, भा. 3.22.37
32. श्री.भा. 11.20.9

* * *

चतुर्थपरिच्छेदः

हरिभक्तिसुधाकरस्य वैशिष्ट्यविमर्शः

(१) ग्रन्थस्य आकारपरिकल्पना—

'हरिभक्तिसुधाकरग्रन्थः' षोडशीषु कलासु विभक्तोऽभूत् । सुधाकरस्य अर्थो भवति चन्द्रः । अपि तु केवलमेव 'सुधा'शब्दस्य अर्थः अमृतम् । चन्द्रो भवति अमृतस्य आधारः आकरो वा । ततः चन्द्रः सुधाकर इति अभिहितः । षोडशीषु कलासु सम्पूर्णः चन्द्रः पूर्णचन्द्रः इति कथ्यते । पूर्णिमातिथौ चन्द्रः षोडशीभिः कलाभिः पूर्णो भवति । श्रीहरिर्देवकीनन्दनो गोपालचूडामणिः श्रीकृष्णः । सोऽपि कृष्णचन्द्रनाम्ना जगति ख्यातः । अतः हरिभक्तिसुधाकर-ग्रन्थस्यास्य नामकरणं वस्तुतः यथार्थं भवति ।

(२) मङ्गलाचरणस्य वैशिष्ट्यम्—

यस्य कस्यापि कर्मणः आदौ देवादिस्तुतिर्गुरुजनाद्यर्चनाप्रभृतिमङ्गला-चरणम् अस्माकं भारतीयपरम्परायां परिलक्ष्यते । एतदपि दृश्यते यत् चौराः चौरकर्मणः प्रारम्भे ईश्वरस्मरणं कृत्वा असदाचरणं कुर्वन्ति । अतः ननु मङ्गलस्य कर्त्तव्यत्वे किं प्रमाणं चेत् कर्मणो ग्रन्थस्य वा निर्विघ्नपरिसमाप्तये मङ्गलाचरणम् आवश्यकम् उपादानं कथ्यते, शिष्टाचारानुरोधात् । मङ्गलस्य अवश्यं समाप्तिसाधनत्वं नास्ति । यद्यपि मङ्गलाचरणं विना अपि किरणावल्यादौ समाप्तिर्भवति । कादम्बर्यादौ ग्रन्थे ग्रन्थस्य निर्विघ्नं परिसमाप्तये मङ्गले कृते सति ग्रन्थस्य निर्विघ्नं परिसमाप्तिर्न जायते । अतः मङ्गलाचरणं ग्रन्थस्य समाप्तेर्न कारणम्। पुनः कथ्यते यत् नूनमेवं मङ्गलाचरणं ग्रन्थे प्रयोजनीयम्। कादम्बर्यादौ आत्यन्तिक-विघ्नसत्त्वेऽपि तादृग् दृढं मङ्गलाचरणं न क्रियते । यतः ग्रन्थसमाप्तिर्न भवति ।

नवीना नैयायिकाः मङ्गलं विघ्ननाशकम् इत्युद्घोषयन्ति । मङ्गलाचरणस्य विघ्नविनाशित्वेऽपि ग्रन्थप्रणेतुर्बुद्ध्या ग्रन्थस्य समाप्तिर्निर्विघ्नं जायते इति नवीना नैयायिकाः स्वीकुर्वन्ति । यद्यपि बाह्यं मङ्गलाचरणं एतादृशेषु ग्रन्थेषु न लक्ष्यते तथापि कवयः मानसिकस्तरे तदर्थं कृतसङ्कल्पाः कार्याणि आरम्भन्ते । अतो मङ्गलं नाचरितमिति वक्तुं न शक्यते ।

ग्रन्थस्य सुष्ठु समाप्तये मङ्गलाचरणम् आवश्यकमिति मत्वा ग्रन्थकारः मिश्रपादः 'हरिभक्तिसुधाकर'नामकग्रन्थस्य निर्विघ्नपरिसमाप्तिकामो

श्रीमद्भागवतस्य द्वादशे त्रयोदशे च अध्याययोः भागवतपद्येनैव भगवद्ध्यानलक्षणं मङ्गलमाचरति ।

किमर्थं ग्रन्थकारः भागवतस्य द्वादशस्कन्धस्य अन्तिमाध्यायस्य श्लोकं मङ्गलाचरणरूपेण स्वीकरोति । अत्र ग्रन्थे भागवतस्य प्रथमस्कन्धस्य स्कन्धान्तरस्य च भागवतसम्प्रदायवर्णनमस्ति । ग्रन्थकारः श्रीभागवतसम्प्रदायानुयायी भवति । अतो भागवतसम्प्रदायानुगामित्वेन ग्रन्थकारः एनं श्लोकं मङ्गलाचरणे सन्निवेशयति ।

कस्मै येन विभाषितोऽयमतुलो ज्ञानप्रदीपः पुरा
तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ।
योगीन्द्राय तदात्मनाथ भगवद्राताय कारुण्यत-
स्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥[1]

(३) ग्रन्थस्य आधारः—

कविवर-दीनबन्धुमिश्रः भगवत्तत्त्वजिज्ञासूनां भगवद्भक्तानां मनोविनोदकारकं श्रीकृष्णभक्तिपरकं ''हरिभक्तिसुधाकर''नामकं भक्तिग्रन्थं विरच्य उत्कलीयभक्तिसाहित्ये तथा समग्रवैष्णवभक्तिसाहित्ये चिरभास्वरसारस्वतप्रतिभा-यामेकं विशिष्टविभवमुद्घाटितवान् । श्रीमद्भागवते अस्य महती श्रद्धा आसीत् । यस्या आभासः तदीय भक्तिमूलकप्रसङ्गानां मार्मिकसङ्कलनेन सिद्ध्यति । ग्रन्थकारः ग्रन्थेऽस्मिन् भगवद्गीता-भागवत-भक्तिरत्नावली-बृहन्नारदीयपुराण-भक्तिसुधाकर-तन्त्रवार्त्तिकादीनां ग्रन्थानां सारसंग्रहपूर्वकं हरिभक्तिसुधाकरनामकं षोडशकलात्मकमनुपमं ग्रन्थं निर्माति । अस्य ग्रन्थस्य कोणानुकोणे भगवतः वासुदेवश्रीकृष्णस्य महिमा तथा उत्कर्षः प्रस्फुटितः । अत्र भक्तिरत्नावली आदर्शग्रन्थत्वेन स्वीकृता । प्रस्तुते ग्रन्थे भक्तितत्त्वसाधनप्रतिपादकाः नैके श्लोकाः समुद्धृताः सन्ति । परन्तु भक्तिरत्नावल्यामुद्धृतानां श्लोकानां चर्वितचर्वणा नास्ति । नैके नवीनाः श्लोकाः समुद्धृताः भक्तितत्त्वसाधनत्वेन च सार्थकं ते प्रतिपादिताः । ग्रन्थेऽस्मिन् श्रीमद्भागवतम् अनुसृत्य पुराणप्रशंसा, वैराग्यं, सत्सङ्गस्य फलम्, श्रीकृष्णस्य उत्कर्षः, भक्तिप्रशंसा, भक्तिभेदः, श्रवणकीर्त्तनादेर्नवधाभक्तेः तथा भावप्रेमभक्तेः तात्त्विकालोचना क्रियते । कविर्भागवतपद्यानां विशदव्याख्यां प्रस्तौति । अपि च पदे पदे भगवद्भक्तेः पराकाष्ठा सन्निवेशिता । अतः श्रीमद्भागवतं भवति ग्रन्थस्यास्य मूलाधारः उपजीव्यश्च ।

भारतीयवैष्णवदर्शने श्रीमद्भागवतसमो नान्यः कश्चन मान्यो ग्रन्थः विद्यते । श्रीमद्भागवतं कल्पद्रुमवत् सकलान् अभीष्टान् पूरयति । अतः श्रीमद्भागवतस्य

महिमा सर्वत्र गीतो वर्त्तते । अस्य सुधाधिकं माधुर्यं मनोमुग्धकरि वर्त्तते । अस्य श्रवण-पठन-मनन-दर्शनैः पापराशिः प्रणश्यति ।

श्रीमद्भागवतं समस्तानां शास्त्राणां मुकुटमणिः । पुराणानां मूर्धन्यं वैष्णवानां च परमधनम् । भागवतं भक्तानां सर्वस्वम् । अत्र ज्ञानवैराग्याभ्यां साकं भक्तिमार्गं प्रशस्तीकृत्य नैष्काम्यमाविष्कृतम् । यस्यानुशीलनेन श्रीहरिर्भक्तहृदयमन्दिरेषु षरमानन्दं प्रापयति साधकम् । श्रीमद्भागवतम् एकं महदमृतं सरोवरम् । यत्रावगाहनेन नूनं निर्भया भवन्ति भावुकाः भक्तरसिकभक्तप्रवराः ।

यथा महाकविवाल्मीकिविरचितं रामायणं रामकथाया आधारस्तथैव श्रीमद्भागवतं लीलापुरुषोत्तमवृन्दावनविहारिणः श्रीकृष्णस्य कथावस्तुनो मूलाधारो भवति । ततः श्रीमद्भागवतं भक्तितत्त्वप्रतिपादकानां वैष्णवककवीनां प्रायशः उपजीव्यं भवति । अतः एव कविवरेण दीनबन्धुमिश्रेण हरिभक्तिसुधाकरः तमेवाधारीकृत्य प्रणीतः । यतः भागवते वर्णितो भक्तिप्रसङ्गो हरिभक्तिसुधाकरे वर्णितविषयस्य संवादः सम्पूर्णतया युज्यते । अत एव कथनीयम् - श्रीमद्भागवतं श्रीकृष्णभक्तेः प्रतिपादकः प्राचीनतमः परमप्रामाणिको मौलिक उपजीव्यो ग्रन्थः । अर्वाचीनाः भगवद्भक्तेः प्रतिपादकाः सर्वे ग्रन्थास्तमेवानुसृत्य विरचिताः । भागवतं विहाय कस्य एकस्यापि श्रीकृष्णस्य तथा भगवद्भक्तिविषयकस्य अर्वाचीनग्रन्थस्य उत्पत्तिर्न कल्पनीया ।

भागवतस्य प्रभावो वल्लभसम्प्रदाये एवं चैतन्यसम्प्रदायोपरि निपतति । भागवतस्य गूढार्थप्रकाशार्थं सकलवैष्णवसम्प्रदायः स्वमतानुकूलं व्याख्यां करोति। श्रीमद्भागवतम् अद्वैततत्त्वं प्रतिपादयति । यथा[2] -

अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम् ।
पश्चादहं यदेतच्च योऽवशिष्यते सोऽस्म्यहम् ॥

भगवान् अरूपः सन्नपि रूपवान् भवति । उक्तं यथा[3] —

तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव ।
यानि यानि च रोच्यन्ते स्वजना नामरूपिणः ॥

निगमकल्पतरोर्गलितं फलं ललितकोमलकमनीय-भाषा-भावसंयुतं भक्तिरसप्लावितं श्रीकृष्णतत्त्वविजृम्भितं ग्रन्थरत्नमिदं समग्रवैष्णवसम्प्रदायस्य वेदवत्प्रामाण्यमासाद्य विराजतेतराम् । विद्यावतां ज्ञानिनामपि भागवतस्य सूक्ष्मतत्त्वं दुर्बोध्यम् । अतः उक्तं विद्यावतां भागवते परीक्षा । भागवतं जनाः गायत्री सम्पुटितमिति प्रतिपादयन्ति ।

ग्रन्थेऽस्मिन् भगवान् श्रीकृष्णः श्रेष्ठदेवतारूपेण प्रतिपादितः । 'ऐते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्' इति । स एव श्रीकृष्णः साक्षात् सगुणं निर्गुणं च ब्रह्मस्वरूपम् । अतः उक्तम्[4]—

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ।।

श्रीमद्भागवतं प्रतिपदम् अनन्यया भक्त्या एव आसाद्यते । मुक्तितः भक्तिः श्रेयसी । भागवतस्य पठनेन श्रवणेन वा जीवस्य मनसि अनन्यया निष्ठया ईश्वरभक्तिः समुदेति । अतः मुक्तावपि सुखं नास्ति । भगवान् भक्तस्य अभिरुच्यनुसारं भिन्नं भिन्नं रूपं धत्ते ।

अतः भगवत्प्राप्त्यर्थमेक एव उपायो भवति भक्तिः ।

न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ।।[5]

भगवान् तपो-दान-जप-बहुज्ञातदिभिः प्रसन्नो न भवति । स केवलमेव निर्मलभक्तिभावनया प्रसन्नो भवति । अतः भक्त्यतिरिक्त मन्यत् साधनं निरर्थकम्। यतः श्रीकृष्णपदारविन्दनिस्यन्दमकरन्दसन्दोहाऽऽस्वादने भक्तमधुकरः कालातिपातं करोति । परमसुखं च लभते । 'अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे' इति प्रकारान्तरेण भागवते उक्तम्[6] —

यो मां सर्वेषु भूतेषु सन्तमात्मनमीश्वरम् ।
हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः ।।

भारतीयधर्मपरम्परायां श्रीमद्भागवतस्य महती उपादेयतास्ति । श्रीकृष्ण-चेतना भागवतस्य प्रतिपाद्यं विषयवस्तु । वेदेषु इतिहासपुराणेषु भक्तिशास्त्रेषु च श्रीकृष्णस्य नाम भूयो दृश्यते । 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति आभाणकं दृश्यते । वैदिककृष्णस्य क्रमिकविवर्त्तनेन पौराणिककृष्णस्य भक्तिकेन्द्रीभूतस्य कृष्णस्य च दिव्यता दृश्यते । स्थावरजङ्गमात्मकजीवजगत् भगवतः रूपविशेषः । भागवते जीवन्मुक्तः परमहंसात् सर्वश्रेष्ठमद्वितीयमेवं मायारहितं ज्ञानं प्राप्नोति भगवद्भक्तिः सकलकल्याणाय मूलं स्रोतस्तथा उद्‌गमस्थलम् । भगवान् श्रीकृष्णः सच्चिदानन्दविग्रहात्मको भवति । पुनः स एव कर्मयोगी, पूर्णकामः तथा आनन्दमूर्त्तिस्वरूपो भवति ।

परां प्रसिद्धिं गतेभ्यः पुरुषार्थेभ्यः भिन्ना भक्तिरेव पञ्चमपुरुषार्थः इति भागवते स्वीकृतः । भक्तिरियं साध्यसाधनरूपा भेदेन द्विविधा । अत्यद्भुतमिदं

तत्त्वम् । यैव साध्यरूपा, सैव साधनरूपेति । साधनरूपया भक्त्या साध्यरूपा भक्तिरासाद्यते । मुक्तिः भक्तेरन्तरायः अवाञ्छनीया च भवति । भगवतः श्रीकृष्णस्य आनुकूल्येन सा लभ्यते । केवलमेव ज्ञानकर्मादिद्वारा नैषा प्राप्यते । अतः आब्राह्मणचाण्डालेभ्यः सर्वे भक्तिरसमहिमानम् आस्वाद्य तदाकृष्टमानसाः हरिभक्ताः बभूवुः । यद्यपि अन्येषु पुराणेषु विष्णुतत्त्वं कृष्णतत्त्वं भक्तितत्त्वं वा वर्ण्यते तथापि पुराणमूर्धन्यभूत भागवतपुराणे कृष्णः पूर्णब्रह्म इति विस्तरेण प्रतिपाद्यते ।

कविवरदीनबन्धुमिश्रः स्वकृतहरिभक्तिसुधाकरग्रन्थे उपर्युक्तसिद्धान्तानां प्रतिच्छविः प्रस्फुटिता दृश्यते । भगवद्भक्ता इतरेभ्य विलक्षणाः भुवि मुख्यतमा आनन्दाब्धौ सततं सन्तरन्ति । भक्तस्य भक्तेश्च महिमानं प्रख्यापयितुकामो ग्रन्थकारः प्रस्तौति । अवान्तराधारणां विचारः तुलनात्मकविषयोपस्थापने स्पष्टीभविष्यति ।

(४) हरिभक्तिसुधाकरस्य कालानुयायी विषयविमर्शः—

<u>प्रथमा कला-</u>

हरिभक्तिसुधाकरः वैष्णवभक्तिकाव्यस्य उपादेयभक्तिग्रन्थो भवति । ग्रन्थोऽयं षोडशीषु कलासु विभज्यते । प्रथमकलायां मङ्गलाचरणं, ग्रन्थरचनायाः प्रयोजनं पुराणप्रशंसा च क्रियते । अतः भागवतपद्यैनैव ग्रन्थकारः ग्रन्थस्य शुभारम्भं करोति ।

कस्मै येन विभाषियोऽयमतुलो ज्ञानप्रदीपः पुरा
तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ।
योगीन्द्राय तदात्मना च भगवद्राताय कारुण्यतः
तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥[7]

अर्थात् कल्पादौ भगवान् विष्णुः नाभिकमले स्थितस्य ब्रह्मणः भागवतग्रन्थं निर्माति। ब्रह्मा भागवतं नारदाय, नारदो व्यासाय अतुलनीय-ज्ञान-प्रदीपं प्रददौ । व्यासो योगीन्द्रशुकदेवाय, शुकदेवः करुणावशवर्त्तिने परीक्षिते च उपदेशं ददाति। शुकदेवः समाजे भागवतस्य प्रचारं प्रसारं कुर्वन् परमसत्यम् अमृतमयं परंब्रह्म श्रीकृष्णं ध्यायति । स भगवान् श्रीकृष्णः भवभयपापहारी, रोगशोकविनाशकारी वेदस्वरूप एवं च ब्रह्मादिदेवगणस्य वन्दनीयः । वेदवेदाङ्गैर्यस्य स्तुतिर्वर्णितास्ति । योगिनः तल्लीनावस्थायां यस्य रूपं निरन्तरं स्मरन्ति । अनाद्यनन्ताव्यक्तं श्रीकृष्णं भूयो भूयः नमस्कुर्वन्ति ।

किरात-हूण-आन्ध्र-पुलिन्द-मल्ल-चाण्डाल-गोपाल-कङ्कादयो ये च नीचजातयः सन्ति भगवदाश्रयेण ते शुध्यन्ति । तं प्रभावशालिनं भगवन्तं ग्रन्थकारो नमति । अनेन नानास्तुतिवाक्येन ग्रन्थप्रणयनस्य प्रयोजनं निरूप्यते ग्रन्थकारेण । जनकल्याणाय भगवत्तत्त्वप्रकाशार्थं सततपराङ्मुखो व्यासपुत्रं शुकं प्रणमति ।

कलौ जनाः अल्पायुषः, आलस्यपरायणाः, मन्दबुद्धिसम्पन्ना रुग्णाश्च भवन्ति । अकाले ते मृताः जायन्ते । अतः उक्तम्[8] —

प्रायेणाल्पायुषः सभ्याः कलावस्मिन् युगे जनाः ।
मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥

अतः तेषां सुखबोधनाय बहुकालसाधनया एष 'हरिभक्तिसुधाकरः' विरचितः । तदनन्तरं श्रीमद्भागवतस्य प्रशंसा क्रियते । श्रीमद्भागवतं सुन्दरं परमधर्मप्रकाशकं सर्वशास्त्रेषु श्रेष्ठं भवति । अतः नित्यमेतस्यैव पठनं श्रवणं च कर्त्तव्यम् । अतः उक्तम्[9] —

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥

श्रीमद्भागवतं सर्वशास्त्रेषु श्रेष्ठम् । वेदवेदाङ्गानां सारो भवति । अतः ये जनाः अमृतद्रवसंयुतस्यास्य फलस्य सुधां पिबन्ति तेषां न कुत्रापि श्रद्धा अस्ति । श्रीमद्भागवतमहापुराणम् अन्येषु पुराणेषु श्रेष्ठत्वं तथा वैष्णवानां प्रियं भवति । यथा[10]—

निम्नगानां यथा गङ्गा देवानामच्युतो यथा ।
वैष्णवानां यथा शम्भुः पुराणानामिदं तथा ॥

इदानीम् एतद्ग्रन्थप्रतिपाद्याया भगवद्भक्तेर्मूलसाधनं मनुष्यजन्मदेवादि-दुर्लभं भवति । तदाधारत्वेन भारतवर्षस्य श्रेष्ठं प्रदर्शयति । यथा[11] —

अहो भुवः सप्त समुद्रवत्या द्विपेषु वर्षेऽप्यधिपुण्यमेतत् ।
गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवन्ति ॥

कल्पायुषो ध्रुवादयो मर्त्यैरपिदेहैः अल्पकालेन कृतेन कर्मणा भयशून्यं हरेः परं यान्ति । अतः स्वर्गिभिरप्यत्र जन्म प्रार्थ्यमित्याह[12] ।

यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनम् ।
तेनाजनाभे स्मृतिमज्जन्म नः स्याद्वर्षेहरिर्यद्भजतां शं तनोति ॥

यत्र भागवतकथारूपा अमृतमय्यो नद्या न प्रवहन्ति, भगवद्भक्ताः न निवसन्ति, नृत्याद्युत्सवो न सम्पाद्यते अपि च श्रीहरिकथाविरहितो ब्रह्मलोकोऽपि न सेव्यताम् ।

अतः स्वर्गादिलोकेभ्योऽपि श्रीहरिभजनप्रसारिता भारतभूमिः श्रेष्ठा इति उक्तम् । यस्मिन् देशे श्रीहरेः चर्च्चा भवति स देशः श्रेष्ठो भवति । यत्र पुराणप्रसिद्धा गङ्गानदी, पुष्करादिपुष्करिणी, कुरुक्षेत्रम्, गयशिरः, प्रयागः, पुलहाश्रमः, नैमिषम्, सेतुबन्धः, प्रभासः, कुशस्थली, वाराणसी, मधुपुरी, पम्पाविन्दुसरः, बदरिकाश्रमः, अलकानन्दा, सीताया रामस्य च आश्रमः शोभन्ते, स देशः पवित्रो भवति । अतः उक्तम्[13] —

यत्र यत्र च मद्भक्ताः प्रशान्ताः समदर्शिनः ।
साधवः समुदाचारास्ते पूयन्त्यपि कीकटाः ॥

अर्थात् शान्ताः समदर्शिनः, सदाचाराः, भगवद्भक्ताः यत्र कुत्रापि वा तिष्ठन्तु सर्वे शुद्धा भवन्ति । श्रीमद्भागवतं, भारतवर्षं तत्रस्थप्रसिद्धक्षेत्राणां प्रशंसानन्तरं गङ्गादिनदीनां माहात्म्यं वक्ष्यति । गङ्गोदकसंस्पर्शमात्रेण सगरवंशजाः स्वर्गं प्राप्नुवन्ति। अतः उक्तम्[14] —

भस्मीभूताङ्गसङ्गेन स्वर्याताः सगरात्मजाः ।
किं पुनः श्रद्धया देवी ये सेवन्ते धृतव्रताः ॥

पुनः भारतवर्षे प्रवाहितानाम् अन्यासां पुण्यनदीनां माहात्म्यमप्याह—

ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ।
कावेरी च महापुण्या प्रतीची च महानदी ॥[15]
ये पिबन्ति जलं तासां मनुजा मनुजेश्वरे ।
प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः ॥[16]

अतः कलौ नारायणपदपङ्कजाश्रय एव श्रेष्ठो भवति । ग्रन्थेऽस्मिन् ज्ञान-भक्ति-वैशिष्ट्यं विविच्यते । यतः बहुजन्मानन्तरं प्राणिमात्रं मनुष्ययोनिं लभते । अपि च स्वस्य पुण्यकर्मणा भारतभूमौ जन्म लभते ।

सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या
वृक्षान् सरीसृपपशून् खगदंशमत्स्यान् ।
तैस्तैरतुष्टहृदयः पुरुषं विधाय
ब्रह्मावलोकधिषणं मुदमाप देवः ॥[17]

अतः भगवतोऽपि पौरुषी तनुः, प्रिया स्वर्गिणोऽपि इदं जन्म अभिलषन्ति ।

स्वर्गिणोऽप्येतमिच्छन्ति लोकं निरयिणस्तथा ।
साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकम् ॥[18]

अतः अस्मिन् देशे उभयोः ज्ञानस्य भक्तेश्च प्राधान्यं विराजते । मुकुन्दसेवा

एव श्रेष्ठा । अनन्तरं मानुष्यदेहे गार्हस्थ्यस्य प्रशंसामाह । संसारभयात् जनाः वनाद्वनान्तरं गच्छन्तोऽपि विषयवासनायुक्तं मनः तथा पञ्चेन्द्रियरूपाणि षट् शत्रून् च न परित्यजन्ति । परन्तु गृहेष्वपि स्थित्वा एकनिष्ठभक्त्या श्रीहरिसेवया मुक्तिं लभन्ते । पुनः गृहे स्थित्वाऽपि गुणैरधिकं पुरुषं दृष्ट्वा प्रीतिं कुर्यात् । भगवतः सेवां विनाऽपि सालोक्य-सार्ष्टि-सामीप्य-सारूप्य-सायुज्य-मुक्तिं दीयमानामपि भगवद्भक्ता न गृह्णन्ति । यस्य मनः शान्तं समाहितं भवति तस्य दानादिशुभकर्मणः प्रयोजनं नास्ति । यथा[19] —

समाहितं यस्य मनः प्रशान्तं दानादिभिः किं वद तस्य कृत्यम् ।
असंयतं यस्य मनो विनश्यद्दानादिभिश्चेदपरं किमेभिः ॥

चित्तं खलु जीवस्य बन्धनं मानदण्डश्च । विषयवासनातो विरहितं मनः क्षणमात्रं परमात्मगुणचिन्तनेन मोक्षं लभते । अतः ज्ञानभक्तिमार्गेण श्रीहरि-तुष्टि-विधानेन च जीवनं सार्थकं भवति । ततः जीवनं सुखमयं च स्यात् ।

द्वितीया कला-

द्वितीयकलायां वैराग्यप्रसङ्गे वर्णनाऽस्ति । संसारविरक्ता जनाः गुरुसेवया सिद्धिं प्राप्नुवन्ति । भगवद्भक्तिः वैराग्यात् जायते । इदं विश्वब्रह्माण्डं परंब्रह्मणो जायते । अतः सांसारिकज्ञानधनाभिमानादिकं निरर्थकम् ।

ईशाभिसृष्टं ह्यवरुन्ध्म हेऽङ्ग दुःखं सुखं वा गुणकर्मसङ्गात् ।
आस्थाय तत्तद्यदयुङ्क्त नाथश्चक्षुष्मतान्धा इव नीयमानाः ॥[20]

सत्कार्यात् सुफलं कुकार्यात् कुफलं ज्ञानं च वैराग्यात् प्राप्यते । शरीरं यथा तस्य परिपोषकम् उपादानं च नश्वरम् । अतो देहेन्द्रियलब्धज्ञानं मिथ्याज्ञानमुच्यते । परन्तु ये मूर्खाः विषयवासनासक्ताः सन्ति ते मिथ्याज्ञानं सत्ज्ञानं मन्यन्ते । भक्तप्रवरप्रह्लादः असुरबालकेभ्यः कथयति[21] —

पुंसो वर्षशतं ह्यायुस्तदर्धमजितात्मनः ।
निष्फलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः ॥
मुग्धस्य बाल्यकैशोरे क्रीडतो याति विंशतिः ।
जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ॥[22]

अर्थात् इन्द्रियासक्तजनाः चार्धशतं कालं जीवन्ति । बाल्यकैशोरे च आमोद-प्रमोदादिकृत्येन यापयेत् । अन्तिमसमयं वार्द्धक्यम् असामर्थ्येन अतिवाहितं भवति । अतः आदौ विंशतिः अन्तिमे च विंशतिः काला निरर्थका मूल्यहीनाश्च ।

अवशिष्टजीवनकालः कामोपभोगेन लिप्यते । अतः ये कामुकाः सन्ति ते सर्वे लोभ-मोह-क्रोधादिभिः रिपुभिः अन्धीभूय स्वयम् अजर-अमर इति मत्वा पशुहत्या-परस्वापहरण-परदारगमन-मद्यसेवनादिभिः आसुरिकैरमानुषिकैः हिंसात्मकैः कार्यैः च लिप्ता भवन्ति । यथा-

हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः ।
मन्यमानैरिमं देह मजरा मृत्युनश्वरम् ।।[23]

कामोपभोगलिप्सवो जनाः केवलमेव भोजनाच्छादनेन चिन्तां कुर्वन्ति । देहापत्य-कलत्रादीनां कृते आत्मानं समर्पयन्ति । आस्तां तावत् पुत्रदारादीनां संयोग-वियोगकर्त्ता स्वीयोऽपि देहो न चिरस्थायी इति विस्मरति । दुःखस्य कर्मणः प्रतिकारचिन्तां न करोति । यथा-

नैकान्ततः प्रतीकारः कर्मणां कर्म केवलम् ।
द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ।।[24]

ततः प्राणी संसारं प्रति भयशीलः तथा जगत् कल्याणाय यत्नशीलो भवेत् । रज आदिषु गुणेषु सन्निविष्टं मनः चेत्, गुरुपत्न्या ज्ञानोत्पत्तिर्न भवति । ननु उत्तमगुरोरपि पुत्रादयस्तं नरमेव मन्यन्ते । एषः गुरुः साक्षाद्भगवानेव । बहवः सन्ति ते सर्वे विष्णुवत्पूज्या भवन्ति । तेषु प्रधानः पुरुषेश्वरो भगवान् श्रीकृष्णः ज्ञानप्रदो गुरुः । इह संसारे यत्र सम्भवो जन्ममात्रं प्रथमो गुरुः पूज्यः । तस्मात् कारणात् गुरुराश्रीयते । गुरुरपि ज्ञानी, शाब्दे ब्रह्मणि वेदाख्यो निष्णातो भवेत् । गुरुर्यदि वर्णाश्रमाचारहीनः, दैहिकसुखपरायणो लोभी, अहंकारी स्यात् तादृशो दूरात् परित्यज्यते । यतः गुरुः अनायासेन संसारं नाम भवसंसारं पारयितुं शक्नोति ।

विजितहृषीकवायुभिरदान्तमनस्तुरङ्गं
य इह यतन्ति यन्तु मतिलोलमुपायखिदः ।
व्यसनशतान्विताः समवहाय गुरोश्चरणं
वणिज इवाज सन्त्यकृतकर्णधारा जलधौ ।।[25]

गुरुरेव साक्षात् भगवत्स्वरूपः । एवं च सर्वदेवमयः । तस्मिन् रुष्टे सर्वे देवाः रुष्यन्तीति । पादसंवाहनादिभिः समीपासनेन कृताञ्जलिनियोगप्रतीक्षया एव आत्मसमर्पणेन गुरुप्रत्युपकारो भवति । एतेन गुरुप्रदर्शितभगवद्भजनेन सुखानुभूतौ तु स्वत एव मनो निश्चलं भवति इति । गुरूणां भर्त्सितैः ताडितैः नरैः दुःखमेव प्राप्यते । अतः ज्ञानी, दयाशीलः, शुचिमान्, निरहंकारः, समचित्तः, सतत-क्षमाशीलः यो गुरुस्तं सर्वदा सेवेत । स एव 'भागवत'भक्तनाम्ना नामितः । गुरुसेवया

शास्त्रज्ञानविरहिताः मूर्खाः मायारूपकदुस्तरसंसारसागरं पारयन्ति । हरेर्जन्म-कर्मगुणानां श्रवणादिद्वारा भक्तिभावः स्वतः समुत्पद्यते । पापिनोऽपि पूता भवन्ति।

तृतीया कला-

कलायामस्यां सत्सङ्गस्य महिमा वर्णितः । भक्तियोगेन सत्सङ्गप्राप्तिर्भवति। उक्तम्[26] —

प्रायेण भक्तियोगेन सत्सङ्गेन विनोद्धव ।
नोपायो विद्यते सध्य्रङ् प्रायणं हि सतामहम् ॥

साधु सत्सङ्गस्य मिलनं सत्सङ्ग एव उच्यते । हृदयसमभावापन्नः कृपालुः, परदुःखा-सहिष्णुः सत्यवादी असूयारहितः, समचित्तः परोपकारी मनुष्यः साधुसज्जनरूपेण सम्मानितो भवति । सज्जनाः निष्कामाः, संयताः, मृदुभाषिणः, सदाचाराः, शान्ताः स्वधर्मपरायणाः, अप्रमत्ताः, निर्विकाराः, करुणापरायणाश्च भवन्ति । उक्तं यथा[27]—

अप्रमत्तो गभीरात्मा धृतिमाञ्जितषड्गुणः ।
अमानीमानदः कल्पो मैत्रः कारुणिकः कविः ॥

कविवरेणाऽपि साधूनाम् उत्तममध्यमाधमभेदेन त्रिविधो भेदो निरूपितः। यो जनः भगवतो विग्रहादिपूजां श्रद्धया सम्पादयति अपि तु भगवतो भक्तस्य सेवां न करोति स साधारणभक्तो भवति । यो जनो भगवति श्रद्धां तथा प्रेमभावं प्रदर्शयति तथा तस्य भक्तेषु मित्रताचरणं करोति दुःखिषु अज्ञानेषु दयां तद्विरोधिषु च जनेषु उपेक्षां करोति स मध्यमभक्तः अभिधीयते । सर्वभूतेषु ब्रह्मभावेन समन्वयं पश्यन् तथा आत्मनो हरेः भगवद्भावं निरतिशयैश्वर्यमेव यः पश्येत् तेषु च न तारतम्यं परिलक्ष्यते ते धन्याः । सर्वभूतेषु सर्वपदार्थेषु ब्रह्मरूपे आत्मन्यधिष्ठाने भूतानि च पुनर्जडमलिनभूताश्रयत्वेन जाड्यादिप्रसक्त्या ऐश्वर्यादिप्रच्युतिं पश्येत् तथा सर्वदा परिपूर्णं भगवन्तं पश्यन् स तस्य परमप्रेमी उत्तमभक्तोत्तम इति कथ्यते । यथा[28]—

अर्चायामेव हरये पूजायां श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥
ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेम-मैत्री-कृपोपेक्षा यः करोति स मध्यमः ॥[29]
सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥[30]

सत्सङ्गेन मनसि भगवद्भक्तिर्जागर्ति । मनः शरीरम् अन्तःकरणं च शुध्यन्ति । अतः भगवद्भक्ताः आत्मानं भगवति समर्प्य मायारूपसंसारात् तरन्ति । उक्तं यथा[31] —

येषां स एव भगवान् दययेदनन्तः
सर्वात्मनाऽऽश्रितपदो यदि निर्व्यलीकम् ।
ते दुस्तरामतितरन्ति च देवमायां
नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ॥

पुराणेतिहासानुशीलनात् ज्ञायते यत्, सर्वस्वत्यागपूर्वकं सर्वात्मभावानन्ताचिन्त्य-भगवच्चिन्तनेन प्राचीनमुनिर्षयः, राजानो महाराजाश्च मुक्तिं लभन्ते । उदरपोषणाय अहंकारी, लोभी, अभिचारक्रियाशीलः, हिंसुकाः, असज्जनाः अन्धा इति कथ्यन्ते । ईदृशाचरणशीलगुरोराश्रयेण मानवजीवनं निरर्थकं भवति । सद्गुरोरन्वेषणमेव परमावश्यकम् । तेषां मध्ये हि स्वयं भगवान् प्रतिभातो भवति । उक्तं च[32] —

निष्किञ्चना मय्यनुरक्तचेतसः
शान्ता महान्तोऽखिलजीववत्सलाः ।
कामैरनालब्धधियो जुषन्ति यत्-
तन्नैरपेक्ष्यं न विदुः सुखं मम ॥

भगवतो नामस्मरणमात्रेण प्रारब्धपापपुञ्जः भस्मीभूतो भवति । भगवत् प्रेमिभक्तानां क्षणमात्रसंसर्गमात्रेण स्वर्गसुखं तथा मोक्षमपि तुच्छं भवति । अखिलजगतः स्वामिनि भगवति श्रीकृष्णो आत्मसमर्पणेन तथा अनीर्वचनीयानन्य-प्रेमभावेन जन्ममरणरूपसंसारचक्रात् मुक्तिः प्राप्यते । अतः कृष्णभक्तसाधवः आगमादिशास्त्रस्य विवादात् विरता भूत्वा सर्वसाधारणजनकल्याणव्रतिनो भवन्ति तेऽपि धन्याः । अतः कविवरेण स्वपद्येन उक्तम्[33] —

अदभ्रदोषागमजं तमो भरं निरस्य लोकस्य सुखोचिताः क्रियाः ।
प्रवर्त्तयन्तो भुवि भास्करा इव प्रिया मुरारेः कुशलं दिशन्तु मे ॥

चतुर्थी कला-

चतुर्थकलायां भगवतः श्रीकृष्णस्य चरमोत्कर्षः प्रतिपादितोऽस्ति । भगवान् विष्णुः समग्रविश्वस्य सृष्टिस्थितिसंहारहेतुर्भवति । तथा जाग्रत्-स्वप्न-सुषुप्तिषु तिसृषु अवस्थासु साक्षिस्वरूपः । देह-मन-इन्द्रियाणि यानि स्वस्वव्यापारेषु रतानि तत्र भगवान् नारायणः परमात्मा एव तत्त्वमित्यवेहि । भक्तितत्त्वानां मते वासुदेव-श्रीकृष्ण एव परंब्रह्म परमात्मा । तदपि स्पष्टतयोक्तम्[34] —

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥

केचन वेदान्तिनः भगवान् श्रीकृष्णः ब्रह्मेति, मीमांसका धर्मः । साङ्ख्याः प्रकृतिपुरुषरूप इति विवेचयन्ति । केचिद् विमल-उत्कर्षिणी-ज्ञान-क्रिया-योगा-प्रह्वी-सत्या-ईशाना-अनुग्रहाश्चेति नवशक्तियुक्तं तं प्रतिपादयन्ति । यथा[35] —

त्वां ब्रह्म केचिदवयन्त्युत धर्ममेके
एके परं सदसतोः पुरुषं परेशम् ।
अन्येवयन्ति नवशक्तियुतं परं त्वा-
मेके महापुरुषमीश्वरमात्मतन्त्रम् ॥

अतः महापुरुषाः एकस्येश्वरस्य नानाभावं गृह्णन्ति । अनेकम् अवतारं धत्ते परंब्रह्म भगवान् नित्यः अद्वितीयः परन्तु शास्त्रकाराः बहुधा बहुरूपं मानयन्ति । कार्यवशादवतारभेदोऽपि अस्ति । प्रथमं तावत् पुरुषः अवतारस्वरूप उच्यते । सृष्टिसर्जनाकाले भगवान् सर्वश्रेष्ठमनुष्यरूपनिर्माणार्थं चिन्तयति । तस्मात् कारणात् महत्तत्वात् पुरुषं निर्माति । अर्थात् सर्वप्राणिषु श्रेष्ठं संवेदनशीलं मनुष्यशरीरं सृजति । तेषु एकादशेन्द्रियाणि पञ्चमहाभूतातीति षोडशकलात्मकानि शरीराणि कृतानि ।

एतदपि भगवतो नारायणरूपम् अभिधीयते । अस्मात् शरीरात् देवता-पशु-पक्षि-मनुष्याः सृष्टिं लभन्ते । अपक्षयशून्यात् सरसः सकाशात् कुल्याः क्षुद्रप्रवाहाः समुत्पद्यन्ते तथैव आपुरुषात् सर्वेभ्योपि भगवतः कृष्णस्य मुख्यता विद्यते । पुरुषावतारस्य केचिदंशाः काश्चिदंशकला विभूतयः । तत्र मत्स्यादीना-मवतारत्वेन सर्वज्ञत्वे सर्वशक्तिमत्त्वेऽपि कृष्णस्तु साक्षाद्भगवान् उच्यते । यथा[36]—

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥

स एव सत्य-पवित्रता-दया-क्षमा-त्याग-सन्तोष-सरलता-शम-दम-तपः-समता-तितिक्षा-उपरति-शास्त्रविचार-ज्ञान-वैराग्य-ऐश्वर्य-वीरता-तेजो-बल-स्मृति-स्वतन्त्रता-कौशल-कान्ति-धैर्य-कोमलता-निर्भीकता-विनय-शील-साहस-उत्साह-सौभाग्य-गम्भीरता-स्थिरता-आस्तिकता-कीर्त्ति-गौरव-निरहंकारप्रभृतिभिः एकोनचत्वारिंशता गुणैर्युक्तो भवति । एवंभूतस्य शरीरपरिग्रहे कारणमपि अस्ति । मलयस्य कीर्त्तये चन्दनं यथा तथैव प्रियस्य युधिष्ठिरस्य अथवा यदोरेव कीर्त्तये स जातः । भुवो भारावतरणाय उदधौ नौरिव ब्रह्मणा जातः । भगवान् श्रीकृष्णः त्रयाणां पुरुषाणाम् ईशः । सर्वात्मा, समदर्शी अद्वितीयः

निरहंकारः निष्पापः, परमात्मा हीनकर्मणि लिप्तजनेषु वैषम्यं न परिलक्षयति । भक्तानां कृते भगवान् सदैव मनुष्यदेहं धारयति ।

अनुग्रहाय भक्तानां मानुषं देहमाश्रितः ।
भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत् ॥[37]

पञ्चमी कला-

अस्यां कलायां भक्तिमाहात्म्यमालोच्यते । भक्तिभावव्यतिरेकेण वेद-वेदान्त-तपो-जप-योग-स्वाध्यायादि निरर्थकम् । परमेश्वरस्य पदवीं मन्वादयोऽपि प्रेप्सन्ते । हरिसेवायां सर्वं जन्मादिकं सफलं भवति । स हरिर्नारायणः श्रीकृष्णः योग-तपो-ज्ञान-स्वरूपश्च । हरिभक्ताः निर्भयं विचरणं कुर्वन्ति । भक्तिमतां कालभयं नास्ति । भगवतो भक्तानां कृते किमपि दुर्लभं न भवति । एकनिष्ठभक्त्या ज्ञानं वैराग्यं च समुपद्यते । अतः कथ्यते[38] —

वासुदेवे भगवति भक्तियोगः समाहितः ।
सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ॥

मुकुन्दसेविजनः कदाचित् कुयोनिगतोऽपि संसारं न व्रजेत् । ऐकान्तिकभक्तिसम्पन्नो भक्त्या स्वर्गादिसुखं न अभिलषति । रजस्तमःप्रकृतयः स्वभाववन्तः श्रिया, ऐश्वर्यं च प्रजांश्च ईप्सन्ते । केवलमेव भक्तिमता भगवान् लभ्यो भवति । मन्दमतयः भगवत्कथाश्रवणादिविमुखाः स्युः । चन्द्र उदिते सति अर्कस्य तेजोनिवृत्तिरिव भगवद्भक्त्यैव संसारनिवृत्तिर्जायते । साधारणजनाः वर्णाश्रमादिधर्मपालनाय शतजन्मान्तरं ब्रह्मपदं प्राप्नुवन्ति । पुण्यातिशयेन विष्णुलोकं गच्छन्ति । परन्तु ये भगवद्भक्ताः सन्ति तेषां कृते वर्णाश्रमधर्मपालनस्य आवश्यकता नास्ति । ते स्वदेहेन विष्णुलोकं व्रजन्ति । अतः भगवद्भजने देशकालनियमस्य प्रयोजनं नास्ति। यथा[39] —

तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ।
श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यो भगवान् नृणाम् ॥

निरन्तरं हरौ भक्ति प्रकर्षेण वहन् असौ ध्रुवोऽहमित्यात्मनो ज्ञानं न सस्मार । भगवति लब्धभक्तेः पूर्णकामता सम्पाद्यते ।

षष्ठी कला-

षष्ठकलायां भक्ति भेदप्रसङ्गे वर्णनाऽस्ति । श्रवणकीर्त्तनादीनां गुणानां सत्त्वादीनाम् अधममध्यमोत्तमतत्त्वानां च भक्तियोगस्य नानाविधो भेदश्च निरूप्यते। या भक्तिः कोशं लिङ्गं शरीरमात्मविकारमज्ञानं जनयति स्वप्रयत्नं विनैव सिद्धौ

दृष्टान्तः निगीर्णं भुक्तमन्नम् अनलो जठरो यथा जरयति इति भक्तस्यानायासेनैव मोक्षो भवतीत्यर्थः । अतः भगवतः प्रतिमा, भक्तकृतं भगवत् स्पर्शनम्, लीलारटनं, परिचर्या, स्तुतिः नाम कीर्त्तनम् इत्यादि भगवद्भक्तिः उच्यते ।

मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनम् ।
परिचर्यास्तुतिः प्रह्वगुणानामनुकीर्त्तनम् ॥[40]

पर्व-पर्वाणि, यात्रा-महोत्सवः वैदिकरीत्या तथा तान्त्रिकरीत्या व्रतोपासना मङ्गलादिपूजनया भगवद्भक्तिः प्रकाश्यते । यद्यपि अनेकानि भक्तिलक्षणानि सन्ति तथापि तेषु श्रवण-कीर्त्तन-स्मरण-पादसेवनानार्चन-वन्दन-दास्य-सख्यात्म-निवेदनादिर्नवधा भक्तिर्मुख्या भवति ।

श्रवणादीनां मुख्यभक्त्यपेक्षया अङ्गत्वं तद्रूपभक्तिसुखस्फूर्त्तिदशायामङ्गित्वं उक्तम् च—

अङ्गत्वं श्रवणादीनां मुख्यभक्तेरपेक्षया ।
तत्तद्रूपसुखस्फूर्तावङ्गित्वमपि विद्यते इति ॥

अतः गुणयोगात् भक्तियोगो बहुविधो भवति । श्रद्धालुभक्तः प्रीत्या भगवन्तं भजेत् । स एव भक्त्यैव सर्वं कर्त्तुं भविष्यतीति भक्त्या हृद्गतोऽज्ञानाहंकारः अपसृतो भवति । श्रीहरेर्भजनं योगसाधनावद् दुष्करं नेति । भगवद्भजने सति संसारहेतोरविद्याया नाशो जायते । एवं च प्रारब्धकर्मफलात् अस्मिन् मायासंसारात् निष्कृतिप्राप्तिर्भवति । यथा[41]-

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननन्तः ।
तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ॥

<u>सप्तमी कला—</u>

सप्तमकलायां श्रवणकीर्त्तनादिभक्तेः महत्त्वं दर्शयति । हरिकथाश्रवणेन यस्य कालः अतिवाहितः तस्य जीवनं धन्यं भवति । नामश्रवणे पुंसः पुरुषमात्रस्या-रतिर्मनोग्लानिस्तन्मूला विविधा तृष्णा च अपगच्छति । अतिमधुरत्वात् हरिचरितामृतश्रवणेन महतां तृप्तिर्जायते ।

कलौ हरिनामकीर्त्तनमेव श्रेष्ठम् । हरियशःकथनादीतरसाधनेन दुःखनिवृत्ति र्भवति । इन्द्रियविकारः च न जायते । हरिचरितगानरतस्य संसारपीडनभयं नास्ति । अमङ्गलं परिहरति मोक्षप्राप्तिर्भवति ।

एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति ये वै भगवत्प्रपन्नाः ।
अत्यद्भुतं यच्चरितं सुमङ्गलं गायन्त आनन्दसमुद्रमग्नाः ॥[42]

प्रह्लादस्य भगवत्स्तुतौ उक्तं यत् हरिनामकीर्त्तनेन परमपदं प्राप्यते । संसारपीडितानां नानाविधक्लेशशान्तिः प्रकारान्तरेण जायते । भगवद्यशोवर्णनारहितं पाण्डित्यपूर्ण-रचनमपि निरर्थकम् । हरिनामकीर्त्तनस्थानं परमतीर्थपदवाच्यम् । रमणीयपदावली-युक्तमपि हरिकथाविरहितं काव्यं सज्जनानां काकतीर्थ इव न सेवनीयम् । शुकदेवादिमुनिमहर्षयः आत्मनः सद्गतेः जगद्धिताय श्रीकृष्णस्य यशःकीर्त्तनाय उपदिशन्ति । भगवन्नाम-श्रवण-कीर्त्तनेन कर्णरसनं च परमपवित्रं भविष्यति । अतः कविना स्वकृतपद्येन उक्तम्[43]—

शमशालिं शुकादिसाधुभिः सततं संस्तुतमात्मशर्मणे ।
शृणुत श्रवणे श्रुतीरितं सुरसारस्य शुभावहं यशः ॥
रविसूनुरतीव रोषणो रतिरस्माकमेष्वहर्निशम् ।
रचितोऽञ्जलिरेष तेऽधुना रसेन कीर्त्तय नेतरं हरेः ॥[44]

इत्थं श्रवणकीर्त्तनसाधनाया भक्तेर्वैशद्येन वर्णनं भक्तिधारायां माधुर्यमावहति।

अष्टमी कला—

कलायामस्यां भगवत्स्मरणरूपभक्तेः निर्णयो भवति । साधारणतः भगवद्भक्तस्य धर्मार्थकाममोक्षरूपचतुर्वर्गसाधनया विषयवासनादि इन्द्रियलब्धसुखं नोत्पद्यते । अतः येन केन प्रकारेण वा भवतु ईश्वरे चित्तसमर्पणेन पुमान् धर्मादीन् प्राप्नोति । यथा भर्जिता पक्वा धाना बीजयाङ्कुरोद्गमाय न जायते तथैव भगवति अनन्यभक्त्या आत्मसमर्पणेन कामोपभोगजन्यः कामो नोत्पद्यते । ततः येन केनापि प्रकारेण भगवति श्रीकृष्णे मनोनिवेशे सद्गतिर्मङ्गलं च स्यात् । उक्तं यथा-

कामा द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥[45]

ब्रह्मभावेन दासभावेन अथवा पुत्रभावेन भगवच्चिन्तनेन वैकुण्ठगतिः प्राप्यते । अतः प्राणावसानकाले कीदृशं नारायणनामस्मरणं सम्भवेत् तन्निराकरणाय कविना प्रोक्तम्- स्थिरचित्तजनानां शयन-स्वपन-गमन-जागरणकाले विशुद्धभावेन तथा एकाग्रचित्तेन हरिनामस्मरणं स्वतः एव भवति । व्रज-अङ्कुर-ध्वज-कमल-श्रीवत्सचिह्नयुक्तस्य भगवतः श्रीकृष्णस्य ध्यानेन हृद्गतस्य अज्ञानरूपस्य अन्धकारस्य अपसारणं भवति । भगवत एतद्रूपध्यानेन भक्ताः परमानन्देन तल्लीना भूत्वा मोक्षं प्राप्नुवन्ति । अतः स्मरणरूप-भगवद्भक्तिः प्रशंसायोग्या भवति ।

एवं भगवतो रूपं सुभद्रं ध्यायतो मनः ।
निर्वृत्या परया तूर्णं सम्पन्नं न निवर्त्तते ॥[46]

नवमी कला—

नवमकलायां भगवतः पादसेवनभक्तेर्वर्णनमस्ति । छत्रचामरादिद्वारा उपासनायां पादसेवनम् उच्यते ।

छत्रचामरमुखैर्नृपोचितैः श्रीहरेः सदुपचारसंचयैः ।
साधुभिर्विरचितामुपासनां पादसेवनमिति प्रचक्षते ॥[47]

श्रीहरिपादसेवनया धर्मार्थ-काम-मोक्ष-रूप-चतुर्वर्गफलप्राप्तिर्भवति । शुद्धान्तः-करणः कृष्णपादमूलं भक्तो न मुञ्चति । नानादेशाटनक्लान्तः पथिकः प्रवासादागतः स्वगृहं न मुञ्चति । तथैव रागद्वैषादिक्लेशग्रस्ताः भक्ताः कृष्णाङ्घ्रिमूलादन्यदपि न वाञ्छन्ति ।

पारिजातेऽञ्जसालब्धे सारङ्गोऽन्यन्नसेवते ।
त्वदङ्घ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि ॥[48]

भगवत्पादसेविनां मृत्योरपि भयं नास्ति । अतः स्वरचितपद्येन पादसेवनभक्तेः प्रशंसा क्रियते ।

पशुप प्रमदापयोधरार्पितपत्रावलिकुङ्कुमाङ्किते ।
पुरुषोत्तमपादपङ्कजे परिचर्यास्तु मम प्रथीयसी ॥[49]

दशमी कला—

दशमकलायां पुरुषार्थसाधनाय विष्णोः अर्चनरूपभक्तितत्त्वस्य व्याख्या क्रियते ।

भूतशुद्धिविधिमातृकाक्षरन्यासपूर्वमुपचारसंहतैः ।
दैवते स्वमनुनोपपादनं प्राहुरर्च्चनं ममन्दबुद्धयः ॥[50]

अर्थात् भूतशुद्धि मातृकाक्षरन्यास द्वारा देवप्रतिष्ठानन्तरं स्वस्य श्रीहरिसमर्पणं विधेयम्। भगवदर्चनादेव सर्वेषां तृप्तिर्भवति । दान-यज्ञ-जप-तपःसु भगवदर्चनं श्रेयस्करम् ।

पुंसामतो विविधकर्मभिरध्वराद्यै-
र्दानेन चोग्रतपसा व्रतचर्यया च ।
आराधनं भगवंस्तव सत्क्रियार्थो
धर्मोऽर्पितः कर्हिचिद्ध्रियते न यत्र ॥[51]

सूर्याग्नि-ब्राह्मण-गो-व्योम-मरुद्-जलात्म-भू-वैष्णवेषु सर्वभूतेषु अपि भगवान् विष्णुः विराजितः । इमे स्वर्गादय एकादशपूजापदानि भवन्ति । भगवत् पूजायां प्रस्तर-काष्ठ-लोहालेख्य-सैकत-मणिमय-लेप्य-मनोमय्य एता अष्टविधाः प्रतिमा

ग्रहणीयाः । भगवत्पूजासाधनात् प्रागेव सम्भारसंभृतः प्राङ्मुख उदङ्मुखो वा आसीनः गुर्वादिनमस्कारपूर्वकं यथोपदेशम् उपासनां साधयेत् ।

कृतन्यासः कृतन्यासां मदर्चां पाणिना मृजेत् ।
कलशं प्रोक्षणीयं च यथावदुपसाधयेत् ॥[52]

भगवद्भक्ताः स्वशक्त्या सहस्रेण शतेन षोडशभिर्दशभिर्वा उपचारैः पूजां कुर्यात् । अष्टदलपद्ममण्डलेन सह सुदर्शन-गदा-पाञ्चजन्यासि-धनु-र्हल-मुषलादि समेतस्य भगवतः कौस्तुभ-दुर्गा-गुरु-दिक्पालप्रभृतीनां पाद्याद्युपचारैः पूजा कर्त्तव्या । निष्कामभक्तियोगस्य न किञ्चिदवशिष्यते । अतः उक्तम्—

चतुराननचन्द्रशेखरादिभिरप्यपर्च्चित उर्ध्वर्च्चया ।
चिरमृच्छतु तृप्तिमर्च्चयाप्यपचित्या मम भक्तवत्सलः ॥[53]

एकादशी कला—

एकादशकलायां वन्दनभक्तितत्त्वस्य आलोचना क्रियते । अष्टाङ्गप्रणतिर्वन्दनभक्तिः कथ्यते । अतः तल्लक्षणमाह—

भुजाङ्घ्रिजानुवक्षोहृच्छरोनयनभाषितैः ।
अष्टाङ्गप्रणतिर्विष्णोर्बुधैर्वन्दनमुच्यते ॥[54]

भगवद्वन्दनाय कृतेन समुद्यमेनापि भक्तानां समीहितार्थप्राप्तिर्भवति । भगवदधिष्ठानतया सर्वाणि भूतानि वन्दनीयानि । अनेन प्रकारेण भगवद्वन्दनं विधेयम् ।

ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरञ्चिनुतं शरण्यम् ।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ते चरणारविन्दम् ॥[55]

संसारार्णवतारको भगवान् भक्तानां मनोरथपूरकः । इदानीं भगवान् स्वयम् आप्तकामत्वात् निरपेक्षभक्तार्थं च सापेक्षतां दर्शयति श्रीरामस्तुतौ ।

त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्मिष्ठ आर्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधावद्
वन्दे महापुरुष ते चरणारविन्दम् ॥[56]

भगवद्ववन्दनेन भगवान् भक्त्या क्रीतः सन् भक्तस्य कृते न केवलं सुलभो भवति, अपि तु भक्तप्राप्त्यर्थं भक्तमप्यन्विष्यति ।

द्वादशी कला—

अस्यां कलायां दायभक्तेः प्रशंसा विधीयते । महान्तो जना भगवद् दास्य मृते न अन्यत् किमपि वाञ्छन्ति । यदृच्छयैव लब्धा मनसः समृद्धिर्येषां ते खलु दास्ये निमज्जन्ति । प्रभोः पादसेवनकेशप्रसाधनालंकरणादिवाह्योपचारैः स्वस्य निकृष्टताप्रतिपादनेन सेव्यस्य उत्कर्षप्रतिपादनेन एव दास्यभक्तिरुच्यते । अतः भगवन्तमुद्दिश्य सर्वकर्मणा रूपं दास्यं निरूपयति ।

यद् युज्यतेऽसुवसुकर्म मनोवचोभि-
र्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात् ।
तैरेव सद्भवति यत्क्रियतेऽपृथक्त्वात्
सर्वस्य तद्भवति मूलनिषेचनं यत् ॥[57]

दास्यभक्त्या प्रियाप्रिय-संयोग-वियोग-दुःखशोकाद्यनुभवो नास्ति । अतः ग्रन्थकारः स्वकृतपद्येन दास्यभक्तेः महत्त्वं प्रदर्शयन् प्रभोः चरणयुगले सेवकपदं दास्यं प्रार्थयते ।

यदनुस्मृतिशालिनां नृणां द्रुहिणत्वादपि विघ्न उच्यते ।
प्रददातु दयानिधिर्दृढां निजपादाम्बुजदासतां स मे ॥[58]

त्रयोदशी कला—

सख्यभक्तेर्वर्णना त्रयोदश्यां कलायां भवति । विश्वास-मित्रताभेदेन सख्यं द्विविधम् । भगवतः प्रियत्वे हेतुः प्रीतिमयत्वं सख्यं बन्धुत्वं च तस्मिन् अखण्डविश्वासात् संसारभयं न विद्यते । भगवत्सम्पर्कात् प्राण-बुद्धि-मनो-धन-दार-पुत्रादय एते सर्वे प्रिया भवन्ति । भक्तवत्सलस्य भगवतः अङ्गस्पर्शेन हृदयं पुलकितं भवति । तस्य प्रीत्या आनन्दाश्रूणि निर्गतानि भवन्ति । ब्रह्मानन्दानुभूतिश्च जायते ।

अतः विश्वास-मित्रतारूप-भक्तिस्वरूपनिरूपणेन कविः सख्यभावस्य प्रशंसां स्वपद्येन करोति ।

सुबलादिवदासनाशन भ्रमणादिष्ववियुक्तताधिया ।
अनपायि सखित्वमस्ति मे सह नित्यं वसुदेवसूनुना ॥[59]

वासुदेवः कृष्णः भक्तस्य बन्धुत्वेन अत्यन्तं नैकट्यं सुलभत्वं च दर्शयति । भक्तः भगवतः सामीप्यं सख्यभावेन प्राप्नोति ।

चतुर्दशी कला—

चतुर्दशकलायाम् आत्मनिवेदननामको भक्तिप्रकारो वर्णितोऽस्ति । भक्तानां वित्तकलत्रापेक्षया स्वदेहः, स्वदेहात् आत्मा च प्रियतरो भवति । आत्मस्वरूपः श्रीकृष्णः सर्वेषां प्रियो भवति । भगवति आत्मनिवेदनेन स्वतः एव भक्तिरुत्पद्यते । भगवति निवेदितस्य देहस्य समक्षं राज्यराजपदस्यापि नाधिक्यम्। भगवति अर्पितदेहः सर्वतः श्रेष्ठो भवति । चतुर्षु वर्णेषु ब्राह्मणः श्रेष्ठो ब्राह्मणेष्वऽपि वेदज्ञोऽधिकः । वेदज्ञात् तस्य संशयच्छेत्ता मीमांसकः श्रेयान् भवति । परन्तु तदपेक्षया अशेषाः क्रिया स्तत्फलानि तथा आत्मनिवेदनेन परमपदलाभो भवति । यतः पापिष्ठा पूतनापि भगवत्पदं प्रापिता । अस्याः श्रवणकीर्त्तनादिभक्तेः प्रेमभक्तिरेव श्रेष्ठा भवति । अर्थात् श्रवणादिसाधनेभ्यो विशिष्टेनात्मनिवेदनेन भगवति प्रेमभक्तिः संजायते । अस्य भक्तस्यान्यः कोऽर्थः साधनरूपः साध्यरूपो वा नापेक्ष्यते । अतः कविर्दीनबन्धुः स्वपद्येन आत्मनिवेदनभक्तिभावस्य महत्त्वं दर्शयति ।[60]

मम तिष्ठति यद्धनादिकं सकलत्रं सकलं तदात्मना ।
विनिवेदितमस्तु वल्लवीवदनाम्भोजमधुव्रते हरौ ॥

पुत्रकलत्रादि स्वं सर्वस्वं च समर्प्य तदपेक्षया उत्कृष्टतरस्य तस्य यः प्रियतमः स्वः, आत्मा वा स च सर्वथा भगवति समर्प्यते । एकान्तात्मसमर्पणेन निरतिशयसुखाप्तिः स्वकीयं जन्मसार्थकं करोति ।

पञ्चदशी कला—

कलायां पञ्चदश्यां भावप्रेमभक्तितत्त्वालोचना क्रियते । एकान्ते भगवद्भावविह्वलस्य इष्टदेवचिन्तनेन प्रेमभक्तिरासाद्यते । भक्तिभावेन भगवच्चरण-कमलध्यानेन भगवत्प्राप्तिर्भवति । तद्गत-प्राण-मनोहेतोः अङ्गानि पुलकितानि नयने आनन्दाश्रुपूर्णे च भवन्ति । भगवच्चरणाम्भोजं ध्यायतः भाव-शुद्ध-सत्त्व-विशेषात्मा प्रेमतुर्यांशसाम्यभावो भवति । उक्तं यथा-

प्रेम्णस्तु प्रथमावस्था भाव इत्यभिधीयते ।
सात्त्विकाः स्वल्पमात्राः स्युरत्राश्रुपुलकादयः ॥

ध्यानमार्गेण साधनभूतेन हरौ प्रतिलब्धो भावः । येन भक्त्या प्रेमलक्षणया हृदयं द्रवीभूतं जायते । भावापेक्षया प्रेम्णि पुलकाश्रुण आधिक्यं दर्शयति । प्रेमोद्गतस्य पुलकाः संजायन्ते । तेन औत्कण्ठ्यजन्याश्रुकलया मुहुरर्द्यमानः आनन्दसंप्लवे मज्जमानः भक्तो भगवद्रूपग्रहणे सर्वथा समर्थः दुःखजनकं चित्तं तदीयवासनाजातं

त्यजति यथा मत्स्यो जलमग्नः स्वबन्धनहेतुभूतं बडिशं त्यजति । मन्दप्रयत्नो भवतीति भावः । यथा[61]—

एवं हरौ भगवति प्रतिलब्धभावो
भक्त्या द्रवद्धृदयमुत्पुलकः प्रमोदात् ।
औत्कण्ठ्यवाष्पकलया मुहुरर्द्यमान-
स्तच्चापि चित्तबडिशं शनकैर्वियुक्ते ॥

भगवति जातस्य भावस्य लिङ्गत्रयमस्ति । अर्थात् भगवद्भावनया तन्मयो भूत्वा जगत्पतेर्नारायणस्य नामरूपचिन्तनेन पुरुषोत्तमभगवत्प्राप्तिर्भवति । प्रेमभक्तिविह्वलभक्तस्य संसारिकबाह्यज्ञानं न विद्यते । सुख-दुःख-हर्ष-क्रन्दनादि-देह-क्लेशं परित्यज्य साधारणदृष्ट्या भक्तो वाचालप्रायः प्रतीतो भवति । यदा भगवद्भावेन तन्मयो भवति तदा स समाधिं प्राप्नोति । भगवद्भक्तियोगतः प्रसन्नमनसः भक्तस्य निवृत्तासक्तेर्भगवत्तत्त्वविज्ञानं जायते । भक्तेरन्यनिरपेक्षत्वादन्यस्य भक्तिसापेक्षत्वात्सर्वतो भक्तियोग एव श्रेष्ठः तमनुतिष्ठतो न किञ्चिदवशिष्यते । नद्यम्बुसागरसङ्गम इव भगवद्भक्तस्य आत्मा परमात्मनि विलीनो भवति । यथा[62]-

ता नाविदन्मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदम् ।
यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे ॥

प्रेमभक्तिविह्वलभक्तस्य हरेर्नामकीर्त्तने महाननुरागो जायते । तद्गतया अनन्यभक्त्या भगवन्तमाकल्प्य उच्चैर्हसति ।

अन्तकालमुपेक्षितोऽस्मीति रोदिति । हरिं भजतः भक्तिः प्रेमलक्षणा परेणानुभवश्च जायते । बहुग्रासभोजनैः यथा तुष्टिः तथा भगवन्नामभजनैर्जायमानं परमप्रेम जायते । अतः कविवरः स्वकृतपद्येन प्रेमलक्षणां भक्तिमांशसति ।

श्रवणाभिराशु साधनैः स्फुटभावस्य ममाघविद्विषि ।
अपि योगसमाधितत्परैर्भवतु प्रेम सुदुर्लभं नरैः ॥[63]

षोडशी कला—

ग्रन्थकारः तद् विरचितहरिभक्तिसुधाकरनामाख्यग्रन्थस्य अन्तिमकलायां भक्तिहीनानां जनानां सकाशं सामान्यतः संसारसम्भवस्तापो दुर्निवार इति प्रतिपाद्य ग्रन्थसमाप्तिं करोति । दैवमायया विमोहिता भूत्वा जनाः क्षुधा-तृष्णा-वात-पित्त-कफादित्रिविधधातुप्रभावेण प्रभाविता नानाविधकुकार्येण मूढा भवन्ति । एतैः पीड्यमानमनः सीदति । धन-दार-पुत्र-स्वजनादिषु निमज्जन्ति । ततः मूढ इव हरिगुणगानरूपं जलं परित्यज्य मृगतृष्णायाः पश्चाद्धावनं कुर्वन्ति । भगवत् कथादिषु

तेषां स्पृहा नास्ति । काम-क्रोध-लोभ-मोहैर्जडिताः ईर्ष्या-द्वेष-मद-मात्सर्यादिभिः आकर्षिताः भवन्ति । परन्तु एतेभ्यः श्रीहरिभक्ता भिन्नाः ते कदाचिदपि विषयवासनया न आकर्षिताः । शयने, स्वपने, जागरणे हरिनामकीर्त्तनं तेषां मुख्यं साधनं भवति । अजातपक्षा खगाः क्षुधादिभिः पीडिता यथा मातरं यथा च दाम्ना बद्धा बालवत्सास्तन्यं यथा च प्रवासं गतं प्रियं कामेन प्रिया तथा तापत्रयपीडितस्य भगवद्भक्तस्य कर्मभिर्बद्धं मनः भगवन्तं दिदृक्षते । अतः श्रीहरिभक्ताः संसारे उषित्वाऽपि भगवत्स्वरूपं द्रष्टुं पारयन्ति । यथा उक्तम्[64]—

अजातपक्षा इव मातरं खगाः स्तन्यं यथावत्सतराः क्षुधार्ताः ।
प्रियं प्रियेव व्युषतं विषण्णां मनोऽरविन्दाक्ष दिदृक्षते त्वाम् ॥

भगवतः चरणकमलाश्रयेण परमपदलाभो भवति । स्वयं भगवान् प्रपन्नानां शरणगतानां भयं नाशयति । अतः विज्ञः परमकृपालुं भगवन्तं शरणं गच्छति । कविवरः स्वग्रन्थं भगवति समर्पयति-

इयमच्युतहृत्सरोरुहे वसतः शासनवर्त्तिना तव ।
ग्रथिता शुभपद्यसंहतिस्त्वयि कारुण्यनिधौ समर्पिता ॥[65]

अनित्यसंसारे हरिभक्तं विना न कोऽपि जन्ममृत्युरूपदुःखात् मुक्तिं प्राप्नोति। ततः सर्वे जनाः भगवति आत्मसमर्पणं कुर्वन्ति । हरिमृते अन्यगतिर्न विद्यते । भक्तिसाहित्यम् अतिव्यापकम् ।

ज्ञानलाभाय ग्रन्थपठनस्य आवश्यकता वर्त्तते । किन्तु शास्त्राध्ययन-ज्ञानार्जन-जप-तपो-याग-यज्ञ-तीर्थयात्रादिषु कृतेषु अपि हरिभक्तिं विना जीवनं निरर्थकम् । बहुविधक्लेशहरस्य मुरारेराश्रयं विना जीवनं मूल्यहीनम् । ग्रन्थकारः निम्नोक्तपद्येन ग्रन्थस्य उपसंहारपुरःसरं काव्यरचनया स्वस्य दोषत्रुटिमार्जनाय भगवति विनिवेदयति ।

रम्यं भक्तिसुधाकरं समलिखं भूरिप्रयत्नादमुं
बोधायास तमःसमूहदमनीं टीकां च सत्कौमुदीम् ।
अत्र स्वामिकृतौ कृतं यदधिकं नूनं च पूर्वापर-
श्लोकैक्यप्रतिपत्तये सुकृतिभिस्तत् क्षम्यतां साधुभिः ॥[66]

(५) हरिभक्तिसुधाकरे प्रतिपादितं भक्तिस्वरूपं तद्भेदाश्च—

भारतभूमिर्हि सरसस्य भक्तिरसस्य स्निग्धधारया सिक्ता आप्यायिता च वर्त्तते । भक्तितत्त्वस्य प्रवाहोऽनादिकालात् एव प्रचलन्नास्ते । स्निग्धानुरागसम्बद्धा भावप्रेमभक्तिरसप्लाविता बहवो विद्वांसः सन्तो महात्मानश्च अनायासेन

परमात्मानमवाप्य कृतकृत्यतामगुः यान्ति यास्यन्ति च । आत्मानं धन्यतां नयन्ति च । अतः भक्तिसाहित्यस्य क्षेत्रम् अतिव्यापकम् । महर्षिपाणिनिः सूत्रम् एकं प्रणीतवान्[67] । अस्य सूत्रस्य काशिकावृत्ति भज्यते सेव्यते इति भक्तिः इति स्पष्टयति। भज्+क्तिन्=भक्तिः । ऋग्वेदस्य धार्मिकसाहित्ये निर्मलभक्तिधारा आसीदिति सन्देहलवोऽपि कर्त्तुं न युज्यते[68] । श्रीमद्भागवतमवलम्ब्यास्मिन् भारतवर्षे बहवः भक्तिग्रन्थाः विरचिताः । श्रीमद्भागवतं कृष्ण-ब्रह्मा-नारद-व्यास-शुकमुखाद् निःसृतं सत् अखण्डतया जगति विभाति । भक्तिसिद्धान्तस्य प्रमाणावसरे बहवो ग्रन्थाः विरचिताः । तेषु उत्कलवास्तव्यदीनबन्धुमिश्रेण कृतः 'हरिभक्तिसुधाकरः' वैष्णवभक्तिसाहित्ये मूर्धन्यभूतस्य श्रीमद्भागवतस्य पङ्क्तीः उद्धृत्य तासां पङ्क्तीनां महत्त्वमुट्टङ्कयति ग्रन्थकारः हरिभक्तिसुधाकरे भक्तितत्त्वस्य व्याख्यानावसरे ।

ग्रन्थेऽस्मिन् भक्तेः ज्ञानस्य च वैशिष्ट्यं दरीदृश्यते । ग्रन्थे केवलमेव ज्ञानादपि भक्तेर्दुलभतां द्योतयति । ज्ञानभक्तिभ्यां ज्ञानभक्त्योः तदुभयं स्वर्गिनारकि शरीरम् । विषयवासनानिरोधपूर्वकं भगवतः श्रीकृष्णस्य अनन्यकृपालाभो भक्तानां कृते मोक्षमपि तुच्छं प्रतिपादयति । भगवद्भक्त्या यस्य मनः शान्तं समाहितं भवति स दानादिसत्कर्मणः फलं प्राप्नुयात् । वैराग्यभावात् भगवद्भक्तिः न जायते । मूढजनाः भोजनाच्छादनादिविषये वृथा चिन्तां कुर्वन्ति । परन्तु विश्वम्भरे देवे श्रीकृष्णे चित्तसमर्पणेन भक्ताः किञ्चिदपि न वाञ्छन्ति । गुरुरूपभगवत्सेवया भवसंसारात् मुक्तिः प्राप्यते । सत्सङ्गलब्धा भक्तिरेव भगवत्पदप्राप्तिहेतुर्भवति । ततः भागवते उक्तम्[69]—

सत्सङ्गलब्धया भक्त्या मयि मां स उपासिता ।
स वै मे दर्शितं सद्भिरञ्जसा विन्दते पदम् ॥

सत्सङ्गजनितभक्तियोगं विना भवतरणे नान्योपायो विद्यते । यः श्रद्धया नित्यं भगवत् लीलादि कथां शृणोति गायति च स भगवतः प्रियो भवति । भगवन्नाममात्रश्रवणाद् अन्तःकरणं शुद्धं भवति मनो निर्मलं च भवति । भक्तेरुदयेन महापापिनोऽपि भगवद्भक्तिमाश्रित्य पापरहिताः सन्तः पुण्यमयेऽध्यात्मराज्येऽग्रेसरा भवन्ति । अतोऽपूर्वोऽयं भक्तिमहिमा । श्रीकृष्णं प्रति जगतां सर्ववस्तुसमर्पणाय भिक्षा ग्रन्थ-कारस्य निखिलामपि जागतीं चेष्टां विष्णुपरां विधातुं साडम्बरं चेष्टते । प्रथमतः कृष्णार्पणं ततश्च भक्तिप्रारम्भः । आदौ श्रीकृष्णं प्रति स्वात्मसमर्पणं पश्चाच्च भक्तत्वेनात्मनः प्रचार इत्येवं हि ग्रन्थस्य महत्त्वम् । मानुषमेव जन्मास्मिन् सर्वतो

भगवत्प्रियं तच्च परमार्थपदं दुर्लभं च वर्त्तते । अतः वर्त्तमाने एवान्याभिनिवेश-प्रहाणेन शोकमोहभयापहा भक्तिरेव साधारणी सरणिः शाश्वती श्रेयस्करीति विजानता भक्तियोगो विधातव्यः इति हरिभक्तिसुधाकरग्रन्थकारस्याभिमतम् ।

भगवान् वासुदेवश्रीकृष्णः एव समग्रविश्वस्य सृष्टि-स्थिति-प्रलयस्य कारणं भवति । पुनः परब्रह्मपरमात्मा एव प्रतिपादयति । यथा[70]—

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमव्ययम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥

भगवान् वासुदेव एकोनचत्वारिंशद् गुणयुक्तो भवति । भगवान् काले काले भक्तानां हिताय परमकल्याणाय च मनुष्यदेहं धारयति ।

अनुग्रहाय भक्तानां मानुषं देहमाश्रितः ।
भजते तादृशीः क्रीडा या श्रुत्या तत्परो भवेत् ॥[71]

अतः अनन्ताऽसीम-योगजन्म-लीलामयस्य भगवतो महिमा अनन्यसाधारणो भवति । भक्तिमन्तो जनाः परमेश्वरस्य पदवीं जानन्ति । यतः श्रीहरिसेवायां सर्वजन्मादिकं सफलं भवति ।

किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि ।
किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥[72]

अनन्यया भक्त्या भगवन्तं प्राप्य भक्तः संसारे आवापागमनचक्राद् विमुक्तः शाश्वतं सुखमुपलभ्यते । तस्मात् भगवत्प्राप्तिरूपशाश्वतसुखसाधनं भक्तिरेवास्ति । भगवति एकनिष्ठभक्त्या ज्ञानं वैराग्यं च उत्पद्यते । ज्ञानवैराग्यापेक्षया भक्तिः श्रेयस्करी । ज्ञानं वैराग्यं च भक्तेरुपयोगितामावहतः, परन्तु न तस्या अङ्गभूते स्तः ।

भगवद्भक्तस्य कृते देशकालादिविचारनियमस्य आवश्यकता नास्ति । अतः सर्वतोभावेन भगवानेव भजनीय आवश्यको वर्त्तते । भक्तिमतां भगवान् अचिरेण लभ्यो भवति ।

भगवान् भक्तिमतां लभ्यो दुर्लभः सर्वदेहिनाम् ।
स्वराज्यस्याप्यभिमतम् एकान्तेनात्मविद्गतिः ॥[73]

भगवन्तं प्रति ऐकान्तिकभक्त्या स्वर्गादिसुखं तुच्छं भवति । मोक्षस्यापि प्रयोजनं नास्ति । भक्त्या अविरुध्यमाना मुक्तिः त्याज्या एव । मुक्तौ सुखैश्वर्यं लभ्यते भक्तौ तु परमप्रेम लभ्यते[74] । भगवद्भक्तानां कृते विषयसुखं तुच्छं भवति । वर्णाश्रम-चारिणौ जनाः शतजन्मान्तरं ब्रह्मपदं प्राप्नुवन्ति । परन्तु भगवद्भक्ताः मरणान्तरं स्वतः एव विष्णुलोकमधिगच्छन्ति । तत्र निर्विघ्नमीश्वरप्राप्तिः भवति ।

हरिभक्तिसुधाकरे भक्तिस्वरूपस्य तथा तस्य माहात्म्यस्य निर्णयानन्तरं ग्रन्थकारो दीनबन्धुमिश्रः ग्रन्थे भक्तिभेदमपि निर्णयति । मुख्यतया भक्तिः उत्तम-मध्यम-अधमभेदेन त्रिविधा कृता ।

अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥[75]

अर्थात् भगवत्प्रतिमायां पूजामीहते न तद्भक्तेषु स कनिष्ठभक्तः इति कथ्यते ।

ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेम-मैत्री-कृपोपेक्षा यः करोति स मध्यमः ॥[76]

भगवति प्रेम तद्भक्तेषु मैत्री, अज्ञानेषु कृपां द्विषत्सु उपेक्षां करोति स मध्यमभक्तः भवति ।

सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥[77]

सर्वभूतेषु ब्रह्मभावेन समन्वयं पश्येत्, आत्मनो हरेः सर्वभूतेषु भगवतोभावनिरतिशयैश्वर्यमेव यः पश्येत् स भागवतोत्तमभक्तः आख्यायते ।

न काम्यकर्मबीजानां नास्य चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥[78]

दीनबन्धुमिश्रेण भक्तिभेदनिर्णयप्रसङ्गे कथ्यते यत् भागवतपुराणे भक्तिः सगुणनिर्गुणभेदाभ्यां द्विधा कथ्यते । तत्पुनः सात्त्विक-राजसिक-तामसिकभेदेन त्रिविधम् । पुनश्च तदपि अधममध्यमोत्तमभेदेन त्रिधा विभज्यते[79] । विष्णुपुराणेऽपि एतद्भक्तिभेदः अङ्गीक्रियते[80] । मार्कण्डेयपुराणे नारायणः सगुणनिर्गुणभावेन द्विविधः । पुनः सगुण सत्त्व-रज-स्तमो भावेन त्रिधा भवति[81] ।

भक्तिभेदप्रसङ्गेऽपि रूपगोस्वामिना भक्तिरसामृतसिन्धौ त्रिधा कथिता । यथा- सा भक्तिः साधनं भावः प्रेमा चेति त्रिधोदिता[82] । तत्र साधनभक्तिलक्षणमेतादृशं कृतम् । यथा[83]—

कृतिसाध्या भवेत् साध्यभावा सा साधनाभिधा ।
नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता ॥

साधनभक्तिः पुनर्द्विधा विभज्यते वैधी रागानुगा चेति । वैधी भक्तिः उत्तम-मध्यम-कनिष्ठभेदेन त्रिधा विभज्यते । तत्र वैधी रागानुगा चेति सा द्विधा साधनाभिधा[84] । तत्र वैधीभक्तिः—

यत्र रागा नवाप्यत्वात् प्रवृत्तिरुपजायते ।
शासने नैव शास्त्रस्य सा वैधी भक्तिरुच्यते ॥[85]

रागानुगा भक्तिः—

इष्टे स्वारसिकी रागः परमाविष्टता भवेत् ।
तन्मयी या भवेद् भक्तिः सात्र रागात्मिकोदिता ॥[86]

रागानुगा भक्तिः पुनः कामरूपा सम्बन्धरूपा चेति भवेत् द्विधा[87] ।

उज्ज्वलनीलमणिनामके भक्तिग्रन्थेऽपि हार्दरूपाऽपि भक्तिः स्वीकृतास्ति। भावरूपा प्रेमरूपा चेति भक्तिद्वयमपि तेषु अन्तर्भवति । तत्र भक्तिर्गौणी परा भेदेन द्विधा ग्रहणं क्रियते । वैधी श्रवणादिभेदेन नवधा तथा परा सप्तधा कथिता[88] । भक्तियोगस्य बहुविधभेदनिरूपणेऽपि मुख्यतया भक्तिर्द्विधा विभज्यते । साधनरूपा साध्यरूपा चेति । साधनभक्तिः विष्णुकथाश्रवणकीर्त्तनादिभेदेन नवधा कथ्यते । साध्यरूपा भक्तिः प्रेममयी स्यात् । प्रेमभक्तेः प्रतिनिधिस्वरूपा व्रजाङ्गना भवति । श्रवणकीर्त्तनादि नवविधसाधनभक्तिः भगवतप्राप्तरङ्गः भवति । अतः अङ्गभेदात् भक्तिभेदं निरूपयति ग्रन्थकर्त्ता । हरिभक्तिसुधाकरस्य मुख्यप्रतिपाद्यविषयवस्तु भवति साध्यसाधनभूतस्य अङ्गस्वरूपं भाव-प्रेम-भक्ति-श्रवण-कीर्त्तनादि नवविध-भक्तिवर्णनं स्यात् । यद्यपि अनेकानि भक्तिलक्षणानि सन्ति तथापि तेषु श्रवण-कीर्त्तनादिनवध भक्तिर्मुख्या भवति । अतः गुणयोगाद् भक्तियोगो नानाविधो दृश्यते।

हरिभक्तिसुधाकरग्रन्थे ग्रन्थकर्त्ता दीनबन्धुमिश्रः बृहन्नारदीयपुराणे वर्णित-भक्तिभेदमपि संयोजयति । तत्र सात्त्विक-राजसिक-तामसिक इति त्रिविधा भक्तिः प्रत्येकं उत्तम-मध्यम-अधमभेदेन त्रिधा निरूप्यते । श्रवणकीर्त्तनादयो नवापि प्रत्येकं नव भेदाः सगुण-भक्तिरेकाशीति भेदाः । सा पुनः एकाङ्गी बहुलाङ्गीति द्विधा विभज्यते ।

रूपगोस्वामिना भक्तिरसामृतसिन्धौ अङ्गिरूपाया भक्तेः अङ्गानि स्वीक्रियन्ते । यथा[89]—

आश्रितवानन्तरामेकभेदं केवलमेव वा ।
एकं कर्मात्र विद्वद्भिरेकं भक्तेरङ्गमुच्यते ॥
गुरुपादाश्रयस्तस्मात् कृष्णदीक्षादिशिक्षणम् ।
विश्रमेण साधुसेवा साधुवर्त्मानुवर्त्तनम् ॥
सद्धर्मपृच्छा भोगादित्यागः कृष्णहेतवे ।
निवासो द्वारकादौ च गङ्गादेरपि सन्निधौ ॥

व्यवहारेषु सर्वेषु यावदर्थानुवर्त्तिता ।
हरिवासरो सम्मानो धात्री अश्वत्थमादिगौरवम् ॥

एषामत्र दशाङ्गानां भवेत् प्रारम्भरूपताम्[90] । तत्राऽपि भक्तेः अङ्गभेदाः चतुःषष्टिर्भवन्ति । ते भवन्ति गुरुपादाश्रयः, कृष्णपादादिशिक्षणम्, विश्रम्भेण गुरोः सेवा, सद्धर्मपृच्छा, कृष्णार्थे भोगादित्यागः, द्वारकादिनिवासः, गङ्गादिवासः, यावदर्थानुवर्त्तिता, हरिवासर सम्मानः, धात्र्यश्वत्थादि गौरवम्, श्रीकृष्णविमुख-जनसङ्गत्यागः शिष्याद्यननुबन्धित्वादि, त्रिविधव्यवहारेऽपि अकार्पण्यं शोकाद्यवश-वर्त्तिता, अन्यदेवानवज्ञा, भूतानुद्वेगदायिता, सेवानामपराधवर्जनम्, तन्निन्दाद्य-सहिष्णुता, वैष्णवचिह्नधारणम्, नामाक्षरधृतिः, निर्माल्यधृतिः, अङ्गताण्डवम्, दण्डवन्नतिः, अभ्युत्थानम्, अनुव्रज्या, स्थाने गतिः, आलये च परिक्रमणम् अर्च्चनम्, परिचर्या, गीतम्, संकीर्त्तनम्, जपः, विज्ञप्तिः, स्तवपाठः, नैवेद्यास्वादः, पाद्यास्वादः, धूपसौरभम्, माल्यसौरभम्, श्रीमूर्त्तेः स्पर्शनम्, श्रीमूर्त्तेः दर्शनम्, आरात्रिकदर्शनम्, उत्सवदर्शनम्, श्रवणम्, तत्कृपेक्षणम्, स्मृतिः, ध्यानम्, दास्यम्, सख्यम्, आत्मनिवेदनम्, निजप्रियोपहरणम्, तदर्थेऽखिलचेष्टितम्, शरणापत्तिः, तदीयानां सेवनम्, श्रीमथुरायाः वैष्णवानां तुलस्यादिसेवनम्, यथा वैभवमहोत्सव श्रीजन्मदिनयात्रा, श्रीमूर्त्तेः अङ्घ्रिसेवन प्रीतिः, श्रीभागवतार्थास्वादः सजातीया-शयस्निग्धः, श्रीभगवद्भक्तसङ्गः, नामसंकीर्त्तनम्, श्रीमथुरामण्डले स्थितिः एतानि भक्तेः अङ्गानि भवन्ति । भ.र.सि.ग्रन्थे भक्तिः एकाङ्गी बहुलाङ्गी च तत्र एकाङ्गी भक्तिर्नाम[91]—

श्रीविष्णोः श्रवणे परीक्षिदभवत् वैयासकिः कीर्त्तने ।
प्रह्लादः स्मरणे तदङ्घ्रिसेवने लक्ष्मीः पृथुः पूजने ॥
अक्रूरस्त्वभिवन्दने कपिपतिर्दास्येऽथ सख्येऽर्जुनः ।
सर्वस्वात्मनिवेदने बलिरभूत् कृष्णाप्तिरेषा परा ॥

हरिभक्तिसुधाकरग्रन्थे वर्णितम् एकाङ्ग्या भक्त्या उदाहरणम् । राजा परीक्षित् शुकमुखात् भगवतः तत्त्वमाकर्ण्य अनन्यभावेन श्रीकृष्णस्य पदपङ्कजयो-रात्मानं समर्पितवान् । एवंभूतमेव श्रवणरूपं मङ्गलं यस्याः सा एकाङ्गी भक्तिः उच्यते । यथा[92]—

वैयासिकेरिति वचस्तत्त्वनिश्चयमात्मनः ।
उपधार्य मतिं कृष्णे औत्तरेय सतीं व्यधात् ॥

जगन्निवासभूत-मूर्त्तीनाम् एकेन भक्तेन बहूनामङ्गानां चार्च्यमानत्वात् बहुलाङ्गी

भक्तिः कथ्यते । यथा[93]—

वाणी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्मसु मनस्तव पादयोर्नः ।
स्मृत्यां शिरस्तव निवासजगत्प्रणामे
दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥

भगवत्कथादिश्रवणे यस्य श्रद्धा, सर्वकर्मसु नोद्वेगः तत्फलेषु विरक्तिः स एव श्रद्धालुभक्तः । तेषां भक्तानां कृते भक्तवत्सलो भगवान् सर्वं सम्पादयति । भगवन्नामनित्यभजनेन हृद्गतकामो नश्यति । श्रीहरिनामवचनं योगसाधनवदति-दुःसाध्यं न भवति ।

भक्तितत्त्ववर्णनं प्रत्येकं पुराणेषु दृश्यते । परन्तु श्रीमद्भागवते भक्तितत्त्वस्य सर्वाङ्गिणं विश्लेषणं क्रियते । श्रीमद्भागवतं भक्तिशास्त्रस्य सर्वस्वम् । निर्गुणो भगवानपि भक्तानां कृते सगुणमयो भवति । भक्तस्याभिरुच्यनुसारं भिन्नं भिन्नं रूपं धत्ते । अतः श्रीमद्भागवतमाधारीकृत्य रचितः हरिभक्तिसुधाकरः विद्वत्समाजे परमादरणीयः परमस्पृहणीयो भवति । भक्तिमार्गः सुदीर्घः । ग्रन्थेऽस्मिन् अष्टादशपुराणेषु भागवतमहापुराणं श्रेष्ठम् इति प्रतिपादितम् ।

न केवलं ग्रन्थे भक्तिवर्णना क्रियते । अपि तु वैराग्यादि प्रशंसा सत्सङ्गस्य महिमा भगवतः श्रीकृष्णस्य उत्कर्षः इत्यादयो वर्णना दृश्यन्ते । अस्मिन् प्रसङ्गे ग्रन्थे विशदालोचना क्रियते । हरिनामश्रवणेन पुंसः विविधा तृष्णा अपगच्छति । अतिमधुरत्वात् हरिचरितामृतश्रवणमात्रेण महतां तृप्तिः संजायते । कलौ हरिनामकीर्त्तनेन कैवल्यप्राप्तिर्भवति[94] ।

कृते यद्ध्यायतो विष्णोस्त्रेतायां यजतो मखैः ।
द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनात् ॥

भगवति चित्तसमर्पणेन भक्तस्य धर्म-अर्थ-काम-मोक्षरूपं चतुर्वर्गसाधनं धर्मादीनां च प्राप्तिर्भवति । शयने, स्वपने, जागरणे एकाग्रचित्ततया हरिनामस्मरणमात्रेण मनसि स्वतः एव भक्तिभाव उत्पद्यते[95] ।

स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।
भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥

भगवत्पादसेविनां मृत्योरपि भयं नास्ति । भूतशुद्धिः मातृकाक्षरन्यासद्वारैव स्वयं देवभावेन प्रतिष्ठानन्तरं श्रीहरेरर्चनं विधातव्यम् । भगवदर्चनादेव सर्वेषां तृप्तिर्जायते । दान-यज्ञ-जप-तपोऽपेक्षया भगवदर्चनं श्रेयस्करम् । भगवान् विष्णुः

सूर्य-अग्नि-ब्राह्मण-गौ-आकाश-मरुद्-जल-भू-आत्मा-वैष्णवादिषु सर्वभूतेषु सर्वत्रैव सर्वव्यापकत्वात् विराजते । भगवद्वन्दनया भक्तानां समीहितार्थसिद्धिर्भवति यथा-

ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरञ्चिनुतं शरण्यम् ।
भृत्यार्त्तिहं प्रणतपाल भवाब्धिपोतं
वन्दे महापुरुष ते चरणारविन्दम् ॥[96]

संसारार्णवतारको भगवान् भक्तानां मनोरथपूरकः । महान्तो जनाः भगवद्दास्यमृते अन्यत्किमपि न वाञ्छन्ति । प्रभोः पादसेवनं केशप्रसाधनम् अलङ्करणादि बाह्योपचारैः आत्मसमर्पणं दास्यभक्तिः कथ्यते । अनया भक्त्या प्रिया-प्रिय-संयोग-वियोग-सुख-दुःखादेरनुभवो नास्ति । भगवद् विष्णोः सख्येन विश्वासेन सद्भावेन वा कस्यचित् संसारस्य जागतिकभयं न विद्यते । तत्संसर्गात् भक्तस्य नेत्राभ्याम् आनन्दाश्रूणि निर्गच्छन्ति । भगवान् श्रीकृष्णः सर्वेषां प्रियो भवति । भगवति आत्मनिवेदनेन स्वतः एव भक्तिः संजायते । भगवति वासुदेवेऽर्पितदेहो भक्तः सर्वत्र श्रेष्ठो भवति । श्रवणकीर्त्तनादिसाधनरूपाया भक्तेरपेक्षया आत्मनिवेदन-रूपप्रेमभक्तिः श्रेयस्करी । अस्याः श्रवणादिभक्तेः प्रेमभक्तिं प्रति साधनता दृश्यते। प्रेमभक्तौ सञ्जातायां साधनरूपः साध्यरूपः सर्वोऽपि स्वत एव जायते । साधनाद् भावभक्तिरुत्पद्यते । भगवति भावविह्वलतया इष्टदेवचिन्तनेन प्रेमभक्तिः सम्भवति। तन्त्रोक्तेः प्रेमभक्तेः प्रथमावस्था भाव इति उच्यते । भावभक्तिः प्रेमभक्त्यन्तरङ्गत्वेन पृथग्भावेन ग्रन्थे न प्रतिपाद्यते । भगवति प्रेमभक्तौ सांसारिकज्ञानं नश्यति । नद्यम्बु-सागर-सङ्गम इव भगवद्भावगतभक्तस्य आत्मा परमात्मनि लीनो भवति । तेन सह नामरूपयोः विलयो जायते। विषयसुखादिषु निमज्जनेन दुर्वह दुःखसंसारे उन्मज्जन्ति। हरिगुणगानविहरितो भूत्वा मूढ इव मृगतृष्णाम् अनुधावन्ति परन्तु श्रीहरिभक्तः अस्माद् भिन्नाः भगवता श्रीकृष्णेन शरणागतानां भयं भञ्जयतीति विज्ञाय ग्रन्थकारः दीनबन्धुमिश्रः परमकृपालोर्भगवतः श्रीकृष्णस्य चरणकमले शरणं याति ।

कृष्ण कृष्णाप्रमेयात्मन्प्रपन्नभयभञ्जन ।
वयं त्वां शरणं यामो भवभीताः पृथग्धियः ॥[97]

हरिमृते अन्या गतिर्न विद्यते । भगवद्भक्तेः स्वरूपम् अतिव्यापकम् । भक्तिं विना शास्त्रज्ञान-जप-तपस्त्याग-यज्ञ-तीर्थयात्रादि न निष्पद्यते । अतः बहुविधक्लेश-हारिणो मुरारेराश्रयं विना जीवनं मूल्यहीनम् । अतः भगवद्गीतायामुक्तम्[98]—

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ।।

कलौ हरिनाम एव सर्वस्वम् । हरिनामस्मरणेन सालोक्यादिमुक्तिः प्राप्यते । अतः उक्तम्[99]—

कलिं सभाजयन्त्यार्या गुणज्ञाः सारभागिनः ।
यत्र संकीर्त्तनेनैव सर्वः स्वार्थोऽभिलभ्यते ।।
कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।
कीर्त्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत् ।।[100]

भागवतीयपङ्क्तिमुररीकृत्य कविवरदीनबन्धुमिश्रः हरिभक्तिसुधाकरग्रन्थे भक्तेः महत्त्वं विस्तृततया वर्णयति । परन्तु तत्र वर्णितभक्तेर्विशालपरिसरमुररीकृत्य सम्यगालोचनं प्रस्तुते प्रबन्धे कृतम् । भक्तेः मनस्तात्त्विकवृत्तिः, भक्त्या ईश्वरसान्निध्यलाभो, कर्मज्ञानयोगापेक्षया भक्तेः परमोत्कर्ष इत्येवमेव बहवः विषया अत्र पर्यालोचिताः ।

वैष्णव-सौर-गाणपत्य-शाक्ताद्यनेकेषु सम्प्रदायेषु सत्सु रामकृष्णयोः विष्णुरूपतया वैष्णवभक्तेर्बहुलः प्रसारोऽभूत् । तद्भक्तितत्त्वसारवत्ताप्रतिपादनाय श्रीमद्भागवतादीनि पुराणानि, भक्तिसन्दर्भाः, काव्यात्मतया भक्तितत्त्वस्य प्रतिपादका ग्रन्थाः, वैष्णवाचार्यपरम्परा इत्यादयो महान्तो महान्तः प्रयासाः भक्तिं प्रतिपादयन्ति । हरिभक्तिसुधाकरः भक्त्यमृतवितरणाय यथार्थत्वेन सुधाकरो भवति इत्येव कथने नात्युक्तिः ।

***

सन्दर्भनिर्देशः
(Notes & Reference)

1. भा. 12.13.19
2. भा. 2.9.32
3. भा. 3.24.31
4. भा. 1.2.11
5. भा. 11.14.20
6. भा. 3.29.22
7. ह.भ.सु. 1.1., भा. 12.13.19
8. ह.भ.सु. 1.14.
9. ह.भ.सु. 1.9., भा. 1.1.3
10. ह.भ.सु. 1.32.,भा. 12.13.16
11. ह.भ.सु. 1.35., भा. 5.6.13
12. ह.भ.सु. 1.37., भा. 5.19.28
13. ह.भ.सु. 1.47., भा. 7.10.19
14. ह.भ.सु. 1.49., भा. 9.9.13
15. ह.भ.सु. 1.51., भा. 11.5.39 (b), 11.5.40 (a)
16. ह.भ.सु. 1.52., भा. 11.5.40 (b), 11.5.40 (c)
17. ह.भ.सु. 1.57., भा. 11.9.28
18. ह.भ.सु. 1.61.,भा. 11.20.12
19. ह.भ.सु. 1.84.,भा. 11.23.47
20. ह.भ.सु. 2.3., भा. 5.1.15
21. ह.भ.सु. 2.7., भा. 7.6.6
22. ह.भ.सु. 2.8., भा. 7.6.7
23. ह.भ.सु. 2.16., भा. 10.10.9
24. ह.भ.सु. 2.42., भा. 4.29.34
25. ह.भ.सु. 2.55.,भा. 10.87.33
26. ह.भ.सु. 3.4., भा. 11.11.48
27. ह.भ.सु. 3.15.,भा. 11.11.31
28. ह.भ.सु. 3.17., भा. 11.2.47
29. ह.भ.सु. 3.18., भा. 11.2.46
30. ह.भ.सु. 3.19., भा. 11.2.45
31. ह.भ.सु. 2.28., भा. 2.7.42
32. ह.भ.सु. 3.45.,भा. 11.14.17
33. ह.भ.सु. 3.53.
34. ह.भ.सु. 4.3., भा. 1.2.11
35. ह.भ.सु. 4.4., भा. 8.12.9
36. ह.भ.सु. 4.10., भा. 1.2.11
37. ह.भ.सु. 4.50.,भा. 10.33.37
38. ह.भ.सु. 5.11., भा. 4.29.37
39. ह.भ.सु. 5.38., भा. 2.2.36
40. ह.भ.सु. 6.4., भा. 11.11.34
41. ह.भ.सु. 6.38., भा. 2.2.6
42. ह.भ.सु. 7.22., भा. 8.3.20
43. ह.भ.सु. 7.31.
44. ह.भ.सु. 7.32
45. ह.भ.सु. 8.4., भा. 7.1.29
46. ह.भ.सु. 8.31., भा. 4.8.52
47. ह.भ.सु. 9.2
48. ह.भ.सु. 9.5., भा. 4.30.32
49. ह.भ.सु. 9.14
50. ह.भ.सु. 10.2
51. ह.भ.सु. 10.5., भा. 3.9.13
52. ह.भ.सु. 10.12
53. ह.भ.सु. 10.36

54. ह.भ.सु. 11.12
55. ह.भ.सु. 11.5., भा. 11.5.33
56. ह.भ.सु. 11.16.,भा. 11.5.34
57. ह.भ.सु. 12.7., भा. 8.9.29
58. ह.भ.सु. 12.9.
59. ह.भ.सु. 13.6.
60. ह.भ.सु. 14.10
61. ह.भ.सु. 15.5
62. ह.भ.सु. 15.16., भा. 11.12.12
63. ह.भ.सु. 15.24
64. ह.भ.सु. 6.14., भा. 6.11.26
65. ह.भ.सु. 16.20
66. ह.भ.सु. 16.23
67. पा.सु. 4.3.95
68. Sraddha and Bhakti in Vedic Literature, (Q.R.), Vol.-VI. No.2, June, 1930, p-333
69. भा. 11.11.25
70. भा. 1.2.11
71. भा. 10.33.37
72. भा. 4.31.12
73. भा. 4.24.54
74. भ.र.सि. (पूर्वभाग) दि.ल. 11.12
75. भा. 2.4.7
76. भा. 11.2.46
77. भा. 11.2.45
78. भा. 11.2.50
79. भा. 11.2.45
80. वि.पु. 4.15. see also Ibid, 4.15.17
81. मार्कण्डेय पुराणम् 4.37.59
82. भ.र.सि. (पूर्वविभाग द्वि.क.) 1
83. भ.र.सि. (पूर्वविभाग द्वि.क.) 2
84. भ.र.सि. (पूर्वविभाग द्वि.क.) 4
85. भ.र.सि. (पूर्वविभाग द्वि.क.) 5
86. भ.र.सि. (पूर्वविभाग द्वि.क.) 1.2.212
87. भ.र.सि. (पूर्वविभाग द्वि.क.) 1.2.213
88. उज्ज्व. नी. 416
89. भ.र.सि. 1.2.26
90. भ.र.सि. 1.2.14-17
91. भ.र.सि. 1.2.6-5
92. भा. 2:4.1
93. भा .10.10.38
94. भा. 12.13.52
95. भा. 11.13.31
96. भा. 11.5.33
97. भा. 10.70.25
98. गीता. 8.14
99. भा. 11.5.36
100. भा. 12.3.51

पञ्चमपरिच्छेदः

हरिभक्तिसुधाकरे नवीनताविवेचनम्

यथा महाकविवाल्मीकिविरचितं रामायणम् अवलम्ब्य रामकथायाः पुषकलतया विस्तारो जातः श्रीमद्भागवतोपजीव्येषु भक्तिग्रन्थेषु हरिभक्तिसुधाकरः श्रीकृष्णभक्तिम् आधारीकृत्य विरचितः । कृष्णभक्तिवर्णनं वैष्णवकवीनां मुख्यम् आलोच्यवस्तु । यस्य आभासः तदीयभक्तिमूलकप्रसङ्गानां मार्मिकसङ्कलनेन सिद्ध्यति । प्रस्तुते सन्दर्भे हरिभक्तिसुधाकरस्य का नवीनता ? इति जिज्ञासायां तत्रादर्शभूतस्य भक्तिरत्नावलीग्रन्थस्य स्वरूपं समक्षमायाति । भक्तिरत्नावलीग्रन्थमनुसरन्नपि ग्रन्थकारः स्वकीयं विशेषं दर्शयति । तौलनिकरूपेण भक्तिरत्नावलीग्रन्थं पुरस्कृत्य हरिभक्तिसुधाकरग्रन्थस्य किं वा वैशिष्ट्यं तत् प्रदर्शयितुम्, इदमित्थं च नवीनस्वरूपं समाकलयितुं प्रयत्नोऽत्र विधीयते ।

वैष्णवकविविष्णुपुरीमहाराजस्य अम्लानप्रतिभायाः अनुपमपरिचयं वहन्ती चिरमनोहरा भगवतत्त्वजिज्ञासूनां भक्तिरत्नावली भारतीयभक्तिसाहित्ये समुज्ज्वलरत्नमिव परिशोभते । व्यासदेवकृतायां श्रीमद्भागवतगङ्गायां प्रत्यहम् अवगाह्य पवित्रतां शान्तिं च लभमानस्य पुरीमहाराजस्य ग्रन्थे वर्णितस्य भगवतः श्रीकृष्णस्य महिमानं भक्तिभेदं भक्तेः स्वरूपम्, भक्तेः वैशिष्ट्यं रचनापरिपाटीं च विलोक्य भक्तप्रवरो दीनबन्धुमिश्रः हरिभक्तिसुधाकरं विरचितवान् । अत्र ग्रन्थरचनाशैली रत्नावल्याः शैलीं स्मारयति । गौडीयोत्कलीयवैष्णवानां भावप्रवणाभिव्यक्तानां नवविधभक्तितत्त्वानां रहस्योद्घाटनं भाव-प्रेम-भक्ति-तत्त्वस्य महत्त्वप्रतिपादनं च उपजीव्यत्वेन ग्रन्थस्यास्य सृष्टेर्मूलमिति स्वीकृतमस्ति । पुरीमहाराजेन प्रभावितोऽनुसृतोऽपि स्वरचितपद्यैः ग्रन्थसुधाकरं समुज्ज्वलं कृतवान् येनास्य पण्डितकवेः प्रतिभायाः प्रकाशो जातः ।

दीनबन्धुमिश्रकृतहरिभक्तिसुधाकरे बहुषु स्थलेषु नूतनता परिलक्ष्यते । विषयगतद्वन्द्वस्य ग्रन्थेऽस्मिन् विशेषावकाशो नास्ति अत्र अनेकानि पद्यानि सन्ति यानि ग्रन्थस्य महत्त्वमपि वहन्ति । पुराणसाहित्ये महापुराणानां गणनायां श्रीमद्भागवतमपि परिगणितम् । वैष्णवानां पुराणमिदं नित्यं पाठ्यं ध्येयं गेयं परमादरणीयं चेति । निगमकल्पतरोर्गलितं फलं, ललित-कोमल-कमनीय-भाषा-भावसंयुतम् च ।

न केवलं श्रीमद्भागवतस्य प्रभावः हरिभक्तिसुधाकरे दृश्यतेऽपि तु बृहन्नारदीयपुराणस्य, गीतायाः, भक्तिसुधाकरस्य तथा कृष्णामृतग्रन्थस्य प्रभावोऽपि दरीदृश्यते । भक्तिरत्नावलीग्रन्थशैलीं हरिभक्तिसुधाकरग्रन्थनिर्माणेऽनुकरोति ग्रन्थकारः । तदेव अस्मिन् विषयविवेचने प्रतन्यते तौलनिकदृष्ट्या ।

विषयकोष्ठकम्

हरिभक्तिसुधाकरे प्रतिपाद्यं विषयवस्तु-	भक्तिरत्नावली प्रतिपाद्यं विषयवस्तु-
१. हरिभक्तिसुधाकरः षोडशीभिः कलाभिर्लिखितः ।	१. भक्तिरत्नावली त्रयोदशविरचनैः लिखिता ।
२. हरिभक्तिसुधाकरस्य प्रथमकलायां ग्रन्थस्य सुष्ठुसमाप्तये भागवतसंप्रदायस्य प्रवर्त्तकः ग्रन्थकारः श्रीमद्भागवतीयद्वादशस्कन्धीयपद्येन मङ्गलाचरणानन्तरं श्रीमद्भागवतं, भारतवर्षं, भारते प्रसिद्धवैष्णवक्षेत्रं वर्णयित्वा नदीनां प्रशंसां करोति । तत्र ज्ञानभक्तयोः वैशिष्ट्येन साकं शिष्टाचारस्य प्राधान्यं प्रमाणयति । अन्तिमे सालोक्य-सार्ष्टि-सारूप्य-समीप्यादि चतुर्विधमुक्ति मार्गदर्शनेन साकं स्वरचितपद्येन कलायाः समाप्तिमनयत् । -श्लोकसं. ८६	२. प्रथमविरचने भागवतस्य पद्येनैव मङ्गलाचरणानन्तरं विष्णुपुरीरचित-श्लोकद्वारा ग्रन्थप्रणयनस्योद्देश्यमभिधाय भगवति श्रीकृष्णेऽनन्यया भक्त्या मनसः प्रसाददत्तभजनमेव कल्याणकरमिति निर्णीय तत्र प्रवृत्तये भक्तानां प्रबोधनाय तावद् भक्ति-सामान्य-निरूपणाय तदुपयोगिनां विभिन्नानां श्रीमद्भागवत-श्लोकानामस्ति संग्रहः । -श्लोकसं. ११६
३. हरिभक्तिसुधाकरग्रन्थस्य द्वितीयकलायां वैराग्यविषये अवतारणा क्रियते । भोगलालसा क्षणस्थायिनी । वैराग्यभावसमुद्भवे भक्तिर्जायते । भगवद्भक्तेः सविधे यज्ञादिकर्मनिरर्थकमिति विषये चर्चाऽभूत् । श्लोकसं. ७०	३. ग्रन्थस्य द्वितीयविरचने भक्तवाञ्छाकल्पतरोः लीलापुरुषोत्तमस्य भगवतः श्रीकृष्णस्योपलब्धौ सत्सङ्ग एवास्ति मुख्यं कारणमिति सत्सङ्गस्य माहात्म्यप्रदर्शनाय तद्विषयकपद्यानामस्ति सङ्कलनम् । श्लोकसं. ६४

४. अस्य ग्रन्थस्य तृतीयकलायां सत्सङ्गविषये आलोचना विहिता। भक्तियोगेन साधुजनलाभो भवति। अत्र प्रेम-मैत्री-कृपा-उपेक्षादिः चतुर्विधा ईश्वरसेवा उपदिष्टा । द्विविधं गुरोर्नाम सूचितम्। वेदाध्यापकस्य गुरोरपेक्षया ज्ञानप्रदो गुरुः श्रेष्ठः। यतः स सकलानि अज्ञानानि विनाशयति। गुरुः साक्षात् भगवान् श्रीकृष्णः । स सर्वदेवमय इति प्रतिपादकानां पद्यानां वर्णना विद्यते। -श्लोकसं. ५३

५. अस्य ग्रन्थस्य चतुर्थकलायां भक्तिसाध्यस्य भगवतः श्रीकृष्णस्य उत्कर्षः प्रतिपाद्यते। अत्र भगवान् श्रीकृष्णः भागवतोत्तमः। अवतारेषु पुरुषावतारः श्रेष्ठः, कृष्णस्तु भगवान् स्वयम् । भगवान् स्वयं जगत्सृष्टेर्मूलकारणमपि च सृष्टि-स्थिति-प्रलयानां कारणम् इति प्रतिपादनार्थं भागवतीयपद्यानां सङ्कलनं क्रियते । -श्लोकसं. ५४

६. पञ्चमकलायां श्रीकृष्णभक्तेः माहात्म्यप्रदर्शनार्थं तत्परकपद्यानां संग्रहः विद्यते । श्लोकसं. ५०

७. ग्रन्थस्य षष्ठकलायां भक्तिभेद-विवेचनं कृतम् । श्लोकसं. ३४

४. ग्रन्थस्य तृतीयविरचने परमकृपालो गोपीजनबल्लभस्य श्रीकृष्णस्य प्राप्तौ नवधाभक्तेः प्रपञ्चो विद्यते । तस्य प्राधान्यं बोधयितुं नवधाभक्ति-प्रतिपादकानां पद्यानां संग्रहः वर्त्तते। श्लोकसं. ३२

५. भक्तिरत्नावल्याः चतुर्थविरचने सर्वानर्थविनाशाय भगवद्गुणगान-लीलाश्रवणमेव प्रमुखमस्ति हेतु-रित्यभिप्रेत्य वैधीभक्तेरङ्गेषु श्रवण-कीर्त्तन-स्मरणादिषु पूर्वं तावत् **श्रवण** भक्तिपरकपद्यानां वर्त्तते सङ्कलनम् । श्लोकसं. ४५

६. अस्य पञ्चमविरचने भगवद्गुण-कीर्त्तनस्य श्रेष्ठत्वाङ्गीकारात् तत्र भक्तानां प्रवृत्तये भगवद्गुण**कीर्त्तन**-परकाणां भागवतीयपद्यानामस्ति संग्रहः । श्लोकसं. ५७

७. ग्रन्थस्य षष्ठविरचने भगवतः नाम-स्मरणकर्त्तारः एव पुमांसो भवन्ति

	कृतार्था इति वचनं प्रमाणयितुं **स्मरणभक्ति** प्रतिपादकानां पद्याना-मालोचना विद्यते । श्लोकसं.२६
८. ग्रन्थस्य सप्तमकलायां नवविध-भक्तिभेदेषु **श्रवण-कीर्त्तन**-भक्ति-परकाणां भागवतीय-श्लोकानां संग्रहः विद्यते । -श्लोकसं. ३२	८. सप्तमविरचने श्रीमतो भगवतश्चरण-सरोजसौगन्धलुब्धानाम् आत्म-सन्तोषाय सकलानन्दफलदायकस्य भगवतः **पादसेवन**-भक्तिपरकाणां पद्यानां प्रतिपादनमस्ति । श्लोकसं. ३२
९. अष्टमकलायां भगवतः श्रीकृष्णस्य **स्मरणभक्ति** प्रतिपादकानां पद्यानां सङ्कलनं क्रियते । श्लोकसं. ३१	९. भक्तिरत्नावल्याम् अष्टमविरचनेनैव स्कन्ध-नाल-भुज-शाखोपशाखा-फल-पुष्प-पत्रादि सेचनवत् श्रीमतः भगवतोऽर्चनेन समेषां देवानामर्चन-सम्भवाद् **अर्चनभक्ति**परकाणां पद्यानां विद्यते सङ्कलनम् । श्लोकसं. ९
१०. हरिभक्तिसुधाकरस्य नवमकलायां भक्तेः **पादसेवन**प्रकारभेदविषये विश्लेषणं क्रियते। तत्र छत्रचामरा-द्युपासना भगवत्पदसेवनभक्ति-रुच्यते । श्रीहरेः पादसेवनया धर्मार्थ-काम-मोक्षादिफलं प्राप्यते इति भागवतीयपद्यानां संग्रहानन्तरं स्वरचितपद्यैः भगवतः पादसेवायाः प्रशंसा विद्यते । श्लोकसं. १४	१०. नवमविरचने भगवतश्चरणारविन्द वन्दनं सर्वविधकल्याणकरमिति प्रदर्शनाय विविधानां **वन्दन**भक्ति-परकपद्यानां संग्रहः विद्यते । श्लोकसं. ४
११. दशमकलायां पुरुषार्थसाधनार्थं भगवतोऽर्चनेन पुरुषार्थसिद्धिः जायते । अत्र एकादशविधिः भगवत्पूजाप्रविधिः तथा अष्टविधा प्रतिमा ग्रहणीया । भगवदर्चनार्थं	११. भक्तिविषये भगवद्दास्यं श्रेष्ठं गण्यते इति दशमविरचने **दास्यभक्ति**-प्रदर्शकानां विभिन्नानां पद्यानां विवेचनम् । -श्लोकसं. ४

स्वशक्त्या सहस्र-शत-षोडश-दशोपचारेण पूजा निर्दिष्टेति प्रतिपादकश्रीमद्भागवतीय पद्यानां संग्रहः वर्त्तते । श्लोकसं. ३६

१२. अस्य एकादशकलायां भगवतो **वन्दनभक्ति**तत्त्वनाम् आलोचना क्रियते ।

-श्लोकसं. ११

१३. हरिभक्तिसुधाकरग्रन्थस्य द्वादशकलायां भगवद् **दास्यभक्ति**विषये प्रतिपादितम् । भगवद् दास्यस्य सकलदुःखनिवृत्तिर्जायते । भगवत्पादसेवा-केशप्रसाधनालंकरणाद्युपचारैः भगवति आत्मसमर्पणं दास्यपदवाच्यं भवतीति प्रतिपादनेन सह भागवतीयपद्यानां विद्यते सङ्कलनम् । श्लोकसं. १०

१४. ग्रन्थस्यास्य त्रयोदशकलायां विश्वास-मित्रताभावेन सर्वदुःखविनाशकतया व्रजगोपाल श्रीकृष्णः द्विविधः सखा विद्यते इति वर्णनया सह श्लोकानामस्ति संग्रहरूपं विश्लेषणम् ।

-श्लोकसं. ६

१२. ग्रन्थस्य एकादशविरचने श्रीमतो भगवतः सखायः सन्ति महाभाग्यशालिनः इति न तेषां महिमानं वक्तुं कश्चन मानवः पारयति इति प्रदर्शनाय **सख्यभक्ति**प्रतिपादकानां पद्यानां पर्यालोचनम् ।

-श्लोकसं. २

१३. भक्तिरत्नावलीद्वादशविरचने प्रेमपयोनिधौ भगवति श्रीकृष्णे सर्वस्वे समर्पिते भक्तिशिरोमणेर्नवमणेः कृपया सकलोऽपि मनोरथो नूनं सफलीभवतीति सिद्धान्तनिरूपणायात्मनिवेदनेन सह भक्तिविषयकाणां भागवतीयपद्यानां विश्लेषणं संग्रहश्च वर्त्तते ।

-श्लोकसं. २

१४. अन्तिमे त्रयोदशे विरचने भगवद्ज्ञानरहितानां सकलसाधनविरहितानां भक्तानां भगवतश्चरण सरोरुहशरणमेवास्ति सर्वथा कल्याणप्रदमिति सिद्धान्तं निरूपयितुं **शरणागतिभक्तिपरकाणां** भागवतीयपद्यानां संग्रहः ततः श्रीमद्विष्णुपुरी महाराजस्यात्मनिवेदन ग्रन्थसंकलन स्थान-समय-निर्देशानन्तरं भक्तिरत्नावली ग्रन्थस्य समाप्तिर्जायते । श्लोकसं. १६

१५. ग्रन्थस्य चतुर्दशकलायां संसारार्णवतारकपरमकृपालोर्भगवतः श्रीमुकुन्दस्य चरणयुगले आत्मसमर्पणेन जीवनं सार्थकं भवतीति भागवतीयपद्येन साकं स्वरचितपद्येन आत्मनिवेदनभक्तेः विवेचनं विधीयते । श्लोकसं. २०

१६. पञ्चदशकलायां भगवतः श्रीकृष्णस्य **भाव-प्रेम-भक्ति तत्त्वस्य** आलोचना क्रियते । रूपगोस्वामिना स्वकीये भक्तिरसामृतसिन्धौ भक्तेः (१) साधनभक्तिः, (२) भावभक्तिः, (३) प्रेमभक्तिश्चेति त्रयो भेदाः कृताः । तत्तु अस्मिन् प्रसङ्गे विवृतम् । भागवतीयपद्यानां संग्रहेण साकं स्वरचितपद्यैश्च कला समाप्तिमगात् । श्लोकसं. २४

१७. ग्रन्थस्यास्य अन्तिमे भागे षोडशकलायां भगवतः श्रीचरणे निजार्त्तिज्ञापनेन सह भक्तिवैशिष्ट्यं दर्शयन् भागवतीयपद्यानि संगृह्य श्रीअच्युतचरणसरोरुहे ग्रन्थः समर्पितः । ग्रन्थस्य श्रेष्ठत्वं प्रदर्श्य स्वरचितहरिभक्तिसुधाकरस्य दीर्घकालव्यापिताकामनया ग्रन्थसङ्कलनस्य स्थान-समयादिनिर्देशानन्तरं ग्रन्थसमाप्तिः क्रियते । श्लोकसं. २९

विषयतुलनात्मककोष्ठकम्

क्र.सं.	हरिभक्तिसुधाकरः	क्र.सं.	भक्तिरत्नावलीअनुरूप	वि.सं.
१.	श्रीमद्भागवतीयश्लोकेन मङ्गलाचरणानन्तरं ग्रन्थप्रणयनस्य प्रयोजनमभिधाय भक्तिसामान्यलक्षणं पुराणादिप्रशंसा ।	१.	भागवतीयपद्येन मङ्गलाचरणानन्तरं ग्रन्थप्रणयनस्य प्रयोजनमभिधाय भक्तिसामान्यलक्षणनिरूपणम् ।	१.५
२.	वैराग्यादिप्रशंसावर्णनम् ।	२.		+
३.	सत्सङ्गमाहात्म्यनिरूपणम् ।	३.	सत्सङ्गवर्णनम्	२
४.	भक्तिसाध्यश्रीकृष्णस्य उत्कर्षप्रतिपादनम् ।	४.		५
५.	भक्तिप्रशंसनीयमाहात्म्यवर्णनम् ।	५.		४
६.	भक्तिर्भेदवर्णनम् ।	६.	भक्तिभेदवर्णनम्	३
७.	श्रवणकीर्त्तनभक्तिवर्णनम् ।	७.	श्रवणभक्तिकीर्त्तनभक्तिवर्णनम्	४.५
८.	स्मरणभक्तिः ।	८.	स्मरणभक्तिः	६
९.	पादसेवनभक्तिः ।	९.	पादसेवनभक्तिः	७
१०.	अर्चनभक्तिः ।	१०.	अर्चनभक्तिः	८
११.	वन्दनभक्तिः ।	११.	वन्दनभक्तिः	९
१२.	दास्यभक्तिः ।	१२.	दास्यभक्तिः	१०
१३.	सख्यभक्तिः ।	१३.	सख्यभक्तिः	११
१४.	आत्मनिवेदनभक्तिः ।	१४.	आत्मनिवेदनभक्तिः	१२
१५.	भावप्रेमभक्तिप्रशंसनम् ।	१५.		+
१६.	निजार्त्तिज्ञापनम्, शरणागतिस्तोत्रग्रन्थनिर्माणकालादिवर्णनम् ।	१६.	शरणागतिभक्तिपोषकाणां पद्यानां वर्णनं ग्रन्थनिर्माणस्थान-कालादिवर्णनम्।	१३

श्रीमद्भागवतं भवति भक्तिशास्त्रस्य सर्वस्वम् । दर्शनग्रन्थानां प्रस्थानत्रयी इव भक्तिग्रन्थानां भागवतं मूलोपजीव्यो ग्रन्थः । भागवतस्य प्रभावः वैष्णवधर्मस्य वल्लभसम्प्रदायचैतन्यसम्प्रदायोपरि निपतति । भागवतस्य गूढार्थप्रकाशनार्थं प्रत्येकं वैष्णवसम्प्रदायः स्वमतानुकूलव्याख्यां करोति । भक्तिसाहित्यस्य प्रविधिकौशलपरिज्ञानाय भागवतोद्धृतपद्यानां व्यवहारे भक्तिरत्नावली, हरिभक्तिसुधाकर इति

ग्रन्थद्वयम् अतीव गूढतत्त्वम् आवहति । अत्र भक्तिरत्नावली, हरिभक्तिसुधाकर इति ग्रन्थद्वयस्य विषयवस्तुषु अनेकानि विषयवस्तूनि समतां भजन्ते । परन्तु तत्र संगृहीत भागवतीय पद्यानां व्यतिक्रमः परिलक्ष्यते । प्रमुखविषयवस्तुवर्णनायाः सदृशतया भक्तिपरकग्रन्थत्वेन द्वयोः लेखनशैली प्रतिपादनशैली च सर्वथा साम्यं वहतः।

साम्यस्थलानि (Similarities)—

अनन्यभक्तिसुधानिर्झरस्य हरिभक्तिसुधाकरस्य निर्विघ्नं परिपूर्त्तये ग्रन्थकारः याथाविधि श्रीमद्भागवतीय पद्येन मङ्गलाचरणपरम्परामनुसृत्य वस्तुनिर्देशात्मकं मङ्गलाचरणं विदधाति । भक्तिरत्नावली ग्रन्थेऽपि ग्रन्थकारः यथाविधि भागवतीय पद्येनैव वस्तुनिर्देशात्मकं मङ्गलाचरणं कृतवान् । तदनन्तरं ग्रन्थरचनायाः प्रयोजनमपि प्रकाशयति । ग्रन्थद्वयस्य विषयवस्तु विभाजननामानि यद्यपि भिन्नानि तथापि वर्णितविषयवस्तूनां बहुषु स्थलेषु साम्यं दृश्यते । उभौ ग्रन्थौ भगवद्धर्मोपदेशकत्वात् भक्तानां जगद्गुरुत्वेन सेव्यौ । पुराणसाहित्ये महापुराणानां गणनया श्रीमद्भागवतमपि पुराणत्वेन उभौ परिगणयतः । संसारः भय-जरा-रोगादि-निमित्तं तत् प्रवृत्तानां निवृत्तानां च कृते कल्याणाय मङ्गलमयो भगवान् श्रीकृष्णः ग्रन्थादौ प्रार्थ्यते । श्रीमद्भागवतप्रणेतुः महामुनि-व्यासदेवस्य सूनुं श्रीशुकदेवमपि स्तौति । इह हि ग्रन्थद्वये परमपुरुषार्थाय प्रयतमानानां जनानां भगवद्भक्तिरेव चरमोपायः परमगतिः च इति सिद्धान्तः । ग्रन्थौ भागवतस्य प्रशंसां कुरुतः । देवतान्तरोपासना भगवद्भक्तैः न निन्दिता । ग्रन्थद्वयस्य पठनेन भगवद्भक्तिः स्वतः जायते, ज्ञानेन वैराग्येण च भक्तिः समुत्पद्यते । विषयवासनाजर्जरितानां भक्त्या श्रीहरिनामोच्चारणेन महापातकमपि विनश्यति । ग्रन्थकारौ गृहस्थाश्रमस्य प्राधान्यं प्रतिपादयतः । यतो गृहिजनाः सकलैश्वर्यभोग्येषु निविष्टा अपि भगवन्त-माराधयितुं योग्या भवन्ति । मनुष्य एव भगवद्भक्तेर्मुख्याधिकारी । यतः नृजन्म देवादिदुर्लभम् । ग्रन्थकारौ मुक्तिमार्गं च दर्शयतः धर्मार्थकामादिपुरुषार्था मुक्तिपरकाः तिष्ठन्ति । परन्तु मुक्तितो भक्तिः श्रेयसी । श्रीहरिसेवापरायणो भक्तः सालोक्य-सार्ष्टि-सामीप्य-सारूप्यमुक्तिं कामयते । ग्रन्थयोर्द्वयोर्मध्ये प्रमुखाः विषयाः सामान्यतः सदृशतया लिखिताः सन्ति ।

हरिभक्तिसुधाकरग्रन्थस्य तृतीयकलायां वर्णितसत्सङ्गस्य महिमवर्णनेन साकं भक्तिरत्नावलीद्वितीयविरचने वर्णितसत्सङ्गमाहात्म्यं विषयवस्तु दृष्ट्या साम्यं भजते । यद्यपि भागवतीयपद्यानां व्यतिक्रमोऽस्ति तथापि प्रमुखानां केषांचित् पद्यानां भावाः सदृशतया वर्णिताः सन्ति ।

भगवद्भक्तौ नारायणकरुणाकल्पवल्लीफलं सत्सङ्गेनैव प्राप्यते । सत्परिचर्यया अचिरेणैव निश्चलभक्तिः जायते । सत्सङ्गजनितभक्तियोगं विना भवतरणे नान्योपायोऽस्ति । सत्सङ्गस्तु महता पुण्येन लभ्यते । साधूनां संदर्शनेन महापातकिनोऽपि शुद्धिर्जायते ।

हरिभक्तिसुधाकरग्रन्थे वर्णित भक्तिलक्षणेन साकं भक्तिभेदः प्रदर्श्यते । भक्तिरत्नावलीग्रन्थेऽपि भक्तिलक्षणेन साकं नवविधभक्तिभेदः क्रियते । भगवतः कथादिनिरन्तरश्रवण-कीर्त्तन-पादसेवनादि-नवविध-भक्तिभावेन सकलपापनाशो जायते । भक्तिमतां महाकालभयं नास्ति । उभयोर्ग्रन्थयोर्नामविषयनिर्वाचनक्रम भिन्नत्वेऽपि श्रवण-कीर्त्तनादि-भक्तिप्रतिपाद्य-विषयवस्तूनां भावस्य सादृश्यं परिलक्ष्यते । श्रीहरिचरितामृतश्रवणेन मनोग्लानिरपगच्छति । अच्युतपीयूषस्य अतिमधुरतापहारकत्वात्, तच्छ्रवणेन महतां तृप्तिर्जायते । हरिनामकीर्त्तनस्थानं पवित्रतीर्थस्थानम् । अत्यन्तरमणीयत्वेऽपि हरिकथारहितवाणी काकतीर्थ इव वर्जनीया । न केवलं हरिनामकीर्त्तनेन पापानां नाशो जायते अपि तु सुगममुक्तिसाधनं भवितुमर्हति ।

धर्माचरणेन साकं नारायण-नाम-स्मरणेन अमङ्गलनाशो जायते । भगवन् नामस्मरणेन ज्ञानवैराग्ये प्रतिपाद्येते चतुर्वर्गप्राप्त्यर्थं श्रीहरिपादसेवनमेव मुख्योपायः। भगवत्पादसेवनया रागद्वेषादयः नश्यन्ति । वस्तुतः भगवद्भक्ताः न किमपि वाञ्छन्ति। ज्ञानवैराग्यभावेन भगवतः पादसेवा पदम् अचिरेण प्राप्यते । उभौ ग्रन्थौ भगवतः अर्चनभक्तितत्त्वस्य माहात्म्यं वर्णयतः । अर्चनं नाम भगवतः पूजा । दान-यज्ञ-जप-तपसां भगवदर्चनं श्रेयस्करम् । भगवत्पूजा सर्वेषां श्रेयसां साधनमेव । न्यायोपार्जितवित्तैः भगवत्पूजा ब्राह्मण-क्षत्रिय-वैश्य-गृहस्थानां च धर्मः । वैदिक-तान्त्रिक-विधिद्वारा पूजनया भगवत्प्राप्तिः सुलभा भवति ।

उभयोग्रन्थयोर्भगवतो वन्दनभक्तेः आलोचना क्रियते । भगवत्पादवन्दनया सर्वतो मङ्गलमयम् । स्वयं भगवान् भक्तानामभक्तानां कृते निरपेक्षम् आप्तकामत्वात् सापेक्षाणां मनोरथं पूरयति । भगवति, सर्वकर्मार्पणरूपम् अन्ततः आत्मकर्त्तृत्व-परिहारपूर्वकं सर्वथा कायमनोवाक्येन आत्मसमर्पणेन भक्ताः कृतार्थाः । भगवद् दास्यकृते प्रिया-प्रिय-संयोग-वियोग-सुखदुःखानुभवः च न विद्यते । भगवत्-सख्यस्य कोऽपि शत्रुर्नास्ति । तत्कृपया सर्वोऽपि पुरुषार्थः सम्भवति ।

अन्तिमे ग्रन्थकारौ भगवतः श्रीचरणकमले निजार्त्तिज्ञापनेन साकं स्वकृत-ग्रन्थसमाप्तिं कुरुतः । भक्तिहीनो जनः संसारे दुःखं प्राप्नोति । दैवमायया विमोहितो

भूत्वा क्षुधा-तृष्णा-वात-पित्त-कफादि-त्रिधातु-प्रभावेन नानाविधम् अकार्य्यं करोति । हरिभक्तः धन-दारा-पत्य-स्वजनादिमुक्तो भवति । गोः प्रिय वत्सप्राप्तौ इव हरिभक्तानां श्रीहरिलाभे आनन्दो भवति । कलिकाले संसारेष्वपि भगवन्तं द्रष्टुं भक्तः पारयति । भगवच्छरणागतस्य तथा भगवतः श्रीचरणे निजार्त्तिज्ञापनेन विश्वसंहर्त्ता कालोऽपि न किमपि कर्त्तुं पारयति । ज्ञानिनामज्ञानानां धनिनां निर्धनानां भक्तकोटौ को भेदो नास्ति । साधारणा जना अपि असाधरणा भक्ता भवितुमर्हन्ति। भगवत्प्रपन्नानां शरणागतानां भयं नास्ति । भगवद्भक्तस्य सर्वश्रेष्ठत्वं प्रतिपादयितुं ग्रन्थद्वयं यतते ।

परिवर्त्तनस्थलानि (Alterations)—

हरिभक्तिसुधाकरः, भक्तिरत्नावलीग्रन्थद्वयस्य मध्ये साम्येऽपि बहुषु स्थलेषु परिवर्त्तनं दृश्यते। हरिभक्तिसुधाकरस्य विषयवस्तुनः षोडशीभिः कलाभिः समावेशः कृतः । भक्तिरत्नावल्या कथावस्तु त्रयोदशसु विरचनेषु लिखितमस्ति । हरिभक्तिसुधाकरग्रन्थस्य निर्विघ्नं परिपूर्त्तये ग्रन्थकारः भगवतः श्रीकृष्णस्य ध्यानरूपवस्तुनिर्देशात्मकं मङ्गलाचरणं विधत्ते । भक्तिरत्नावलीग्रन्थस्य निर्विघ्नं परिसमाप्तये भागवतस्य दशमस्कन्धीयेन पद्येन भगवतः श्रीकृष्णस्य कीर्त्तनरूपवस्तुनिर्देशात्मकं मङ्गलाचरणं क्रियते । तदन्तरं ग्रन्थकारप्रणीतैश्चतुर्भिः श्लाकै र्ग्रन्थप्रणयनस्य प्रयोजनमभिधाय भक्ति-सामान्य-लक्षणं मुख्यतया प्रतिपादितम् । हरिभक्तिसुधाकरग्रन्थे भागवतीयपद्येन ग्रन्थप्रणयनस्य प्रयोजनमभिधाय गुरुवन्दनया साकं गुरोः षड् नामानि प्रकाशितानि । ग्रन्थकारः शिष्टाचारपरम्परामनुसरति । भक्तिरत्नावलीग्रन्थे ग्रन्थकारः सदाचारपरम्परानुगामी भवति । भगवद्भक्तिसुधा सुनिर्मला। 'कृष्णस्तु भगवान् स्वयम्' इति ग्रन्थे प्रतिपादितम्। अत्र हरिभक्तिसुधाकरग्रन्थे भागवतादिभक्तिशास्त्र-भारतवर्ष-तत्रत्यदेश-काल-नदीनां वर्णना क्रियते । ग्रन्थे भागवत-ग्रन्थस्य रचयितुः वेदव्यासस्य प्रशंसया साकं परीक्षितः भागवतश्रवणलालसां प्रतिपादयति । एतद्ग्रन्थः भागवतमूलकत्वात् श्रुतिसुखावहो भवति । भागवतस्य ज्ञानकर्मोपासनादिकाण्डानि सर्वशास्त्रेभ्यः प्रशस्यतराणि । भागवतीयपद्यसंग्रहेण भागवतस्य माहात्म्यं दर्शयति ।[1]

सर्ववेदान्तसारं हि श्रीमद्भागवतमिष्यते ।
तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् ॥

निम्नगानां यथा गङ्गा देवानामच्युतो यथा ।
वैष्णवानां यथा शम्भुः पुराणमिदं च तथा ॥

एतद्ग्रन्थे देवादिदुर्लभस्य मनुष्यजन्मनो नैरन्तर्येण भक्तिसाधनत्वं वर्णितम् । भक्तिमूलभागवतप्राधान्यप्रतिपादनान्तरं भक्तिसमनुकूलस्य भारतवर्षस्य प्राधान्यं वर्ण्यते । अत्रैव ऋषभाद्यवतारेषु पुरुषावतारः श्रेष्ठः अवतारः कथ्यते । एतेन अवताराणां महत्त्वमपि संसूचितम् । मर्त्येनापि देहेन हरेः पदाश्रयेण पुनर्जन्म न जायते । यतः स्वर्गिजनोऽपि अत्र जन्म प्रार्थयते । यत्र वैकुण्ठकथामृतनद्यो न सन्ति महोत्सवाः सुरलोकेऽपि न सेव्यन्ताम् । अतः स्वर्गादिलोकेभ्योऽपि भारतभूमिः श्रेयसी ।

यत्र यत्र हरेरर्चा स देशः श्रेयसां पदम् ।
यत्र गङ्गादयो नद्यः पुराणेषु च विश्रुताः ॥[2]

यत्र पुराणप्रसिद्धगङ्गादिनद्यः प्रवाहिताः स देशः धन्यः । कुरुक्षेत्र-गयाशिरः-प्रयाग-पुलहाश्रम-पुष्कर-नैमिष-फाल्गुबन्ध-प्रभास-कुशस्थली-पम्पा-वाराणसी-मधुपुरी इत्यादीनि क्षेत्राणि विद्यन्ते । अत्र नारायणाश्रय-विन्दुसर-सीतारामाश्रय-स्थलमहेन्द्राचलादय एते देशाः पुण्यतमाः । यतः अत्र नित्यं श्रीहरेश्चर्चा भवति । वैष्णवनिवासिनो देशो निन्दितोऽपि पवित्रतमः ।

ग्रन्थे पुण्यदेशानां माहात्म्यकथनानन्तरं पुण्यनदीनां माहात्म्यं कथ्यते ताम्रपर्णी-कृतमाला-कावेरी-महानदीत्यादि नद्यः अतीव पावनतमा मुक्तिदायिन्यश्च भवन्ति । सत्य-द्वापर-त्रेतया-कलियुगेषु कलिरेव श्रेष्ठः इति । हरिभक्तिसुधाकरग्रन्थे प्रतिपादयति ग्रन्थकारः । किञ्च[3] —

कलौ खलु भविष्यन्ति नारायणपरायणाः ।
क्वचित् क्वचिन्महाराज द्राविडेषु च भूरिशः ॥

निष्कामभावेन वैराग्यं न जायते परन्तु भक्तिभावनया सकलज्ञानादिकं सम्भवति । अतः तीव्रेण भक्तियोगेन सर्वानर्थनिवृत्तिः सम्भवति ।

उभौ ग्रन्थौ सत्सङ्गमाहात्म्यं वर्णयतः । सहनशीलाः, कारुण्यवन्तः सकलप्राणिनां बान्धवाः अशत्रवः धीराः सुशीलादिस्वभावयुक्ताः सज्जनाः निष्कामचित्ततया मनसा वाचा अन्तःकरणेन भगवद्भक्तिं कुर्वन्ति भगवत् कथाः शृण्वन्ति कथयन्ति च । एतान् साधून् आध्यात्मिकादि सन्तापाः न क्लेशयन्ति । सत्सङ्गसुखेन संसारसमुद्रं तरितुं ते शक्नुवन्ति । देवतान्तरोपासनापि भगवद्भक्तैर्नापेक्ष्यते । भक्तिरत्नावलीग्रन्थे, सत्त्वरजस्तमोगुणस्वभावयुक्ताः दैत्यः

राक्षसः, पशुः, पक्षी, गन्धर्वः, अप्सरसः, नागः, सिद्धाः, चारणाः, गुह्यकाः, विद्याधराः, वैश्याः, शूद्राः, स्त्रियः च सर्वे वासुदेवमुपगताः । विधिपूर्वक-वेदविद्याध्ययनरहिताः वृत्रासुर-प्रह्लाद-वृषभानु-बलि-बाणासुर-मयदानव-बिभीषण-सुग्रीव-हनुमद्-जाम्बवद्-गजेन्द्र-जटायु-तुलाधारवैश्य-धर्मव्याध-कुब्जा-ब्रजवनिता-यज्ञपत्न्यादयः एते सत्सङ्गेनैव परमपदं प्राप्नुवन्ति स्म । परन्तु हरिभक्तिसुधाकरे एतद्विषये न वर्ण्यते । अत्र साधूनां कनिष्ठमध्यमोत्तमभेदः क्रियते । यः श्रद्धया तद्भक्तेषु पूजामीहते स कनिष्ठभक्तः, यः प्रेम, मैत्रीं कृपाञ्चोपेक्ष्य ईश्वरादिषु सेवां करोति स मध्यमभक्तः । यः च आत्मनः सर्वभूतेषु ब्रह्मभावेन समन्वयं पश्येत् स उत्तमभागवतः । कर्मरहस्यमत्र प्रतिपाद्यते। भगवतः भक्तिः प्रेमलक्षणया भक्त्या संजायते । द्वादशस्वपि मासेषु भगवान् कालरूपं धृत्वा जनानां लोकयात्रां पृथग्भावेन परिचालयति अतिदुस्तरसंसारसागरे।

भक्तिभेदभक्तिलक्षणवर्णनाप्रसङ्गे ग्रन्थद्वये किञ्चित् परिवर्त्तनं दृश्यते । भगवतः प्रतिमापूजा-भक्तजन-दर्शन-स्पर्शन-लीलारटन-परिचर्या-स्तुति-गुण-नाम-कीर्त्तनादयो भगवद्भक्त्यन्तर्भूता भवन्ति । यात्रापर्वमहोत्सवपालनेन वैदिकतान्त्रिकरीत्या व्रतधारणेन मण्डलादिपूजनया भगवद्भक्तिः स्वतः समुत्पद्यते। स्थले स्थले ग्रन्थयोः मध्ये विषयवस्तुनः किञ्चित् परिवर्त्तनं नास्ति । केवलमेव संगृहीतभागवतपद्यानां परिवर्त्तनं क्रियते ।

स्मरणभक्तिमाहात्म्यवर्णनेन ग्रन्थयो र्द्वयोः साम्येऽपि किञ्चित् परिवर्त्तनं दृश्यते । भक्तिरत्नावलीग्रन्थे वैरभावेन शिशुपालपौण्ड्रादिभूपालाः सारूप्यमुक्तिं प्राप्तवन्तः । किन्तु हरिभक्तिसुधाकरग्रन्थे वैरभावेन हिरण्यकशिपोर्नामोल्लेखोऽस्ति। अत्र भगवद्ध्यानं मन्दहासः, स्फुटहासः इति भावेन द्विविधं प्रतिपाद्यते । भक्तिरत्नावलीग्रन्थे तु भगवतः दशसहस्राणि नामानि तथा अंशाः च सन्ति । सत्य-धर्म-यश-स्तपो-मात्सर्य्य-ह्री-तितिक्षा-असूया-यज्ञ-दान-धृति-श्रुत्यादि द्वादशगुणयुक्तो ब्राह्मणः भगवद्ज्ञानहीनः चेत् चण्डालवत् भवति । भक्तिरत्नावलीग्रन्थापेक्षया हरिभक्तिसुधाकरग्रन्थे प्रदर्शितम् अर्च्चनभक्तिमाहात्म्यम् उत्कृष्टतरम् । हरिभक्तिसुधाकरग्रन्थदिशा भूतशुद्धिमातृकाक्षरन्यासेन भगवत्पूजा प्रतिष्ठिता । भक्तिरत्नावलीग्रन्थे प्रतिपादितविषयवस्तुनः परिवर्त्तनं कृत्वा नूतनविषयः संयोज्यते ग्रन्थकारेण ।

प्रस्तुतसन्दर्भे ग्रन्थे दीनबन्धुः श्रीरामस्तुतिं करोति । रामचन्द्रः

पितृसत्यपालनाय तस्याज्ञया राज्यं त्यक्त्वा वनं गतवान् । सीतायाः अभिलषितं मायामृगमनुधावतः श्रीरामस्य चरणारविन्दं सर्वेषां वन्दनीयम् ।

ग्रन्थयोर्विषयवस्तुसाम्येऽपि स्थले स्थले विषयपरिवर्त्तनं क्रियते । चतुर्षु वर्णेषु ब्राह्मणः श्रेष्ठः । तेषु वेदज्ञः ब्राह्मणः श्रेष्ठः । वेदज्ञब्राह्मणात् संशयच्छेदको मीमांसको धन्यः । श्रवणादि नवविधा भक्तिः प्रेमभक्तेः साधनभूता । भक्तिः साध्य-साधनभावेन द्विधा । साधनभक्तिः भाव-प्रेमभावेन द्विविधा कथ्यते । श्रद्धया अपरं नाम रतिः । रतिभावः समुत्पद्यते ततः प्रेमभावो जायते । प्रेमभावभक्तिः प्रेमभक्त्यन्तरर्भूता भवति । एतत्तु भक्तिरत्नावलीग्रन्थे न वर्ण्यते । ग्रन्थोपसंहारे ग्रन्थकारः भगवतः श्रीकृष्णस्य श्रीचरणे स्वकर्मफलं समर्पयति । ग्रन्थ-माहात्म्य-प्रतिपादनावसरे स्वदोषमङ्गीकरोति ।

हरिभक्तिसुधाकरग्रन्थे ग्रन्थकारः श्रीहरिभक्तानां कृते भागवततत्सम्बन्धीय-पद्यानां सारवचनं संक्षेपेण संगृह्य सकलक्लेशहारिणं मुरारिं विना जीवनं निरर्थकम् इति कथयति । सर्वाणि भक्तिशास्त्राणि आलोचनया रम्याणि हरिभक्तिसुधाकरः सत्कौमुदीटीका समेतः सम्प्रकटितः । भगवतः विश्वनाथस्य कृपया काश्यां १५५५ मिते शके फाल्गुनशुक्लद्वितीयातिथौ भौमवासरे सटीकोऽयं भक्तिरत्नाकरग्रन्थः समाप्तिमगात् ।

तथैव कृष्णभक्तिरसरसिकदीनबन्धुना एष ग्रन्थः सततं कृष्णदासानां वैष्णवानां कृते तथा भूपालनारायणमङ्गराजस्य पृष्ठपोषकतां प्राप्य तस्य एकान्तानुरोधेन १६१०मिते शकाब्दे प्रणीतवान् ।

ग्रन्थानुशीलनात् ज्ञायते यत् ग्रन्थकर्त्ता कविवरदीनबन्धुमिश्रः भागवतस्य तथा भक्तिरत्नावल्या भक्तिरसामृतसिन्धोर्ग्रन्थाधारत्वेन हरिभक्तिसुधाकरग्रन्थस्य विषयप्रतिपादनावसरे परिवर्त्तनं विदधाति अपि च नूतनविषयं स्वग्रन्थस्य प्रयोजनानुसारं संयोजयति ।

नवविषयविमर्शः (Renovations)—

हरिभक्तिसुधाकरः, भक्तिरत्नावलीग्रन्थद्वयस्यानुशीलनेन तौलनिकदृष्ट्या च ज्ञायते यद् भक्तिरत्नावलीग्रन्थापेक्षया हरिभक्तिसुधाकरः अधिकं नवीनतामुत्कर्षं चावहति । अत्र प्रयुक्तभागवतीयपद्यानां महती उपयोगिता वरीवर्त्तते । भारतवर्षं, तत्रत्यानां पुण्यदेशानां, नदीनां च वर्णनेन कविजीवनं धन्यतां गतम् । विषयगत-चमत्कारातिशयपरिस्फुटनार्थं निरङ्कुशाः कवयः प्रयोजनानुसारं नवीनं प्रयोगं कृत्वा

ग्रन्थस्य अधिकतरसरसतामापादयन्ति । तत्तु सहृदयानां पाठकानां भगवद्भक्तानां च अधिकतरं स्पृहणीयं भवति ।

हरिभक्तिसुधाकरग्रन्थे वैराग्यस्य प्रशंसा विस्तृततया क्रियते । भक्तिरत्नावलीग्रन्थे वैराग्येण भगवद्भक्तिर्जायते इति प्रसङ्गक्रमेण सम्यग्भावेन प्रतिपाद्यते । इदं शरीरं नश्वरम् । स्तेय-हिंसा-दम्भ-क्रोध-काम-अस्मदादयः षडनर्थाः कामिपुरुषाणां काम्या भवन्ति । एते भोगैश्वर्यस्य अङ्गानि स्युः । अत्र योषित्सङ्गदोषो निन्दितः । नित्यताबुद्ध्या योषित्सङ्गत्यागे वैराग्यभावसमुद्भवे भगवत्प्राप्तिः सुलभा भवति । कालक्रमगुणाधीनं शरीरमिदं पाञ्चभौतिकम् । जनाः जगद्धिताय संसारस्य नियमं प्रतिनियमं प्रति सचेतना भवेयुः । श्रीमद्भागवते उक्तम्[4]—

ततो यतेत कुशलः क्षेमाय भद्रमाश्रितः ।
शरीरं पौरुषं यावन्न विपद्येत पुष्कलम् ॥

गुरुसेवनमत्यावश्यकं प्रतिमनुष्यम् । कर्म-विद्या-प्रदायको गुरुः उपनीतस्य शिष्यस्य यथार्थं विद्याध्यापक इत्यर्थः । विद्याध्यापकगुरुः ईश्वरस्थानीयः । ज्ञानप्रदगुरूपासनेन जनाः सहजोपायेन मुक्तिं प्राप्नुवन्ति । सर्वभूतात्मा गुरुर्भवति भगवान् श्रीकृष्णः । गुरुः हीनेषु दयां समेषु मैत्रीम् उत्तमेषु प्रश्रयं विनयं च ददाति । इत्थं गुरुवर्णनेन साकं विषयप्रयोगे ग्रन्थकारः स्वकृतग्रन्थस्य उपादेयतां दर्शयति ।

भक्तिसाध्यस्य श्रीकृष्णस्य उत्कर्षप्रतिपादनार्थं कविवरो दीनबन्धुमिश्रः स्वतन्त्रविषयप्रतिष्ठापनं कृतवान् । अस्मिन् प्रसङ्गे भक्तिरत्नावलीग्रन्थे स्वतन्त्रव्याख्या नास्ति । वासुदेवः श्रीकृष्णः स्वयं भगवान्[5] ।

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोके मृडयन्ति युगे युगे ॥

अस्मिन् प्रसङ्गे अवतारादिवर्णना क्रियते ।

वैदिकवाङ्मयादारभ्य संस्कृतसाहित्यस्य सर्वेष्वपि मान्यग्रन्थेषु अवतारवादस्य पर्याप्तविवेचनं दृश्यते । यद्यपि वैदिकग्रन्थेषु अवतारवादस्य वर्णनं बहुलतया नोपलभ्यते तथापि वेदमार्गप्रवर्त्तितेषु स्मृतिपुराणादिषु भगवतः अवतार-वादस्य वर्णनं विद्यते । कर्मवशीभूतो न भूत्वापि भगवान् अवतारं गृह्णाति । भगवतः अवतारग्रहणं स्वेच्छाधीनम् अजोऽपि कर्मबन्धनरहितोऽपि स लोकरक्षणार्थं धर्मसंस्थापनार्थं च धरायामवतरति । उक्तं च आनन्दवर्धनेन ध्वन्यालोके[6] —

स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः ।

त्रायन्तां वो मधुरिपोः प्रपन्नार्त्तिच्छिदो नखाः ॥

भगवान् विष्णुः अवतरत्यस्मिन् धरातले । अतः जगदनुकम्पया परमेश्वरस्य अवतारः स्वेच्छाकृतः । भगवतः लीला नित्या अनादिकालात् विद्यते । भगवतः रामकृष्णादीनि स्वरूपाणि गोलकवैकुण्ठप्रभृतीनि धामानि नित्यानि । चिन्मय-नित्य-गोलकधामसु भगवतो विभिन्नमूर्त्तिषु या नित्यलीलाः क्रियन्ते, ताः सर्वा एव अप्रकटलीला अर्थात् अप्रकाश्या लोकलोचनगोचरीभूताः । परन्तु यदा भगवान् पृथिव्यामवतीर्य भूभारहरणं धर्मसंस्थापनं, भक्तानां मनोरथपरिपूरणम् इत्यादिकां नरलीलां करोति तदा तस्य लीला प्रकटलीला अथवा व्यक्तलीला इति अभिधीयते । स एव भगवान् नृसिंह-मत्स्य-कूर्मप्रभृतिभिः विभिन्नमूर्त्तिभिः प्रकटलीलां करोति । कदा कदा नृसिंहादीनां लीलां स पृथिव्यां प्रकाशयति । पृथिव्यामवतीर्य स कदा श्रीरामरूपेण, श्रीकृष्णरूपेण वा लीलां करोति ।

श्रीमद्भगवद्गीतायाश्चतुर्थाध्याये[7] उक्तं यत्—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत,
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।
परित्राणाय साधूनां विनाशाय च दुष्कृताम्,
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

अर्थात् भगवान् मानवदेहं धारयित्वा अवतीर्णो भवति ।

गोविप्रसुरसाधूनां छन्दसामपि चेश्वरः ।
रक्षामिच्छं स्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥[8]
यदा यदेह धर्मस्य क्षयो वृद्धिश्च पाप्मनः ।
तदा तु भगवानीश आत्मानं सृजते हरिः ॥[9]
अनुग्रहाय भूतानां मानुषं देहमास्थितः ।
भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत् ॥[10]

भगवतः अवतारवादविषये महानिर्वाणतन्त्रे उक्तम्[11] —

उपासकानां कार्यार्थं श्रेयसे जगतामपि ।
दानवानां विनाशाय धत्से नानाविधास्तनूः ॥
साकारापि निराकारा मायया बहुरूपिणी ।
त्वं सर्वादिरनादिस्त्वं कर्त्री हर्त्री च पालिका ॥[12]

उपासकानां कार्यसिद्धये, जगतः क्षेमाय, दानवानां विनाशाय भगवान् नानाविधां तनुं धारयति । योगमायाशक्त्या एव स साकारनिराकाररूपं वा धारयति ।

अखण्डतेजस्वी अग्निः सर्वत्र विद्यमानोऽपि न दृष्टिगोचरो भवति । परन्तु कस्मिन् कस्मिन् स्थाने प्रज्वलितो भूत्वा प्रकाशितो भवति । तथैवाऽपि भगवतः अवतारः। भगवान् अवतारं स्वीकृत्य लोकलोचने गोचरीभूतो भवति । अत एव श्रीदुर्गासप्तशप्त्यामुक्तम् ।[13]

नित्यैव सा जगन्मूर्त्तिस्त्वया सर्वमिदं ततत् ।
तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥
देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ।
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ॥

लघुभागवते गौडीयवैष्णवाचार्यश्रीरूपगोस्वामिना षड्विधाः अवताराः उल्लिख्यन्ते। तद्यथा पुरुषावतारः, लीलावतारः, गुणावतारः, मन्वन्तरावतारः, युगावतारः, आवेशावतारश्च भगवतः अवतारविषये ब्रह्मपुराणे उक्तं यथा[14] —

यदा यदा च धर्मस्य ग्लानिः समुपजायते ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजत्यसौ ॥

देवीभागवतेऽपि उक्तम्—

यदा यदा हि धर्मस्य ग्लानिर्भवति भूधर ।[15]
अभ्युत्थानमधर्मस्य तदावेशान् विभर्म्यहम् ॥[16]

पद्मपुराणस्य सृष्टिकाण्डेऽपि[17] अवतारविषये उल्लेखोऽस्ति ।

युष्माकं च कुले गोपा देवकार्यार्थसिद्धये ।
अवतारं करिष्येऽहं सा क्रीडा तु भविष्यति ॥

एतदतिरिक्तं गरुडपुराणे (३१/२३), ब्रह्मपुराणस्य (१८१/२/३/४५), विष्णुपुराणे (४/२७), महाभारतस्य वनपर्वणि (२७२/७१) तथा भागवतादिषु भगवतोऽवतारलीलायाः विस्तृतवर्णनं प्राप्यते । वस्तुतः अवतारधारणस्य विशेषतः चत्वारि मतानि उपलभ्यन्ते ।

प्रथमतः भगवान् नारायणः स्वकीयां दिव्यां मूर्त्तिं परित्यज्यास्यां पृथिव्यामवतरति ।[18]

द्वितीयतः यदा अधर्मस्य वृद्धिस्तथा धर्मस्य ह्रासो जायते तदा जगतः कल्याणार्थं भगवान् जनार्दनः स्वशरीरं भागद्वयेन विभाजयति ।[19]

तृतीयतो भगवान् विष्णुः[20] अवतारसमये स्वीयां मूर्त्तिं द्विधा विभज्य एकया मूर्त्या वैकुण्ठे एवं स्थितः तपस्तपति द्वितीयया च मूर्त्या योगनिद्रामाश्रित्य प्रजानां सृष्टि-स्थिति-संहाररचनं करोति । चतुर्थे महाभारतस्य शान्तिपर्वणि

उपलभ्यते यद् भगवता नारायणेन स्वकीया मूर्त्तिश्चतुर्षु भागेषु विभक्ता तत्रैकामूर्त्ति-र्निर्गुणाऽस्ति । शिष्टास्त्रिस्रो मूर्त्तयः सगुणाः । निर्गुणामूर्त्तिरस्ति वासुदेवः तथा सगुणमूर्त्तीनां नामानि सन्ति सङ्कर्षणः, प्रद्युम्नानिरुद्धवासुदेवाः । आसां चतसृणां नामान्तराणि क्रमशः पुरुषः, जीवः, मनः अहंकारश्च ।

कल्याण विष्णवऽङ्के[21] भगवतः अवतारस्य बहवो भेदाः सन्ति । यद्यपि भगवतः अवताराः अनेकविधाः तथापि तस्य स्वरूपं ज्ञातुं न कोऽपि समर्थो भवति । भगवतः आविर्भावः विभवावताररूपेण कथ्यते, तस्य भेदद्वयं वर्त्तते । साक्षादवतारः, आवेशावतारश्चेति । शक्त्यावतारोऽपि शक्त्यावेशस्वरूपवेशत्वे बहुविधः । तत्र शक्त्यावेशे शक्तेः विकाशः, स्वरूपावेशे भगवतः अप्राकृतस्वरूपेण साकं कस्मिन्नपि चेतनशरीरे आवेशो भवति ।

प्रथमतः कलाभेदेन अवतारः द्विविधो भवति । यत् पूर्णावतारः, अंशावतारश्च । नवमकलातः पञ्चदशकलापर्यन्तमंशावतारः, तथा षोडश्या कलया पूर्णावतारः कथ्यते । तत्र अंशावतार-पूर्णावतारयोर्मध्ये कोऽपि भेदः परिलक्ष्यते । तयोरंशावतारस्य कार्यमेकदेशिकम् अर्थात् तेन देशविशेषस्य लोकविशेषस्य वा हितं भवति । परन्तु पूर्णावतारस्य कार्यं सम्पूर्णस्य देशस्य समग्रकालस्य, सर्वेषां परिस्थितीनां तथा समेषां जीवानां च हिताय भवति ।

पुनः कल्याण विष्णवऽङ्के[22] कथ्यते यत् कारणजगति विद्यमाना ज्ञानशक्ति-क्रियाशक्ति-प्रेमशक्ति-दयाशक्ति-निरोधशक्ति-ऐश्वर्यशक्तिप्रभृतयः प्रयोजनानुसारं विविधेष्ववतारेषु प्रादुर्भवन्ति तच्छक्तीनां नामानुसारं ज्ञानावतार-क्रियावतार-दयावतारादीनि नामानि कल्पितानि । पुराणेषु भगवतः पञ्चविधा अवताराः दृश्यन्ते । तद्यथा पूर्णावतारः, अंशावतारः, विशेषावतारः, आवेशावतारः, नित्यावतारश्च । नारदपुराणे[23] देवर्षिणा नारदेन अवतारस्य षड्भेदाः स्वीकृता यथा- अंशावतारः, अंशांशावतारः, कलावतारः, पूर्णावतारः, परिपूर्णावतारः, आवेशावतारश्च । एतदतिरिक्तं तत्र बहवः क्षुद्रावताराः परिलक्ष्यन्ते । लघुभागवते रूपगोस्वामिना पुरुषावतारः, लीलावतारः, गुणावतारः, मन्वन्तरावतारः, युगावतारः, आवेशावतारश्च स्वीकृताः ।

अगाधसरोवरात् यथा सहस्रसंख्यकानि स्रोतांसि निर्गच्छन्ति तथैव भगवतः श्रीहरेः असंख्या अवताराः आविर्भवन्ति । एते अवताराः भगवतः अंशावताराः अथवा कलावताराः भवन्ति । सर्वेषु अवतारेषु भगवतः श्रीकृष्णस्यावतारः श्रेष्ठः । कृष्णस्तु भगवान् स्वयम् । हरिभक्तिविलासस्य एकादशविलासे उक्तम्[24] —

सहस्रनाम्नां पुण्यानां त्रिरावृत्त्या तु यत् फलम् ।
एकावृत्त्या तु कृष्णस्य मामैकं तत्प्रयच्छति ॥

भगवतो नाममाहात्म्यप्रसङ्गे श्रीकृष्णावतारमाहात्म्यं विशेषतो वर्ण्यते। भगवान् सर्वप्रथमतः पञ्चमहाभूतात्मकं ब्रह्माण्डं रचयित्वा तत्र स्वयं चेतनशक्त्या सह लीलार्थं प्रविष्टः । अयमेवास्ति नारायणस्य प्रथमपुरुषावतारः । तस्य शरीरे त्रयाणां लोकानां रचनाऽस्ति । तदुत्पन्ना ब्रह्मा, विष्णुर्महेश्वरः त्रयः अस्य विश्वप्रपञ्चस्य सृष्टिं पालनं संहारं यथाक्रमं कुर्वन्ति । भागवतस्य तृतीये स्कन्धे (६/२५) अवताराः वर्णिताः। पुनः भागवतस्य (२/७/१-३०) पर्यन्तं भगवतो विष्णोः अवताराणां मनोरमवर्णनं प्राप्यते । अपि च भागवतस्य दशमस्कन्धे (१०/४०/१७,२२) भगवतः चतुर्दशानामवताराणां निर्देशोऽस्ति । एषु बहुषु अवतारेषु भगवतः दशावताराः सन्ति । वायुपुराणेऽपि[25] भगवतः अवताराणां दशानां कल्पना कृता भगवतः नानाविध अवतारवादविषये मत्स्यपुराणेऽपि[26] वर्णना समुपलभ्यते । एवंविधभगवदवतारलीलायाः वर्णनं विभिन्नशास्त्रेषु निर्दिष्टमस्ति ।

भक्तकविदीनबन्धुमिश्रप्रणीत हरिभक्तिसुधाकरग्रन्थे अवतारतत्त्वस्य या वर्णनाऽस्ति, संक्षेपतः सा पुरस्क्रियते ।

गोकुलचूडामणिः श्रीकृष्णः स्वयं स्रष्टुः सृष्टेश्च कारणम् । एवं च स्वप्न-जागर-सुषुप्त्यवस्थानां साक्षिस्वरूपः । पूर्णानन्दमयभगवतः अवताराः तस्य अक्षयकोषो भवति । भगवान् श्रीकृष्णः भवति अंशी रामादयोऽवताराः तस्य अंशभूता यथा अगाधसमुद्रात् क्षुद्रप्रबालो जायते तथा सत्त्वनिधेर्भगवतः श्रीहरेः असंख्या अवताराः समुत्पद्यन्ते । एते सर्वे भगवतः अंशावतारा वा कलावताराः। परन्तु भगवान् श्रीकृष्णः स्वयं भगवान् । तत्त्वविदः शास्त्रभेदैरेकस्य परमात्मनो नानात्वं प्रतिपादयन्ति यथा उपनिषद्वेत्ता ज्ञानी ब्रह्म, हिरण्यगर्भः योगी परमात्मा इति भक्तिनिष्ठसात्वता भगवान् वासुदेव इति मीमांसकाः धर्म इति सांख्याः प्रकृतिपुरुषरूपा इति पाञ्चरात्रा विद्या-विमला-उत्कर्ष-ज्ञान-क्रिया-योग-प्रह्वा-सत्त्व-ईशानुग्रहादि नवशक्तियुक्त इति कथयति । अतः शास्त्रभेदात् एकस्य ईश्वरस्य रूपभेदो निरूप्यते । अतः कार्यवशात् भगवतः अवतारभेदः जायते ।

सृष्टिसर्जनकाले भगवान् महत्त्वात् मनुष्यशरीरं सृजति, पञ्च तन्मात्राणि, एकादश इन्द्रियाणि, पञ्चमहाभूतानि । षोडशकलाश्च भगवतोऽंशाः । भगवतः श्रीकृष्णस्य षोडशकला भवन्ति श्रीः-भूः-कीर्त्तिः-इला-लीला-कान्ति-विद्या-

विमलाः-उत्कर्षिणी-ज्ञानं-क्रिया-योगः-प्रह्वा-सत्त्वेशानुग्रहाः इति षोडशशक्तयः भगवतः कला भवन्ति । अस्मात् नारायणरूपं जायते । नारायणो न केवलम् अवताराणां बीजं भवति, परन्तु स्थावरजङ्गमजीवजगतो बीजं भवति । येन आपुरुषात् सर्वेष्वपि भगवतः श्रीकृष्णस्य महिमा पुरष्क्रियते । ऐश्वर्य-माधुर्ये तस्य अंशौ भवतः । मत्स्यादिरवतारो भगवतः श्रीकृष्णस्य अंशभूतः । कृष्णामृतपद्यं संगृह्य भगवतः सर्वशक्तिमत्त्वं सर्वव्यापकत्वं च प्रतिपाद्यते ।[27]

अंशत्वं नाम शक्तीनां सदाल्पांशप्रकाशिता ।
पूर्णत्वं च स्वेच्छायै नानाशक्तिः प्रकाशिता ॥

एतेन साकं भगवतः एकोनचत्वारिंशतो गुणानां नामोल्लेखो लभ्यते । सत्य-शौच-दया-क्षान्ति-त्याग-सन्तोष-आर्जव-शम-दम-तपः-साम्य-तितिक्षा-उपरति-क्षुत्-ज्ञान-विरक्ति-ऐश्वर्य-शौर्य-बल-तेजः-स्मृति-स्वातन्त्र्य-कौशल-कान्ति-धैर्य-मार्दव-प्रागल्भ्य-प्रश्रय-शील-सहः-ओज-भग-गाम्भीर्य-स्थैर्य-आस्तिक्यं-कीर्त्ति-मान-अनहंकृतिरिति एतैरेकोनचत्वारिंशता गुणैरन्वितो भगवान् श्रीकृष्णः साधारणजनानां कृते दुर्ज्ञेयो भवति । श्रीकृष्णः साध्यसाधनरूपो भवति। हरिभक्तिसुधाकरे देवकीवसुदेवयोर्नामोल्लेखो दृश्यते । भक्तिरत्नावल्यां तु यशोदानन्दनाम प्रतिपाद्यते ।

अत्र श्रीकृष्णस्य उत्कर्षस्य महनीयतायाः च प्रतिपादनप्रसङ्गेऽपि भक्तप्रवर दीनबन्धुमिश्रेण शृङ्गारशिरोमणिश्रीकृष्णस्य रासलीलायाः महत्त्वं प्रकटीक्रियते । श्रीकृष्णः स्वस्य तथा पुण्यभूमेर्यदुकुलस्य कीर्त्तिं विस्तारयति । तत्र गोप-गोपी-गोपसमूह-मधुवन-मथुरा-गिरिगोवर्द्धन-यदुकुल-व्रजपुर-व्रजवनिता अपि तं लब्ध्वा पूर्णकामतां लभ्यन्ते । न केवलम् एते पवित्रतमा अपि तु लीलापुरुषोत्तमः श्रीकृष्णं पुत्रत्वेन प्राप्य देवकी-वसुदेवौ कृतार्थौ भवतः । बहुवनितावल्लभत्वेऽपि भगवान् श्रीकृष्णः स्वात्मारामतया द्योत्यते, प्रकाश्यते वा । तस्य रमणीयरूप-लावण्येन दिव्यमधु निःसरति येन गोपवनिताः तस्य वंशीस्वनं निशम्य अहैतुकप्रेम्णा अभिभूता आनन्दातिशयमग्ना भवन्ति । तत्र स्थावरा जङ्गमाः सर्वे आनन्दसागरे निमज्जन्ति । मधुरवेणुध्वनिश्रवणेन सर्वे विमोहिता जायन्ते । त्रैलोक्यसौरभरूपमिदम् अत्यन्तमनोमुग्धकरं भवति ।

भक्तिरत्नावल्यां प्र.वि.भक्तिलक्षणं कृतं परन्तु ग्रन्थकारो विषयनिर्वाचन-क्रमपरिवर्त्तनं कृत्वा हरिभक्तिसुधाकरग्रन्थस्य पञ्चमकलायां भक्तिलक्षणं प्रतिपादयति ।

श्रीहरिसेवासर्वजन्मादिकं सफलं करोति । भक्तिं विना वेद-वेदान्तोक्त-ज्ञान-तपो-जप-योग-स्वाध्यायादिर्निरर्थकः सर्वतोभावेन भगवद्भजनेन भगवत्प्राप्तिर्जायते ।

दीनबन्धुमिश्रः भगवद्गीतायाः ध्यानयोगपद्यमुद्धृत्य भक्तिप्रशंसां करोति।

यतते च ततो भूयः संसिद्धौ कुरुनन्दनम् ।[28]

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ॥[29]

ग्रन्थे प्रतिकलम् अन्तिमे स्वरचितपदप्रयोगात् कविप्रतिभा प्रकाशिता दृश्यते ।

हरिभक्तिसुधाकरग्रन्थे ग्रन्थकारः भक्तिलक्षणेन साकं भक्तेः नानाविधभेदं प्रदर्शयति । तत्र भगवन्तमुद्दिश्य पर्व-यात्रा-महोत्सवपालनं वैदिकतान्त्रिकरीत्या व्रतधारणं मण्डलादिपूजनया भगवद्भक्तिः समुत्पद्यते । येन जना भगवतः श्रीकृष्णस्य जन्मतिथिं जन्माष्टमीपर्वरूपेण पालयन्तीति ग्रन्थे सूचितम् । वार्षिकपर्वसु चातुर्मास्यैकादशीपर्व श्रेष्ठम् । श्रवणादिनवविधभक्तिर्भवति तस्य अङ्गं, तत् सुखस्फूर्त्तिर्भवति अङ्गिरूपा ।

हरिभक्तिसुधाकरग्रन्थे पुराणेषु बृहन्नारदीयपुराणग्रन्थे प्रतिपादितभक्ते-र्भेदस्यालोचना दृश्यते । यत्तु भक्तिरत्नावलीग्रन्थे नास्ति तत्र उत्तममध्यमाधमभेदेन भक्तिर्मुख्यतः त्रिधा । पुनः प्रत्येकमेकैकं सात्त्विक-तामसिक-राजसिकभेदेन त्रिधा विभज्यते । पुनः सात्त्विकी-तामसिकी-राजसिकी प्रत्येकं एकैकं त्रयस्त्रयोभेदाः स्युः । श्रवणादिर्नवविधा सगुणा भक्तिः अनेनैव क्रमेण एकाशीतिः भेदाः क्रियन्ते। पुनः एकाङ्गी बहुलाङ्गीभेदेन एकाशीतिभेदा भक्तिश्च द्विविधा भवेत् ।

स्मरणभक्तिमाहात्म्यवर्णनेन कविरनेकानि नूतनानि तत्त्वानि प्रयुक्तवान् । भक्तिरत्नावलीग्रन्थे वैरभावेन शिशुपाल-पौण्ड्रादिराजानां नामोल्लेखोऽस्ति किन्तु हरिभक्तिसुधारकरग्रन्थकर्त्ता वैरभावेन हिरण्यकशिपोर्नाम ददाति । पुनः भगवद्ध्यानं मन्दहास-स्फुटहासभावेन द्विविधं कृत्वा ग्रन्थस्यास्य नवीनतां दर्शयति ।

हरिभक्तिसुधाकरग्रन्थे च्छत्रचामराद्युपासनं भगवतः पादसेवनभक्तिः कथ्यते । भूतशुद्धिर्मातृकाक्षकरन्यासेन भगवत्पूजा प्रतिष्ठिता । अत्र भगवतः एकादशपूजा दर्शिताः । अष्टविधप्रतिमापूजाविधिः सूचितः । सूर्याग्नि-ब्राह्मणाकाश-गो-मरुद्-जल-भ्वात्म-वैष्णवादिषु सर्वभूतेषु भगवान् विराजितः। एतेन साकं पूजायां प्रस्तर-काष्ठ-लौहालेख्य-सैकत-मणिमय-लेप्य-मनोमयादि-रष्टविधा प्रतिमा अपि पूजायां ग्रहणीया । भगवतः अष्टदलपद्ममण्डनेन साकं सुदर्शन-गदा-पाञ्चजन्याऽसि-धनु-र्हल-मूषलाद्यायुध-कौस्तुभ-दुर्ग-गुरु-

दिक्पालप्रभृतयः पाद्याद्युपाचारैः पूजायामुपदिष्टा एतत्तु भक्तिरत्नावलीग्रन्थे न लिखितमस्ति । हरिभक्तिसुधाकरग्रन्थे[30] —

त्यक्त्वा सुदुस्त्यजसुरेप्सित राज्यलक्ष्मीं
धर्मिष्ठ आर्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधावद्
वन्दे महापुरुष ते चरणारविन्दम् ॥ इति ।

अत्र श्रीरामस्तुतिः कृष्णावतारदृष्ट्या विचार्यते । भक्त्याकृष्टो भगवान् श्रीकृष्णः स्व राज्य लक्ष्मीं नाम गोलकधामत्यक्त्वा ब्रह्मणो वचसा अरण्यं नाम श्रीवृन्दावन-वनमगात् । मृग्यते नाम अन्विष्यते । मायालक्ष्मीमपि मृगम् । दयितया नाम सत्यभामया ईप्सितं पारिजाततरुं तदनुधावत् तत्ते चरणारविन्दं वन्दे इति व्याख्या हरिभक्तिसुधाकरग्रन्थस्य मौलिकी एव । एतत्तु भक्तिरत्नावलीग्रन्थे न प्रतिपादितमस्ति ।

भगवतः दास्यभक्तिमाहात्म्यं प्रदर्शितम् । भगवतः पादसेवनकेशप्रसाधना-लङ्करणाऽदिबाह्योपाचारैः स्व कर्मार्पणमेव भगवद्दास्यं कथ्यते इति लिखितम् । भक्तिरत्नावलीग्रन्थे भगवतः साधनभूताया भावप्रेमभक्तेः वर्णना नास्ति । भावप्रेम-भक्तिः साधनभक्तेः अंशविशेषः । साधनभक्तिर्नाम घनारण्यमध्ये पिप्पलस्य अथवा अश्वत्थवृक्षस्य मूले उषित्वा मनसि परमेश्वररूपभगवच्चिन्तनं साधनभक्तिः कथ्यते ।

भावेन चित्तस्यभक्तिभावेन निविष्टभगवद्ध्यानेन भगवत्पदप्राप्तिर्भवति । चक्षुषि आनन्दाश्रु स्वतः जायते । प्रेमभक्तिगतचित्तेन भावविह्वलो भूत्वा स्वेष्टचिन्तनं प्रेमभक्तिः कथ्यते । प्रेमभक्तौ देह-मनआदि पुलकितं भवति । प्रेमभक्तिविह्वलस्य भक्तस्य बाह्यज्ञानं न विद्यते । अचिरेण समाधिलाभो भवति इति शास्त्रप्रसिद्धम् । नद्याः सागरसङ्गमलाभ इव परमात्मनि शरीरं लीनं जायते । वैराग्यवर्णनम्, भगवतः श्रीकृष्णस्य उत्कर्षः तथा भावप्रेमभक्तिवर्णनं भवति हरिभक्तिसुधाकरस्य मुख्यो नवीनविषयप्रयोगः । येन ग्रन्थपठनेन भगवदानन्दानुभवः प्राप्यते ।

भक्तितत्त्वप्रतिपादकयोः भक्तिरत्नावली हरिभक्तिसुधाकरग्रन्थयोर्द्वयोः भगवद्भक्तिप्रतिपादनं मुख्यलक्ष्यम् । भक्तिरत्नाकरग्रन्थमुपजीव्य तद्गृहीतप्रसिद्ध-श्लोकान् विहाय अतिरिक्तान् भागवतान् श्लोकान् गृहीत्वा भक्तिप्रतिपादनार्थं बद्धचेतसो दीनबन्धुमिश्रस्य अदीना शैली तस्य प्रतिभां प्रतिभासयति, दुष्करमपि कर्म सुकरं करोति । श्रीभगवतः कृपया एव स्वदास्यं प्रतिपाद्य एतादृशि आयाससाध्ये कर्मणि स्वलेखनीसाधनामवन्ध्यां करोति इति दिक् ।

***

सन्दर्भनिर्देशः

(Notes & Reference)

1. ह.भ.सु. (प्र.क.), 1.31-32
2. ह.भ.सु. (प्र.क.), 1.42
3. ह.भ.सु. (प्र.क.), 1.54
4. ह.भ.सु. (द्वि.क.), 2.47
5. ह.भ.सु. (च.क.), 4.10
6. ध्वन्यालोक (प्रथम उद्यतः)- 1
7. गीता- 4.7.8
8. श्री.भा. 8.24.5
9. श्री.भा. 9.24.56
10. श्री.भा. 10.33.37
11. महानिर्वाणतन्त्र 4.16
12. महानिर्वाणतन्त्र 4.34
13. श्रीदुर्गासप्तसती, 1.64-65
14. ब्रह्मपुराण 186.26
15. देवीभागवत, 7.39.22b
16. देवीभागवत, 7.39.23a
17. प.पु. (सृष्टिकाण्ड) 1.17.19
18. मत्स्यपुराण, 47.34
19. ब्रह्मपुराण, 72.2,3,4
20. हरिभक्तिविलास, 41.18.19-20
21. कल्याण (विष्णुअङ्क), पृ- 251
22. कल्याण (विष्णुअङ्क), पृ- 252
23. नारदपुराण, 1.17,18,19
24. हरिभक्तिविलास, 11.2.58
25. वायुपुराण, 52.27
26. मत्स्यपुराण, 47.238, 248
27. ह.भ.सु. (च.क.)
28. भ.गी. (ध्यानयोग) श्लोक सं. 43a
29. भ.गी. (ध्यानयोग) श्लोक सं. 44b
30. भा. 11.5.34

उपसंहारः

वैष्णवशास्त्रेषु अपरिचितस्य हरिभक्तिसुधाकरनामकस्य ग्रन्थस्य किमपि वैशिष्ट्यमस्तीति कथनस्य प्रभाणं सप्रयोजनं निर्धारणीयम् । किं तावदस्य ग्रन्थस्य प्रतिपादितं काश्च पुनरुलब्धस्य इति प्रश्ने प्रथमन्त्विदमेव वक्तव्यमस्ति ग्रन्थेऽस्मिन् विद्ववर्येण दीनबन्धुमिश्रेण भक्तितत्त्वगाम्भीर्यविषये संक्षेपेणैव निर्देशः कृतः । भक्तिसाहित्येषु भक्तिशास्त्रेषु च भक्तितत्त्वं सुविस्तृतम्। रूपगोस्वामिना, जीवगोस्वामिना, विष्णुपुरीमहोदयेन च याः भक्तेः परिभाषाः विहिता स्तासां विश्लेषणं कृत्वा भक्तप्रवरः दीनबन्धुमिश्रेण प्रथमं नूतनतया ग्रन्थोऽयं विरचितः ।

हरिभक्तिसुधाकरे भगवद्भक्तेस्तथा भगवतः श्रीकृष्णस्य चरमोत्कर्षः परमरहस्यं च समुद्घाटितम्। ग्रन्थस्यास्य वैष्णवधर्मोपरि बहुशः प्रभावः परिलक्ष्यते। अतः उत्कलीयसंस्कृतौ वैष्णवभक्तिमालासु ग्रन्थोऽयं मणिरिव विराजते ।

विश्वेऽस्मिन् भक्तिकल्पद्रुमस्य स्थितिः सुप्राचीनकालात् सुदृढा आसीत्। उत्कलेषु भारतीयपरम्परया साकं उत्कलीयवैष्णवपरम्परायाः मार्गमनुसृत्य जनाः भक्तिं सम्पादयन्ति । अतोऽद्यावधि समग्रभारतवर्षेषु भक्तिधारा निरवच्छिन्ना प्रवहति यतो हि भक्तेरनुष्ठानेन इष्टसाधनरूपफलं प्राप्यते । भक्तिहीने अनिष्टसाधकफलानि उत्पद्यन्ते। अतः प्राचीनाः अर्वाचीनाश्च विद्वांसः भक्तिशास्त्रस्य रचयितारः भक्तेः महत्त्वं प्रतिपादयितुं चेष्टितवन्तः । श्रीमद्भागवतस्य भक्तिरत्नावलीग्रन्थस्य च प्रभावः हरिभक्तिसुधाकरे स्पष्टं परिदृश्यते इति प्रागालोचितम् । मुख्यतः हरिभक्तिसुधाकरः भक्तिरत्नावलीवत् भक्तिरसप्रतिपादको ग्रन्थः । श्रीकृष्णो भवति पुरुषश्रेष्ठः । श्रीकृष्णभक्तिं विना भवसंसारतारणे नान्योपायोऽस्ति । श्रीकृष्णसदृशः सगुणः महहिमान्वितः भगवान् जगति कोऽपि नास्तीति स्पष्टतया ग्रन्थ उद्घोषयति । सर्वशास्त्रेभ्यः श्रीमद्भागवतमेव श्रेष्ठं भक्तिशास्त्रम् । भागवतस्य मूलाधारः अनन्तमहिमान्वितो यदुकुलनन्दनन्दनः श्रीकृष्णः । श्रीकृष्णैकभक्तेन कविना दीनबन्धुमिश्रेण भागवतेन सह पूर्वसूरीणां ग्रन्थाननुसृत्य स्वविरचितग्रन्थस्यास्य वैशिष्ट्यं प्रतिपादितम् ।

(क) ग्रन्थाध्ययनस्य वैशिष्ट्यम्—

श्रीमद्भागवतस्य तात्त्विकोपादानैः भगवद्भक्तैः विरचितोऽयं ग्रन्थः हरिभक्तिसुधाकरः भक्तिरसस्य अनुपममन्दिरमिव प्रतिभाति यस्य कोणानुकोणेषु

श्रीकृष्णभक्तितत्त्वात्मकगीतानि अनुरणितानि लक्ष्यन्ते । भक्तेः माहात्म्येन साकं नवधाभक्तितत्त्वमत्र संस्थापितम् । भावप्रेमभक्तेः प्राधान्यं निजार्त्तिज्ञापनस्य फलं वैष्णवानां कर्त्तव्याकर्त्तव्यपरम्परायाः वैशिष्ट्यं च ग्रन्थस्य प्रतिपाद्यमिति आलोच्यते ।

१- ग्रन्थस्यास्य वैष्णवधर्मोपरि प्रभावः—

वैदिकयुगादारभ्य भारतीयानां सामाजिकं सांस्कृतिकमार्थिकमाध्यात्मिक-जीवनं च भक्तिधर्मेण प्रभावितम् । तेन प्राचीनाः चिन्तारहिताः सन्तः सुखं लब्धवन्त आसन् । गच्छता कालेन वैदिकधर्मतः भागवतसात्वतपाञ्चरात्रादयः धर्मधाराः समुद्भूताः ।

कालक्रमेण भागवतो धर्मः वैष्णवधर्मस्योपजीव्यत्वेन परिगणितः । भागवतवैष्णवधर्मयोः सूक्ष्मभेदः उपास्यविशेषे एव निहितोऽस्ति । भागवतधर्मस्य विस्तारमात्रं वैष्णवधर्म इति कथनेन न कोऽपि दोषः । 'भगवतः इदमिति भागवतम्' । अत्र भगवान् श्रीकृष्ण एव मुख्यनायकः । यथा धर्मात् धर्मस्योद्भवः तथा पुरुषेषु पुरुषोत्तमभगवान् श्रीकृष्णः प्रादुर्भूतः । तस्यानुशासनमार्गेण मानवाः स्वीयधर्मकर्म-जीवनक्षेत्रेषु अग्रेसराः जायन्ते । धर्मेण हि अन्तस्थितमालिन्यकुसंस्कारादयः परिशुद्धाः भवन्ति, सत्य-अहिंसा-सहिष्णुता-उदारतादयश्च सद्गुणाः प्रकाशिताः जायन्ते । जगति सर्वे मानवाः समानाः । हिन्दुयवनख्रीष्टीयानप्रभृतयः सम्प्रदायानु-गामिनः सर्वे जनाः एतद्धर्मानुसारेण वर्त्तन्ते । श्रीमद्भागवते उक्तम् (२/४/१८)—

किरातहुणान्ध्रपुलिन्दपुक्कसा आभीरकङ्का यवनाः खसादयः ।
येऽन्ये च पापायदपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥

एतेन वैष्णवधर्मस्य विश्वजनीनत्वं प्रतिपादितम् । इदानीं धर्ममाधारीकृत्य या साम्प्रदायिकभावना दृश्यते तस्या निराकरणम् अनेन धर्मेण सम्भवेदिति वक्तुं शक्यते । वैष्णवधर्मस्य 'अहिंसा परमो धर्मः' इति सर्वधर्मस्य सारः । वैष्णवधर्मदीक्षितः हिंसाविरहितो मानवः सदा भगवत्सुखं प्राप्नोति । अतः धर्मानुसरणेन प्राणिनां प्रमुखलक्ष्यं भगवद्दर्शनं मोक्षप्राप्तिश्च भवति ।

परन्तु कलियुगेऽधुना प्रचलत्सु कालेषु धर्मस्य विधि-नियम-व्यवस्थाऽ-भावात् समाजो विनष्टः फलतः विशृङ्खलिताः सन्तः नराः धर्मस्य मौलिकतत्त्वं परिहाय स्वेच्छया कालं यापयन्ति । अपि च धर्मस्य आभिमुख्यं विलुप्तप्रायं मन्यन्ते । एवंभूतायामवस्थायां विशृङ्खलितसमाजवर्त्तिनां मानवानां समुद्धाराय ग्रन्थस्यास्य वैशिष्ट्यं भृशं वर्त्तते । गम्भिरेऽस्मिन् विषये सर्वेषां सुखाय, हिताय,

कल्याणाय आध्यात्मिकसमृद्धये च कवेः हरिभक्तिसुधाकरस्वरूप उद्यमः प्रशंसनीयः, सर्वदा च सिद्धान्तस्य अनुशासनस्य च मार्गः अनुसरणीयः ।

२- नवधाभक्तितत्त्वेषु वैराग्य-सत्सङ्ग-गुरुसेवा-भावप्रेम निजार्त्तिज्ञापन-भक्तीनामालोचनं ग्रन्थस्यास्य वैशिष्ट्यं प्रकाशयति—

अहरहः प्रलयान्तर्गतानां सर्वेषां मानवानाम् ऐहिकपारत्रिकसुखाय यथा परमपुरुषे श्रीकृष्णेः मतिःरतिश्च स्यात् तथैव सरलपथनिर्द्धारणाय भक्तवरेण कविना दीनबन्धुमिश्रेण ग्रन्थेऽस्मिन् समुद्यमः कृतः । जीवेषु मानुषं जन्म दुर्लभम् । भक्तिस्तत्र सुदुर्लभा, तत्रापि परमार्थपदं दुर्लभं च । अतः वर्त्तमानाभिनिवेशन-प्रहाणेन शोक-मोह-भयापहा-भक्तिरेव साधारणशरीराणां सततं श्रेयस्करी इति ज्ञानेन भक्तियोगमार्गः सर्वैरनुसरणीय इति कवेराशंसा । ग्रन्थेऽस्मिन् श्रवणकीर्त्तनादि नवविधभक्तीनां प्रचारार्थं स्पष्टं घोषणाऽनुश्रूयते ।

सत्यस्य हि जगति द्विधा प्रचारः परिलक्ष्यते । अन्वयेन व्यतिरेकेण च, न केवलम् अन्वयतः सत्यप्रचारः सम्भवेत् परन्तु व्यतिरेकमूलः प्रचारः एवान्वयमुख-प्रचारादप्यधिकतरमौज्ज्वल्यं विदधाति । कृते युगे स्वपित्रा हिरण्यकशिपुना बहुधा दण्ड्यमानः प्रह्लादः श्रीनृसिंहमाहात्म्यं जगति प्रकाशयामास । त्रेतायां हनूमता श्रीराममाहात्म्यं तथा द्वापरे पाण्डवैः यादवैः शिशुपालादिभिश्च श्रीकृष्णमाहात्म्यमपि प्रकटितम् । संसारविमुखाः जनाः उत्तमगुरुसेवया मुक्तिं लभन्ते । वैराग्यात् भगवद्भक्तिः सञ्जायते । अतः भगवत्स्वरूपगुरुसेवया मायाविरहिताः जनाः मोक्षं लभन्ते । सत्सङ्गबलेन भक्तिरेव भगवत्पदप्राप्तिहेतुः भवति । सत्सङ्गजनितभक्तियोगं विना भवतरणे नान्य उपायो वर्त्तते यतः सत्सङ्गमाध्यमेन हि अनन्यप्रेमभक्तिः प्राप्यते। ततः हरिसेवाभिनिविष्टाः सन्तः भगवत्पार्षदरूपेण नित्यं विराजमानाः सन्ति । स्वल्पसंख्यकाः केचन सुकृतिमन्तः स्वकीयसाधनबलेन मायाबन्धनरहिताः जीवन्मुक्ताः सुखं विचरन्ति । पुनः देहे नष्टे हि परमपदं वैकुण्ठं प्राप्य भगवतः श्रीकृष्णस्य नित्यलीलां दृष्ट्वा भगवद्भजनपरायणाः साधवः दिव्यभावसमृद्धा भवन्ति।

३- अधुना ग्रन्थस्यास्योपयोगित्वम्—

परिवर्त्तिनि असारे संसारेऽस्मिन् सर्वं परिवर्त्तते । प्राचीनकाले मानवाः पशुरिव आचरणशीला आसन् । कालक्रमेण मानवाः शिक्षिताः शृङ्खलिताः सन्तः स्वस्य मानवत्वगुणेन स्वकीयवैशिष्ट्यं समुपस्थापयन्ति इति दृढो विश्वासोऽस्ति ।

परन्तु इदानीन्तने युगे मानवाः नूतनस्वर्गनिर्माणाय स्वप्नं पोषयन्ति । तेषां कामा अनन्ता वासना अशेषा आशा निराधारा च । कामक्रोधलोभमोहादि बन्धनरज्जुभिराबद्धाः मानवाः काले काले परार्थं न पश्यन्ति । 'वसुधैव कुटुम्बकम्' भावना तन्मनसि लुप्ता । अतः आधुनिके काले शिक्षिता अपि मानवाः वस्तुतः पशुवत् आचरणं न जहति । यद्यपि मानवाः स्वरूपेण न पशुरिव अपि तु कर्मणा पशुवत् भवन्ति । अपगते वयसि जनाः मायापारावारेऽस्मिन् निमज्जिताः शाश्वतं सुखं शान्तिं च अन्विष्यन्ति । अतः मूढबुद्धिमानवजागरणार्थं युगे युगे महात्मनामाविर्भावो जायते । तदर्थं 'धर्मसंस्थापनार्थाय सम्भवामि युगे युगे' इति श्रीमद्भगवद्गीतावाणी सुप्रसिद्धा वर्त्तते । परमाज्ञानन्धकारच्छन्नाः सन्तः नराः तस्य चिरन्तनसत्यस्य अन्तर्निरीक्षणं कर्त्तुं न शक्नुवन्ति । अहङ्कारवशादुद्धता बहवः विविधोपचारेण समाजं जीवनं च कलुषपूर्णं कुर्वन्ति । केषु कुत्रापि च सद्भावनायाः सम्भवो न जायते । अतः तत्संस्काराय परमसत्यस्यावलोकनाय च उपदिशन्ति । धर्मसंरक्षकाः ततः जनमानसेषु भगवद्भावजागरणार्थं विविधधर्माः समजायन्त । तेषु वैष्णवधर्मः स्वतः प्रकाशितोऽभूत् । येन धर्मेण मानवान्तर्भावनायाः परिशुद्धिः सम्भवति ।

साम्प्रतं विशृङ्खलितसमाजस्य सुसंघटनाय 'हरिभक्तिसुधाकर' नामाख्यग्रन्थस्यास्य भूमिका वस्तुतः समादरणीया । धर्मानुष्ठानच्छलेन याः हिंसादिभावनाः मानवहृदि दृश्यन्ते तासां समाधानमपि अनेन ग्रन्थानुशीलनेन कर्त्तुं शक्यते । यतः भक्तिरेव गरीयसी शक्तिरहिताः शवाः सशक्तिकाः शिवाः इति प्राचीनैरुक्तम् । आलोच्य ग्रन्थानुशीलनेन सर्वेषां हृदये भक्तिभावस्योदयः भविष्यतीति ।

४- भारतीयसंस्कृतेः समाजस्य च पुनरुद्धराय अस्योपयोगिता—

साम्प्रतिके काले धर्मः कैतवान्तर्गुम्फितः समाजः विशृङ्खलितः, संस्कृतिः विनष्टा जनाः कलुषितचित्ताः चेति लक्ष्यते । जनाः स्वकीयविवेकवैराग्यात् मानवत्वगुणं धर्मं च विस्मरन्ति । एतादृशदुःखावस्थायां प्राच्यगौरवस्य पुनः प्रतिष्ठापनाय ग्रन्थकृता 'हरिभक्तिसुधाकराख्यो' ग्रन्थः विरचितः । ग्रन्थेऽस्मिन् जनमानसेषु भगवत्चेतनाजागरणाय समुद्यमः विहितः । येन पूर्वमैतिह्यं भारतीयाः स्मारिष्यन्ति सम्यगनुसरिष्यन्ति च । आत्मजाः दायादाश्च असभ्या न भवन्तु इति अभिप्रायः । वैदिकयुगादारभ्य या गुरुशिष्यपरम्परा प्रचलिता आसीत् सा यथा पुनरेव सर्वेषां कल्याणाय प्रचरिष्यति तथैव यत्नो ग्रन्थकारेण विहितः ।

५- मानवेषु मानवत्वजागरणम्—

काले काले मानवाः मुख्यतया जैवीं वृत्तिं पाशवीं वृत्तिं वा अनुसरन्ति । तेषां व्यवहारः विश्वेषु भयाभयसङ्कटस्य कारणं जातम् । वैष्णवधर्मानुकूलभक्तिग्रन्थोऽयं विश्ववासिषु भगवद्विश्वासं स्थापयितुकाम इति एका धारणा जागर्त्ति । 'परोपकाराय इदं शरीरम्' आत्मनः प्रतिकूलानि परेषां न समाचरेदिति इत्यादि भावनानां मानवेषु समुत्पादनाय प्रयत्नः कृतः । अनेन आसुरिकप्रवृत्तेः निवृत्तिः आत्मोन्नतिश्च आशास्यते ।

६- जनानां हृदये भगवद्विश्वासः—

मायाविजडितसंसारेऽस्मिन् जनानां हृदये भगवद्भक्तेरभावः परिलक्ष्यते । या भक्तिः सा विमुक्तये इति हेतोः जनानां कृते भक्तिग्रन्थस्यास्य परमावश्यकता अस्ति । यतः भगवतः प्राप्त्यर्थं सफलानि उपायान्तराणि सन्ति । केन समाचरणेन मानवः भगवन्तं प्राप्नुयादिति अत्र सुस्पष्टम् आलोचितम् । अतः दुःख-शोक-रोगभयादिपीडितेभ्यः जनेभ्यः शान्तिप्रीतिमैत्रीमार्गस्य निर्देशनाभूतम् ।

७- अन्यधर्मेण सह समन्वयस्थापनम्—

हरिभक्तिसुधाकरे इति ग्रन्थो वैष्णवधर्मस्य प्रशंसार्हः, वैष्णवानां कृते च प्रशस्यतरग्रन्थो भवति । ग्रन्थेऽस्मिन् वैष्णवधर्मस्य तत्त्वालोचनामाध्यमेन धर्ममतवादान्तरैः सह विश्वधर्मस्य सार्वजनीनधर्मस्य वा स्वरूपनिर्णयाय उदारभावेन कविना स्वचिन्तापरिकल्पना च प्रकाशिता । यतः ग्रन्थेऽस्मिन् सर्वेषां धर्माणां भक्तितत्त्वादीनि विचारितानि सन्ति । अतः हरिभक्तिसुधाकरः सर्वोपादेयग्रन्थ इव प्रतिभाति ।

(ख) भक्तिसाहित्ये हरिभक्तिसुधाकरस्य स्थानम्—

उत्कलीयवैष्णवपरम्पराविष्टः कविदीनबन्धुमिश्रः श्रीकृष्णस्य भक्तिभाव-रसमधुमधुकरो भवति । तस्य कृष्णैकतानमानसस्य सर्वाः समुपलब्धाः कृतयः कृष्णभक्तिमेवाधिकृत्य प्रणीताः । कविना भागवत-भगवद्गीता-बृहन्नारदीयपुराण-तन्त्रशास्त्र-भक्तिसुधाकर-कृष्णकर्णामृतप्रभृतिभ्यो ग्रन्थेभ्यश्च भक्तिविषयाः संगृहीताः । भगवद्भक्तिधाराप्लावितभक्तः दीनबन्धुः आध्यात्मिकभावस्यानुभवार्थं भक्तिरेव मुख्या सरणिरिति ग्रन्थेऽस्मिन् प्रतिपादयति । भक्तिग्रन्थेषु ग्रन्थस्यास्य महत्त्वपूर्णं स्थानं वैशिष्ट्यं च विद्यते । यतः आनन्दमयो भगवान् आत्मानुभूतये परमानन्दलाभाय च भक्तान् अनुप्रेरयति इति ग्रन्थेऽस्मिन् प्रतिपादितम् । भक्तिस्तु

परमपुरुषार्थरूपा। ननु पूर्णानन्दो भगवान् भक्तैस्तज्ज्ञैरर्पितया सेवया परमप्रीतिमापन्नः चतुर्वर्गसिद्धिं प्रयच्छति । ग्रन्थे सन्निहितया ललित-ललितया मधुरमधुरया वाचा पद्यानि अचिरेण भगवद्भक्तानां हृदयानन्दं जनयन्ति ।

ग्रन्थोऽयमनिर्वचनीयमानन्दं परिवेषयति पाठकेषु भक्तेषु च । स्वकीयग्रन्थ-मर्य्यादया ग्रन्थोऽयं सुललितपद्यावलीभिः श्रुतिसुखावहो जातः । श्लोके श्लोके परमानन्दकारणस्य श्रीकृष्णस्य महिमा समुद्भासतेतराम् ।

उत्कलीयभक्तिलक्षणग्रन्थेषु हरिभक्तिसुधाकरः शिरोरत्नायमानोऽस्ति । भगवद्भक्तिपरम्परायां योगदानमस्य महत्तरमस्ति । सहृदयभक्तानां हृदयेषु च आनन्दसन्दोहं जनयति चेत्, ग्रन्थोऽयं परिसरतः परिव्याप्तो भवेत । नव्यानां कृते भक्तिसाहित्ये सम्पादितोऽयं ग्रन्थभागः न केवलं लोकलोचनगोचरतां भजते, अपि तु पाण्डुग्रन्थसम्पादनार्थं नवीनं दिग्दर्शनं च निर्दिशति चेत् 'क्लेशः फलेन हि पुनर्नवतां विधत्ते' इत्याभाणकपुरस्कारेण श्रमो विश्रमं लभताम् इत्याशास्यते ।

***

सम्पादितग्रन्थ हरिभक्तिसुधाकरस्य श्लोकानुक्रमणिका

हरिभक्तिसुधाकरे संगृहीत-इतरश्लोकानुक्रमणिका

संकेत-सूची (ABBREVIATIONS)

अथ.वे.	-	अथर्ववेद:
अ.क.	-	अष्टमी कला
ई.पू.	-	ईशवीय पूर्व
उ.त.	-	उत्तरतन्त्र
उज्ज्य.नी.	-	उज्ज्वलनीलमणि:
ऋ.वे.	-	ऋग्वेद:
ए.क.	-	एकादशी कला
ऐ.ब्रा.	-	ऐतरेयब्राह्मणम्
ओ.	-	ओड़िआ
ओ.जा.इ.	-	ओड़िआ जातिर इतिहास
ओ.सा.इ.	-	ओड़िआ साहित्यर इतिहास
ओ.सा.ध.	-	ओड़िआ साहित्यर धर्मधारा
ओ.सं.ले.ले.	-	ओड़िशार संस्कृत लेखा ओ लेखक
क	-	कला
कठ.उप.	-	कठोपनिषद
कू.म.पू.	-	कुर्ममहापुराणम्
क्र.सं.	-	क्रमिक संख्या
खा.भा.	-	खाड़ङ्गा भागवत
ग.पु.	-	गरुड़ पुराणम्
गु.भ.ब्र.गी.	-	गुरु भक्ति ब्रह्मगीता
च.क.	-	चतुर्थी कला
चतु.क.	-	चतुर्दशी कला
छान्द.उप.	-	छान्दग्योपनिषद्

तु.	- तुलनीय
तै.आ.	- तैत्तिरीयारण्यकम्
तै.ब्रा.	- तैत्तिरीय ब्राह्मणम्
त्र.क.	- त्रयोदशीकला
तृ.क.	- तृतीया कला
तृ.स.	- तृतीय संस्करण
द.क.	- दशमी कला
द्वि.क.	- द्वितीया कला
द्वि.पा.	- द्वितीय पादः
द्वि.सं.	- द्वितीय संस्करण
द्वौ.क.	- द्वादशी कला
न.क.	- नवमी कला
ना.	- नागरी
ना.भ.सू.	- नारद भक्तिसूत्र
पद्म.पु.	- पद्म पुराणम्
प.पु.भा.मा.	- पद्मपुराण भागवत माहात्म्यम्
प.क.	- पञ्चमी कला
पञ्च.क.	- पञ्चदशी कला
प्र.क.	- प्रथम कला
प्र.पा.	- प्रथम पादः
प्र.सं.	- प्रथम संस्करण
प्रश्न.उप.	- प्रश्नोपनिषद्
पा.सू.	- पाणिनि सूत्रम्
ब.ओ.रा.	- बलराम दास ओड़िआ रामायण

ब्र.सू.	-	ब्रह्मसूत्रम्
भ.र.	-	भक्तिरत्नावली
भ.र.सि.	-	भक्ति रसामृत सिन्धु:
भा.	-	भागवत
भा.घ.शा.ई.	-	भारतीय धर्मशास्त्र का इतिहास
भा.स.	-	भारतीय संस्कृति
म.भा.	-	महाभारतम्
म.स्मृ.	-	मनुस्मृति:
मुण्ड.उप.	-	मुण्डकोपनिषद्
वि.पु.	-	विष्णुपुराणम्
वि.ध.पु.	-	विष्णुदर्मोत्तर पुराणम्
व्र.युव.वि.	-	व्रजयुव विलास
वृ.आ.उप.	-	वृहदारण्यकउपनिषद्
बृ.ना.पु.	-	बृहन्नारदीयपुराणम्
शा.भ.सू.	-	शाण्डिल्य भक्तिसूत्र
शुक्ल.यजु.	-	शुक्लयजुर्वेद:
श्री.भ.गी.	-	श्रीमद्भगवद्गीता
श्वेता.उप.	-	श्वेताश्वतरोपनिषद्
ष.क.	-	षष्ठ कला
षो.क.	-	षोड़श कला
सप्त.क.	-	सप्तमी कला
साम.वे.	-	सामवेद:
सि.कौ.	-	विद्धान्त कौमुदी
सू.	-	सूत्र

सं.	-	संख्या
स्क.पु.	-	स्कन्दपुराणम्
ह.व.	-	हरिवंशम्
ह.भ.वि.	-	हरिभक्तिविलासः
ह.भ.सु.	-	हरिभक्तिसुधाकरः
a.	-	First Pāda of a Verse
A.S.B.	-	Asiatic Society of Bengal
A.S.I.	-	Asiatic Society of India
b.	-	2nd Pāda of a Verse
c.	-	3rd Pāda of a Verse
C.H.I.	-	Cultural Heritage of India
E.L.	-	Epigraphica Indian Literature
GOML	-	Government Oriental Manuscripts Library
J.A.H.R.S.	-	Journal of Asiatic Historical Research Society
Mbh.	-	Mahavarat
MSS	-	Manuscripts
N.	-	नागरी
O.	-	ओड़िआ
O.H.R.J.	-	Orissa Historical Research Journal
O.S.M.	-	Orissa State Museum
T.J.K.	-	The Journal of Kalinga
VSMRS	-	Vaisnavism, Saivism and Minor Religious Systems.

सन्दर्भे व्यवहृतानां सहायक ग्रन्थानां शोधपत्राणां च सूची
(BIBLIOGRAPHY)
संस्कृत विभागः (Sanskrit Section)

सहायक ग्रन्थाः	प्रमुखाः प्रकाशकाश्च
अथर्ववेदः	संपा. वसन्त श्रीपादसातवलेकर, स्वाध्यायमण्डल, पारड़ी ।
अध्यात्मरामायणम्	संपा. आरती भण्डारकर पुना, १९२८.
अनर्घराघवम्	निर्णयसागर मुद्रणालय, मुम्बई, १९३७
अभिनवगीतगोविन्दम्	संपा.डा.भगवान पण्डा, ओड़िशाराज्य संस्कृतिव्यापार, भुवनेश्वर, १९७७.
अमरकोषः	संपा. निर्णयसागर मुद्रणाय, मुम्बई, १९४४
अष्टाध्यायी	संपा. एस् सि.वसु भाग. I.II . मोतीलाल बनारसी दास, दिल्ली, १९८८
उज्ज्वलनीलर्माणः	संपा तुकाराम जवाजी, बम्बई-१०१३
उपनिषदसंग्रहः	संपा. पण्डित जगदीशशास्त्री, मोतीलाल बनारसीदास, वाराणसी, १९७०
ऋग्वेदमंत्रानुक्रमणिका	संपा. कृष्णदास एकाडेमी, वाराणसी, १९८४.
ऋग्वेदसंहिता	संपा. चौखम्बा सीरीज् अफिस, वाराणसी, १९८९.
ऐतरेयब्राह्मणम्	संपा. आनन्दाश्रममुद्रणालय, पुण्यपत्तनम्, १९८६.
कठोपनिषद्	संपा. आनन्दाश्रममुद्रणालय, पुण्यपत्तनम्, १९१४.
कपिलसंहिता	संपा. रत्नाकर गर्गवटु, दत्तप्रेस्, कटक, प्र.सं. १९२८.
कल्याण (उपासना अङ्कः)	संपा. गीताप्रेस्, गोरखपुर, १९८७.
कल्याण (धर्माङ्कः)	संपा. गीताप्रेस्, गोरखपुर, १९६६.
कल्याण (भक्तिअङ्कः)	संपा. गीताप्रेस, ग्रोरखपुर, १९५८.
कालिकापुराणम्	संपा. चौखम्बा संस्कृत सीरीज् अफिस्, वाराणसी ।

काव्यादर्श:	व्याख्याकार:, आचार्य श्री रामचन्द्रमिश्र:, चौखम्बा विद्याभवन, वराणसी, १९७४.
काव्यप्रकाश:	संपा. चौखम्बा विद्याभवन, १९६३.
कूर्म महापुराणम्	संपा. सि. आर. स्वामीनाथन्, नागपब्लिसर्स, दिल्ली, १९८३.
केनोपनिषद्	संपा. गीताप्रेस, गोरखपुर
गरुड़पुराणम्	संपा. डा. रामशङ्कर भट्टाचार्य, चौखम्बा संस्कृत संस्थान, १९७४.
गरुड़ पुराणम्	संपा. नाग पब्लिसर्स, जवाहर नगर, दिल्ली, १९८५.
चैतन्य-चरितामृतमम्	संपा. कृष्णदास कविराज, गोस्वामी प्रकाशप्रेस, कलकता, सन् ३३४.
छान्दग्योपनिषद्	संपा. आनन्दाश्रममुद्रणालय.
तैत्तिरीयोपनिषद्	संपा. मोतिलाल बनारसी दास, दिल्ली, १९७०.
दशग्रीववधमहाकाव्यम्	संपा. ओड़िआ साहित्य एकाडेमी, भुवनेश्वर, १९५६.
दुर्गासप्तशतीसर्वस्वम्	संस्कृत प्रचार परिषद प्रकाशन, भारतीभवन, राजस्थान, संवत्, २०२८.
देवीभागवत	संपा. क्षेमराज श्रीकृष्णदास, श्री वेङ्क्टेश्वर, स्टीम्प्रेस्, मुम्बई ।
ध्वन्यालोक:	संपा. चैखम्बा विद्याभवन, वाराणसी, १९७८ ।
नारदपञ्चरात्र	संपा. के एन् वेनार्जी, वीसपस्, वाकेलप्रेस्, १९६६ ।
नारदभक्तिसूत्रम्	स्वामी त्यागीशानन्द श्री रामकृष्णमठ, मद्रास, १९७२ ।
नारदमहापुरारम्	संपा. रामजी शर्मा, संस्कृत संस्थान, देवनगर केरल, १९७७ ।
पद्मपुराणम्	संपा. नागपब्लिसर्स, जवाहर नगर, दिल्ली, १९८५ ।
पुराणपर्यालोचनम्	संपा. कृष्ण मणि त्रिपाठी, चौखम्बा सुरभारती प्रकाशन ।
प्रेमदर्शनम्	संपा. गीताप्रेस्, गोरखपुर ।

ब्रह्मपुराणम्	संपा. हिन्दी साहित्य सम्मेलन, प्रयाग, १९७७ ।
बाल्मीकिरामायणम्	संपा. श्री श्रीनिवास शास्त्री, ओरिएण्टालालियावुक् सेलस्, दरियागञ्ज, दिल्ली, १९८३ ।
भक्तमाला	संपा. क्षेमराज श्रीकृष्णदास, भेङ्कटेश्वर प्रेस्, बम्बे ।
भागवतमहापुराणम्	गीताप्रेस्, गोरखपुर, संवत् २०१० ।
भक्तितरङ्गिनी	संपा. मुन्सीराम शर्मा, चौखम्बा विद्याभवन, वाराणसी ।
भक्तिरत्नावली	संपा. कृष्णमणि त्रिपाठी, चौखम्बा सरस्वती, वाराणसी, १९७५ ।
भक्तिरसायनम् (मधुसूदन सरस्वतीस्वामी कृत)	संपा. नवद्वीप, वाराणसी, १९५६ ।
भक्तिरसामृतसिन्धुः	संपा. साहित्यनिकेतन, कानपुर, १९६५ ।
महाभारतम्	संपा. वि.एस्. सुकथङ्करः, भ.प्रा.सं.म., पूना, १९३३ ।
महाभारतम्	गीताप्रेस्, गोरखपुर, प्र.सं., संवत् २०४५ ।
मत्स्य महापुराणम्	संपा. महेशचन्द्र लच्छमन दास, दिल्ली, १९८४ ।
मनुस्मृतिः	संपा. चौखम्बा संस्कृत सिरीज, वाराणसी, तृ.सं., १९८३ ।
मार्कण्डेय पुराणम्	संपा. इण्डोलजिकाल बुक्हाउस्, दिल्ली, १९६९ ।
मेघदूतम् (पूर्वमेघ)	संपा. डा. गोपालकृष्ण, कादम्बिनीदास, सन्तोष पब्लिकेशनम्, सूताहाट, कटक, १९९४ ।
रघुवंशम् (कालिदास ग्रन्थावली)	संपा. रेवाप्रसाद द्विवेदी, काशी हिन्दू विश्वविद्यालय, १९७६ ।
रुद्रयामल (उत्तरतन्त्रम्)	संम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणासी, ख्रीष्टाब्द, १९५० ।
व्रजयुवविलस महाकाव्यस्य (समीक्षणात्मक सम्पादन-प्रथमभाग)	संपा. पतितपावन बानार्जी, भारतीय विद्याप्रकाशन, जवाहरनगर, दिल्ली, प्र.सं. १९९१ ।

वायुपुराण	नाग पब्लिकेशन्, १९८५ ।
विवेकचूड़ामणि	संपा. गीताप्रेस् गोरखपुर, २०१० ।
विष्णुधर्मोत्तर महापुराणम्	संपा. क्षेमराज श्री भेङ्कटेशप्रेस्, बम्बई, संवत् ९६९ ।
विष्णुपुराणम्	संपा. नाग पब्लिशर्स, जवाहरनगर, दिल्ली, १९८५ ।
वृहन्नारदीयमहापुराणम्	संपा. हृषिकेशशास्त्री, चौखम्बा अमरभारती प्रकाशन, वाराणसी, १९७७ ।
शतपथ ब्राह्मणम्	संपा. चौखम्बा संस्कृत संस्थान, वाराणसी, द्वि.सं., १९८४ ।
श्रीमद्भगवद्गीता (प्रथमभाग)	संपा. सेठश्री विनोदकुमार मुरारके, कलकता ।
श्रीमद्भगवद्गीता (द्वितीय भाग)	संपा. चौखम्बा संस्कृत सिरीज अफिस, वाराणासी, १९८२ ।
श्रीमद्भागवततत्त्वसमीक्षा	संपा. चौखम्बा संस्कृत विद्याभवन, वाराणसी, १९७० ।
श्रीमद्भागवतमहापुराणम्	गीताप्रेस्, गोरखपुर ।
श्रीमद्भागवतमहापुराणम्	संपा. मोतिलाल बनारसी दास, दिल्ली ।
शुक्लयजुर्वेद (काण्वसंहितासायणभाष्योपेता)	संपा. चिन्तामणि मिश्रः, संपूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, १९७८ ।
श्वेताश्वतर उपनिषद्	संपा. तुलसीदास शर्मा, अमर पब्लिसर्स विजयनगर, दिल्ली, १९७१ ।
संस्कृत हिन्दी शब्दकोष	संपा. वामन शिवराम आप्टे, मोतीलाल बनारसी दास पब्लिसर्स प्रा.लि., दिल्ली, १९८९ ।
स्कन्दमहापुराणम्	संपा. क्षेमराज कृष्णलाल, श्री वेङ्कटेश स्टीम् प्रेस्, बम्बई, संवत्, १९६६ ।
सामवेद मन्त्रानुक्रमणिका	संपा. नाग प्रकाशक, जवाहरनगर, दिल्ली ।
सामवेद संहिता	संपा. सातवलेकर, स्वाध्यायमण्डल पारड़ी, १९८५ ।

हरिवंश (प्रथमभाग)	संपा. भण्डारकर ओरिएण्टाल रिसर्च इन्स्टीच्युट्, पुणे, १९६९ ।
हरिभक्ति विलास:	संपा. मुन्शीलाल शर्मा, शर्मा, प्रेस् प्रकाशन, दिल्ली, १९७१ ।

हिन्दी विभाग: (HINDI SECTION)

प्रमुखा:	सहायकग्रन्था:
उपाध्याय बलदेव	संपा. भारतीयदर्शन, चौखम्बा ओरिएण्डालिआ, द्वितीय संस्करण, १९७९ ।
उपाध्याय बलदेव	संपा. भारतीय धर्म और दर्शनका अनुशीलन, शारदासंस्थान, वाराणसी ।
उपाध्याय बलदेव	संपा. भारतीय धर्मशास्त्र और उनका इतिहास, शारदासंस्थान, वाराणसी ।
कृष्णलाल	संपा. संस्कृत शोध वैदिकअध्ययन, विभुवैभवम् सरस्वती विहार, दिल्ली, १९८७ ।
चतुर्वेदी परशुराम	वैष्णवधर्म, ओरिएण्टालिया वाराणासी, १२२७ ।
भण्डारकर रामकृष्ण गोपाल	वैष्वण शैव और अन्यधार्मिकमत्त, भारतीय विद्याभवन, १९७७ ।
शर्मा एम्	भक्तिआन्दोलन और साहित्य, प्रगति प्रकाशन, आग्रा, प्रथम संस्करण, १९७८ ।
शर्मा एम्	भक्ति का विकाश, चौखम्बा विद्याभवन, वारणसी, १९५८ ।
सूर्यकान्त	वैष्णव धर्म और दर्शन, मोतीलाल बनारसी दास, दिल्ली, १९६३ ।
क्षेमराज कृष्णदास	भक्तमाला, वेङ्कटेश्वर प्रेस्, बम्बे ।

ओड़िआ विभाग: (ORIYA SECTION)

प्रमुखा:	सहायकग्रन्था:
आचार्य परमानन्द	ओड़िशार प्रत्नतत्त्व ओ अन्यान्य प्रबन्ध, ओड़िआ साहित्य एकाडेमी, भुवनेश्वर, १९६९ ।
दाश अभिराम	संपा. ओड़िशार सांस्कृतिक इतिहास, ओड़िशा कल्चराल् फोरम्, भुवनेश्वर, द्वितीय संस्करण, १९८४ ।
दास अच्युतानन्द	संपा. गुरुभक्ति ब्रह्मगीता, प्राचीसमिति गणेशघाट, कटक ।
दास अभिमन्यु	संपा. प्रेम चिन्तामणि, अभिमन्यु स्मृति संसद, भुवनेश्वर, १९८२ ।
दास उदयनाथ	संपा. खण्डपड़ा इतिहास, श्री प्रीण्टर्स, खण्डपड़ा, पुरी, १९८४, खाड़ङ्गा भागवत, (दीनबन्धु खाड़ङ्गा विरचित) प्राची समिति, गणेशघाट, कटक ।
दास देवदुर्लभ	संपा. रहस्यमञ्जरी, प्रकाशक आर्त्तवल्लभ महान्ति, १९२८ ।
	संपा. सहस्यमञ्जरी (प्रथमभाग) उत्कलसाहित्य प्रेस्, कटक, १९२५ ।
दास बलराम	संपा. दाण्ड़िरामायण, एड़उआर्ड़ प्रेस्, कटक, १९१४ ।
दास भक्तचरण	मनशिक्षाकाव्य, भक्तविनोद लाइब्रेरी, बारिपदा, मयूरभञ्ज, १९६७ ।
दास सूर्यनारायण	संपा. ओड़िआ साहित्यर इतिहास (प्रथमद्वितीयभाग) ग्रन्थमन्दिर, कटक, १९७९ ।
दास सूर्यनारायण	संपा. ओड़िआ साहित्यर इतिहास (तृतीयभाग), ग्रन्थमन्दिर, कटक, १९७९ ।
दास यशोवन्त	संपा. प्रेमभक्तिब्रह्मगीता, प्राची समिति, गणेशघाट, कटक ।

देवी श्रीमती सारला	संपा. रायरामानन्द, ओड़िआ साहित्य एकाडेमी, भुवनेश्वर ।
नायक श्री विनोदचन्द्र	संपा. कोणार्क (पञ्चसखा विशेषाङ्क) ओड़िआ साहित्य ए;काडेमी, भुवनेश्वर, १९७१ ।
पण्डा भगवान	ओड़िशार धर्म, ग्रन्थमन्दिर, कटक, १९४८ ।
पाढ़ी वेणीमाधव	दारुदेवता, कटक, १९६४ ।
महताब हरेकृष्ण	ओड़िशा इतिहास, ष्टुडेण्टस् स्टोर, कटक, १९४८ ।
महान्ति देवेन्द्रनाथ	पञ्चसखा ओड़िआ साहित्य, फ्रेण्डस् पब्लिसर्स, कटक, १९६५ ।
महापात्र केदारनाथ	खुरुधा इतिहास, श्री शारदाप्रेस्, १९६९ ।
महापात्र केदारनाथ	श्री जयदेव ओ श्री गीतगोविन्द, ओड़िआ साहित्य एकाडेमी, भुवनेश्वर, १९७३ ।
महारणा सुरेन्द्रकुमार	ओड़िआ साहित्यरे धर्मधारा, वाणीरूपा, कटक, १९८७ ।
मिश्र काह्नुचरण	संपा. ओड़िआ वैष्णव साहित्य, ओड़िआ साहित्य एकाडेमी, भुवनेश्वर, १९८२ ।
मिश्र नीलमणि	ओड़िआ कवि ओ काव्य, ओड़िआ साहित्य एकाडेमी, भुवनेश्वर, १९६९ ।
मिश्र नीलर्माण	ओड़िआ काव्यधारा, ओड़िआ साहित्य एकाडेमी, भुवनेश्वर ।
....	ओड़िशार संस्कृत लेखा ओ लेखक, ओड़िआ साहित्य एकाडेमी, भुवनेश्वर, १९६२ ।
....	ओड़िशी वैष्णव धर्म - ओड़िआ साहित्य एकाडेमी, भुवनेश्वर, १९६१ ।
....	संपा. रामलीला (प्रथम द्वितीय भाग) ओड़िआ साहित्य एकाडेमी, भुवनेश्वर ।

मिश्र लिंगराज	संपा. नवभारत, (ओड़िआ मासिक पत्रिका), ओड़िआ साहित्य एकाडेमी, भुवनेश्वर, १९४७ ।
साहु नवीन कुमार	ओड़िआ जातिर इतिहास, ओड़िशा राज्य पाठ्यपुस्तक प्रणयन ओ प्रकाशक, भुवनेश्वर, १९७७ ।
....	ओड़िआ साहित्यरे विभिन्न धारा, उत्कल गौर वाणी संसद, ओड़िआ बजार, कटक ।
सिंह जगबन्धु	प्राचीन उत्कल (प्रथमभागः) ओड़िआ साहित्य एकाडेमी, भुवनेश्वर, द्वितीय संस्करण, १९६४ ।

अर्वाचीन विभागः (MODERN SECTION)

Name of the Authors	**Name of the Books and Publishers**
Apte V.S.	Ed. Practical Sanskrit English Dictionary Motilal Banarsidas, Delhi, 1978.
Banerjee, P.K.	Ed. Early Indian Religions, Vikas Publishing house Pvt. Ltd., 1975
Basu, B.E.	Ed. Narad Bhaktisutra, Allahabad, 1911
Bhandarkar R.G.	Ed. Vaisnava, Saiva and Anyadharma, Indological Book, Delhi, 1976.
....	Vaisnavism, Saivism and Minor Religious System, Strassburg Verlag von Karl-J, Trubner, 1913.
Bhattacharya Hari Das	Ed. Cultural Heritage of India Vol.IV Ramakrishna Mission, Calcutta, .1975.
Chattopadhyaya Sudhakar	Evolution of Hindu Sect, Munshiram Manoharlal, New Delhi 1970
Dev, Achintya Kumar	Ed. Bhakti Movement in Orissa, Kalyani Devi, 37, Rishi Aurabi Sarani, Calcutta, 1984.

Dey, S.K.	Ed. Early History of Vaisnava Faith and Movement, Forma, K.L. Mohapadyay, Calcutta, 1961.
Dutta Bhupendranath	Tr. Mystic Tales of Lama Taranath, Ramakrishna Vedant Math, 1st Ed. 1944.
Farquhar J.N.	Religious Literature of India, 2nd Ed. Motilal Banarasidas, Delhi, 1967.
Gonda, J.	Ed. Aspects of early Vaisnavism, Motilal Banarasidas, Delhi, 1969.
Goswami Bhagawat Kumar	Ed. The Bhakti Cult in Ancient India, Oriental Publisher and Distribuor, 1975. and Distributors, 1975.
Katre, S.M.	Ed. Introduction to Indian Textual Criticism, Deccan Colege Handbook series, Poona, 1954.
Law N.N.	Indian Historical Quarterly, Vol. XXV, No.1, Oriental Press, Calcutta, 1949.
Mishra, K.C.	The Culture of Jagannath, Firma K.L. Muhopadhayay, Calcutta, 1971.
Mishra, Nilamani	Ed. An Alphabetical Catalogue of Sanskrit Manuscript, Part-2, O.S.M., Bhubaneswar, 1st Ed., 1974.
....	Asiatic Society of India, A Report, 1923.
Mohatab, Hare Krushna	Ed. History of Orissa up to 1568 AD, Prajatantra Prachara Samity, 1959.
Mahapatra, K.N.	Ed. A Descript Catalogue sanskrit Manuscript of Orissa, Vol-1,2. Orissa Sahitya Akademi, Bhubaneswar, 1990.

.... A Descript Catalogue Sanskrit Manuscript of Orissa, Vol-3, Orissa Sahitya Akademi, Bhubaneswar, 1962.

.... An Alphabetical Catalogue of Sanskrit Manuscript, Part-2, O.S.M., Bhubaneswar, 1st Ed., 1974.

.... The O.H.R.J. Vol-III, O.S.M., Bhubaneswar, 1982.

.... The O.H.R.J. (Vol-III, Part 1-2) O.S.M., Bhubaneswar, 1960.

.... The O.H.R.J. (Vol-X, No-3) O.S.M., Bhubaneswar, 1961.

.... The O.H.R.J. (Vol-XXXVIII, No.1-4) O.S.M. Bhubaneswar 1961.

.... The O.H.R.J., (Vol-XXX, No.2,3,4) O.S.M., Bhubaneswar 1984.

.... The Prachi (Quarterly Eng. Journal, Vol.2, Part-III and IV, 1932.

Nath, B.V. The O.H.R.J., (Vol.VII, Part-1,2) O.S.M., 1959.

Panda, Susmita Ed. Birth of Bhakti in Indian Religions and Arts, Books and Books Publisher and distributors, New Delhi, 1st Ed., 1992.

Panigrahi, K.C. Ed. History of Orissa (Hindu Period) Kitabmahal College Square, Cuttack, 1981.

Rajguru, S.N. Inscription of Orissa Vol.1, Part-2, O.S.M., Bhubaneswar 1958.

.... Inscription of Orissa, Vol.3, Part-1 O.S.M., Bhubaneswar.

....	Inscription of Orissa, Vol.3, Part-II, O.S.M., Bhubaneswar 1961.
Rao, G. Gopinath	Ed. History of Vaisnavas, Madras University, 1925.
Rath, B.K.	Cultural History of Orissa, Centre Ashokvihar Press-II, Delhi.
Rath, Banamali	Ed. A Study on Sri Kṛṣṇlīlāmṛtam, Kalyani Prakasan, Berhampur, 1983.
....	Ed. A Study of Vaisnavism, Oriental Book Agency.
....	Ed. Glimpses of Vaisnavism in Orissa, Kalyani Prakasan, Berhampur, 1983.
Rath, P.C.	The Journal of Kalinga, H.P. Society, Vol.1, No.4 March, 1947.
Ray, N.R.	Ed. Brahmanical Gods in Burma. University of Calcutta, 1932.
Ray, P.K.	Prachi Velley, Archaeological Survey Report, O.S.M., Bhubaneswar 1975.
Rukmani, T.S.	Ed. A Critical Study of Bhāgavat Purān, (With special references of Bhakti), Chowkhamba Sanskrit Series office, Varanasi, 1970.
Sahoo, N.K.	Ed. A History of Orissa, Vol.II, Susil Gupta of Susil Gupta Indian Ltd., 1st Ed., 1956.
....	Ed. Budhism in Orissa, The Title "Two Vajrayan Works" Greek Word's Oriental Series.

....	Budhism in Orissa, Utkal University, 1958.
Sarma, K.	Ed. Bhakti and Bhakti Movement, M.M. Publisher New Delhi, 1987.
Shastri, H.P.	Ed. Descriptive Catalogue of Sanskrit Manuscripts, Vol. VIII, A.S.B., 1931.
....	Notices of Sanskrit Manuscripts, Vol.IV, Asiatic Society, Bengal, 1911.
....	Ed. Report on the search of Sanskrit Manuscripts, A.S. Bengal, 1906-1911.
Sukthaukal, V.S.	Mahābharat, The BORI, Poona, 1961.
Suvir Jaiswal	The Origin and Development of Vaiṣnavism, Munsiram Manaharlal, 1967.

An Alphabetical Index of Sanskrit Manuscript, Part-2, G.O.M.L., Madras, 1940.;

By:
Dr. Sunanda Tripathy
W/o-Biraja Sankar Mishra
At/Po- Sriramchandrapur
Via- Sakhigopal
Dist-Puri,Orissa,India
Ph. 09337706488
Email-upasana@rediffmail.com